शब्दकौस्तुभः

(प्रभाव्याख्यासंवलितः) भाग-2

ञ म ङ ण न म्, झ भ ञ.

ल ण्, घ ढ ध ष्

ह य व र ट्, ज ब ग ड द श्

ऐ औ च्, ख फ छ ठ थ च ट त व््

ए ओ ङ्, क प य्

ऋ ऌ क्, श ष स र्

अ इ उ ण्, ह ल्

सम्पादकः

डा | रोचनाचार्यः बाळगारु

प्रकाशनम्

वेद-वेदान्ताध्ययनशोधसंस्थानम्

वसन्तकुञ्ज, नवदेहली

विश्वविद्याग्रन्थमाला -10

वेदवेदान्ताध्ययनशोधसंस्थानम्

वैद्यनाथपायगुण्डविरचितप्रभाव्याख्यासहितः

शब्दकौस्तुभः

भाग- 2

सम्पादकः

डा। रोचनाचार्यः बाळगारु.

प्रकाशनम्

वेद-वेदान्ताध्ययनशोधसंस्थानम्.
वसन्तकुञ्ज, नवदेहली.
2020

विश्वविद्याग्रन्थमाला- 10
शब्दकौस्तुभः- प्रभाव्याख्यासहितः भाग-2

सम्पादकः : डा। रोचनाचार्यः बाळगारु

प्रकाशनम् : **वेद-वेदान्ताध्ययनशोधसंस्थानम्.**
वसन्तकुञ्ज, नवदेहली.

© **सर्वे अधिकाराः स्वायत्तीकृताः**

प्रथममुद्रणम् : **2020**

ISBN : **978-81-978406-2-3**

प्रतयः : **250**

मूल्यम् : **200 रूप्यकाणि**

मुखचित्रविन्यासः: **कार्तिकः**

मुद्रणालयः: **वाणिप्रेस्. मैसूरु**

Vedic Vedantic Studies & Research Institute

Śabdakautubha

With the 'Prabha' commentary composed by Vaidyanatha Payagunda

vol-2

Edited by:

Dr. Rochanācārya Bāḷagāru

Published by:

Vedic Vedantic Studies & Research Institute

(Eetablished under SRI RAMA VITTALA SHIKSHANA SEVA SAMITI New Delhi)

Sri Krishna Dhama, Plot No-3, Phase-II, Institutional Area,
vasant Kunj, New Delhi-110070

2020

Vishvavidyagranthamala -10

Śabdakautubha vol-2

With the 'Prabha' commentary composed by Vaidyanatha Payagunda

Edited by: Dr. Rochanācārya Bāḷagāru

Published by: Vedic Vedantic Studies & Research Institute
(Eetablished under SRI RAMA VITTALA SHIKSHANA SEVA SAMITI New Delhi)
Sri Krishna Dhama, Plot No-3, Phase-II, Institutional Area,

ISBN : 978-81-978406-2-3

Edition: 2020

copies : 250

©: Publishers

Price: 200

printed by: Vanipress.Mysore

जगद्गुरुश्रीमन्मध्वाचार्यमूलमहासंस्थानम्

पेजावरअधोक्षजमठः,उडुपि

अनुग्रहसन्देशः

"मुखं व्याकरणं स्मृतम्" इति वचनानुसारं वेदाङ्गेषु प्रधानभूतं व्याकरणशास्त्रं सकलविद्यानां आधारशिला वर्तते। तत्र पाणिनीयपरम्परायां महाभाष्यस्य आशयं सुदृढं स्थापयितुं, सूत्रार्थानां गम्भीरं विचारं कर्तुं च भट्टोजिदीक्षितैः प्रणीतः 'शब्दकौस्तुभः' इति ग्रन्थराजः वैय्याकरणानां कृते कल्पवृक्षः इव शोभते। इदानीं अस्य ग्रन्थस्य द्वितीयोऽयं भागः प्रकाशते, यत्र तृतीय-चतुर्थ-पञ्चमाह्निकानां विचारः सन्निविष्टः। अस्य गम्भीरग्रन्थस्य आशयं स्फुटीकर्तुं वैद्यनाथपायगुण्डविरचिता 'प्रभा' व्याख्या अत्र सुवर्णसुगन्ध इव संयोजिता वर्तते।

अस्मिन् द्वितीये भागे व्याकरणशास्त्रस्य सूक्ष्मतमानि तत्त्वानि चर्चितानि सन्ति। अत्र तृतीयाह्निकादारभ्य पञ्चमाह्निकपर्यन्तं 'हयवरट्' इत्यादि-अवशिष्टानां माहेश्वरसूत्राणां विचारः, वर्णानां स्वरूपं, तेषां उच्चारणस्थानानां विमर्शः च कृतः अस्ति। विशेषतः शास्त्रप्रवृत्तये आवश्यकानां 'इत्सञ्ज्ञा', 'लोपः', 'अनुबन्धः' इत्यादीनां पारिभाषिकशब्दानां सोपपत्तिकं विवरणं, तथा च प्रत्याहारसिद्धौ विद्यमानानां सन्देहानां निवारणं च अत्र दृश्यते। एतेषां विषयाणां सम्यग्ज्ञानेन विना अग्रे सूत्रार्थविचारे गतिः न सम्भवति, अतः 'प्रभा'व्याख्यानेन एते क्लिष्टविषयाः अत्र सरलीकृताः।

एतादृशस्य शास्त्रग्रन्थस्य सम्पादनकार्यं व्याकरणशास्त्रनिष्णाताः विद्वान् रोचनाचार्याः अत्यन्तं परिश्रमेण कृतवन्तः। प्राचीनहस्तलेखानां परिशीलनेन, पाठभेदानां विमर्शनेन च तैः कृतं इदं सम्पादनं शास्त्रलोके बहुकालपर्यन्तं स्थास्यति। एतेषाम् अनवरत-शास्त्रसेवया वयं भृशं मोदामहे। अन्ते, अस्माकम् उपास्यमूर्तेः श्रीरामविठ्ठलदेवस्य च पूर्णानुग्रहः ग्रन्थसम्पादकानां रोचनाचार्याणां, प्रकाशकानां, अध्येतॄणां च उपरि सदा भूयात् इति सानुग्रहं प्रार्थयामहे।

इति नारायणस्मृतयः

श्रीश्रीविश्वप्रसन्नतीर्थश्रीपादाः

निदेशकवचांसि

"साधुशब्दप्रयोगेण धर्मोत्पत्तिः" इति महाभाष्यकारस्य पतञ्जलेः उद्घोषः एव व्याकरणशास्त्रस्य प्रयोजनं स्पष्टयति। शब्दब्रह्मणः यथार्थज्ञानाय प्रवृत्तायां पाणिनीयपरम्परायां, महाभाष्यरूपिणं क्षीरसागरं निर्मथ्य श्रीमद्-भट्टोजिदीक्षितैः 'शब्दकौस्तुभः' इति अनर्घ्यरत्नं समुद्धृतम्। अद्य अस्य ग्रन्थरत्नस्य द्वितीयभागः सव्याख्यानं प्रकाशते इति अतीव मोदस्य विषयः। अत्र संयोजिता वैद्यनाथपायगुण्डविरचिता 'प्रभा' व्याख्या ग्रन्थस्य अन्तर्निहितं भावं प्रकाशयितुं दर्पणायते।

प्राचीनताडपत्रेषु निलीनानां ग्रन्थानां पुनःप्रकाशनं नाम एकः वाग्यज्ञ एव। अस्मिन् यज्ञे ऋत्विज इव कार्यं निर्वहन्तः विद्वांसः रोचनाचार्याः सर्वथा प्रशंसां अर्हन्ति। एते शास्त्रगवेषणे, पाठविमर्शने च यां प्रगल्भतां दर्शितवन्तः, सा खलु विस्मयावहा। वेदवेदान्ताध्ययनशोध-संस्थानस्य प्रकाशनमालायां दशमं पुष्पमिदम् अद्य विदुषां पुरतः विकसति। एतादृश-प्रौढग्रन्थानां प्रकाशनेन संस्थायाः कीर्तिः दिगन्तेषु प्रसरतु।

अस्य विशिष्टग्रन्थस्य सम्पादनकार्यं विद्वांसः, व्याकरणशास्त्रनिष्णाताः विद्वान् रोचनाचार्याः अत्यन्तं परिश्रमेण कृतवन्तः। प्राचीनहस्तलेखानां परिशीलनेन, पाठभेदानां विमर्शनेन च तैः कृतं इदं सम्पादनं शास्त्रलोके बहुकालपर्यन्तं स्थास्यति। एतेषां शास्त्रनिष्ठा, संस्थां प्रति एतेषां समर्पणभावः च श्लाघनीयः।

अस्य महार्हग्रन्थस्य प्रकाशने अस्माकं मुख्यप्रेरणास्रोतोभूताः, श्रीपेजावरमठाधीश्वराः, परमपूज्य श्रीश्रीविश्वप्रसन्नतीर्थश्रीचरणाः। पूज्यपादानां "ज्ञानदानात् परं न किञ्चित् दानम्" इति आदेशं वयं शिरसा वहामः। तेषां पादपद्मयोः वयं सश्रद्धं साष्टाङ्गप्रणामान् कृतज्ञतां च निवेदयामः।

अनेन ग्रन्थराजेन व्याकरणशास्त्राध्ययनं सुकरं भवतु, तथा च लुप्तप्रायं पाण्डित्यं पुनः समेधताम्। अनेन ग्रन्थेन व्याकरणजिज्ञासूनां छात्राणां च महान् उपकारो भविष्यति इति विश्वसिमि।

विद्वान् डा। धनञ्जयाचार्यः
निदेशकः,

।। श्रीगुरुराजो विजयते ।।

भूमिका

वर्णाम्नायसुधावृतः पणियुवापत्योक्तसूत्रावली-
कल्लोलप्रचुरः कतप्रसववाक्यावर्तजालान्वितः ।
गोनर्दीयनिगूढवाक्यरचनावेलासमुज्झृम्भितः
शश्वद्व्याकरणाम्बुधिः कलयतादानन्दचन्द्रोदयम् ।।

०.१ भारतीयसंस्कृतौ व्याकरणशास्त्रस्य स्थानम्

०.१.१ व्याकरणशास्त्रम्

स्थावरजङ्गमात्मिकां सृष्टिं विरचय्य असन्तुष्टमना ब्रह्मदेवो ब्रह्मावलोकधिषणं मनुजं निर्माय परमां मुदमाप्तवान् । अत्र ब्रह्मावलोकधिषणमिति विशेषणस्य चारितार्थ्यसम्पत्तये काचन भाषाऽपि तेन प्रदत्ता स्यात्, यया मानवेषु ब्रह्मतत्त्वज्ञानार्थं गुरुशिष्यपरम्परा, समाजरचना च स्यात् । सा च भाषा संस्कृता एव भवितुमर्हति, सैव सृष्टिकालतः प्रचलन्ती आस्ते । यथोक्तम् –

[१]अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा ।
आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः ।। इति ।।

अस्याश्च संस्कृतभाषाया वैदिक-लौकिकभेदाभ्यां द्वैविध्यमस्ति । तत्र वैदिकी भाषा अपौरुषेयी परमेश्वरवाणी इत्युच्यते, सा च वेदब्राह्मणारण्यकोपनिषदात्मिका । लौकिकी संस्कृतभाषाऽपि द्विविधा, द्विजातिकृतव्यवहारविषयभूता, तदितरमानवसाधारणव्यवहारविषयमाप्ता चेति । उक्तं च वाल्मीकिरामायणे सुन्दरकाण्डे –

[२]यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम् ।
रावणं मन्यमाना मां सीता भीता भविष्यति ।।
वाचं चोदाहरिष्यामि मानुषीमिह संस्कृताम् ।। इति ।।

---

१. ब्र.सू.शा.भा. (१-३-२८) पृ.सं. ३२२

२. वा.रा. ३०सर्गः श्लो.सं. १८

तत्रास्याः संस्कृतभाषायाः स्वरूपज्ञानाय तद्रक्षायै च किमपि शास्त्रं नितरामावश्यकतां बिभर्ति । तदेतत् शास्त्रं व्याकरणशास्त्रसंज्ञया प्रथितम् ।

तत्र व्याकरणशास्त्रमधिकृत्याधिकं वचनात् प्राक् व्याकरणं नाम किम् ? व्याकरणशास्त्रमित्यत्र व्याकरणशब्दः कस्मिन्नर्थे प्रयुज्यते ? इति आदौ विवेचनीयम् ।

व्याक्रियन्ते व्युत्पाद्यन्ते प्रकृतिप्रत्ययविभागविषयीक्रियन्ते, असाधुशब्देभ्यो विविच्य बोध्यन्ते साधुशब्दा अनेनेति व्युत्पत्त्या वि आङ्पूर्वात् डुकृञ् करणे इत्यस्मात् धातोः 'करणाधिकरणयोश्च' (पा०सू० ३-३-११७) इति सूत्रेण करणार्थकल्युट्प्रत्ययान्तो निष्पद्यतेऽयं व्याकरणशब्दः । 'एकः शब्दः सम्यग् ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति' इति 'एकः पूर्वपरयोः' इति सूत्रभाष्योक्तश्रुत्यनुसारेण साधुशब्दज्ञाने प्रयोगे च धर्मः । न हि व्याकरणज्ञानमन्तरेण साधुशब्दान् व्यवहर्तुं शक्नुवन्ति जना इति निश्चप्रचम् । तत्र 'व्याकरणमित्यस्य कः पदार्थः' इत्याशङ्क्य भगवता पतञ्जलिना[१] 'लक्ष्यलक्षणे व्याकरणम्' वार्तिकेन समाधानमुक्तम् । एवञ्च शब्दो लक्ष्यम् सूत्रं लक्षणमेतत् समुदितं व्याकरणम् । यद्वा [२]व्याकरणं नाम - अर्थविशेषमाश्रित्य स्वरप्रकृतिप्रत्ययादीन् विशेषेण संस्काररूपेण, आ-समन्तात् - वैदिकान् लौकिकांश्च शब्दान् करोति तथाभूतः पाणिन्यादिमहर्षिप्रणीतो ग्रन्थसमूहः ।

०.१.२ व्याकरणशास्त्रस्य महत्त्वम्

'ब्राह्मणेन निष्कारणः षडङ्गो वेदोऽध्येयो ज्ञेयश्च, प्रधानं हि षट्स्वङ्गेषु व्याकरणम् - प्रधाने हि कृतो यत्नः फलवान् भवति' इति [३]भगवद्वचनानुसारेण प्रकृतिप्रत्ययतत्तदर्थविभागज्ञानपूर्वकं वेदशब्द-तत्तदर्थज्ञानजनकत्वेन उपकार्योपकारकभावसम्बन्धेन व्याकरणस्य वेदाङ्गत्वात् इतराङ्गापेक्षया व्याकरणस्य महत्त्वं प्रतिपादितं भवति । किञ्चेदं च व्याकरणशास्त्रं ज्योतिषामपि ज्योतिः, यतो हि शब्दो ज्योतिः, तस्य प्रकाशनं = अन्वाख्यानं = प्रकृतिप्रत्ययतदर्थप्रतिपादनं व्याकरणमेव करोति । तथा चोक्तं दण्डिना काव्यादर्शे -

इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम् ।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ।। इति ।।

---

१. म.भा.पस्प.पृ.सं. ७९ प्रथमभागः

२. नरहरिशर्मभिः भैरवीव्याख्यासहितस्य लघुशब्देन्दुशेखरस्य भूमिकायाम् ।

३. म.भा.पृ.सं. २३ प्रथमभागः

शब्दशास्त्रं समधिगम्य स्वाशयं प्रकटयद्भिः भर्तृहरिभिरपि प्रतिपादितम् –

[1]''इदमाद्यं पदस्थानं सिद्धसोपानपर्वणाम् ।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः ।। इति ।।

पदमञ्जरीकारा हरदत्तमिश्रा अप्यवोचन् शब्दानुशासनप्रस्तावे –

[2]उपासनीयं यत्नेन शास्त्रं व्याकरणं महत् ।
प्रदीपभूतं सर्वासां विद्यानां यदवस्थितम् ।।
रूपान्तरेण ते देवा विचरन्ति महीतले ।
ये व्याकरणसंस्कारपवित्रितमुखा नराः ।। इति ।।

तथा चानुशासनतः श्रेष्ठस्य गुणतो गरिष्ठस्य दुर्मेधसो दविष्ठस्य मुख्यवेदाङ्गत्वेन लब्धप्रतिष्ठस्य शब्दानुशासनापरनामधेयस्य व्याकरणस्य सम्प्रति स्वरूपं श्रीमतां समक्षं समुपस्थाप्यते । शब्दसाधुत्त्वप्रतिपादनपरेषु तेषु तेष्वाकरग्रन्थेषु सम्यक्समीक्षमाणेषु शब्दानुशासनस्य स्वरूपद्वयं समुपलभ्यते - एकं लौकिकशब्दव्युत्पादकं, अपरं परमार्थवस्तुप्रतिपादकम् । 'पदलक्षणाया वाचोऽन्वाख्यानं व्याकरणमिदम्' इत्यादिनाद्यं निर्दिष्टम्, 'इयं सा मोक्षमाणानां' इत्यादिना चान्त्यम् ।

एतेनेदं वक्तुं शक्यते यज्जनैः कामं प्रयुज्यमाना पुनः पुनर्व्यवह्रियमाणा काचन वाग् यदा लोकभाषात्वमवाप्नोति, विस्तरश्चैति, भाषान्तरसम्पर्कात् साङ्कर्यदोषमादधाति, तदा तस्याः स्वरूपनिर्धारणाय सीमानियमनाय च प्रयतमाना विद्वांसः कांश्चन नियमान् निबध्नन्ति । तेषामेव नियमानां व्याकरणपदेन व्यपदेशो भवति । तात्पर्यमिदं यत् शब्दानां निष्पन्नानामेव लघुना यत्नेन ज्ञानं साध्यतेऽनेन व्याकरणेन, न तु नवीनानां शब्दानां निष्पादनं क्रियते ।

०.१.३ व्याकरणशास्त्रस्य विषयः प्रयोजनञ्च

'प्रेक्षावत्प्रवृत्तये व्याकरणस्य विषयं भगवान् भाष्यकारः प्रादर्शयत् ''अथ शब्दानुशासनं'' इति' इति कौस्तुभवचनात् शास्त्रजन्यज्ञानविषयस्यैव शास्त्रविषयत्वेन लौकिकाः वैदिकाः शब्दाः विषयत्वेन स्वीकृताः । प्रकृतशोधप्रबन्धे सम्पादनाय स्वीकृतायां प्रभायां उक्तकौस्तुभपङ्क्तेः व्याख्यावसरे इत्थमभिप्रायो वर्णितः - 'यद्यपि पाणिनिना 'ब्राह्मणेन निष्कारण'

---

१. वा.प. (१।१६) पृ.सं. ३९

२. का.वृ.प. पृ.सं. १४.

इत्यादिश्रुतेर्वेदाध्ययनवन्नित्यतया प्राप्ते व्याकरणाध्ययने सन्ध्योपासनादाविव प्रत्यवायपरिहारार्थितयैव उत्तमाधिकारिप्रवृत्तिसम्भवात् प्रयोजनं नोक्तम् । वार्तिककृता तु 'शास्त्रपूर्वके प्रयोगे धर्मः' इत्यनेन मध्यमाधिकारिणः परमप्रयोजनं दर्शितम् । एवञ्च नास्योपयोगः । तथापि भगवान् विवरणकारत्वात् मन्दाधिकारिणां प्रवृत्तेः प्ररोचकप्रयोजनप्रतिपत्तिप्रवणत्वाद्धचवहितफलेषु स्वर्गापूर्वादिष्वविश्वासात् साक्षात्प्रयोजनं शब्दव्युत्पत्तिलक्षणं सूचयन् तादृशशब्दरूपविषयं कथयन् शास्त्रारम्भं प्रतिज्ञातवानित्यर्थः' इति । अनेन च व्याख्याकदम्बेनेदमवसीयते - लौकिकाः वैदिकाः शब्दाः विषयाः, शब्दव्युत्पत्तिलक्षणं साक्षात्प्रयोजनम् । रक्षोहागमादीनि तु अवान्तरप्रयोजनानि । कौस्तुभे विषयमित्युपलक्षणं प्रयोजनस्यापि । तज्जिज्ञासुरधिकारी, प्रतिपाद्यप्रतिपादकभावः सम्बन्धः इति ।

०.१.४. व्याकरणशास्त्रप्रभेदः

अपौरुषेयार्षग्रन्थेषु समुपलब्धप्रमाणानुसारं संस्कृतव्याकरणस्य आदिवक्ता ब्रह्मा आसीत्, तेन समुपदिष्टो बृहस्पतिर्द्वितीयः प्रवक्ता बभूव । तेन बृहस्पतिना प्रशिक्षितः कश्यपमहर्षेरात्मज इन्द्रदेवः प्रकृतिप्रत्ययविभागगर्भस्य व्याकरणस्यादिसंस्कर्ताऽभवत् । उक्तं च –

> [1]''इदमक्षरच्छन्दो वर्णशः समनुक्रान्तं, यथाचार्या ऊचुर्ब्रह्मा
> बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्रायेन्द्रो भरद्वाजाय भरद्वाज
> ऋषिभ्य ऋषयो ब्राह्मणेभ्यस्तं खल्वक्षरसमाम्नायमित्याचक्षते,
> न भुक्त्वा न नक्तं प्रब्रूयात् ब्रह्मराशिः'' । इति ।
>
> ''वाग्वै पराच्य व्याकृतावदत् । ते देवा इन्द्रमब्रुवन्, इमां नो
> वाचं व्याकुर्विति । तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्[2] । इति च ।

किञ्चेदमैन्द्रं व्याकरणं सर्वेष्वपि व्याकरणेषु प्राचीनतममिति गीयते । इतराणि तस्मादर्वाक्तनानि इति प्रथा । उक्तं च मुग्धबोधकृतकविकल्पद्रुमे ग्रन्थे प्रारम्भे एव —

> इन्द्रश्चन्द्रः काशकृत्स्नश्चापिशलिश्शाकटायनः ।
> पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः[3] ।। इति ।।

इत्थञ्च सर्वाणि संस्कृतव्याकरणानि त्रिधा विभक्तुं शक्यन्ते –

---

१. ल.शे.पृ.सं. ८

२. तै.सं. ६।४।७

३. सं.व्या.शा.इ.पृ.सं. ७३ ।

१. केवलानि प्रातिशाख्यादीनि वैदिकव्याकरणानि ।

२. केवलानि लौकिकशब्दपराणि कातन्त्रादीनि ।

३. लौकिक-वैदिकोभयविधशब्दसंस्कारकरणानि आपिशलीय-पाणिनीयानि ।

तत्रापि पाणिनिमुनिमवधिं कृत्वा वैयाकरणानां द्विधा विभागः कर्तुं शक्यते —

१. पाणिनेः पूर्वभवा भरद्वाजापिशालिप्रभृतयः ।

२. पाणिनेः पश्चाद्भवा वामन-भोजराजादयः ।

पाणिनिमुनेः प्राक्तना अपि वैयाकरणा द्विविधा भवन्ति –

१. पाणिन्यनुल्लिखिता इन्द्र-भरद्वाज-व्याडिप्रभृतयः ।

२. पाणिन्युल्लिखिताः शाकटायन-गार्ग्य-गालव-सेनकप्रभृतयः ।

तत्र पाणिनिनाऽनुत्कीर्तिता वैयाकरणा अधोलिखिता द्रष्टव्याः –

१. **इन्द्र :-** विक्रमपूर्वीयेभ्यः ९५०० वर्षेभ्यः प्राक्तन आसीत्[१] । एतत्प्रणीतं व्याकरणं जैनशाकटायनव्याकरणे (पा०सू० १.२.३७) उल्लिखितमस्ति ।

२. **वायुः -** विक्रमपूर्वीयेभ्यः ९५०० वर्षेभ्यः पूर्वकालिकः आसीत् । एतद्विरचितं वायुनामकं व्याकरणं कवीन्द्रचार्यस्य ग्रन्थसूच्यामुल्लिखितमस्ति । परन्तु सूचीपत्रनिर्दिष्टवायुव्याकरणस्य प्राचीनतायां विवदन्ति युधिष्ठिरमीमांसकाः ।

३. **भरद्वाजः –** वि०पू० ९३०० वर्षेभ्यः प्राक्कालिकः आसीत् । ऋक्तन्त्रे एतदीयं व्याकरणमुल्लिखितमस्ति ।

४. **भागुरिः** – वि.पू० ४००० वर्षेभ्य पूर्वकालिक आसीत् । अदसीयव्याकरणस्य 'हन्तेः कर्मण्युपष्टम्भात् प्राप्तुमर्थे तु सप्तमीम् । चतुर्थी बाधिकामाहुश्चूर्णि भागुरिवाग्भटाः' इति **शब्दशक्तिप्रकाशिकायां** चर्चा कृता विद्यते ।

५. **पौष्करसादिः –** वि०पू० ३१०० अब्देभ्यः पूर्वकालिक आसीत् । एतत्प्रणीतस्य व्याकरणस्य महाभाष्ये 'चयो द्वितीया पौष्करसादेरिति वाच्यम्' इति वार्तिके तैत्तिरीये प्रातिशाख्ये, च उपलब्धिः सान्दर्भिकतया वर्तते ।

---

१. द्रष्टव्यं संस्कृतव्याकरण शास्त्र का इतिहास - युधिष्ठिरमीमांसकः

६. **चारायणः** – असावपि वि० पू० ३१०० वर्षेभ्यः प्राक्तन आसीत् । महाभाष्ये 'वृद्धिर्यस्याचामा' (पा०सू० १-१-७३) इति सूत्रे सान्दर्भिकतया उल्लेखो दृश्यते ।

७. **काशकृत्स्नः** – अयं च शाब्दिकः वि०पू० ३१०० वर्षेभ्यः प्राक्कालिकः । अस्य व्याकरणस्य चोल्लोखः महाभाष्ये उक्तसूत्रे (पा०सू० १-१-७३) प्रथमाह्निकस्य अन्ते विद्यते ।

८. **वैयाघ्रपद्यः** – अयं वि.पू. ३१०० वर्षेभ्यः पूर्वमासीत् । अस्य दशाध्यायोपेतस्य वैयाघ्रपद्यव्याकरणस्य जयादित्यवामनाभ्यां रचितायां काशिकावृत्त्यां सङ्केतो वर्तते ।

९. **माध्यन्दिनिः** – असौ वि०पू० ३००० वर्षेभ्यः प्राक्कालिकः । अस्य चोल्लेखः 'ऋदुशनस्पुरुदंसोनेहसां च' (पा०सू० ७-१-९३) इति सूत्रे काशिकायां कृतो विद्यते ।

१०. **रौढिः** – अयं च शाब्दिकः वि०पू० ३००० वर्षेभ्यः प्राक्तन आसीत् । काशिकायां 'आचार्योपसर्जनश्चान्तेवासी' (पा०सू० ६-२-३६) इति सूत्रेऽस्य व्याकरणस्योट्टङ्कनं दृश्यते ।

११. **शौनकः** – अयं वि०पू० ३००० समाभ्यः पूर्वसामयिक आसीत् । अस्य व्याकरणस्य समुल्लेखः जेज्जटप्रणीतायां चरकसंहितायाष्टीकायां कृतो दृश्यते ।

१२. **गौतमः** – अयं वैयाकरणः वि.पू०. ३००० वर्षेभ्यः पूर्वीकः । अस्य व्याकरणस्य च महाभाष्ये 'आचार्योपसर्जन' (पा०सू० ६-२-३६) इति सूत्रे उल्लेखः कृत ।

१३. **व्याडिः** – वि०पू० २९०० वत्सरेभ्यः पूर्वमयमासीत् । अस्य व्याकरणं ऋक्प्रातिशाख्ये निर्दिष्टम् ।

महर्षिपाणिनिना समुल्लिखिता व्याकरणप्रणेतारोऽधोनिर्दिष्टा :—

१. **आपिशलिः** – अयं विक्रमपूर्वीय - ३००० वर्षेभ्यः पूर्वीकः । अस्योल्लेखो महर्षिणा पाणिनिना स्वकीये सूत्रपाठे वासुप्यापिशलेः इति सूत्रे (पा०सू० ६-१-९२) कृतो दृश्यते । अनेन विरचिता ग्रन्थाः - आपिशलिव्याकरणम्, धातुपाठः, गणपाठः, उणादिसूत्रम्, शिक्षा, कोशः, अक्षरतन्त्रं, सामप्रातिशाख्यश्च ।

२. **काश्यपः** – असौ वि०पू० ३००० वर्षेभ्यः पूर्वतनः । अस्य चोल्लेखः 'तृषिमृषिकृषेः काश्यपस्य' (पा०सू० १-२-२५) इति सूत्रे पाणिनिना कृतः । एतद्विरचितं काश्यपव्याकरणमिति ज्ञायते ।

३. **गार्ग्यः** – महर्षिगार्ग्यः वि०पू० ३१०० वर्षपूर्वकालिकः आसीत् । अस्योल्लेखः पाणिनेः सूत्रपाठे ओतो गार्ग्यस्येति (पा०सू० ८-३-२०) विद्यते । एतद्विरचितं गार्ग्यव्याकरणमिति श्रूयते ।

४. **गालवः** – असौ शाब्दिकः वि०पू० ३१०० संवत्सरपूर्वसामयिक इति इतिहासज्ञाः । अस्योल्लेखः अष्टाध्याय्यां इको ह्रस्वोऽङ्यो गालनस्येति(पा०सू० ६-३-६१) सूत्रे विद्यते ।

५. **चाक्रवर्मणः –** अयं वि०पू० ३००० संवत्सेभ्यः प्राक्तनः । अस्योल्लेखः पाणिनीयसूत्रपाठे (पा०सू० ६-१-३०) 'ईचाक्रवर्मणस्य' इत्यत्र विद्यते ।

६. **भारद्वाजः – अयं** वि०पू० ३००० वर्षपूर्वकालिकः आसीत् । अस्य सङ्कीर्तनं अष्टाध्याय्यां (पा०सू० ४-२-१४५) 'कृकण पर्णाभ्रद्वाजे' इति सूत्रे कृतं विद्यते ।

७. **शाकटायनः –** अयं शाब्दिकः वि०पू० ३००० वर्षसामयिक आसीत् । अस्य नामसंङ्कीर्तनं पाणिनिना स्वीये सूत्रपाठे 'लडः शाकटायनस्य' (पा०सू० ३-४-१११) इति सूत्रे कृतमस्ति । 'उणादयो बहुलम्' (पा०सू० ३-३-१) इति सूत्रे महाभाष्ये 'व्याकरणे शकटस्य तोकम्' इत्युल्लिखितम् । एतेन प्रणीता ग्रन्था इमे - १) शाकटायनव्याकरणम्, २) दैवतग्रन्थः, ३) कोशः, ४) ऋक्तन्त्रम्, ५) लघुऋक्तन्त्रम्, ६) सामतन्त्रम्, ७) पञ्चपदी-उणादिसूत्रम्, ८) श्राद्धकल्पः ।

८. **शाकल्यः –** असौ वि०पू० ३१०० वर्षेभ्यः पूर्वमासीत्, अस्योल्लेखः 'सम्बद्धौ शाकल्यस्येतावनार्षे' (पा०सू० १-१-१६) इति सूत्रे कृतो विद्यते । अस्य नाम्ना शाकल्यव्याकरणं समुपलभ्यते ।

९. **सेनकः** – अयं वि०पू० २९५० वर्षेभ्यः प्राक्कालिकः आसीत् । अस्योल्लेखः 'गिरेश्च सेनकस्य' (पा०सू० ५-४-११२) इति सूत्रे पाणिनिना कृतो विद्यते ।

१०. **स्फोटायनः –** अयं वि०पू० २९५० पूर्वकालिकः । पाणिनिना 'अवङ् स्फोटायनस्य' (पा०सू० ६-१-१२३) इति सूत्रेऽस्योल्लेखः कृतः ।

एतदतिरिक्ताः [१]सप्तपञ्चाशदाचार्या व्याकरणशास्त्रप्रणेतारो वैदिकव्याकरणेषु प्रातिशाख्येषु च निदिष्टाः सन्ति । इत्थञ्च अशीतिराचार्याः व्याकरणशास्त्रप्रणेतारो पाणिनितः प्राचीनाः श्रूयन्ते ।

---

१. द्र.सं.व्या.शा.इ ।

पाणिनितोऽर्वाचीनाः पञ्चदश आचार्याः व्याकरणशास्त्रप्रणेतारो जाताः । तेषां नामानि ग्रन्थनामानि प्रस्तूयन्ते -

ग्रन्थनाम	आचार्यनाम	कालः
१. कातन्त्रव्याकरणम्	श्रीयशोवर्मा	२००० वि०पू०
२. चान्द्रं व्याकरणम्	चन्द्रगोमी	१००० वि०पू०
३. क्षपणकं व्याकरणम्	क्षपणकः	वि.प्रथमशताब्दी
४. जैनेन्द्रं व्याकरणम्	देवनन्दी	५०० वि०पू०
५. विश्रान्तिविद्याधरंव्याकरणम्	वामनः	३५० वा. ६०० पूर्व
६. जैनशाकटायनं व्याकरणम्	पाल्यकीर्तिः	८७१-९२४
७. शाकटायनं व्याकरणम्	शिवस्वामी	१९४-९४०
८. सरस्वतीकण्ठाभरणं व्याकरणम्	भोजदेवः	१०७५-१११०
९. बुद्धिसागरव्याकरणम्	बुद्धिसागरः	१०८० वि०
१०. हैमं व्याकरणम्	हेमचन्द्रः	११४५-१२२९
११. दीपकं व्याकरणम्	भद्रेश्वरसूरिः	१२०० वि०पू०
१२. सारस्वतं व्याकरणम्	अनुभूतिस्वरूपः	१२५०
१३. मुग्धबोधं व्याकरणम्	बोपदेवः	१२८७-१३५०
१४. कौमारं व्याकरणम्	क्रमदीश्वरः	१३०० वि०पू०
१५. सुपद्मं व्याकरणम्	पद्मनाभदत्तः	१४००

०.१.५. [१]पाणिनीयं व्याकरणम्

एवं सत्स्वपि बहुषु व्याकरणेषु सर्वैरपि अद्यत्वे पाणिन्युपज्ञमेव व्याकरणं समाश्रीयते,

---

२. पणनं पणः । पण व्यवहारे स्तुतौ च इत्यस्मात् 'घञर्थे कविधानम्' इति कप्रत्ययः । सोऽस्यास्तीति पणी, 'अत इनिठनौ' इति सूत्रेण इनिप्रत्ययः । तस्य गोत्रापत्यं पाणिनः । 'तस्यापत्यम्' इत्यण्प्रत्ययः । अत्र 'नस्तद्धिते' इति टिलोपो न भवति । 'गाथिविदथिकेशिगणिपणिनश्च' इति सूत्रेण अण्प्रत्यये परे प्रकृतिभावविधानात् । ततोऽनन्तरापत्ये पणिनो युवापत्त्ये वा 'अत इञ्' इत्यनेन इञ्प्रत्यये सति अकारलोपे च पाणिनिशब्दो निष्पद्यते । पुनश्च पाणिनिना प्रोक्तं पाणिनीयम् । 'वृद्धाच्छः' इति छप्रत्यये सति ईयादेशः । 'इञश्च' इति अण् तु न शङ्क्यम्, गोत्रे य इञ् तदन्तादिति उक्तत्वात् ।

तदध्ययनमध्यापनं च लोके प्रसृतं चकास्ति । तत्र किं कारणमिति ? प्रश्नः सञ्जागर्ति । अत्रेत्थमुपदिशन्ति प्राज्ञाः[1] – 'सत्सु बहुषु व्याकरणेषु पाणिनीयमेव मूर्धावतंसतया विराजते । पाणिनिः महेश्वरं सन्तोष्य तदनुग्रहेण चतुर्दशसूत्रीमुपलभ्य लौकिकवैदिकवाङ्मययोः अष्टाध्यायीति नाम्ना व्याकरणं रचयामास । माहेश्वरसूत्रमूलकत्वेन पाणिनीयस्यैव वेदाङ्गत्वमिति' । किञ्चान्येषां व्याकरणानां केषाञ्चिल्लोकमात्रविषयत्वं, केषाञ्चिद्वैदिकैकदेशमात्रविषयत्वमेवेति न तानि पाणिनीयवल्लोकवेदसाधारण्येनोपकारकाणि । ध्वनितं चेदं 'लौकिकानां वैदिकानां चेति' वदता भाष्यकृता । स्पष्टीकृतं चेदं कौस्तुभे प्रकृतसंशोधितायां कौस्तुभव्याख्यायां प्रभायाञ्च । अत एवोक्तं–

[2]पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम् ।
सर्वोपकारकं ग्राह्यं कृत्स्नं, त्याज्यं न किञ्चन ।। इति ।।

किञ्चाष्टाध्याय्याः सूत्रक्रमस्य यत्प्राधान्यं तदन्यत्र व्याकरणान्तरीयसूत्रग्रन्थेषु नैव दृश्यते । उत्सर्गापवादं मनसि निधाय सपादसप्ताध्यायीत्वेन त्रिपादीत्वेन च विभागोऽष्टाध्याय्या महत्त्वं ज्ञापयति । प्रत्याहारद्वारा सूत्रप्रणयनमन्यदेकं वैशिष्ट्यं पाणिनिव्याकरणस्य । किमधिकं वक्तव्यम् यदीदं पाणिन्युपज्ञं व्याकरणं न स्यात्, सर्वेषां वाचां मलं न विधूयेत, सर्वेषामज्ञानान्धंतमः न विभिद्येत । अतः सर्वैरासेव्यमिदं व्याकरणम् । उक्तं च —

[3]येन धौता गिरः पुंसां विमलैश्शब्दवारिभिः ।
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नामः ।।

अष्टाध्यायीति नामास्य व्याकरणस्य अन्वर्थं नाम । तत्र प्रत्यध्यायं चत्वारः पादाः प्रतिपादं च विषयानुसारं न्यूनाधिकसंख्याकानि सूत्राणि संरचितानि सन्ति । अस्या अष्टाध्याय्या व्याख्यानतया प्रवृत्तोऽयं शब्दकौस्तुभः, तद्व्याख्यानतया प्रवृत्तः प्रकृतानुसन्धानप्रबन्धः । इत्थञ्च प्रकृते अष्टाध्यायीव्याख्याभूतस्य शब्दकौस्तुभस्य, तद्व्याख्यायाः प्रभायाश्च परिचयनात् पूर्वं शब्दकौस्तुभः तद्व्याख्या च यमुपजीव्य प्रवृत्तः तस्य भाष्यकैयटादिग्रन्थजातस्य विषये यद्वक्तव्यं तत् द्वितीयभागे कथ्यते ।

---

१. लघुशब्देन्दुशेखरभूमिकायां श्रीपादसत्यनारायणमूर्तिमहाभागाः रा.सं.वि. तिरुपति

२. पराशरोपपुराणम्

३. अष्टाध्यायीसूत्रपाठारम्भे पठनसम्प्रदायः । निर्णयसागरीय सि.कौ.पृ.सं. ४१७

०.२ अष्टाध्यायीव्याख्यानुव्याख्याः

०.२.१ वररुचिप्रणीतं वार्तिकम्

पाणिनिसमयस्तावत् क्रिस्ताब्दात् पूर्वं पञ्चशतं संवत्सराणि । पाणिनेरनन्तरं त्रिभिः संवत्सरशतकैः वररुच्यपरनामधेयेन कात्यायनेन मुनिना लघुटिप्पणीरूपः ग्रन्थः प्राणायि । सोऽयं वार्तिकमिति परम्परायां प्रसिद्धो वर्तते । यद्यपि लाघवमष्टाध्याय्या अनितरसाधारणो विशेषः, तथापि तेनैव तथैव तन्त्रविशेषाश्रयणाद् रचनाया बहुत्र दुर्बोधा सा । अत एवार्थबोधे व्याख्यानविस्तरः सर्वथाऽपरिहार्यस्तत्र । अतः सुखबोधार्थं पाणिनिना विस्तृतं सूत्रव्याख्यानं शिष्येभ्यः श्रावितं स्यादित्यनुमीयते । विस्मृतिः कालस्वभावः, किञ्च सूत्रेषु काचन न्यूनतापि सम्भवति । अतस्तद्व्याख्यानमनवरतं समाजेऽनुवर्त्ततां सूत्रे न्यूनता चापगच्छतु इत्युद्देशो वार्तिकरचनायाः । उक्तानुक्तदुरुक्तचिन्ताकराण्येतानि वार्तिकानि प्रायः पञ्चसहस्रसंख्याकान्यद्यत्वे उपलभ्यन्ते ।

०.२.२ महाभाष्यम्

भगवत्पतञ्जलिविरचितं पञ्चाशीत्याह्निकपरिमाणोपेतं सूत्रवार्तिकव्याख्यानं महाभाष्यमिति गीयते । प्रायः अन्यत्र मीमांसा-न्याय-योगदर्शनप्रभृतिषु भाष्यस्य व्याख्यानभूतं वार्तिकं प्रवृत्तम् । यथा पूर्वमीमांसायां जैमिनिप्रणीतानि मीमांसासूत्राणि, शबरस्वामिप्रणीतं तद्भाष्यम्, कुमारिलभट्टविरचितं वार्तिकम् । अत्र तु व्याकरणे सूत्रवार्तिकव्याख्यानभूतं भाष्यमस्ति । तत्र क्रमविपर्यये त्विदं कारणं - प्रायः वार्तिककारस्य सूत्रेषु उक्तानुक्तदुरुक्तचिन्ता अभिलषिता । अत एव स्वग्रन्थस्य वार्तिकमिति नाम कृतम् । भाष्यकारस्य तु पाणिनेर्गौरवरक्षार्थमेव प्रवृत्तिः दृष्टा । अतः वार्तिकाण्यपि व्याकरोत् । अत एव ''प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविष्य महता प्रयत्नेन सूत्राणि प्रणयति स्म, तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुं, किं पुनरियता सूत्रेण'' इति [१]महाभाष्ये प्रतिपादितम् । अत एव **'यथोत्तरं मुनीनां प्रामाण्यम्'** इति प्रथा वैयाकरणसमाजे विद्यते ।

अपि च महाभाष्यं न केवलं व्याकरणनिबन्धः, किन्तु सर्वाण्यपि ज्ञातव्यानि विषयजातानि स्थाने स्थानेऽत्र सपरिकरं विवेचितानि । लौकिकाः व्यवहाराः दर्शनानां सिद्धान्ताश्च निरूपिताः ।

---

१. म.भा.पृ.सं. १६० प्रथमभागः

एतन्मूलकतयैव भर्तृहरिप्रभृतिभिः वाक्यपदीयवैयाकरणमतोन्मज्जन - भूषणसार - लघुमञ्जूषादिग्रन्थनिकारैः आर्थिकं व्याकरणं संस्थापितम् । तदुक्तम् –

[1]कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना ।
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने ।। इति ।।

अत्र पुण्यराजः – 'तीर्थान्यागमविशेषाः । तान् पश्यति विजानातीति तीर्थदर्शी । अनेन गुरुत्वनिबन्धनः प्रभावातिशयो भगवत उक्तः । तच्च भाष्यं न केवलं व्याकरणस्य निबन्धनं यावत्सर्वेषां न्यायबीजानां बोद्धव्यमित्यत एव सर्वन्यायबीजहेतुत्वादेव महच्छब्देन विशेष्य महाभाष्यमित्युच्यते लोके' इत्यभिप्रायमाविश्चकार ।

किञ्च महाभाष्यरचनाशैली अनितरसाधारणा । तत्र हि क्वचन सोपहासा आक्षेपाः - क्वचित्प्रशंसा - क्वचित्प्रतिवादिसमर्थनं - क्वापि बहुमुखा निर्णयाः - क्वचनान्तिमनिर्णये उदासीनभावः - निर्णीतचरस्य पुनः आशङ्कान्तरोद्भावनेन संभ्रमावस्थावपातः इत्येवं वैविध्यमण्डितया रचनाशैल्या तन्महाभाष्यमापातरमणीयम्, परं दुष्प्रापनिर्णयम् । अत एव नूतनाभ्यासकानां दुरध्येयं वर्तते । यद्यपि महाभाष्यमितरटीकावत् ब्रह्मसूत्रादिभाष्यवत् न दीर्घसमासादिबहुलम्, अतः प्रसन्नार्थम् । तथापि गभीराशयं चिरायाभ्यासेनैव सुज्ञानं नान्यथा । अत एव महावैयाकरणो महाभाष्यस्य प्राचीनतमष्टीकाकारो श्रीमान् भर्तृहरिः वाक्यपदीये महाभाष्यस्येमां वस्तुभूतामवस्थां वर्णयति -

[2]अलब्धगाधे गाम्भीर्यादुत्तान इव सौष्टवात् ।
तस्मिन्नकृतबुद्धीनां नैवावस्थित निश्चयः ।। इति ।।

अपरो वैयाकरणः कैयटोपाध्यायः प्रदीपटीकोपक्रमे अमुमेवाशयं इत्थमाविश्चकार —

[3]भाष्याब्धिः क्वातिगम्भीरः क्वाहं मन्दमतिस्ततः ।
छात्राणामुपहास्यत्वं यास्यामि पिशुनात्मनाम् ।। इति ।।

तदिदं कात्यायनऋषेरनन्तरं प्रायः द्वाभ्यां संवत्सरशतकाभ्यां अनन्तरकालिकेन भगवता विरचितं महाभाष्यं पञ्चाशीत्या अहोभिः शिष्येभ्यः पाठितम् । अतः तस्य पञ्चाशीत्याह्निकानि सन्ति । एकस्मिन् अहनि यत्पाठितं तदाह्निकम् । महाभाष्यस्य ग्रन्थपरिमाणं तु ग्रन्थपरिमाणदण्डमनुसृत्य

---

१. वा.प.पृ.सं. ५१८ द्वितीयकाण्डः

२. वा.प.पृ.सं. ५१९ द्वितीयकाण्डः

३. म.भा.प्र.पृ.सं. ३

षट्त्रिंशत्सहस्राणि (पा०सू० ३६०००) ग्रन्था इति निश्चितं साम्प्रदायिकैः ।

०.२.३ महाभाष्यव्याख्यानानि

महाभाष्यस्यास्य अनेकैर्विद्वद्भिरेकैरनेकाष्टीकाः विरचिता विराजन्ते । तासु टीकासु उपलभ्यमानासु प्रथमं व्याख्यानं भगवता भर्तृहरिणा रचितमिति विदन्त्येव इतिहासज्ञाः । अस्य व्याख्याया नाम महाभाष्यदीपिका इति । यद्यपि भर्तृहरिः स्वगुरोः नाम कुत्रापि नोल्लिखितवान् । तथापि पुण्यराजेन 'प्रणीतो गुरुणास्मकमयमागमसंग्रह' इति श्लोकस्यावतरणिकायां 'तत्र भगवता वसुरातगुरूणां ममायमागमः संज्ञाय वात्सल्यात् प्रणीत' इति कथयता वसुरातः भर्तृहरिगुरुः इति प्रतिपादितम् । अस्य हरेः कालः वि० ४०० इति युधिष्ठिरमीमांसकाः ।

परन्त्वतिसंक्षिप्ता महाभाष्यदीपिकानाम्नी व्याख्या छात्राणां महाभाष्यार्थावगमे नालमिति हरिनिर्मितव्याख्यानुसारिणा कैयटेन प्रदीपाख्या सर्वसम्मता व्याख्या व्यरचि । उक्तं च मङ्गलाचरणे –

तथापि हरिबद्धेन सारेण ग्रन्थसेतुना ।
क्रममाणः शनैः पारं तस्य प्राप्ताऽस्मि पङ्गुवत् ।। इति ।।

अत एव कैयटव्याख्याया एव अनेकाः व्याख्या विरचिता विराजन्ते । तत्र Catalogos Catalogoram मध्ये निर्दिष्टाः प्रदीपव्याख्याः –

व्याख्यानाम	**रचयिता**
कैयटप्रकाशः	चिन्तामणिः
लघुविवरणम्	रामचन्द्रसरस्वती
बृहद्विवरणम्	ईश्वरानन्दसरस्वती
प्रदीपोद्योतनम्	अन्नम्भट्टः
विवरणम्	नारायणः
प्रदीपव्याख्या	रामसेवकः
महाभाष्यप्रदीपव्याख्या	नारायणशास्त्री
प्रदीपप्रकाशिका	प्रवर्तकोपाध्यायः
प्रदीपोद्योतः	नागेशभट्टः
प्रदीपस्फूर्तिः	सर्वेश्वरदीक्षितः

प्रदीपव्याख्यामतिरिच्य महाभाष्यस्यान्या महत्त्वपूर्णा व्याख्याः सन्ति । तासु गणनार्हतया शेषनारायणविरचितः सूक्तिरत्नाकरः । शिवरामेन्द्रसरस्वतीविरचितः रत्नप्रकाशः । अनयोः व्याख्यानयोः प्रधानतया कैयटस्य विमर्शः, तत्रापि रत्नप्रकाशे शब्दकौस्तुभस्य च विमर्शः दरीदृश्यते । अत एव कौस्तुभप्रभाकारेण वैद्यनाथेन वारं वारं नारायणमतस्य रत्नप्रकाशमतस्य चोल्लेखः कृतः । एतच्च उत्तरत्र विवरिष्यते ।

इदन्तु बोध्यम् - सूत्रवार्तिकमहाभाष्यकैयटव्याख्यानमवलम्ब्य पाणिनिव्याकरणशास्त्रस्य पाठप्रवचनपरम्परा द्वेधा विद्यते । तत्र वामनजयादित्यविरचितायाः काशिकायाः पदमञ्जरी - न्यास - प्रक्रियामञ्जरी इत्यादिव्याख्यानिकुरुम्बैः हरदत्तादिभिः अष्टाध्यायीक्रमानुसारेण एका पाठप्रवचनपरम्परा प्रचालिता । तथा प्रक्रियाक्रमानुसारेण प्रक्रियाकौमुदी - सिद्धान्तकौमुदी - मनोरमा - शब्दरत्न - शेखरादिभिः प्रचालिता पाठप्रवचनपरम्परा कौमुदीपरम्परा इत्येवं प्रसिद्धा वर्तते । तत्र कौमुदी - प्रौढमनोरमाप्रणयनपूर्वकं प्रक्रियापरम्परायाः प्रवर्त्तकेन श्रीभट्टोजिदीक्षित-महाभागेन महाभाष्यगूढार्थोपन्यासतत्परेण शब्दकौस्तुभेन अष्टाध्यायीपाठप्रवचनपरम्परापि सम्यगेव संरक्षिता । तदत्र तृतीयभागे शब्दकौस्तुभस्य तत्कर्तुश्च विषये वक्तव्यं निरूप्यते ।

०.३ श्रीभट्टोजिदीक्षितविरचितः श्रीशब्दकौस्तुभः

०.३.१ श्रीभट्टोजिदीक्षितः

श्रीमान् भट्टोजिदीक्षितः विश्वसंस्कृतवाङ्मयेऽविस्मरणीयः शाब्दिकः । अस्य कालः कि०श० १५७० तः १६५० वर्षपर्यन्तम् । महाराष्ट्रदेशीयः ऋग्वेदान्तर्गताश्वलायनसूत्रशाकल-शाखाध्यायी भट्टकुलावतंसोऽयं लक्ष्मीधरनामकस्य पण्डितवरस्य तनयः । उक्तं च शब्दकौस्तुभारम्भे - 'नत्वा लक्ष्मीधरं तातं सुमनोवृन्दवन्दितम्' इति । अस्य च भट्टोजिदीक्षितस्य विद्याभ्यासः प्रक्रियाकौमुदीप्रकाशकर्तुः शेषनृसिंहसूनोः शेषकृष्णपण्डितात् समजानि । उक्तं च भावप्रकाशे 'एकस्मादेव गुरोः इत्यस्य विवरणावसारे 'कृष्णपण्डिताख्या' दिति । किं बहुना, यदिदानीमपि व्याकरणपाठप्रवचनपरम्परा लोके प्रसरति, तदस्य महानुभावस्य कृपाकटाक्षेणैवेति निश्चप्रचं वक्तुं शक्यते । यतः अनेन विरचितां सिद्धान्तकौमुदीमपठित्वा भाष्याद्याकारग्रन्थेषु विद्वत्तल्लजानामपि प्रवेशो दुर्गमः । उक्तं च –

कौमुदी यदि कण्ठस्था वृथा भाष्ये परिश्रमः ।
कौमुदी यद्यकण्ठस्था वृथा भाष्ये परिश्रमः ।।

अत एव कौण्डभट्टेन भूषणे तस्येत्थं प्रशंसा कृता –

वाग्देवी यस्य जिह्वाग्रे नरीनर्ति सदा मुदा ।
भट्टोजिदीक्षितमहं पितृव्यं नौमि सिद्धये ।। इति ।।

०.३.२ श्रीभट्टोजिदीक्षितविरचिताः ग्रन्थाः

सोऽयं महाभाष्याम्बुधिविहरणपटुर्दीक्षितः व्याकरणशास्त्रे धर्मशास्त्रे वेदे वेदान्ते चानेकान् ग्रन्थान् रचयामास । ते यथायथं (१) धर्मशास्त्रं, (२) वेदः, (३) वेदान्तः, (४) व्याकरणशास्त्रमिति क्रमेणाधो निर्दिष्टाः[१]

१) धर्मशास्त्रग्रन्थाः –

१. आचारप्रदीपः
२. अशौचनिर्णयः
३. कालनिर्णयसंग्रहः
४. गोत्रप्रवरनिर्णयः
५. चन्दनधारणविधिः
६. तिथिनिर्णयः
७. तिथिनिर्णयसंक्षेपः
८. तिथिप्रदीपः
९. तीर्थयात्राविधिः
१०. त्रिस्थलीसेतुसारसंग्रहः
११. प्रायश्चित्तविनिर्णयः
१२. मासनिर्णयः
१३. श्राद्धकाण्डम्

२) वेदभाष्यमधिकृत्य 'वेदभाष्यसार' इति ग्रन्थः एतद्विरचितः 'भारतीय विद्याभवन मुम्बयि' द्वारा प्रकाशितः । संध्याभाष्यमिति अपरः ग्रन्थः अमुद्रितः ।

---

१. एते ग्रन्थाः महाभाष्यभूमिकायां भार्गवशास्त्रिभिः निर्दिष्टाः, तमनुसृत्यात्र प्रदत्ताः ।

(३) वेदान्तग्रन्था :–

१) अद्वैतकौस्तुभः

२) तत्त्वकौस्तुभः

३) तत्वविवेकदीपनव्याख्या

४) दशश्लोकीव्याख्या

५) तन्त्रसिद्धान्तदीपिका

६) तन्त्राधिकारनिर्णयः ।

एतेषु 'तत्त्वकौस्तुभः' माध्वीयचन्द्रिकाखण्डनपरः कञ्चीकामकोटीद्वारा मुद्रितः । अस्य ग्रन्थस्य खण्डनं 'तत्वकौस्तुभकुलिश' इति नाम्ना महामहोपाध्याय सेतुमाधवाचार्यैः विरचितो विद्यते । अस्यापि खण्डनं दीक्षितमण्डनं च 'कुलिशप्रतीकार' इति नाम्ना महामहोपाध्याय पेरी सूर्यनारायणशास्त्रिभिः विरचितमिति भाट्टरहस्य व्याख्यानभूमिकायां पेरीसूर्यनारायणशास्त्रिभिरुक्त-मस्ति ।

४) व्याकरणग्रन्थाः –

१) शब्दकौस्तुभः

२) वैयाकरणसिद्धान्तकौमुदी

३) प्रौढमनोरमा

४) वैयाकरणमतोन्मज्जनम्

५) लिङ्गानुशासनसूत्रवृत्तिः

६) धातुपाठनिर्णयः

०.३.३ शब्दकौस्तुभग्रन्थपरिचयः

मीमांसायां यथा मीमांसाकौस्तुभः, न्याये च यथा न्यायकौस्तुभः, तथा व्याकरणे भट्टोजिदीक्षितस्य सर्वोत्तमो ग्रन्थः शब्दकौस्तुभनामा महाभाष्यार्थविवेचनपरो वर्त्तते । अष्टाध्यायीक्रममाश्रित्य प्रवृत्तोऽयं ग्रन्थराजः महाभाष्यगूढार्थाभिसन्धानेऽत्यन्तमुपकारी । अत एव नागेशः कौस्तुभकारमतमेव तत्र तत्रोद्योते प्रकटीचकार इति प्रथा वैयाकरणनिकाये । यद्यप्युक्तरीत्या महाभाष्यस्य कैयटेन प्रदीपनाम्नी टीका विरचिता वर्तते । तयैव महाभाष्यार्था ज्ञातुं शक्यन्ते । तथापि

नायं गतार्थः । वामन-जयादित्य-पुरुषोत्तमदेव - सीरदेव - हरदत्त - न्यासकार - माधवाचार्य - शेषकृष्ण - रामचन्द्र - विट्ठलप्रभृतीनां विदुषां मतानि परीक्षितानि अत्र ग्रन्थे । प्रायः कैयटमतानुसरणेऽपि क्वचित्तस्यापि परीक्षा विद्यते । तदा भाष्यस्याशयान्तरवर्णनं, क्वचिच्च भाष्यमेव प्रौढिवादतया स्वीकरणम्, क्वचिद्भाष्यदूषितपक्षसमर्थनं च कृतम् । किञ्च बहुत्र नैयायिकानां मीमांसकानां च परामर्शो विद्यते । तस्मात् समादरणीयोऽयं ग्रन्थः । किं बहुना न खलु यद्वैयाकरणसिद्धान्तकौमुदीमविमृश्य कश्चिद्विपश्चिद्वैयाकरणीभवितुमर्हति सा वैयाकरणसिद्धान्त-कौमुदी अपि शब्दकौस्तुभमूला । उक्तं च कौमुद्यामन्ते –

[1]इत्थं लौकिकशब्दानां दिङ्मात्रमिह दर्शितम् ।
विस्तरस्तु यथाशास्त्रं दर्शितं शब्दकौस्तुभे ।। इति ।।

तथा वैयाकरणमतोन्मज्जनेऽपि —

[2]फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः ।
तत्र निर्णीत एवार्थः संक्षेपेणेह कथ्यते ।। इति ।।

ग्रन्थसंख्या अध्यायादिविभागश्च –

अयं शब्दकौस्तुभः उक्तरीत्या अष्टाध्यायीव्याख्यानार्थं प्रवृत्तः । तथाप्यत्र भाष्यक्रममनुसृत्य अध्यायादिविभागः प्रक्रान्तो वर्तते । भाष्ये तावत् आह्निकक्रममनुसृत्य सूत्रवार्त्तिकयोः व्याख्यानं प्रवृत्तम् । अत्रापि ग्रन्थे स एव क्रमः अनुसृतो ग्रन्थकृता । उपलब्धप्रमाणानुसारादनेन महाभागेन षष्ठाध्यायपर्यन्तं कौस्तुभः रचितः इति निश्चयेन वक्तुं शक्यते । यतो हि 'अतो लोपः' (पा०सू० ६-४-८४) इति सूत्रव्याख्यावसरे मनोरमायां 'विस्तरः शब्दकौस्तुभे बोद्धव्यः' इत्युक्तं ग्रन्थकृता । तत्रैव **शब्दरत्ने** 'विस्तर इति । कौस्तुभे षाष्ठे' इत्युक्तम् । सम्भाव्यते सम्पूर्तितो वा कौस्तुभः अनेन । परन्त्वस्माकं दौर्भाग्यवशादयं ग्रन्थः सम्पूर्णतया नोपलभ्यते । किन्तु आरम्भतः तृतीयाध्यायद्वैतीयीकपादपर्यन्तांशः चतुर्थाध्यायश्च उपलभ्यते ।

प्रभायां अधिकविचारः

शब्दकौस्तुभव्याख्यायां प्रभायां अयमाश्चर्यकारः विषयः प्रस्तुतः, तदनुसारेण शब्दकौस्तुभः

---

१. सि.कौ.पृ.सं. ५८५

२. वै.सि.का.श्लो.सं. १

भट्टोजिना न सम्पूर्तित इत्यपि वादः प्रस्तोतुं शक्यते । तथा हि । शब्दकौस्तुभे 'वृद्धिरादैच्' इति सूत्रव्याख्यावसरे 'चोः कुः' (पा०सू० ८-२-३०) इति सूत्रेण कुत्वमैच्छब्दे आशङ्क्य परिहृतः । तत्र प्रभाव्याख्यायां यद्वेति कौस्तुभव्याख्यावसरे ''भाष्ये तु संज्ञाशब्द एव द्रव्यमात्रबोधकत्वमिति मते प्रकृतिप्रत्ययार्थयोः भेदानुपपत्तिमाशंक्यायं पक्ष एकदेशिनोक्त इति गुरुचरणाः । वस्तुतस्तदपि यथायुक्तं तथा **कौस्तुभपूरपे** तत्रैव सूत्रे प्रतिपादितं तत एव बोध्यम्'' इत्युक्तम् । अनेन व्याख्यासन्दर्भेण भट्टोजिना कौस्तुभः न पूर्तितः, नागेशेन सम्पूर्तित इति ज्ञायते । यद्वा नागेशेन कौस्तुभस्यापि व्याख्या रचिता इति श्रूयते । तेन कौस्तुभस्य यथा निर्दुष्टत्वं तथा व्याख्यानेन सम्पूरणं कृतं इत्यपि वक्तुं शक्यते । अत्राधिकं विचारणीयमस्ति ।

शब्दकौस्तुभपाठः

एतावत्पर्यन्तं शब्दकौस्तुभस्य पञ्चवारं षड्वारं वा संस्करणं जातमिति अन्तर्जालतः (Internet) ज्ञायते । तदत्राधस्तात् निविष्टम् :-

1) Baburam 'संवत्' 1868 'शके' 1753 (i.e., 1811)
2) BhuvaneshvarI Ashram (1904)
3) Srisha Chandra Vasu, Vaman Das Vasu, Allahabad (1906)
4) P.V. Naganatha Shastri (1990) ISBN 81-208-0679-4
५) प. गोपालशास्त्री नेन ६ प. श्रीमुकुन्दशास्त्री पुणतामकार आभ्यां सम्पादितः (१९९१) - चौखम्बा संस्कृत सीरिज् आफिस्
6) S.C. Vasu, Motilal Banarasidass (2003) ISBN - 978-81-208-1290-1.

एतेषु संस्करणेषु प्रकृते पञ्चमसंस्करणस्य पाठमनुसृत्य अयं कौस्तुभव्याख्यारूपशोधप्रबन्धः कृतः ।

०.३.४ शब्दकौस्तुभस्य वैशिष्ट्यम्

अस्य ग्रन्थस्य वैशिष्ट्यं स्वयं ग्रन्थकृतैव स्पष्टीकृतम् । तद्यथा -

[१]परिभाव्य बहून् ग्रन्थान् योऽर्थः क्लेशेन लभ्यते ।
तमशेषमनायासादितो गृह्णीत सज्जनाः ।। इति ।।

अयमर्थः । कैयटादिप्राचीनग्रन्थाध्ययनेनैवार्थप्रतिपत्तौ किमनेन शब्दकौस्तुभाख्येन

---

१. श.कौ. पृ.सं. १

ग्रन्थेनेत्याशङ्कायामयं श्लोकः प्रवृत्तः । तथा च बहून् ग्रन्थान् कैयटादिग्रन्थान् परिभाव्य विचार्य योऽर्थः क्लेशेन भाष्यादिग्रन्थात् बह्वायासेन लभ्यते तं सम्पूर्णमनायासात् इतः बुद्धिस्थात् शब्दकौस्तुभात् गृह्णीतेति भावः । अथवा प्राचीनन्यासकारादिग्रन्थाध्ययनेनैव भाष्यादिग्रन्थाशय-सिद्धौ किमनेनापूर्वग्रन्थेनेत्याशङ्कायां वा उक्तं परिभाव्येति । अत्र च परिभाव्येत्यस्य तिरस्कृत्येत्यर्थः । तथा च प्राचीनग्रन्थानां भाष्यादिविरोधेन निर्युक्तिकत्वेनाश्रद्धेयत्वमिति भावः । नन्वेवं प्राचीनग्रन्थतिरस्कारे प्राचीनग्रन्थप्रतिपाद्यभाष्याद्यविरुद्धार्थाप्रतिपत्तिप्रसङ्ग इत्याशङ्कायां उत्तरभागः प्रवृत्तः । तथा च तेभ्यो न्यासादिग्रन्थेभ्यो योऽर्थः बह्वायासेन लभ्यते, तद्ग्रन्थप्रतिपाद्यं तमाशयं सम्पूर्णमनायासेन शब्दकौस्तुभतः गृह्णीतेत्यर्थः । तदत्र शब्दकौस्तुभे कथं कैयटादिग्रन्थपरीक्षणं कैयटाद्यशयवर्णनं भाष्याद्याशयवर्णनं च कृतमिति यथामति स्थालीपुलाकरीत्या निरूपयिष्यते ।

०.३.४.१ कैयटमतपरीक्षणम् :-

प्रत्याहाराह्निके माहेश्वरसूत्रे स्वरसन्धिः कुतो न भवतीत्याशङ्कायां कैयटेन प्रदीपव्याख्यायां इत्थमुक्तम् - ''स्वरसन्धिस्तु न प्रवर्त्तते, वर्णोपदेशकाले अजादिसंज्ञानामनिष्पादात्'' इति । आदिरन्त्येनेत्यस्य वर्णोपदेशानन्तरभावित्वात् तत्समये तदप्रवृत्तेः संज्ञानामनिष्पत्तौ तदधीनगुणादिकं न प्रवर्त्तत इति कैयटाशयः । इमं कैयटं कौस्तुभकारः इत्थं दूषयति - 'तच्चिन्त्यम्, वर्णोपदेशे, इत्संज्ञायामच्प्रत्याहारे च प्रत्याहारे प्रवर्त्तमानानां यणादीनां 'सुध्युपास्य' इत्यादौ तटस्थे इव उद्देश्यतावच्छेदकरूपाक्रान्ते वर्णोपदेशादावपि प्रवृत्तेरावश्यकत्वात् । अन्यथा तुल्यास्यप्रयत्न-मित्यादौ सवर्णदीर्घो न स्यात्' इति । तस्मादत्र संहिताया अविवक्षया न संहिताकार्यं यणादिकमिति सिद्धान्तः ।

०.३.४.२ न्यासकारमतपरीक्षणम् :–

'आद्यन्तवदेकस्मिन्' (पा०सू० १-१-२१) इति सूत्रे कौस्तुभे एकग्रहणप्रयोजनविचारा-वसरे - ''यत्तु न्यासकृतोक्तं - अतिदेशसूत्रे एकग्रहणाभावे वृद्धसंज्ञासूत्रस्थमादिग्रहणमनाति-देशिकप्रतिपत्त्यर्थं सदसहायानां ज्ञादीनामेव वृद्धसंज्ञां वारयेन्न तु सभासन्नयनस्य, सन्नयनेत्येत-दन्तर्गताश्चतुरोऽचोऽपेक्ष्यानाति- देशिकस्यादित्वस्य तत्र सत्वादिति । तच्चिन्त्यम्, परस्मिन् सति यस्मात्पूर्वो नास्ति स आदिरिति सिद्धान्तरीत्या मध्यस्थेऽप्यादित्वविरहात् । इयानेव हि विशेषः - असहाये सत्यन्तविशेषणविरहाद्विशिष्टाभावः, मध्यस्थे तु विशेष्याभावाद्विशिष्टाभाव इति'' इति ।

अयमाशयः :– 'आद्यन्तवदेकस्मिन्' इति सूत्रे एकस्मिन्नित्यस्य 'एकस्मिन्निति किम् ? सभासन्नयने भवः साभासन्नयनः, आकारमाश्रित्य वृद्धसंज्ञा न भवति' इति काशिकायामुक्तम् । काशिकाव्याख्यातृणां न्यासकाराणामत्रायमाशयः - यद्येकग्रहणं न क्रियेत, तदा यत्राद्यन्तव्यपदेशो नास्ति तत्रातिदेशो युक्त इति आद्यन्तव्यपदेशरहिते मध्येऽप्यतिदेशः स्यात् । आद्यन्तवदिति वचनसामर्थ्यात् । ततश्च सभाशब्दाकारस्यादित्वे सति सभासन्नयनशब्दस्य य आकारः, वृद्धसंज्ञकं तमाकारमाश्रित्य 'वृद्धिर्यस्याचामादिस्तद्वृद्धम्' इति वृद्धसंज्ञा स्यात् । तस्याश्च सत्यामणं बाधित्वा 'वृद्धाच्छः' इति छप्रत्ययः प्रसज्येत । ननु मध्येऽपि यद् वृद्धसंज्ञकं तस्यापि यदि वृद्धसंज्ञा स्यात् तर्हि आदिग्रहणं वृद्धसंज्ञासूत्रे व्यर्थं स्यात्, व्यवच्छेद्याभावादिति चेन्न वृद्धसंज्ञासूत्रे आदिग्रहणसामर्थ्यात् यस्य विशिष्टमादित्वमनातिदेशिकं मुख्यम्, तत्परिग्रहार्थं तत्रादिग्रहणम् । एवञ्च यस्य न कदाचिदपेक्षयैवंविधमादित्वं सम्भवति, तदादिग्रहणस्य व्यवच्छेद्यम् । यथा जानातीति ज्ञा इत्यादि । सभासन्नयनशब्दे तु सन्नयनेत्येतदन्तर्गताश्चतुरोऽचोऽपेक्ष्यादित्वमनातिदेशिकमस्तीति सभाशब्दाकारस्य भवति वृद्धसंज्ञा । अतः तद्व्यवृत्यर्थमेकस्मिन्नितीति ।

चिन्त्यताप्रदर्शकस्य कौस्तुभकारस्य त्वयमाशयः - 'आदिरन्त्येन सहेता' (पा०सू० १-१-७१) इति सूत्रभाष्योक्तदिशा 'परस्मिन् सति यस्मात्पूर्वो नास्ति' स आदि' रिति सिद्धान्तत्वात् मध्यस्थेऽप्यादित्वं न भवति । अतः एवंविधाशयवर्णनं न युक्तम् । किन्तु असत्येकग्रहणे यत्रादिव्यपदेशो नास्ति, मध्येऽसहाये च सोऽतिदेशस्य विषयः । 'वृद्धिर्यस्याचामादिस्तद्वृद्धम्' इत्यत्रादिग्रहणस्याप्येतदेव व्यावर्त्त्यं इति विकल्पः स्यात् - कचादित् वृद्धसंज्ञा, कदाचिन्न इति । अतः एकग्रहणम् । सति च तस्मिन् मध्यान्त्ययोर्व्यावृत्त्या वृद्धसंज्ञायामादिग्रहणं सार्थकमिति ।।

०.३.४.३ हरदत्तमतपरीक्षणम्

'अदसो मात्' (पा०सू० १-१-१२) इति सूत्रे कौस्तुभे - ''यत्तु हरदत्तेनोक्तम् 'अणोऽप्रगृह्यस्य' इत्यत्रोपस्थितेन पूर्वसूत्रेण संज्ञायां क्रियामाणायां मुत्वस्य सिद्धत्वाल्लिङ्गत्रयेऽपि द्विवचनेऽनुनासिकपर्युदासः पूर्वेणैव सिद्धः । एतत्सूत्रारम्भस्त्वद्विवचनार्थः, पुंसि द्विवचने प्रकृतिभावार्थश्चेति । तच्चिन्त्यम् । प्लुतसंग्रहानुरोधेन पूर्वसूत्रे यथोद्देशपक्षस्यैव स्थापितत्वात् । तस्मात् पुंसि द्विवचनेऽनुनासिक-पर्युदासोऽप्येतत्सूत्रस्य फलं, न तु प्रकृभिभावमात्रमित्यवधेयम्'' इति ।

अयमर्थः - किमेतत्सूत्रस्य प्रयोजनमिति विचारावसरे 'अणोऽप्रगृह्यस्य' इति सूत्रे 'ईदूदेत्' इति सूत्रं उपस्थितं भवति । कार्यकालपक्षाश्रयणात् । एवञ्च तत्र सूत्रे प्रगृह्यसंज्ञायां क्रियमाणायां

मुत्वस्य सिद्धत्वात् लिङ्गत्रयेऽपि द्विवचनेऽनुनासिकपर्युदासः सिद्ध इति हरदत्ताशयः । परन्तु दीक्षिताः प्लुतसंग्रहानुरोधेन ''ईदूदेत्'' इति सूत्रे यथोद्देशपक्षाश्रयणादयं हरदत्तः चिन्त्य इति प्रतिपादयन्ति ।

एवं अष्टविधस्फोटनिरूपणम् । तत्राष्टविधस्फोटविषये उपष्टम्भकतया भाष्याद्याकर-ग्रन्थानामुद्धारः । एवं नैयायिकमतपरीक्षणं मीमांसकमतपरीक्षणं च तत्र तत्र कौस्तुभे स्पष्टं निरूपितमिति भट्टाचार्योक्तस्य परमतनिराकरणपूर्वकस्वमतव्यवस्थापनरूपपरीक्षालक्षणस्य सम्यक् समन्वयः शब्दकौस्तुभे स्फुटं । इत्थञ्च परमतनिराकरणेन स्फुटं भाष्याद्यर्थावगमे सफलश्चेदयं ग्रन्थः किमन्यद्वैशिष्ट्यमस्य ग्रन्थस्य भवितुमर्हति ।।

०.४ शब्दकौस्तुभस्य व्याख्यानानि

इत्थं विषयबाहुल्येन गम्भीरविमर्शनेन च वर्णितदिशा शब्दकौस्तुभस्य यादृशं महत्त्वमस्ति तेन तस्य व्याख्यानसाहित्यमपि सम्भावितम् । छात्राणां व्याख्यानिरपेक्षेण तदध्ययनं तु दुःशकमेव । अत एव विद्वद्भैरः नागेशभट्टादिभिः विरचिताः कौस्तुभव्याख्याः विलसन्ति । Catalogs Catalogorm मध्ये निर्दिष्टाः कौस्तुभव्याख्याः

१.	शब्दकौस्तुभोद्योतः	विद्यानाथशुक्लविरचितः
२.	शब्दकौस्तुभविषमपदी	नागेशभट्टविरचिता
३.	शब्दकौस्तुभभावप्रदीपः	कृष्णमित्रविरचितः
४.	शब्दकौस्तुभमरीचिः	अज्ञातकर्तृका
५.	शब्दकौस्तुभप्रभा	राघवेन्द्राचार्यविरचिता
६.	शब्दकौस्तुभप्रभा	वैद्यनाथपायगुण्डविरचिता (प्रकृतःग्रन्थः)

एतासु टीकासु १, ४ एतयोर्विषये किमपि प्रमाणं नोपलभ्यते । १, २, ३, ५, विषये क्वचिदेव विषयसंग्रहः लभ्यते इति संस्कृतव्याकरणशास्त्रेतिहासे (पृ.सं. ५५३प्रथमभाग) युधिष्ठिरमीमांसकाः ।

०.४.१ नागेशभट्टविरचिता शब्दकौस्तुभविषमपदी

इयं व्याख्या युधिष्ठिरमीमांसकैः (सं.व्या.शा.इ. ५५३ प्रथम भाग) नागेशविरचिता इति

कथितमस्ति । इयं च व्याख्या B.O.R.I. मध्ये Ms.No. 192 मध्ये उपलभ्यते । यदा मया 'शब्दकौस्तुभप्रभायाः' प्रकृतसंशोधनग्रन्थस्य B.O.R.I. मध्ये प्रतिकृतिः (Xerox) स्वीकृता, तदा एषा व्याख्यापि स्वीकृता । अत्र विषमपदीव्याख्यायां नागेशविरचितत्वेन किमपि प्रमाणं नोपलभ्यते । नामाङ्कहितं व्याख्यानमात्रमस्ति । एषाऽपि व्याख्या नवाह्निकभागस्यैव उपलभ्यते । अत्र विषमपदीव्याख्यायां - 'प्रयोजनमाहेति कैयटोक्तं चिन्त्यम् विषयाकथनेन न्यूनत्वात्' इत्युक्तम् । इदं च यत्तूकारमतत्वेन प्रकृतशोधप्रबन्धे स्वीकृत्य निराकृतमिति B.O.R.I. मध्ये उपलभ्यमाना नागेशविरचिता इति वक्तुं न शक्यते । किन्तु यत्र कुत्रापि सा स्यादिति सम्भाव्यते ।

०.४.२ कृष्णमित्रकृतः शब्दकौस्तुभभावप्रदीपः

दुर्बलाचार्य इत्यपरनाम्ना प्रथितः कृष्णमित्रः शब्दकौस्तुभस्योपरि 'भावप्रदीप' नाम्नीं टीकामरचयत् । अयं च कृष्णामित्रः रामसेवकदम्पत्त्योः पुत्र इति इतिहासज्ञाः वदन्ति । अनेन सिद्धान्तकौमुद्युपरि 'रत्नार्णव' इति टीका, तथा मञ्जूषोपरि 'कुञ्जिका' नाम्नी टीका च व्यरचि' । अस्य शब्दकौस्तुभव्याख्यानममुद्रितमस्ति । बहुत्र मातृकागारेषु उपलभ्यते । इदमपि व्याख्यानं नवाह्निकभागस्यैवोपलभ्यते ।

०.४.३ राघवेन्द्राचार्यविरचिता शब्दकौस्तुभप्रभा

सातार राघवेन्द्राचार्या इति सुप्रसिद्धा वैयाकरणसमाजे । एतैः 'चन्द्रिका' इति 'विषमपदी' इति व्याख्याद्वयं लघुशब्देन्दुशेखरोपरि विरचितमद्यापि वैयाकरणानां नितान्तमयस्कान्तमिवाकर्षकं विद्यते । अत एव लघुशब्देन्दुशेखरभूमिकायां[1] श्रीगुरुप्रसादशास्त्रिभिः - ''श्रीराघवेन्द्राचार्यैः सदाशिवभट्टाभ्यणङ्कालं स्पृशद्भिः श्रीराजारामशास्त्रिचरणैः, श्रीबालशास्त्रिचरणैश्च तत्र तत्र शेखरव्याख्यानावसरे स्मर्यमाणेयं विशिष्टं स्थानं विद्वत्समवाये धत्ते इति विदन्त्येव विद्वांस'' इत्युक्तम् । राधवेन्द्राचार्यस्य परिभाषेन्दुशेखरोपरि टीका त्रिपथगा इति, तथा शब्दरत्नोपरि टीका 'प्रभा' इति च मुद्रिता अस्ति । शब्दकौस्तुभव्याख्या तु इतोऽप्यमुद्रिता पुनायां आनन्दाश्रमसंस्थामातृकाकोशे उपलभ्यते । एषाऽपि व्याख्या नवाह्निकभागस्यैवोपलभ्यते । एते धीरेन्द्रतीर्थाणां शिष्याः । अतः एतेषां कालः (क्रि.श. १७९२-१८५३) इति । एषा व्याख्यापि प्रकृतशोधितव्याख्यानापेक्षया अर्वाचीना ।।

---

१. ल.शे.भूमिका पञ्चटीकासहिता ।

०.४.४ शब्दकौस्तुभखण्डनम्

प्रायः शब्दकौस्तुभकारः स्वपूर्वेषां गुर्वादीनां निराकरणं चकार इति हेतोः शब्दकौस्तुभखण्डनमपि सञ्जातमिति सम्भावयितुं शक्यते । तत्र पण्डितराज जगन्नाथेन 'मनोरमाकुचमर्दिन्यां - ''इत्थं च ओत् सूत्रगतकौस्तुभग्रन्थः सर्वोऽप्यसङ्गत इति ध्येयम् । अधिकं कौस्तुभखण्डनादवसेयम्' इति उक्तमस्ति । एतेन 'शब्दकौस्तुभखण्डनं' इति नाम्ना एकः ग्रन्थः अनेन विरचित इति ज्ञायते । परन्त्विदानीं नोपलभ्यते । एवं 'शब्दकौस्तुभदूषणम्' इति भास्करदीक्षितविरचितं इति सं.व्या.शा.इ मध्ये (पृ.सं. ५५३ प्रथम) युधिष्ठिरमीमांसकैरुक्तम् ।

०.५ शब्दकौस्तुभप्रभाकरः पायगुण्डेत्युपाख्यो वैद्यनाथः

प्रकृते सम्पदनाय या शब्दकौस्तुभप्रभानाम्नी व्याख्या स्वीकृता अस्याः रचयिता पायगुण्डेत्युपाख्यो वैद्यनाथः । अयं पायगुण्डेत्युपाख्यो वैद्यनाथः वेणी-महादेवाभिधयोर्दम्पत्योः सुत आसीत् । एतच्च तत्त्वं प्रभायां प्रथमाह्निकस्यान्ते ''श्रीमन्महादेवसुतवेणीगर्भजपायगुण्डोपाख्य-वैद्यनाथविरचिताकौस्तुभव्याख्यायां प्रभाख्यायां प्रथममाह्निकम्'' इति विद्यमानपुष्पिकावाक्यतः ज्ञायते । एवं

[१]अमन्दगणमन्दिरं विमलरत्नविद्याधरं
कलाधरकृतादरं कलितचित्तलक्ष्मीवरम् ।
शिरोधृतनदीवरं शिवकरं रमोमावरं
नमामि दुरहिताहरं गुरुवरं सनागेश्वरम् ।।

इति मञ्जूषाव्याख्याया मङ्गलपद्यतः अस्य गुरुः नागेशभट्ट इति ज्ञायते । नागेशभट्टस्तु पाणिनीयव्याख्यातृपरम्परायां विशेषतः संस्मर्यते सम्मान्यश्च विराजते । प्रायः द्विचत्वारिंशत् ग्रन्थाः येष्वधिकाः टिप्पणीग्रन्था अनेन विरचिताः । गुरुचरणक्षुण्णपथमनुवर्त्तमानेन वैद्यनाथेनापि प्रायः नागेशविरचितानां सर्वेषामेव व्याकरणग्रन्थानां वैदुष्यपूर्णाः व्याख्याः तथा तन्त्रान्तरेष्वपि अनेकाः कृतयः विरचिताः सन्ति ।

०.५.१ वैद्यनाथस्य कालः

पायगुण्डेत्युपाख्यः वैद्यनाथः नागेशभट्टशिष्य इति सप्रमाणं निरूपितम् । नागेशभट्टकाल-

---

१. वै.ल.म.क. पृ.सं. २ ।

निर्णये सति अस्य कालः सुतरां निश्चितो भवति । बृहच्छब्देन्दुशेखरभूमिकायां (पृ. ५८) श्रीसीतारामशास्त्रिभिः अनेकप्रमाणैः नागेशभट्टकालः १७३१ वैक्रमाब्धात् १८१० वैक्रमाब्ध (१६७४ - १७५३ ई० सन्) इति निर्णीतः । तेनायं ग्रन्थाकारः वैद्यनाथः पायगुण्डेमहोदयः नागेशसमकालीन (१७३०-१८२० A.D.) इति वक्तुं शक्यते । किञ्च वैयाकरणसिद्धान्त-लघुमञ्जूषायाः व्याख्यायां कलायां उपसंहारभागे अयं वैद्यनाथः कलाग्रन्थनिर्माणसमयमित्थं निर्दिष्टवानस्ति –

[1]द्विसारवसुक्षपाकरसम्मितवत्सरे ।
नलाख्ये ज्येष्टमासे च वृषस्थे च दिवाकरे ।।।

कृष्णपक्षे दर्शतिथौ रोहिणीधृतिसंयुजि ।
इन्दुवारे धस्रशेषे कला वै पूर्तिमागता ।। इति ।।

एतदनुसारेण १८५२ वैक्रमाब्दे (१७९६ A.D.) कलारचना इति ज्ञायते । तदानीं वैद्यनाथस्य ६५-७० वयोमानं स्यादिति सम्भाव्यते । अयं वैद्यनाथः काश्यामपि कञ्चित्कालमुवासेति समूह्यते । पिष्टपशुमीमांसारम्भे –

स्फुटीकरोमि तन्मूर्खमुखमर्दनहेतुतः ।
पायगुण्डो वैद्यनाथः काश्यां साधुनियोजितः ।।

इति कथनेन इदं ज्ञातुं शक्यते । एतदतिरिच्यास्य विषये किमपि चारित्रिक - ऐतिहासिकघटना नोपलभ्यते, नोल्लिखितं चेतिहासज्ञैः ।

०.५.२ वैद्यनाथस्य कृतयः

प्रायः नागेशविरचितानां सर्वेषामेव व्याकरणग्रन्थानामनेन वैदुष्यपूर्णाः व्याख्याः तथा तन्त्रान्तरेष्वपि अनेकाः कृतयः विरचिताः । ताः —

१. शब्दकौस्तुभप्रभा

प्रकृतसम्पादनम्

---

१. ल.म.पृ.सं. १५७४ द्वितीयभागः

२. महाभाष्यप्रदीपोद्योतव्याख्या छाया

महाभाष्यव्याख्याभूतस्य कैयटविरचितस्य प्रदीपस्य नागेशेन 'उद्योत' इति प्रदीपाविष्कारकः सर्वाङ्गसुन्दरः व्याख्याग्रन्थः विरचितो विद्यते । तत्र वैद्यनाथः उद्योतव्याख्याव्याजेन भाष्य - प्रदीप - उद्योतानां गूढार्थं शिष्यान् बुबोधयिषुः इमां टीकां अलिखत् । उक्तं च तेनैव –

वैद्यनाथः पायगुण्डो ध्यात्वा ध्यात्वा परं गुरुम् ।
भाष्यप्रदीपसूद्योतान् व्याचष्टे गूढसंविदे ।। इति ।।

इयं च व्याख्या चौखम्बा संस्कृतप्रतिष्ठानतः मुद्रिता ।

३. लघुमञ्जूषाव्याख्या कला

विचारकेषु मूर्द्धन्येन नागेशेन 'वैयाकरणसिद्धान्तलघुमञ्जूषा' इति आर्थिकव्याकरणस्फोरकः मौलिकः ग्रन्थः विरचितः । तस्य मञ्जूषायाः कलानाम्नी टीका अनेन व्यरचि । अयं ग्रन्थः चौखम्बा संस्कृत सीरीज् आफिस्' द्वारा मुद्रितः ।

४. लघुशब्देन्दुशेखरव्याख्या चिदस्थिमाला

सिद्धान्तकौमुदीं व्याख्यातुं प्रवृत्तः लघुशब्देन्दुशेखरः नागेशविरचितः सुप्रसिद्धः । तस्य 'चिदस्थिमाला' इति व्याख्या अनेन विद्वद्वरेण विरचिता अस्ति । प. गुरुप्रसादशास्त्रिभिः सम्पादिते 'वाणीविलास प्रकाशन' द्वारा मुद्रिते पञ्चव्याख्यासहिते लघुशब्देन्दुशेखर इयं व्याख्या घटकीभूता ।

५. परिभाषेन्दुशेखरव्याख्या गदा

'परिभाषेन्दुशेखर' इति नागेशविरचितः प्राचीनव्याकरणतन्त्रे भाष्यवार्तिकयोश्च उपनिबद्धानां परिभाषाणां विवरणात्मकः अपूर्वः स्वतन्त्रग्रन्थः । तस्येयं व्याख्या गदा काशिकेत्यपराभिधा । इयमपि व्याख्याः आनन्दाश्रमसंस्थातः १९१३ क्रि. मुद्रितः ।

६. शब्दरत्नभावप्रकाशः

वैयाकरणसिद्धान्तकौमुदीकर्त्रा दीक्षितेन तदुपरि स्वोपज्ञटीका प्रौढमनोरमानाम्नी प्राचां वैयाकरणानां विमर्शिनी सिद्धान्तस्थापिका च रचिता । तदुपरि पण्डितराजजगन्नाथ-चक्रपाणिशेषवीरेश्वरादिभिः खण्डनाभासतया ग्रन्था रचिताः । तान् खण्डनाभासान् अपास्य

प्रौढमनोरमायाः नैजं स्वादु सौन्दर्यं प्रकटीचकार शब्दरत्नव्याख्याव्याजेन नागेशभट्टगुरुः दीक्षितपौत्रः हरिदीक्षितः । तस्य शब्दरत्नस्य व्याख्यानार्थं प्रवृत्तः वैद्यनाथविरचितः भावप्रकाशः । पं.गोपालशास्त्री नेने इति विद्वद्भैरैः सम्पादितः १९९४ तमे चौखम्भा संस्कृत संस्थान द्वारा प्रकाशितः ।

७. रप्रत्याहारखण्डनम्

सिद्धान्तकौमुद्यां 'लण्मध्ये त्वकारश्च' इति ग्रन्थेन रप्रत्याहारः कैयटानुसारेण स्वीकृतः । तस्य खण्डनं विहितं नागेशेन शेखरे आदौ । शेखरोक्तदूषणमुद्धिधीर्षुः लक्ष्मणपाठकः 'रप्रत्याहारमण्डनम्' इति ग्रन्थं विरचितवान् । तस्य खण्डनार्थमयं ग्रन्थः प्रवृत्तः । डा. रमाकान्त पाण्डेय इति विदुषा सम्पादितः प्रतिभा प्रकाशन दिल्ली द्वारा प्रकाशितः २००० तमे वर्षे ।।

८. पिष्टपशुमीमांसा

मीमांसाग्रन्थः अप्रकाशितः । पाषण्डखण्डनमिति नाम्ना प्रसिद्धः मैसूरुनगरे प्राच्यसंशोधनालये MS. No. C. 1962 मध्ये उपलभ्यते ।।

९. वेदान्तकल्पतरुमञ्जरी

वेदान्तग्रन्थः अप्रकाशितः

१०. हरिलोचनचन्द्रिका

चन्द्रालोकव्याख्या अमुद्रिता

०.६ प्रकृतव्याख्या शब्दकौस्तुभप्रभा

अयं ग्रन्थः श्रीभट्टोजिदीक्षितविरचितस्य शब्दकौस्तुभस्य व्याख्यानरूपः । गुरुवरनागेशभट्टदत्तमार्गानुवर्तिना पायगुण्डवैद्यनाथोपाध्यायेनापि दीक्षितविरचितस्य शब्दकौस्तुभस्य प्रभानाम्नी अत्युपयुक्ता व्याख्या विरचिता विद्यते । इयं च व्याख्या नवाह्निकभागस्यैवोपलभ्यते ।

०.६.१ प्रभारचने कारणम्

वैद्यनाथ पायगुण्डमहोदयाः मङ्गलाचरणानन्तरं एवं प्रतिज्ञां कृतवन्तः -

'वैद्यनाथः पायगुण्डो नत्वा नागेश्वरं गुरुम् ।
व्याख्यां प्रभाख्यां तनुते कौस्तुभस्य स्वबुद्धये ।। इति ।।

अनेनेदं कारणमत्र समूह्यते । अत्र 'स्वबुद्धये' इत्युक्तम् । स्वस्य बुद्धिः स्वबुद्धिः तस्यै । स्वस्यैव विशदज्ञानाय इयं व्याख्या इति । वस्तुतस्तु व्याख्यानं न स्वोद्देशेन प्रवर्तते । किन्तु परोद्देशेनैव । अतः 'स्वबुद्धये' इत्यस्य स्वेषां आत्मीयानां बुद्धये इत्यर्थः । इत्थञ्च ये कौस्तुभमधीयाना आत्मीया च्छात्रा उत्तरत्राध्येष्यमाणाश्च तेषां बुद्धये ज्ञानायेति भावः । एतेनेदं वक्तुं शक्यते नागेशेन स्वगुरुणा यद्यपि कौस्तुभव्याख्या रचिता, तथापि तया शिष्याणां अनुग्रहातिशयो न लभ्यत इति इयं व्याख्या रचिता । किञ्च उक्तदिशा शब्दकौस्तुभस्योपरि अनेके खण्डनाभासग्रन्थाः प्रारभन्त । तन्निराकरणमपि शिष्यानुग्रहायावश्यकमिति 'स्वबुद्धये' इयं व्याख्यां कृता । अपि चायं कौस्तुभः महाभाष्य-व्याख्या - अनुव्याख्यादिग्रन्थसङ्कलनरूपः । यथा कौस्तुभे क्वचिद्भाष्यं - क्वाचिद्भाष्यव्याख्यानप्रदीपं क्वचिदपि प्रदीपव्याख्यानविवरणादिकं - क्वचिद्धरदत्तमतं - वृत्तिमतं - न्यासमतं चेत्येवं समुच्चित्य समुल्लिखितम् । शिष्याणां तु किं भाष्यमतं किमन्येषामिति विज्ञानार्थं मदीयं व्याख्यानमिति भाति । प्रदर्शितं च तत्र तत्र व्याख्यायां विस्पष्टं भाष्याद्युद्धरणं - नारायणादिमतोद्धरणं - कौस्तुभखण्डनकारोद्धरणमित्यादि ।

०.६.२ प्रभायाः सम्पादने उपयुक्ताः मातृकाः

अस्याः कृतेः सम्पादने चतस्रः मातृकाः उपयुक्ताः । ताश्च -

१. कमातृका

मैसूरुनगरस्थप्राच्यविद्यासंशोधनालयात् प्राप्ता समग्रप्राया मातृका । अत्र मातृकायां **प्रारम्भः** - श्रीगणेशाय नमः । शिवाय नमः साम्बाय नमः । श्री गुरुभ्यो नमः । आनन्दकन्दं मुनिहृन्मिलिन्दं स्वच्छन्दगोविन्दपदारविन्दम् । वन्दे सुरेन्द्रादिमुदादिदं तद् दीनादिशाहं रविनन्दनन्दम् । वैद्यनाथः पायगुण्डो नत्वा नागेश्वरं गुरुम् । व्याख्यां प्रभाख्यां तनुते कौस्तुभस्य स्वबुद्धये ।। प्रारिप्सितग्रन्थनिर्विघ्नपरिसमाप्त्यर्थं कृतं भगवदादिनत्यात्मकं मङ्गलं शिष्यशिक्षायै व्याख्यातृश्रोतृणामनुषङ्गतो मङ्गलाय च निबध्नाति ।। **विश्वेशमित्यादिना ।। अन्ते –** उपसंहरति । तदेवमिति । कैयटाद्यनुरोधेनाह । **भाष्येति । ग्रामे इति ।** भव इति शेषः भवो दैवदत्त इत्यत्रेत्त्यर्थः । अत्र कुणिमताश्रयणे शैषिकेष्वित्यस्य वैयर्थ्यं, व्यवस्थितविभाषयैव सिद्धेरतो अन्यमताश्रय ..... । इति । एतावत्येव मातृका उपलब्धा ।

अत्र मातृकायां ५२ पृष्टे प्रथमाह्निकान्ते ग्रन्थसंख्या १३२१ श्रीसंवत् १८४६ डेहरवीनायक ग्राममण्डली इति उपलभ्यते । अनेनास्याः मातृकायाः रचनाकालः स्पष्टं विदितं भवति । १८४६

श्रीसंवत् इति विक्रमाब्दः प्रकृते निबद्धः । विक्रमाब्दस्य क्रिस्तशके यदा परिवर्तनं क्रियते, तदा १७८९ A.D. इति कालः भवति । प्रभाकरस्य वैद्यनाथस्य कालस्तु सप्रमाणं १७३०-१८२० A.D. इति सप्रमाणं पूर्वं निरूपितः । किञ्च मञ्जूषाव्याख्यायाः कलायाः निर्माणसमयः १८५२ वैक्रमाब्दः (१७९६ A.D.) इत्यपि पूर्वं निरूपितम् । इत्थञ्च इयं मातृका पायगुण्डे वैद्यनाथोपाध्यायस्य समकालीना इति निश्चयेन वक्तुं शक्यते । उपलब्धासु मातृकासु इयमत्यन्तं प्राचीना । अत एव प्रकृतशोधकाले इयं मातृका **कपाठ** इति निर्दिष्टा ।

यद्यपि इयं मातृका पायगुण्डे वैद्यनाथसमकालीनाऽपि तेनैव विरचिता इति वक्तुं न शक्यते । यतः प्रकृतमातृकायां क्वचित्स्थले पङ्क्तयः लुप्ताः - क्वचिच्च वाक्यानां पूर्वापरीभवः - क्वचिच्चासम्बद्धलेखनं - कुत्रचित् (प्रत्याहाराह्निके) अष्टादशपत्राणि लेखकेन अलिखितानि इत्यादयो अनिर्वचनीयाः दोषाः सन्ति । तथापि मातृकान्तरसहायेन शुद्धसंस्करणार्थं प्रयत्नःविहितो वर्त्तते । इयं मातृका प्रथमाध्याये - प्रथमपादे 'वृद्धिर्यस्याचामादिस्तद्वृद्धम्' इति सूत्रकौस्तुभव्याख्यानपर्यन्तमेव, उपलब्धा 'त्यदादीनि च' (पा०सू० १-१-७४) 'एङ्प्राचां देशे' (पा०सू० १-१-७५) इति सूत्रद्वयस्य व्याख्यानं त्वस्यां नोपलभ्यते ।

मातृकास्वरूपं तु - Pages 1-332 + 2 Folios, 32.5 × 13 cms. 11 lines in a page. 68 letters per line. Devanagari script. Good writing. Inc. upto 1st Adhaya 1st Pada Colophon - दशोत्तरशततमे पृष्टे - इति श्रीमत्पायगुण्डोपाख्य वेणीगर्भजमहादेवसुतवैद्यनाथकृते कौस्तुभव्याख्याने प्रभाभिधे प्रत्याहारह्निकं परिपूर्णम् ।। इति ।

२. खमातृका

यदा मया एषा कौस्तुभप्रभा संशोधयितुं २००९ डिसंबर् मासे प्रारब्धा, तदा मत्सकाशे तिस्रः मातृका आसन् । एका मैसूरुप्राच्यविद्यासंशोधनालयस्य पूर्वनिर्दिष्टा । द्वितीयापि पूर्वोक्तसंशोधनालयस्यैव तेलगुलिपिस्वरूपा । तृतीया B.O.R.I संस्थातः प्रतिकृतीकृता । सार्धैकवर्षपर्यन्तं एता मातृका अवलब्म्य कार्यं प्रवृत्तम् । परन्तु कार्यस्यान्तिमकाले महान् कष्टः सम्प्राप्तः । यतः तिसृषु मातृकासु द्वितीयायां तृतीयायां च प्रथमाह्निकभागपर्यन्त एव दृश्यते । प्रथमा च यद्यपि सम्पूर्णा अस्ति, परन्तु अशुद्धिबहुला । तदानीं मया अन्तर्जालमध्ये (Internet) यत्र कुत्रापि अन्या मातृका लभ्यते वा इति अन्वेषणं (Search) कृतम् । तदा इयं खमातृका India

Office Library मध्ये अस्तीति ज्ञातम् । लण्डन्नगर्यां विद्यामानाया अस्या मातृकाया आनयनं कथमिति विचारे प. वीरनारायणाचार्य पाण्डुरङ्गीमहोदयाः मां साहाय्यमकुर्वन् । मातृका च प्राप्ता ।

अस्याः मातृकायाः सहायेन यत्र यत्र कमातृकायां पङ्क्तिपातः - पूर्वपरीभावः - ग्रन्थपातः - इत्येवं कष्टमनुभूतं तत्सर्वमपहस्तितम् । इयं च मातृका आरम्भतः सप्तमाह्निकपर्यन्तमस्ति । अस्या मातृकायाः **'खपाठ'** इति नाम्ना प्रकृतशोधप्रबन्धे निर्देशः कृतः । India Office Library मध्ये मातृकास्वरूपमित्थं निर्दिष्टम् -

610. 399. Foll 252, Size 12 1/4 in. by 4 1/2 in. Written by four or five different hands. Devanageri character. 10-13 lines in a page, prabha a commentary on Bhattoji's Shabdakaustubha, by Vaidyanatha Payagunda, son of Mahadeva and Veni, and pupil of Nageshabhatta.

It begins

आनन्दकन्दं मुनिहृन्मिलिन्दं स्वच्छन्दगोविन्दपदारविन्दम् ।
वन्दे सुरेन्द्रादिमुदादिदं तद्दीनादिशंदं रविनन्दनन्दम् ॥ १ ॥

वैद्यनाथः पायगुण्डो नत्वा नागेश्वरं गुरुम् ।
व्याख्यां प्रभाख्यां तनुते कौस्तुभस्य स्वबुद्धये ॥

प्रारिप्सित ग्रन्थनिर्विघ्नपरिसमाप्त्यर्थं कृतं भगवदादिनत्यात्मकं मङ्गलं शिष्यशिक्षायै व्याख्यातृश्रोतृणामनुषङ्गतो मङ्गलाय च निबध्नाति । विश्वेशमित्यादिना ॥

Ahnika 1 ends fol. 66 इति श्रीमन्महादेवसुत वेणीगर्भजपायगुण्डोपाख्यवैद्यनाथ-विरचितकौस्तुभव्याख्यायां प्रभाख्यायां प्रथममाह्निकं समाप्तं सम्पूर्णम् । [Pratyahasa] Ahnika 2, ends fol. 116. 3 fol 164, 4.fol 197, 5 fol. 220, 6. fol 242 (Dated 1947) 7 fol. 2526. (H.T. Colebrooke)

यत्र यत्र कमातृकायां पाठ लुप्तः, तत्र सर्वत्रानया मातृकया लोपपरिपूर्णता आसाधिता । कुत्रचित् स्थलेऽत्रापि त्रुटिः वर्त्तते, तत्र च ग्रन्थाकारस्य व्याख्यान्तरसहायेन कुत्रचित् पूरणं कृतम्, कुत्रचिच्च '.....' इति ' ? ' इति चिह्नेन च निर्दिष्टम् । खमातृकोपलब्धपाठादिकं त्रुटिपरिपूरणादिकं च तत्र तत्र पादान्तटिप्पण्यां सान्दर्भिकतया निविष्टमस्ति ।

अत्रापि मातृकायां षष्ठाह्निकान्ते पृ.सं. २४२ मध्ये संवत् १८४७ शके १७११ मिते ज्येष्टशुद्ध ११ इति उपलभ्यते । अनेनापि अस्या मातृकाया अपि रचनाकालः सुविदितो भवति ।

१८४७ इति विक्रमाब्दस्य क्रिस्तशकाब्दे यदा परिवर्तनं क्रियते, तदा १७९० A.D. इति कालः शालिवाहनशकस्य क्रि.शके परिवर्तनं क्रियते चेत् १७८९ A.D. इति काल भवति । अतः उभयोः मेलनं न भवति । मम तु भाति - अत्र लेखकेन '१७१२' इति लेखनीये '१७११' इति लिखितमिति । तदानीं कालः समीचीनतया संयोजितो भवति । इयमपि मातृका वैद्यनाथसमकालीना, परन्तु पूर्वमातृकातः संवत्सरपरिमिता अर्वाचीना ।

३. गमातृका

(B.O.R.I) Bhandarkar Oriental Research Institute द्वारा प्राप्ता मातृका प्रथमाह्निकपर्यन्तमेव लभ्यते । इयं **गपाठः** इति नाम्ना प्रकृते व्यवहृता ।

४. घमातृका

मैसूरुप्राच्यविद्यासंशोधनालयतः स्वीकृता तेलगुलिप्यात्मिका नितान्तं शुद्धा । परन्तु इयं मातृका प्रथमाह्निके त्रिंशत्पत्रात्मिका एव वर्तते ।। इयं **घपाठ** इति प्रकृते व्यवहृता ।

०.७ शब्दकौस्तुभप्रभायाः वैशिष्ट्यम्

शब्दकौस्तुभस्य सत्स्वपि बहुषु व्याख्यानग्रन्थेषु, ते न तावदुपकर्तुं प्रभवन्ति, यावदनया व्याख्यायोपक्रियते इति तु न रिक्तं वचः । प्रभायां समुचिता समन्वयरीतिः, विमर्शनीयांशेष्वतिगभीरा विमर्शनपद्धतिः । सुनिपुणा प्रमाणप्रदर्शनसरणिः, सुबोधो ग्रन्थरचनामार्गः । किं बहुना, ये गुणाः व्याख्यानग्रन्थेष्वभिलषणीयाः ते सर्वेऽपि साकल्येनात्र विद्यन्त इत्युक्तिः स्वभावोक्तिर्भवितुमर्हति । एवंविधविशेषपर्यालोचनायामेतद्ग्रन्थकर्तुरसाधारणं पाण्डित्यमिति सर्वेषां सुव्यक्तमेव । यदा यदा सुनिपुणं विमृश्यतेऽयं ग्रन्थः, तदा तदा ग्रन्थकर्तुः पाण्डित्यातिशयः प्रकर्षमाप्नोतीत्यत्र न कोऽपि संशीतिलेशः । एतादृशग्रन्थरचनया पाणिनीयस्याध्येतृणामध्यापकानां च बहूपकृतं ग्रन्थकृतेति सर्वेऽपि कृतज्ञतामावेदयन्तीति मदीयो दृढविश्वासः । तस्मात् सर्वं व्याख्यानं वैशिष्ट्यपूर्णमेव, तथापि कानिचित् वैशिष्ट्यान्यत्र प्रदर्श्यन्ते ।

०.७.१ समुचिता समन्वयरीतिः

प्रभाया अनितरसाधारणं वैशिष्ट्यं यत्र यत्र कौस्तुभपङ्क्तेः क्लिष्टता दुर्बोधता वा तत्र पदं पदमविहाय समन्वयप्रदर्शनम् । यथा - असन्देहप्रयोजननिरूपणावसरे 'तदेवं रक्षोहागम' इत्यादिकौस्तुभस्य इत्थं समुचितपदपदार्थनिरूपणपरं व्याख्यानम् - ''तदेवमिति ।

तस्मादुक्तरीत्येत्यर्थः । फलानि = फलफलानि । इत्युक्तं = इति हेतोः पृथग्व्याख्यानसहितं पूर्वं कथितम् । नन्वेवमुक्तभाष्यमसङ्गतं स्यादत आह । **भाष्ये त्विति ।** सन्दर्भो = रचना । फलचतुष्टयस्य रक्षोहादेः उक्तेरिति शेषः । यथाश्रुतेऽनुपपत्तिः स्पष्टैव । प्रवर्त्तके = आगमे । मध्ये = अर्थात्फलद्वयद्वययोः । तदुक्त्या = आगमोक्त्या, फलसन्दंशेन = संदंशवदुभयतः फलसम्बन्धेन । नित्यानां = संध्यावन्दनव्याकरणाध्ययनादीनां । फलपर्यवसानं = पर्यवसितफलकत्वम्'' इति । एषा शैली ग्रन्थकारस्यात्रैव इति न, किन्तु सर्वत्र शेखरादिव्याख्याग्रन्थेषु च । अत एव वैद्यनाथोपाध्यायस्य व्याख्या सर्वैराद्रीयते लोके विश्रुता च ।

०.७.२ अतिगभीरा विमर्शनपद्धतिः

स्वगुरुनागेशभट्टवत् वैद्यनाथ पायगुण्डेमहोदयानां विमर्शनपद्धतिर्निंतान्तं मुदावहा अतिगभीरा च । प्रभाया अयं स्वभावः पदार्थप्रकाशनं अन्धकारविनाशनञ्च । प्रकृतग्रन्थे एतदुभयमपि सुस्पष्टमवलोकयतां सुजनानाम् । तद्यथा -

'पञ्च पञ्च नखा भक्ष्या' इति परिसंख्योदाहरणतया कौस्तुभे[१] प्रतिपादितम् । अत्र प्रभायां कौस्तुभाभिप्रायः सम्यक् प्रतिपादितः - ''अयं भावः । पञ्च पञ्च नखा भक्ष्या इति वाक्यं न भक्षणापूर्वविधिपरम् । तस्य रागतः प्राप्तत्वात् । नापि नियमविधिपरम् । पञ्च पञ्चानखा-पञ्चनखभक्षमस्य युगपत्प्राप्तिसम्भवेन पक्षप्राप्त्यभावात् । अत एवेदमपञ्चपञ्चनखभक्षणनिवृत्तिपरमिति भवति परिसंख्याविधिः । सा च द्विविधा श्रौती लाक्षणिकी चेति ''इत्यादिना मुदावहा पदार्थप्रकाशनरूपविमर्शनशैली ।

२. अत्रैव व्याख्यासमये दिगर्थप्रदर्शनव्याजेन कौस्तुभकारमतस्य 'वस्तुतस्तु इदमयुक्तम्' इत्यादिना गुरुचरणपथा अयुक्तत्वप्रतिपादनं विमर्शकानामयस्कान्तवदाकर्षकमस्ति ।

३. एवं मङ्गलपद्ये 'चरीकर्त्ति बरीभर्त्ति सञ्चरीहर्ति लीलया' इत्यस्य व्याख्यानावसरे - 'वस्तुतस्तु चिन्त्यमिदम् । भाषायां यङ्लुकः सार्वत्रिकत्वस्य भाष्याद्यनिष्टत्वादित्यग्रे वक्ष्यामः' इति कौस्तुभमतपरामर्शः ।

४. असकृत् कौस्तुभखण्डनार्थं प्रवृत्तस्य रत्नप्रकाशकारस्य शिवरामेन्द्रसरस्वतीयोगिन, तथा, प्रवर्त्तकोपाध्यस्य, महाभाष्यसिद्धान्तरत्नाकरकर्तुः नारायणस्य मतं तत्र तत्र परीक्षितम् । पृष्टभागप्रदानपूर्वकं स्पष्टीकृतमिदं तत्रैव अधिष्टिप्पण्याम् ।

०.७.३ परमताशयविवरणम्

शब्दकौस्तुभे तत्र तत्र नैयायिकानां - मीमांसकानां - वेदान्तिनां च मतस्यानुवादः प्रक्रान्तः। तदाशयस्तु 'अयं भाव' इत्यादिना छात्रोपयोगितया सम्यक् निरूपणमप्यपरं वैशिष्ट्यमस्या तद्यथा-

शब्दकौस्तुभे प्रयोजनप्रपञ्चे - ''एतेन 'पचति' इत्यादौ आदेशैः स्मर्यमाणा लडादयो बोधका इति वदन्तः परास्त'' इति नैयायिकमतपरीक्षा कृता । अत्र नैयायिकानामाशयः प्रभायां सुष्ठु निरूपितः – ''अयं हि तेषां भावः । तिबादयो न बोधकास्तेषां बहुत्वेन शक्त्यानन्त्यापत्तेः । एधाञ्चक्रे इत्यादावादेशभूतलुगादेरभावरूपस्य बोधकत्वासम्भवाच्च । आदेशानां भिन्नतया मिथो व्यभिचाराच्च । लःकर्मणीत्याद्यनुशासनाननुगमाच्च । न ह्यादेशेषु अर्थबोधकमन्यदनुशासनमुपलभामहे। किन्तु तैः स्मृता लादयस्तथा लत्वस्य जातिरूपतया शक्तावच्छेदकत्वौचित्यात्। अव्यभिचाराच्च । न च भूल इत्यतोऽपि बोधः स्यादिति वाच्यम् । बोधे भवतीति समभिव्याहारस्य कारणताया भूति वेत्यतो बोधापत्तिवारणाय तवाप्यावश्यकत्वेनादोषात्'' इति ।

०.७.४ प्रामाणिकत्वस्फोरकमतिनिपुणं प्रमाणप्रदर्शनम्

इदमप्यपरं वैशिष्ट्यं प्रभायाः स्वोक्तार्थे सिद्धान्तभूते अतिनिपुणतया प्रामाणिकभाष्याद्याकारग्रन्थप्रदर्शनम् । तदत्र द्वित्राः प्रदर्श्यन्ते ।

१. ओमाङोश्च इति सूत्रे आङ्ग्रहणस्य 'अन्तरङ्गबहिरङ्गयोरन्तरङ्गं बलीय' इत्यर्थज्ञापकत्वे 'धातूपसर्गकार्यान्तरङ्गताज्ञापकत्वे च 'सम्प्रसारणाच्च' (६-१-१०८) इति सूत्रभाष्यं प्रमाणमिति 'न धातुलोप' सूत्रे प्रतिपादनम् ।

२. 'सार्वधातुकादेशे अनुबन्धा न स्थानिवद्भवन्ति' इति विषये 'हलःश्नः' इति सूत्रभाष्यं प्रमाणमिति 'क्ङितिच' इति सूत्रे निरूपणम् ।

३. 'अङ्गवृत्ते पुनर्वृत्तावविधिः' इति परिभाषायां 'ज्ञाजनोजः' (७-३-७९) इति सूत्रभाष्यं प्रमाणतया 'क्ङिति च ' इति सूत्रव्याख्याने निरूपणम् ।

४. 'स्वरप्रवृत्तेः पूर्वमन्तरङ्गस्याप्येकादेशस्याप्रवृत्तिः' इति 'यद्धितुपरं छन्दसि' सूत्रभाष्यदिशा निरूपणम् ।।

०.७.५ शब्दकौस्तुभप्रभायाः तथा वैद्यनाथकृतेतरग्रन्थानां पूर्वापरीभावः

पूर्वं वर्णितदिशा पायगुण्डवैद्यनाथेनानेके ग्रन्था विरचिताः विराजन्ते । प्राचीनकालादारभ्य इयमप्यस्ति पद्धतिः यत्स्वविरचितग्रन्थान्तराणां ग्रन्थान्तरे उल्लेखरूपा - एवमन्यत्र संक्षेपेण कथितस्य ग्रन्थान्तरे विस्तृतरूपेणकथनमित्यादि । प्रकृतप्रभाव्याख्यायमपि स्वेनैव रचितानामनेकेषां ग्रन्थानां नामनिर्देशपूर्वकमुल्लेखः अस्ति । यद्यपि प्रभायां स्वविरचितग्रन्थान्तरोल्लेखे सति प्रभायाः अर्वाचीनता, ग्रन्थान्तराणां प्राचीनता इति स्पष्टमिति ज्ञायते, तथापि प्रभायामुल्लिखितग्रन्थान्तरेष्वपि प्रभाया उल्लेखोऽस्ति । अतः कः पूर्वः कः पर इति संशयो भवति, तदर्थमियं विचारणा आरभ्यते । अत्र प्रभाव्याख्यायां स्वविरचिताः - छाया, चिदस्थिमाला, गदा, पाषण्डखण्डनं, रप्रत्याहारखण्डनं, भावप्रकाशः एते ग्रन्थाः उल्लिखिताः ।

०.७.५.१ शब्दकौस्तुभप्रभा तथा भाष्यप्रदीपोद्योतच्छाया

शब्दकौस्तुभप्रभायां पञ्चविंशतिवारं छायायाः उल्लेखो विद्यते । छायायां तु पस्पशाह्निके एकत्रैव प्रभायाः उल्लेखः विद्यते । अतः प्रकृते संशयः कः पूर्वः कः परः इति

०.७.५.२ शब्दकौस्तुभप्रभा तथा चिदस्थिमाला

प्रभायां शेखरव्याख्यायाः चिदस्थिमालायाः द्वित्रिस्थलेषु उल्लेखो विद्यते । चिदस्थिमालायामपि संयोगसंज्ञासूत्रे अनुनासिकसंज्ञाकूत्रे च प्रभाया उल्लेखो अस्ति । अतः प्रकृतेऽपि कः पूर्वः कः पर इति निर्णेतुं दुःशकम् ।

०.७.५.३ शब्दकौस्तुभप्रभा तथा परिभाषेन्दुशेखरगदा

शब्दकौस्तुभप्रभायां चतुर्थाह्निके गदायाः द्विवारमुल्लेखोऽस्ति । गदायां तु प्रभाया उल्लेखो न दृष्टचर इति प्रभापेक्षया गदायाः प्राचीनत्वं निश्चेतुं शक्यते ।

०.७.५.४ शब्दकौस्तुभप्रभा तथा भावप्रकाश-पाषण्डखण्डन - रप्रत्याहारखण्डनानि

प्रभायां शब्दरत्नभावप्रकाशस्य षोडशवारमुल्लेखः अस्ति । एवं रप्रत्याहारखण्डनस्य प्रभायां चतुर्वारमुल्लेखः, पाषण्डखण्डनस्य एकधा उल्लेखः विद्यते । भावप्रकाशेऽपि तत्र तत्र प्रभायाः उल्लेखः अस्ति । किञ्च भावप्रकाशे शेखव्याख्याया गदायाः चिदस्थिमालायाः, तथा छायायाः रप्रत्याहारखण्डनस्य चोल्लेखः अस्ति । एतासु व्याख्यास्वपि भावप्रकाशस्योल्लेखो अस्ति । तस्मात् कथमत्र निर्णय इति चेत् -

इत्थमत्र भाति । प्रभाकर्त्रा वैद्यनाथेन प्रथमं सर्वे ग्रन्थाः विरचिताः । अनन्तरं परिशेधनकाले संक्षेप-विस्तारानुगुणं तत्तन्नाम तत्र तत्र ग्रन्थे निवेशितवानिति ।

०.७.६ प्रतीकग्रहणम्

अत्र व्याख्यायां प्रतीकग्रहणावसरे 'प्राथमिकेति' इति ग्रहणे कर्तव्ये 'प्राथेति' इत्यादि रूपेण प्रतीकग्रहणं सर्वासु मातृकासु विद्यते । एवं पटविभाजकोपाधिकेत्यस्य 'पटविभाजकोपेति' इत्यादिरूपेण । एवं प्रतीकग्रहणं वैयाकरणग्रन्थेषु प्रदीपादिव्याख्याभूतेषु तथा शेखरादिव्याख्यासु च दृष्टम् । एवं प्रतीकग्रहणे मानं तु पाणिनिसूत्रम् । पाणिनिना हि 'प्राग्रीश्वरान्निपाता' (पा०सू० १-४-५६) इति सूत्रे 'अधिरीश्वरे' (पा०सू० १-४-९७) इति सूत्रस्थरीश्वरशब्दमभिन्नव्याप्य निपाता इत्यधिक्रियते इत्युक्तम् । तत्र प्रागीश्वरादिति वक्तव्ये रीश्वरेति ग्रहणमेव ज्ञापकमीदृशप्रतीकग्रहणे । न हि रीश्वरेति शब्दः दृष्टः । तथापि तद्ग्रहणेन तावत्सूत्रावधिक अधिकार इति सिद्ध्यति । एवमेमोदिष्टपमस्य सूचनार्थं एवरीत्या प्रतीकग्रहणमिति न कोऽपि दोषः ।

०.७.७ अपूर्वग्रन्थोल्लेखः

इदमप्यपरं वैशिष्ट्यमस्या व्याख्याया यदेतावत्पर्यन्तं अश्रुतपूर्वा अनेका अप्रकटिता ग्रन्था उल्लिखिताः । यथा –

१. ऐकश्रुत्यवाद इति नागेशभट्टविरचितः ।

२. पाषण्डखण्डनं इति स्वेनैव रचिता पिष्टपशुमीमांसासमर्थनपरा ।

३. कौस्तुभपूरणं इति नागेशविरचितः ।

०.७.८ पाठान्तरोल्लेखः

शब्दकौस्तुभप्रभायां यद्यपि अनेकानि पाठान्तराणि प्रदत्तानि । क्वचिच्च 'सोऽयमपपाठ' इत्यादिना प्रदर्शितानि च । तथापि मया सम्पादनार्थं स्वीकृते शब्दकौस्तुभमुद्रितपुस्तके प्रभासम्मत एव पाठः प्रायः निविष्ट इति तदत्र पृथग् नोल्लिखितम् । परन्तु प्रत्याहाराह्निके अयोगवाहानां शर्षु पाठविवरणावसरे मुद्रितपुस्तकेऽनुपलब्धानि कानिचन प्रतीकानि गृहीत्वा व्याख्यातम् । अत्र मूलमन्वेषणीयमस्ति ।

०.७.९ विशिष्टव्याख्यानोदाहरणानि

'अथ शब्दानुशासनम्' इत्यस्य विषयपरव्याख्यानम्

उपसर्गद्योतकत्व-वाचकत्वविचारः

द्योतकत्वपरिष्करणम्

नागेशसम्मताथशब्दवाचकत्वसमर्थनम्

लकाराणां कर्तरि कर्मणि च शक्तिसाधनम्

जञभ्यमानाधिकरणे मीमांसकोक्तमतनिराकरणम्

अष्टविधस्फोटस्वरूपनिरूपणम्

ऊहप्रयोजनावसरे कैयटमतनिरासः

साधुत्वनिर्वचनम्

हयवरट्सूत्रे हकारस्य द्विरुपदेशे फलम्

अयोगवाहेषु अनुस्वारांशे भाष्याद्यनुक्तं फलम्

वृद्धिरादैच् सूत्रे कुत्वाभावसमर्थनम्

इको गुणवृद्धी इत्यस्य तच्छेषत्वसमर्थनम्

'न धातुलोप' सूत्रे नाजानन्तर्यपरिभाषाविचारः

'नाजानन्तर्य' परिभाषायाः सीरदेवाद्युक्तार्थनिरासः

'दीधीवेवीटाम्' सूत्रे सीरदेवाद्युक्तार्थनिरासः

'तुल्यस्यसूत्रे' स्थानप्रयत्नविवेके विशिष्टं व्याख्यानम्

'ईदूतौ च सप्तम्यर्थे' इति सूत्रे अर्थग्रहणप्रयोजनम्

'सर्वादिसूत्रे' तद्गुणसंविज्ञानबहुव्रीहिशब्दार्थः

उभयशब्दविचारः

'स्वमज्ञातिधनाख्यायाम्' इति सूत्रे प्रकाशकारमतनिरासः

०.८. उपसंहारः

यश्च व्याकुरुते वाचं यश्च मीमांसतेऽध्वरम् ।
तौ पुण्यौ पुण्यकर्माणौ पङ्क्तिपावनपावनौ ।।

इति मनुस्मृत्युक्तदिशा, तथा

यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम् ।
स्वजनः श्वजनो मा भूत् सकलं शकलं सकृत् शकृत् ।।

इति सुभाषितकारवचनेन च व्याकरणमवश्यमभ्यसनीयं सर्वैः । तत्रापि भारतीये भूभागे जन्म लब्ध्वा साङ्गं वेदाध्ययनं वेदाध्यापनं न क्रियते चेत् तस्य जन्मैव व्यर्थम् । अतः वेदाध्ययनार्थमङ्गानि आवश्यकानि । तत्रापि मुखस्थानीयत्वेन व्याकरणस्य प्राधान्यात् अवश्यमध्येयं व्याकरणम् । अत एवास्मत्प्राचीना व्याकरणाध्ययनस्येतरापेक्षया महत्वमप्रकटयन् ।

०.९ व्याकरणज्ञानाय अवश्यमाचरणीया अंशाः

मया व्याकरणशास्त्रसम्बन्धिनोऽस्य ग्रन्थस्य सम्पादनाय पौनःपुण्येन व्याकरणग्रन्था अधीताः । तदा एते अंशा व्याकरणज्ञानाय अवश्यमाचरणीया इति भातम् ।

* अष्टाध्यायी कण्ठस्थीकरणीया ।
* न्यूनातिन्यूनं सम्पूर्णा सिद्धान्तकौमुदी पठनीया ।
* एतदर्थं समर्थं ज्ञानिनं गुरुं समाश्रयेत
* कौमुदीपठनात् पूर्वं कानिचन महाकाव्यानि अभ्यसनीयनि
* एतदनुकूलाः संस्काराः बाल्यादेव प्ररोहणीयाः ।

०.१० अन्तिमनिवेदना

अन्ते इदं व्याहर्तुमभिलषामि, व्याकरणशास्त्रसम्बन्धिनः श्रीभट्टोजिदीक्षितरचितग्रन्थस्य व्याख्यायाः यत्सम्पादनावकाशः लब्धः स व्याकरणशास्त्रे मम इतोऽप्यतिशयज्ञानार्थं प्राप्तः सुवर्णावकाशः, एषोऽपि मद्गुरुवर्याणां अनुग्रहविशेषप्रापकः । विद्वद्विद्यार्थिसमुदाये श्रीभट्टोजिदीक्षितानां स्थानं सुमहत्, तेषामुपकारः न केनापि विस्मर्तुं शक्यते । तेषां शिष्यकोटिप्रविष्टस्य **वैद्यनाथ पायगुण्डेमहोदयस्य** अभूतपूर्वं व्याख्यानं सम्पादितमिति महतः प्रमोदस्य कारणम् । अत्र कर्मणि यथाशक्ति प्रयत्नो विहितः । इति शम् ।।

———

संक्षिप्तनामसूची

अ.को.	अमरकोशः
ऋ.प्र.	ऋग्वेदप्रातिशाख्यम्
का.वृ.प.	काशिकावृत्तिपदमञ्जरी
का.वृ.न्या.	काशिकावृत्तिन्यासः
का.प्र	काव्यप्रकाशः
जै.सू.	जैमिनिसूत्राणि
तत्रा.वा	तन्त्रवार्तिकम्
तै.सं.	तैत्तिरीयसंहिता
राणकः	तन्त्रवार्तिकन्यायसुधा
पा.सू.	पाणिनिसूत्राणि
पा.शिक्षा.	पाणिनिशिक्षा
परि.शे.	परिभाषेन्दुशेखरः
परि.शे.ग.	परिभाषेन्दुशेखरगदा
पू.मी.शा.भा.	पूर्वमीमांसाशाबरभाष्यम्
प्रौ.म.	प्रौढमनोरमा
प्रौ.म.श.	प्रौढमनोरमाशब्दरत्नं
प्रौ.म.श.भा.	प्रौढमनोरमाशब्दरत्नभावप्रकाशः
प्र.कौ.प्र.	प्रक्रियाकौमुदीप्रकाशः
बृ.वै.भू.	बृहद्वैयाकरणभूषणम्
बृ.परि.	बृहत्परिभाषावृत्तिः
ब्र.सू.शा.भा.	ब्रह्मसूत्रशाङ्करभाष्यम्
भाग.	भागवतम्
म.भा.	महाभाष्यम्

म.भा.प्र.	महाभाष्यप्रदीपः
म.भा.प्र.उ.	महाभाष्यप्रदीपोद्योतः
छाया	महाभाष्यप्रदीपोद्योतछाया
म.भा.प्र.प्रका.	महाभाष्यप्रदीपप्रकाशः
म.भा.प्र.वि.	महाभाष्यप्रदीपविवरणम्
र.प्र.	महाभाष्यरत्नप्रकाशः
यजु.भा.	यजुर्वेदभाष्यम्(सायणकृतम्)
या.स्मृ.	याज्ञवल्क्यस्मृतिः
रप्र.ख.	रप्रत्याहारखण्डनम्
ल.परि.	लघुपरिभाषावृत्तिः
ल.म.	लघुमञ्जूषा
ल.म.क.	लघुमञ्जूषाकला
ल.शे.	लघुशब्देन्दुशेखरः
ल.शे.चि.	लघुशब्देन्दुशेखरचिदस्थिमाला
वा.प.	वाक्यपदीयम्
वा.प.हे.	वाक्यपदीयहेलाराजीयम्
वा.रा.	वाल्मीकिरामायणम्
वै.सि.कौ.	वैयाकरणसिद्धान्तकौमुदी
श.ब्र.	शतपथब्राह्मणम्
श.कौ.	शब्दकौस्तुभः
शा.भा.	शाङ्करभाष्यभामती
श्लो.वा.	श्लोकवार्तिकम्
सू.रत्न.	सूक्तिरत्नाकरः
सं.व्या.शा.इ.	संस्कृतव्याकरणशास्त्र का इतिहास
IOL	India Office Library

श्रीशब्दकौस्तुभे तृतीयाह्निकम्

वृद्धिरादैच् (पा०सू० १-१-१) आकार ऐकार औकारश्च वृद्धिसंज्ञः स्यात्। संज्ञाप्रदेशा ''वृद्धिरेचि'' (पा०सू० ६-१-८८) इत्यादयः। तदुदाहरणमेवास्याप्युदाहरणं बोध्यम्। इहाच्च ऐच्चेतीतरेतरयोगद्वन्द्वः ''सुपां सुलुक्'' (पा०सू० ७-१-३९) इति सुलुग्वा। अथवा समाहारे द्वन्द्वः। न चैवं ''द्वन्द्वाच्चुदषहान्तात्'' (पा०सू० ५-४-१०६) इति टच् स्यादिति वाच्यं, समासान्तविधेरनित्यत्वात्। अत्र ज्ञापकं तु द्वित्रिभ्यां ष मूर्ध्नः'' (पा०सू० ५-४-११५) इति षविधानम्। तद्धि ''बहुव्रीहौ सक्थ्यक्ष्णोः'' (पा०सू० ५-४-११३) इति षचि प्रकृतेऽपि क्रियते। षचश्चित्त्वसामर्थ्याज्जायमान-मन्तोदात्तत्वं बहुव्रीहित्वप्रयुक्तं पूर्वपदप्रकृतिस्वरं यथा बाधते तथा ''द्वित्रिभ्यां पाद्दन्मूर्धसु

---

३. तृतीयमाह्निकम्

३.१ समासान्तविधेरनित्यत्वविचारः

वृद्धिरादैच्। स्पष्टार्थं वृत्तिमाह। **आकार इति।** गामश्वमिति वत्समुच्चयप्रतीतेराह। **औकारश्चेति। प्रदेशा इति।** स्थानानीत्यर्थः। तेन व्यवहारवन्त इति यावत्। तदेवाह। **तदुदेति।** 'पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना। आक्षेपश्च समाधानं व्याख्यानं षड्विधं स्मृतं' इत्यभियुक्तोक्तेरादौ पदविभागो वाच्यः। तत्र कैयटीयाः पदद्वयं मन्यन्ते। अयं हि तेषामाशयः। अत्र पदत्रयाङ्गीकारे उद्देश्यानेकत्वाद्बुद्धिशब्दस्यावृत्तिर्वाक्यार्थबोधाय कार्या स्यात्। तथा च वाक्यभेदापत्तिः। वक्तुस्तन्त्रसम्भवेऽपि श्रोतुरत्र तन्त्रेणानिर्वाहात्। गामश्वमिति वत् क्रमेणान्वयबोधे तात्पर्यात्। एतेन तथा **कृष्णो**क्तमपास्तम्। द्वन्द्वे तु समाहारस्यैकस्योद्देश्यस्य शब्दतो लाभसम्भवात्तां विनापीष्टं सिद्ध्यतीति। तदनुरोधेनाह। **इहेति।** सूत्र इत्यर्थः। तत्रापि सूचीकटाहन्यायेन दुष्टत्वेन चादावाह। **इतरेतरेति।** नन्वेवं बहुवचनस्य द्विवचनस्य वा श्रवणापत्तिरत आह। **सुपामिति।** सोर्हल्यादिलोपे गौरवमिति ततो लाघवादाह। **लुग्वेति।** विनिगमनाविरहाच्छन्दोवत्सूत्राणीत्यस्यागतिकगतित्वेनात्रान्यथानिर्वाहेणाप्रास्या तस्य छान्दसत्वा-च्चाह। **अथ वेति। न चैवमिति।** समाहारद्वन्द्वस्वीकार इत्यर्थः। तथा चादैचमिति भाव्यमिति भावः। **अत्र** प्रक्रान्ते तदनित्यत्वे। तत्रादौ **नारायणा**द्यनुरोधेनाह। **द्वित्रिभ्यामिति। तद्धीति।** षविधानं हि। ततस्तस्मिन् प्रकृतेऽप्येवमर्थं क्रियत इत्यर्थः द्विमूर्द्ध इत्यादाविति भावः। **पूर्वपदेति।**

बहुव्रीहौ'' (पा०सू० ६-२-१९७) इति विधीयमानमन्तोदात्तत्वविकल्पं मा बाधिष्टेत्येवमर्थम्। तच्च ''द्वित्रिभ्याम्''(पा०सू० ६-२-४३) इत्यस्य क्वचिल्लब्धावकाशत्वे सत्येव सङ्गच्छते, न त्वन्यथा। अवकाशश्च समासान्तानामनित्यतायां सत्यामेव लभ्यते। 'त्रिमूर्द्धानं सप्तरश्मिं गृणीषे' इति यथा। तस्मात्षप्रत्ययविधानं ज्ञापकमिति स्थितम्। तथा ''द्वित्रिभ्याम्'' (पा०सू० ६-२-१९७) इति सूत्रे बहुव्रीह्यग्रहणमपीह ज्ञापकम्। अन्यथा

बहुव्रीहौ पूर्वपदमिति विहितमित्यर्थः। **मा बाधीति।** बाधे तु नित्यान्तोदात्तत्वेन भाव्यमिति पक्षे पूर्वपदप्रकृतिस्वरासिद्धिरिति भावः। **तच्च** तदर्थकरणं च। **द्वित्रीति।** अन्तोदात्तत्वविकल्पस्येत्यर्थः। **न त्वन्यथेति।** तदचारितार्थ्ये इत्यर्थः। तदा हि निरवकाशत्वान्मूर्द्धन्शब्दविषयकान्तोदात्तत्वविकल्पः, एवं पूर्वपदस्वरबाधकचित्स्वरं चोचितेति पक्षे फलाभावात्तद्वैयर्थ्यापातात्तावत्तदप्रवृत्तौ पूर्वपदप्रकृतिस्वरसिद्धिरिति तद्विधानं व्यर्थमेव स्यादिति भावः। **सत्यमेवेति।** अन्यथा षच्यपि विकल्पः प्राप्तविभाषारूपेण चित्स्वरं बाधिष्यते, स्वस्य विषयान्तराभावादिति तदानर्थक्यमेवेति भावः। **लभ्यत इति।** एवञ्च स्वरूपसमासान्तपक्षेऽपि विकल्पो भवत्येव। समासान्ता लौकिकप्रकृत्या वाक्यावयवत्वेन मूर्द्धनित्यस्योत्तरपदत्वस्य सत्वेन ताभ्यां परो यो मूर्द्धन्शब्दस्तदुत्तरपदकबहुव्रीहाविति तदर्थात्। उत्तरपदावयवकत्वं समासावयवत्वमिति पक्षौ तु दुष्टत्वादयुक्तावेवेत्यन्यत्र स्पष्टम्। एतेनाद्यपक्षेऽपि मूर्द्धन्शब्दान्तबहुव्रीहावित्यर्थेन न दोषः। किञ्च परत्वादन्तोदात्तत्वे कृते समासान्तः। ततष्टिलोपे सत्युदात्तनिवृत्तिस्वरेणैव सिद्धं षप्रत्ययस्योदात्तत्वमिति समासान्तानां समासावयवत्वाङ्गीकारेण मूर्द्धनि तस्योत्तरपदत्वात्सिद्धमिति कृते षे कथं स्वरद्वयसिद्धिः। यावता विकल्पविधौ नान्तमूर्द्धन् शब्दस्य कार्यित्वेनाश्रयणमिति **नारायणा**द्युक्तमपास्तम्। अनयोर्दुष्टत्वात्। सति शिष्टत्वेन यस्योदात्तत्वेनोदात्तनिवृत्तिस्वराप्राप्तिः। उक्तरीत्या षेऽपि तत्प्रवृत्तेश्च। अवकाशत्वमसंभवनिरासोऽपि वेदे स्वरनैयत्यादाह। **त्रीति।** उपसंहरति। **तस्मादिति। स्थितमिति। नारायणा**दिप्राचां ग्रन्थ इति भावः। वस्तुतोऽस्य प्रापकीभूतषष्ट्या द्वित्रिभ्यां पादित्येतत्घटिततया नान्तरीयकत्वेन लाघवेन च तेनैव तदनित्यत्वसिद्धेः पाक्षिकान्तोदात्तत्वाभावेन पूर्वपदप्रकृतिस्वरार्थं चारितार्थ्येन ज्ञापकत्वासम्भव इति बोध्यम्। इत एवारुचेराह। **तथेति। द्वित्रीति।** तद्विकल्पविधावित्यर्थः। अपिना मूर्द्धास्त्विति निर्देशसमुच्चयः। **पीह** तदनित्यत्वे। **अन्यथेति।** तदनित्यत्वाभाव इत्यर्थः। अयं भावः। तन्नित्यत्वे हि **द्वित्रिभ्या**मिति षेन नित्यं भाव्यमिति द्विमूर्ध्नेत्यादिनान्तप्रयोगाभावस्यैवाभावे तादर्थ्येन मूर्द्धास्विति निर्देशायोगात्। मूर्द्धन्शब्देन च प्रत्ययान्तमूर्द्धशब्दप्रतिपत्तौ लक्षणाप्रसङ्गाः

''पाद्धन्मूर्द्धेषु' इत्येव निर्दिशेत्। एवं हि सति कृतसमासान्तपाद्दत्प्रक्रमोऽपि न विरोत्स्यते। बहुव्रीहिभिन्नं च समासान्तविरहादेव वारयिष्यते।

ननु षष्ठीतत्पुरुषादिवारणाय बहुव्रीह्यिग्रहणमस्तु। तथा हि, द्वयोर्दन्ता इति विगृह्य 'द्विदतः पश्य' इति प्रयोगे 'पद्दन्' (पा०सू० ६-१-६३) इति दतादेशः। स एवेह निरनुबन्धकत्वाद्वा गृह्येत। न च 'पद्दन्' (पा०सू० ६-१-६३) इति सूत्रे तदन्तविधिदौर्लभ्यात्कथमेतदिति वाच्यम् 'ष्यङः सम्प्रसारणम्' (पा०सू० ६-१-१३) इति सूत्रस्थपूर्वपक्षन्यायेन

प्रत्ययेनान्तस्योदात्तत्वं विधायकृते **'नस्तद्धित'** इति टिलोपे चोदात्तनिवृत्तिस्वरेण षप्रत्ययस्योदात्तत्वप्रतिपत्तौ गौरवप्रसङ्गात् कृतसमासान्तपाच्छब्दप्रक्रमाभेदात्तत्साहचर्याद्यता एव निर्देश उचित इति। यत्तु तत्र प्रतिपत्तिगौरववदत्र मात्रागौरवम्। किञ्च प्रक्रमाभेदोऽप्यकिञ्चित्करः। अन्यथा द्विस्त्रइरित्यत्र कृतेऽर्थग्रहणानर्थक्यापत्तेरिति। तन्न। तस्यासार्वत्रिकत्वात्। पदलाघवसत्वात्। प्रमाणान्तरं विना कृतप्रक्रमस्यैव नियामकत्वस्य कृत्वोऽर्थग्रहणेन ज्ञापितत्वाच्च। प्रकृते तत्प्रक्रमो[1] न केवलं, किन्तूपसंहारेण गुरुभूतबहुव्रीह्यिग्रहणेन च प्रमाणान्तरेण सहकृतस्तदेतद्ध्वनयन्नाह। **एवं हीति।** अपिना प्रागुक्तगौरवसमुच्चयः। **न विरोत्स्यते** न विरुद्धो भविष्यति। अनुकूलितो भविष्यति तदभेदो भविष्यतीति यावत्। भिन्नं तत्पुरुषादिसंज्ञं शब्दस्वरूपं चेति योज्यः।

३.२ समासान्तविधेरनित्यत्वे बहुव्रीह्यिग्रहणज्ञापकत्वविघटनं - समर्थनञ्च

आदिना कर्मधारयादिपरिग्रहः। **विगृह्येति।** कृत इति शेषः। प्रयोगे इत्यनुषज्यमान इत्यर्थे तु न शेषपूरणम्। एवञ्च तत्स्वरूपस्याविशेषितस्यैव ग्रहणमित्यत्र नियामकाभावादत्रातिप्रसङ्ग इति भावः। **पश्येतीति।** अनेन शसादिनिमित्तपरत्वं सूचितम्। न केवलमतिप्रसङ्गः किन्त्विष्टमप्येवं सति नेति। प्रत्युत बाधकमाह। **स एवेहेति।** द्वित्रिभ्यामित्यत्र स एव चेत्यर्थः। एवञ्च अव्याप्त्यतिव्याप्तीति तद्वारणाय बहुव्रीह्यिग्रहणावश्यकत्वे तत्र समासान्तनिर्देशे गौरवमफलत्वं चेति भावः। **दौर्लभ्यादिति।** पदाद्यनधिकारसत्वेन विशेष्याभावादिति भावः। **एतदिति।** तत्रादेशकरणमित्यर्थः। तथा च तत्प्रयोगेणानतिप्राप्त्याऽगत्या तस्यैव ग्रहणेनाव्याप्तिरपि नेति भावः। **सूत्रस्थपूर्वपक्षेति।** तत्सूत्रगततत्पुरुषपदेनोत्तरपदाक्षेपे पुत्रपत्योस्तद्विशेषणत्वेन तदन्तविधिना पुत्रपत्यन्त उत्तरपदे परे ष्यङन्तस्य सम्प्रसारणं स्यादित्यर्थे सम्पन्ने करीषगन्ध्या

---

१. तु प्रक्रमो इति खपाठः।

''सिद्धं त्ववयवानन्यत्वात्'' (भा०इ०) इत्याष्टमिकभाष्यवार्त्तिकन्यायेन चावयवस्य कार्यलाभात्। अन्यथा 'हास्तिशीर्ष्या उपैषि' इत्यादावगतेरिति वक्ष्यते। तस्मात्कथं बहुव्रीह्यिग्रहणं ज्ञापकमिति चेत् ? न, पूर्वोत्तरसाहचर्यबलेनापि बहुव्रीह्यप्रविष्टस्य वारणसम्भवात् दतृ इति सानुबन्धस्यापि सुपठत्वाच्च। ''स्फिगपूतवीणाञ्जोऽध्वकुक्षि-

---

परमपुत्रः करीषगन्ध्या परमपतिरित्यादावतिप्रसङ्ग इति हि तत्र पूर्वपक्षः। तया रीत्याऽत्रापि शसादिभिः प्रातिपदिकाक्षेपेण पदादीनां तद्विशेषणत्वेन तदन्तविधिना पादाद्यन्तानां प्रातिपदिकानां तेषु पदादय इत्यर्थे सम्पन्ने प्रोक्तप्रयोगे ददादेशः सुलभ इति भावः। ननु पदाद्यन्तस्य शब्दन्तरत्वेन तदन्तर्गतपादादेरपि वैलक्षण्यं स्यात्। किञ्च तत्पूर्वपक्षस्य तत्रैव दूषितत्वमित्यस्वरसेणाह[1]। **सिद्धं त्ववयवेति।** अष्टमे[2] उपसर्गात्सुनोती (पा०सू० ८-३-६५) त्यत्राभिषावयतीत्यादावभ्यादेर्ण्यर्थ-विशेषणत्वेन पूर्वपक्षं कृत्वा प्रकृत्यर्थविशेषणत्वात्तस्य च ततोऽभिन्नत्वसिद्धिरित्युक्तं वार्तिककृता सिद्धान्तिना। एवमत्रापि शसादौ पराऽव्यवहितपदादीनां ते इत्यर्थेन तस्य कार्यमिति भावः। नन्वेवमपि पदादिप्रकृतिकशसादावित्यर्थस्य प्रत्यासत्तिन्यायेन सम्भवात् दृष्टान्तवैषम्यमत आह। **अन्यथेति।** उक्तार्थमादृत्योक्तप्रकारेणावयवानन्यत्वानङ्गीकारेण कार्याकरण इत्यर्थः। **हास्तीति।** हस्तिनः शिर इव शिरो यस्य तस्यापत्यम्। बाह्वादित्वादिञ् 'अचि शीर्ष' इति वार्तिकेन शीर्षादेशः। इञः ष्यञ्। तत श्चाप्। ततःशस्। तत्र तथार्थाङ्गीकारे तत्रापि तथौचित्येन तत्र तत्प्रकृतिकेञादिप्रत्ययपरत्वाभावात्स न स्यादिति न। तथार्थाङ्गीकारे किं तथेति तथा तत्सिद्धिर्निष्प्रत्यूहेति भावः। वक्ष्यते **पद्धन्नि**त्यत्र बौद्धे। **साहचर्येति।** तेन विभक्त्यनिमित्तकतदा-देशस्यैव ग्रहणात्। अत एव लघ्वक्षरत्वेऽपि न दच्छब्दस्य पूर्वनिपात इति भावः। अपिर्बहुव्रीह्यिग्रहणसमुच्चायकः। साहचर्यानित्यत्वादाह। **दतृ इतीति।** किञ्च शसादिनिमित्तस्य बहिरङ्गत्वेनासिद्धत्वात् भाष्योक्ततत्प्रकृतिकशसादिविषयप्रकृत्यन्तरत्वपक्षे तत्र तदप्राप्तेश्चेत्यपि बोध्यम्। इदमेवापिसमुच्चेयम्। एतेन द्विदन्त इति बहुव्रीहौ वयोवाचकत्वाभावादन्नादेशाभावे

---

१. मित्यरुचेराह इति खपाठः।

२. तत्र हीत्थं भाष्यम् – ''सुनोत्यादीनां षत्वे ण्यन्तस्योपसंख्यानमधिकत्वात्। सुनोत्यादीनां षत्वेण्मन्तस्योप-संख्यानं कर्तव्यम्। अभिषावयति। किं कारणम् ?। अधिकत्वात्। व्यतिरिक्तः सुनोत्यादिरिति कृत्वोपसर्गोत्सु-नोत्यादीनामिति षत्वं न प्राप्नोति। न वा वक्तव्यम्। किं कारणम् ?। अवयवस्यानन्यत्वात्''। इति। अत्र कैयटः। यथा 'विसेचक' इत्यत्र गमेरुपसर्गो विशब्दो न सिचेरिति षत्वं न भवत्येवं ण्यन्तस्याभिषावयतीत्या-दावभ्यादि-रुपसर्ग इति षत्वाप्रसङ्गः। 'हेतुमति च' इत्यत्र प्रत्ययार्थविशेषणपक्षेऽर्थाधिक्यादधिकत्वमुच्यते। नवेति। ण्यन्तस्य योऽवयवो णिच्प्रकृतिस्तस्याऽनन्यत्वात्तदपेक्षत्वादुपसर्गत्वस्य सिद्धं षत्वम्। इति। म.भा.पू.सं. १९६ षष्ठो भागः।

सीरनामनाम च'' (पा०सू० ६-२-१८७) इति सूत्रे ''अपाच्च'' (पा०सू० ६-२-१८६) इत्यनुवृत्त्या 'अपस्फिगम्' इत्यादावुत्तरपदान्तोदात्तविधायकेऽध्वशब्द्ग्रहणमपीह लिङ्गम्। ''उपसर्गादध्वनः'' (पा०सू० ५-४-८५) इत्यच्प्रत्ययस्य नित्यत्वे हि चित्त्वादेव सिद्धं स्यात्।

तथा ''प्रतेरंश्वादयस्तत्पुरुषे'' (पा०सू० ६-२-१९३) इति सूत्रेऽश्वादिगपे राजन्शब्दस्य पाठोऽपीह लिङ्गम्। अन्यथा ''राजाहः सखिभ्यष्टच्'' (पा०सू० ५-४-९१) इति टचैव सिद्धे किन्तेन ? यत्तु ''ऋक्पूरब्धूः पथाम्'' (पा०सू० ५४-७४) इत्यत्र

शसादौ **पदन्निति** ददादेशे स्वरप्रकृत्यर्थः बहुव्रीहिग्रहणमावश्यकमिति दतृ इति दुष्पठम्। अत एव च मूर्द्धेष्वित्यपि तथा सति कृतसमासान्तः क्विपि सुपि निष्पन्नः। एतेन **येन विधि**रित्यत्र पादयते पादिति पाठे गौरवमिति परास्तम्। यथान्यासेऽपि पूर्वोत्तरसाहचर्येण विभक्त्यनिमित्तददादेशस्यैव ग्रहणात् साहचर्येण दत्रादेशस्यैव ग्रहणापत्त्या तत्र प्रवृत्तिदौर्लभ्यापत्तेः। किञ्च तथा सति तथापाठे गौरवमिति परास्तम्। यथान्यासेऽपि पूर्वोत्तरसाहचर्येण विभक्त्यनिमित्तददादेशस्यैव ग्रहणात्। उक्तहेतुद्वयाच्च। एवञ्च तत्साहचर्यात्पादपि कृतसमासान्त एव। न तु पादयतेः क्विपि निष्पन्नः। एतेन **येन विधि**रित्यत्र पादयतेः पादिति भगवदुक्तेर्द्वयोः पात् द्विपादित्यत्र स्वरवारणाय बहुव्रीहिग्रहणमावश्यकमिति यथान्यासेऽपि पाच्छब्दसाहचर्यात्तस्यैव ग्रहणं स्यादिति चापास्तम्। उक्तहेतुद्वयात् वैपरीत्याच्च। अन्यथा तस्यैव हिशब्देन बहुव्रीहौ स्वरप्रसक्तेः तादवस्थाच्च। तस्मादुक्तैव गतिः। प्रसिद्धाप्रसिद्धयोरिति न्यायोऽपि बोध्यम्। न चैवं **पादः पदि(पा०सू० ६-४-१३०)त्य**त्रापि तदग्रहणं इति वाच्यम्। न्यायेनाप्राप्तस्यापि वचनेन प्राप्तेः। **वचनं च** भाष्यकृदिष्टिः। न च प्रकृते किञ्चिद्वचनमस्ति। अत एव बहुव्रीहौ किं द्वयो मूर्द्धा द्विमूर्द्धा। एवमुत्तरत्रेति **वृत्तिकृतो**क्तम्। न तु द्वयोः पादा द्विपादिति। एतेन तद्वदत्राप्युभयोर्ग्रहणमिष्टमित्यपास्तम्। एवञ्च बहुव्रीहिग्रहणस्यापि ज्ञापकत्वं सिद्धम्। भाष्यकृता तु मूर्द्धास्विति निर्देशस्यैव ज्ञापकतोक्ता। रीतिरुक्तैव। तदर्थमेवापिः प्रागुक्त इत्युक्तम्। अयमेव दिगर्थः ।।

३.३ ज्ञापकान्तरवर्णनं - नारायणाद्युक्तज्ञापकनिरसनञ्च

ज्ञापकान्तरमाह। **तथेति।** अत्र नामग्रहणं सीरामेव सम्बद्ध्यते व्याख्यानात्। **अश्वादिगण इति।** सूत्रार्थपठितेऽश्वादिगण इत्यर्थः। प्राचोक्तं तदनित्यत्वज्ञापकं खण्डयति। **यत्त्विति।**

टिलोपस्येव ''प्रकृतिवदनुकरणम्'' (प०भा० ३६) इत्यतिदेशेन प्रत्ययस्यापि प्राप्तौ तदकरणं ज्ञापकमिति। तन्न, अतिदेशोऽयमनित्य इति ऋलृक्सूत्रे प्रपञ्चितत्वादिति दिक्। ''कृतमनयोः साधुत्वम्'' इत्यादिभाष्यग्रन्थाश्चास्मत्पक्षे*ऽनुकूलाः। अनयोः पदयोरिति स्वरसात्। अथवा 'आत्' इत्यसमस्तमेव ''पस्पशायां शब्दाप्रतिपत्तिः'' इति वार्त्तिके भाष्यकारैरेव वृद्धिः आदैजिति पदविभागप्रदर्शनात्। अस्मिंश्च पक्षे अनयोः सूत्रखण्डयोरिति नेयम्। पक्षान्तराभिप्रायकमेव वा तत्। वृद्धिशब्दस्तु तन्त्रेणावृत्त्या वा

टिलोपस्येव तत्करणस्येव। प्रकृतिवदिति उभयान्वयि। **प्रत्ययेति। ऋक्पू**रिति विहितस्येत्यर्थः। इति इत्यस्य। इमं पक्षं समूलयति। **कृतमिति।** इत्यादिरित्यादिना वक्ष्यमाणादेशादिपक्षचतुष्टय-सम्भवस्य द्वयोश्चैतदित्याद्युपक्रम्य न चादैच्छब्द इत्येकवचनान्तपरभाष्योक्तेश्च परिग्रहः। **अत** एव बहुवचनम्। चस्त्वर्थे। यत्तु **दण्डिकृष्णादयः** पूर्वपरसंख्यासन्देहलाघवात् प्राथम्याच्च पूर्वैव युक्तेति। तन्न। तस्येहानाश्रयणात्, उत्तरसंख्यायाः पूर्वसंख्यावधिकाच्च। **अस्मत्पक्षे** समासपक्षे। **पदयोरितीति।** तेषामेव साधुत्वान्वाख्यानादिति भावः। अत्र ज्ञानगौरवस्य सत्वेन **हरदत्तानु-**रोधेनाह। **अथ वेति।** अत्र पक्षे समासान्तप्रवृत्तिशङ्कैव नेति भावः। वार्तिके तद्व्याख्यानावसरे सम्भवतीति रीत्या। उक्तभाष्यविरोधं परिहरति। **अस्मिंश्चेति। खण्डयो**स्तस्योद्देश्यविधेयभागयोः। **इति नेयमिति।** इत्येवमुक्तभाष्यं योजनीयमित्यर्थः। द्वयोश्चैतदित्यादिभाष्यं तु नीलोत्पलादिसाधारणं। प्रकृतमात्रपरत्वेऽपि चोक्तरीत्या समुदायाभिप्रायम्। अत एवादैच्छब्द इत्यत्र शब्दशब्दोक्तिः। अन्यथा आदैज्पदमित्येव वदेत्। शब्दत्वं चैकानेकपदसाधारणम्। पदयोरेव विशेषणविशेष्यभाव इति तु न। महावाक्येऽवान्तरवाक्यानामपि तस्य दर्शनात्। आदेशादिपक्षचतुष्टयानुपपत्तिरपि नात्र पक्षे, संज्ञावन्निर्वाहात्। अत एव वृद्धिशब्दस्यादैच् इत्यादिबहुवचनान्तेन भाष्योक्तिः सङ्गच्छते। गामश्वमिति वच्चास्यानुपयोगः। नन्वेवमपि स्वरसतस्तथा प्रतीतिरत एव स्वरसादिति प्रागुक्तम्। अत्र तु नेयमित्युक्तमत आह। **पक्षान्तरेति।** एवं तयोश्चेदित्याद्यपीति बोध्यम्। नन्वत्र पक्षे बृद्धिशब्दस्याकारणैव सान्निध्यसम्बन्धेन निराकाङ्क्षत्वेनैचा सह सम्बन्धो न स्यान्नवाऽवृत्तिर्मानाभावात्। चाद्यभावाच्च, तदनन्वयापत्त्याऽऽवृत्ति-कल्पनायामपि वाक्यभेदापत्तेश्चात आह। **वृद्धीति।** नन्वेकरूपावच्छिन्नेऽन्वयासम्भवाद्वक्तु-स्तत्सत्वेऽपि अहरह इव क्रमेणान्वयबोधे तात्पर्येण श्रोतुस्तदसम्भवाच्च कथं तेन निर्वाहो अत आह। **पावृत्त्या वेति।** अत एवादेशादिपक्षचतुष्टयस्याप्युपपत्तिरित्युक्तम्। यत्तु नात्रावृत्तिर्युक्ता।

---

* अस्मिन् पक्षे इति मुद्रितपाठः। प्रभायां तु अस्मत्पक्षे इति पाठः।

योजनीयः । ''द्विर्वचनेऽचि'' (पा०सू० १-१-५९) ''इग्यणः सम्प्रसारणम्'' (पा०सू० १-१-४५) इत्यादाविवोभयथाऽप्यदोषात् । आदिति तपरकरणमैजर्थं, तेन त्रिमात्रचतुर्मात्रापामैचां संज्ञा न भवतीत्यादि ''एओङ्'' ''ऐऔच्'' सूत्रयोः प्रपञ्चितम् । न चैवं तकारस्योत्तरशेषतैव स्यादिति पदान्तताविरहाज्जश्त्वं न स्यादिति वाच्यम्, असन्देहार्थ-

---

भिन्नरूपोपकाराभावादिति **नारायणादयः ।** तन्न । **इग्यण** इत्यत्र मूले एव [1]उक्तमीमांसकमर्यादाया दूषितत्वात् । तदर्थस्य [2]**मञ्जूषाया**मन्यथा प्रतिपादितत्वाच्च । तद्ध्वनयन्नाह । **द्विर्वचनेऽचीति । प्यदोषादिति ।** पक्षान्तरावतरणोक्तदोषसत्वेऽपि तदवतरणोक्तदोषाभावादित्यर्थः । एतेनोक्तदोषस्य तत्र सत्वेनोभयथाऽप्यदोषादिति चिन्त्यमित्यपास्तम् । तत्र वाक्यभेदाभावेऽप्यत्रान्यथानुपपत्त्या स इष्टपत्तिग्रस्तः । किञ्च पौरुषेयवाक्ये तस्यादोषत्वम् । वेदे त्वपूर्वभेदकल्पनाप्रसङ्गात्तस्य तत्वं तद्विषय एव सम्भवतीति घण्टघोषा इति भावः । तपरत्वमुच्चारणसमावाय्येव निमित्तान्वयपर्यवसायीति तस्यैजर्थत्वमपि निर्विघ्नम् । अन्यथा स हीत्यत्र वर्णग्रहणानर्थक्यापत्तेः । अस्योद्भवतीत्यन्वयकाले तस्य तत्वाभावेन तत्कालग्रहणासम्भवात् । तदेतद् ध्वनयन् आकारस्यातपरत्वेन सर्वग्राहकत्वाप्रसक्तेस्तपरसूत्रस्य नियमार्थत्वाद्गुणानामभेदकत्वादाकारार्थत्वस्य तस्यासम्भवादाह । **आदितीति । संज्ञा नेति ।** तेन कृष्णैकत्वमित्यादौ त्रिमात्रादि न । एवमुत्तरसूत्रेऽपि । तेन गङ्गोदकमित्यादौ त्रिमात्रादि न । तदाह । **तीत्यादीति । चैवं** ऐजर्थत्वमात्राङ्गीकारे । **शेषतैवेति ।** तदुपकारत्वादिति भावः । तदुक्तम् :—

> [3]तादर्थ्येन विशेषास्तास्त्वाश्रयाश्रयिभावतः ।
> राजार्थोऽयं पिकं नित्यमुष्ट्रोष हति कुंकुमम् । इति ।

नन्वेवं प्रकृतसूत्रभाष्येऽत्र शास्त्रे गुणानां भेदकत्वं ज्ञापकादाश्रित्य सवर्णग्रहणार्थत्वाय भावस्योक्तत्वादाह । **असन्देहेति ।** तन्निवृत्तेः स्पष्टतया बोधनार्थतयेत्यर्थः ।

---

१. तन्त्रत्वमैकरूप्येण भवेत्तुल्योपकारतः । उपकारान्यथात्वे तु भवेदावृत्तिलक्षणम् ।। इति तन्मर्यादा ।

२. तत्र हि – 'शब्दविषये तुल्योपकारत इत्यस्य तुल्यकालमुपकारतोऽन्वयत इत्यर्थः । विद्वन्मानसेत्यादौ परस्परान्वयेऽपि मानसाभिन्नमानसाधिकरणकहंसेति युगपदेव बोधात्तदक्षतिः । कदाचित्तत्र पृथक् प्रयोगोऽपि विद्वन्मानसमानसेति सूत्रालरक्ष्वसूत्रालरक्ष्वळोर्मिज इति वत् । उपकारान्यथात्वं भिन्नकालमन्वयः । तेन क्रमेण बोधे आवृत्तिरित्यर्थः । ऐकरूप्येणेत्यनेन शब्दसारूप्यं तन्त्रबीजमुक्तम् । क्रिययोरपि सारूप्यमेव तन्त्रबीजम् । क्रियाविषयतन्त्रादेरेवेदं लक्षणमित्यन्ये'' इति प्रतिपादितम् । ल.म.पूं.सं. १५०९ द्वितीयो भावः ।

३. अस्य मूलमन्वेषणीयम् ।

तयाऽऽकारशेषत्वस्यापि सम्भवात्। अस्तु वाऽऽदैजिति पदम्, ''ऋत इद्धातोः'' (पा०सू० ७-१-१००) इत्यादौ दपरत्वमेवाश्रित्य तपरसूत्रे दकारोऽपि प्रश्लिष्यते इति ''तित्स्वरितम्'' (पा०सू० ६-१-१८५) इति सूत्रे भाष्यकारैर्वक्ष्यमाणत्वाद् दात्परस्यापि तत्कालग्राहकत्वात्। वस्तुतस्तु दकारप्रश्लेषपक्षोऽभ्युच्चयमात्रम्। इह तु तपरकरणं स्पष्टार्थमेवेत्यादि प्रागेवोक्तं न विस्मर्त्तव्यम्।

ननु ''चोः कुः'' (पा०सू० ८-२-३०) इति कुत्वमैच्छब्दे प्राप्नोति

मालादीनां चेति ज्ञापकाश्रयणे तु प्रतिपत्तिगौरवं स्यादिति भावः। **शेषत्वेति।** अन्यथेजुत्तरमेव पठेत्। सन्देहनिवृत्तेर्व्याख्यानत एव सिद्धत्वात्। **औतोम्शसो**रित्यादौ तस्यैवावश्यकत्वात्। इदमेकपदत्वे भेदपक्षे। भिन्नपदत्वे तु अनुकार्यानुकरणयोरभेदविवक्षापक्षे सोरुत्वे यत्वे तल्लोपे तस्यासिद्धत्वात्सन्ध्यभाव इत्यपि सुवचम्। तस्मान्मध्ये करणस्य फलव्याख्यानादेरप्याना-श्रयणेनातिलाघवसूचनद्वारा पूर्वार्थत्वस्यापि प्रतिपादनार्थमिति भावः। अपिना त्रिमात्रादेस्तत्र व्यावृत्तये परार्थत्वस्य समुच्चयः। एतेनाणुदित्सूत्रेऽशब्दसंज्ञेत्यनुवृत्त्या शब्दसंज्ञायां सवर्णाग्राह-कत्वात्तपरकरणं व्यर्थं सदसन्देहार्थं सम्पद्यत इत्यभिप्राय इत्यपास्तम्। तत्सूत्रस्य प्रत्याख्यानात्। **नारायणा**द्युक्तिं दूषयितुमाह। **अस्तु वेति।** वाशब्दोऽनास्थायाम्। दैजितीति तात्पर्यत ऐजत्वेऽपि न तच्छेषत्वं, तुकि तु प्रासङ्गिकोपकार्यपूर्वशेषत्वमित्यत्र विनिगमकम्। जश्त्वानङ्गीकारात् तत्वम्। मध्ये पाठात्सन्देहोऽपि नेत्युत्तरमात्रशेषत्वेन स्वतःसिद्धदविशिष्टमेवास्त्वित्यर्थलभ्येव तत्र त्रिमात्राद्यापत्तिरत आह। **ऋत इदिति।** आदिना **ऋदो रबि**त्यादिपरिग्रहः। **दपरेति।** तपरत्वे हि **तित्स्वरित**मिति स्वरितत्वं स्यादिति भावः। **इति** इत्यस्य। इदं दूषयति। **वस्तुतस्त्विति।** इदं चान्यत्र स्पष्टम्। **तपरेति।** अत एवात् ऐजिति पदविभागप्रदर्शकभाष्यसङ्गतिः। तदपि तात्पर्यतः परोपकारत्वेऽपि प्रागुक्तरीत्याऽसन्देहार्थत्वेन पूर्वशेषत्वे मानम्। **स्पष्टार्थमिति।** एवोऽप्यर्थे। असन्देहार्थमेजर्थं वेत्यर्थः। तदाह। **एवेत्यादीति। प्रागेवोक्तमिति। एओङादि**सूत्र एवेत्यर्थः॥

३.४ आदैच्शब्दस्य शास्त्रविषयत्वनिरूपणम्

असाधुशब्दोच्चारणे पाणिनेरश्रद्धेयतापत्त्या शास्त्राप्रामाण्यापत्तिः स्यादतः तदुक्तपदस्य तावत्प्रथमोपस्थितत्वात् साधुत्वं विचारयति। **नन्वित्यादिना।** यत्तु साधुत्वज्ञानस्य शाब्दबोधे कारणत्वात्तथेति। तन्न। 'नाज्झला'वित्यत्र मूल एव तस्य दूषितत्वात्। अयं विचारः सार्वत्रिको बोध्यः। अत एवान्यत्र पुनर्न विचारः, युक्तितौल्यात्। नन्वैच्छब्दस्य संज्ञाभूतस्या**दिरन्त्येने**ति

चतुष्टयी शब्दानां प्रवृत्तिरिति पक्षेऽस्य संज्ञाशब्दतया लौकिकत्वेनानुशासनविषयत्वात्। त्रयीपक्षेऽपि जातिशब्दत्वसम्भवात्। वैशेषिकपरिभाषया द्रव्यत्वगुपत्वादिजातिस्वीकारे वैयाकरपपरिभाषयापि तत्स्वीकारस्य दुर्वारत्वात्। वस्तुतस्तु सिद्धान्ते व्यक्तिविशेषोप-हितसत्ताया एव जातित्वस्वीकारादिहापि साऽस्तु। व्यक्तिविशेषाश्च स्वरूपसत्ता अतद्भेदेनानुगतीकृतास्सत्तोपधायकाः। तदुक्तम् – ''तस्यां सर्वे शब्दा व्यवस्थिताः'' इति। आद्यन्तावयवद्वारा समुदायानुकरपं ऐच् वा शब्दः। अनुकरपशब्दाश्च जातिशब्दा

सूत्रसाध्यत्वेन कृत्रिमतया लौकिकवैदिकबहिर्भूतत्वेन कथं तावत् सुबादिशास्त्रप्राप्तिः, लौकिकत्वं च लोकेऽर्थबोधनाय प्रयुक्तशब्दत्वम्। तेषां तत्रान्तर्भावमभिप्रेत्य **लोकत** इत्येवोक्तवता कात्यायनेन **लौकिकानां वैदिकानां चे**त्युक्तवता भगवता च तथैवोक्तत्वादत आह। **चतुष्टयीति। संज्ञाशब्देति।** शब्दार्थसम्बन्धानां नित्यत्वेन सर्वसंज्ञानां नित्यत्वादिति भावः। **लौकीति।** अवैदिकत्वेऽपीत्यादिः। संज्ञाशब्दानां तत्पक्षे जातिशब्देऽन्तर्भावाङ्गीकारादाह। **जातीति।** ननु न तत्वे मानमत आह। **वैशेषिकेति। स्वीकार इति।** सतीति शेषः। तथा तस्यैतत्स्वीकारे निमित्तत्वं फलति। **तदिति।** जातीत्यर्थः। एवं परमतेनोक्त्वा सिद्धान्तमाह। **वस्तुतस्त्विति। सत्ताया एवेति।** सर्वत्र विद्यमानब्रह्मसत्ताया एवेत्यर्थः। **इहापि** ऐच्छब्देऽपि। ननु तेषामानन्त्यात्कथं तदुपहितायास्तस्याः सकलनिष्टत्वमत आह। **व्यक्तीति।** ज्ञानस्य सर्वदा दुःपरिच्छेद्यत्वादाह। **स्वरूपेति।** अनुगतीकृता एकीकृताः एकाकाराः सत्तोपधायकास्तदाश्रयाः। वेदान्तपरिभाषयेदम्। न्यायपरिभाषया तु तत्परिचायका इति बोध्यम्। दण्डत्वं यथा। तद्धि स्वविशेष्यान्वयिकरणतायां नान्वेति। यथा प्राचीनमते लिङ्गपरामर्शोऽनुमानम्। तत्र लिङ्गं विशेषणं करणतायामन्वयात्। उपलक्षणं तु काकादिर्यदा कदाचिद्वर्तमानो व्यावर्तक इति विशेषोपलक्षणपरिवाचकानां मिथो भेदो बोध्यः। **तदुक्तमिति। हरिणेति** शेषः। **तस्यामिति।** उक्तरूपब्रह्मसत्तायामित्यर्थः। स्वनिष्टवाचकतानिरूपितवाच्यत्वेन तदवच्छेदकत्वेन वेति शेषः। अपूर्वाः संज्ञाः क्रियन्त इति पक्षे। **दण्डिकृष्णा**द्यनुरोधेन मतान्तरमाह। **आद्यन्तेति।** अयं भावः। ऐजिति 'ऐऔच्' इति सूत्रस्यानुकरणमाद्यन्तावयवानुकरणद्वारा। संज्ञाविधिसमये तु 'लोपश्च बलवत्तर' इति न्यायात् तस्यासन्निधेस्तयोरेव सा प्रवर्तत इति। कैयटेऽनुकरणशब्दत्वं जातिशब्दत्वे हेतुरित्याशयेनाह। **अनुकरणेति।** पूर्वं साक्षाज्जातिशब्दत्वमुक्तम्। इदानीं त्वनुक्रियमाणे शब्दे समवेता या जातिस्तत्सम्बद्धानुकार्यप्रतिपादकत्वेन परम्परया जातियोग इत्यपौनरुक्त्यमित्याशयेनाह।

एव, तत्रानुकार्यनिष्ठजातेः प्रवृत्तिनिमित्तत्वात्। न चाद्यपक्षे सूत्रवैयर्थ्यम्, मदीयशास्त्रे वृद्धिशब्देनादैच एव ग्राह्या इति नियमार्थं सूत्रारम्भात्। तदुक्तं कैयटेन – ''अनेकशक्तेः शब्दस्य शक्त्यवच्छेदेन संज्ञिनि विनियोगान्नित्यत्वाच्च सर्वसंज्ञानां लौकिकत्वात्'' इति। अनेकस्मिन्ननेका वा शक्तिरस्येति विग्रहः। अवच्छेदकभेदेऽपि लाघवाच्छक्तिरेकैव।

तत्रेति। अनुकरण इत्यर्थः। परम्परयेति भावः। वस्तुतश्चिन्त्यमिदम्। एवं हि सत्या**दिरन्त्येने**ति सूत्रवैयर्थ्यापत्तेः। वृद्धिशब्दादेः शास्त्रविषयताया एवमप्यनुपपादनाच्च। अनुकरणशब्दत्वमपि लौकिकत्वे हेतुर्न तु जातिशब्दत्वे। तत्त्वं च प्रागुक्तमेव। तच्चानुकरणेषु स्फुटमेव। अन्तर्भावस्तु यथायथं बोध्यः। अपूर्वाः संज्ञाः क्रियन्त इति लक्षणया तेनैवोपस्थापितयोरैकारौकारयोस्तात्पर्यवशाच्छाब्दबोधविषयतेति बोध्यम्। **न चाद्येति।** सर्वसंज्ञानां नित्यत्वादिति भावः। द्वितीयपक्षे तु तृतीयपक्षवद्वृद्धित्वरूपजातिबोधार्थमेव सूत्रं कार्यम्। इयमेव गतिरन्यसंज्ञासूत्रेष्वपीति बोध्यम्। नियमार्थमिति **नारायणादि**प्राचामनुरोधेन। सिद्धान्तस्त्वन्यतो बोध्यः। अग्रे स्फुटीभविष्यति च। [२२०]**हरदत्त**स्तु वृद्धिशब्दे वृधेर्भावे क्तिन्नन्तः, अभेदोपचाराच्च वृद्धियुक्तादैक्षु वृत्तिः। लक्षणयैव सिद्धे द्वितीयपक्षेऽपि सूत्रं नियमार्थम्, वृद्धियुक्तप्लुतदीर्घेकारादीनां बोधो मा भूदिति त्रयीपक्षे सूत्रार्थमाह। तन्न। अदेङ्गुण इत्यादावसम्भवात्। **तदुक्तमिति।** प्रागुक्तं सर्वमित्यर्थः। उक्तं चेति पाठो न युक्त इति स्पष्टमेव। **कैयटेनेति।** कुत्वं कस्मादित्यत्रेति भावः। कैयटेनेत्यपाठे तच्छेषो बोध्यः। **अनेकेति। नित्यत्वाच्चेति।** चो हेतौ। यतः शब्दार्थसम्बन्धानां नित्यत्वात्सर्वसंज्ञानां नित्यत्वमतो लौकिकत्वाच्छास्त्रप्राप्तिरित्यन्वयः। लोकेऽर्थान्तरेऽप्रसिद्धानामपि संज्ञानां टिघुभादीनां नित्यत्वमिति बोधयितुं सर्वशब्दः। नन्वेवं वृद्धिरादैजित्यादीनां संज्ञासूत्राणां वैयर्थ्यमत आह। **शक्त्येति। अवच्छेदः** सङ्कोचः। **संज्ञिनि विनियोगः** संज्ञिविशेषे नियमः। अभिमतातिरिक्तार्थान्तरव्युदासाय च सः। परिसंख्यायां चात्र शास्त्रे प्रायेण नियमव्यवहार इति बोध्यम्। नन्वेवं लौकिकार्थबोधो न स्यादत उक्तम् - **अनेकशक्तेरिति।** स्वशास्त्रे एव प्रकरणादन्यार्थबोध इति भावः। एतेन नन्वादिरन्त्येनेत्यतः प्रागैकारादौ ऐचूशब्दसम्बन्धो न प्राप्त अत आह अनेकेतीति **दण्ड्युक्त**मपास्तम्। उक्तरीत्या तत्रापि तत्प्राप्तिसत्वात्। इतीत्यन्तेन तत्प्रतीकं धृतम्। तेन सर्वो ग्रन्थो ग्राह्यः। अत एव प्रागुक्तसर्वसङ्गतिः। अन्यथा नियमसंमतित्वमात्रे इष्टे विनियोगादित्यन्तस्यैवौचित्यं, प्रथमपक्षनियमसम्मतित्वमात्रे इष्टे मध्यपक्षद्वयस्य निर्मूलत्वापत्तिस्तेन तयोरप्युक्तत्वेन तत्त्यागानौचित्यमिति बोध्यम्। **अनेकस्मिन्निति।** अत्र पक्षे शक्तिरित्यस्यैका शक्तिरित्यर्थः।

---

१. काशिकापदमञ्जर्यां (का. पद.पृ.सं. ६१)

औपाधिको भेद इति प्रवादस्तु उपाधिभिन्न इत्यत्र पर्यवसन्न इति मतेनाऽऽद्यः पक्षः। उपाधिस्थित्यधीनस्थितिको जीवब्रह्मभेदवदुपधेयेऽपि भेदोऽस्तीति मतेन द्वितीयः कल्पः। ''न कोपधायाः'' (पा०सू० ६-३-३७) इति पुंवद्भावनिषेधस्तु नास्ति। ''तद्धितवृग्रहणं कर्तव्यम्''(का०वा०)इति वक्ष्यमापत्वात्। अवच्छेदः संकोचः। स च यद्यपि शक्तेर्निरवयवतया न सम्भवति तथापि तदितरस्मिंस्तात्पर्यविरह एव शक्तिसङ्केचाऽत्राभिमतः। ''सर्वे सर्वार्थवाचकाः'' इत्यभ्युपगमेऽपि तात्पर्यं क्वचिदेवेत्यस्य निर्विवादत्वात्। शक्तिः परं कारणतापरपर्याया सर्वत्र दुर्वारित्युक्तम्। न चैवम् ''अन्यायश्चानेकार्थत्वम्'' इत्यस्य निर्विषयता, पौरुषेयसङ्केतनिरपेक्षस्य प्रसिद्धतरसम्बन्धस्य विना प्रमापं बहुषु न कल्पनमिति तदर्थात्। गौणमुख्यविभागोऽपि प्रसिद्ध्यप्रसिद्धिनिबन्धन एव।

नन्विदं **तद्यः सारण्यक** इति संयोगसंज्ञासूत्रस्थभाष्यविरुद्धमिति **कृष्णाद्य**नुरोधेनाह। **अनेकावेति।** निरूपकभेदस्याप्यवच्छेदकभेदाधीनत्वादाह। **अवच्छेदकेति। एकैवेति।** आश्रयभेदादेव तद्भेदाङ्गीकारादिति भावः। **उपाधिर्भिन्न इति।** यथा वर्णानां ताल्वोष्टपुटव्यापाररूप उपाधिर्भिन्नस्तथेति भावः। निरूपकभेदादपि भेदाङ्गीकारेणाह। **उपाधीति।** मायास्थित्यधीना स्थितिर्यस्य स जीवब्रह्मणो भेदो यथेत्यर्थः। अपिनोपाधिसमुच्चयः। अत्राद्यमतमेव युक्तम्, न द्वितीयमिति, यथा च तस्य तद्विरुद्धत्वं तथा च तत्रैव स्फुटीभविष्यति। सर्वनाम्न इत्यतः प्रथमोपस्थितत्वेनान्तरङ्गत्वात् 'स्त्रियाः पुंवत्' इत्युचितमित्याशयेनाह। **न कोपेति। तदितरेति।** अभिमतान्यस्मिन्नित्यर्थः। **चोऽत्र** संज्ञाविषये। अत्र एव वृद्धिरादैजिति सामानाधिकरण्यम्। पक्षान्तरे तस्य प्रदेशे एवादैक्षु वृत्तिः स्यात्, न त्वत्रैव संज्ञात्वेन विनियोगकाल इति तदनुपपन्नमेव स्यादिति भावः। ननु नित्ये शब्दार्थसम्बन्धे क्रियमाणे पुरुषव्यापारात्प्रागवाचकस्य न पुरुषव्यापारेण वाचकता कर्तुं शक्या। अतः सर्वे सर्वार्थवाचका इति स्वीकार्यम्। अत एव चानेकशक्तित्वावसायस्तथा च कथं सङ्केचोऽत आह। **सर्व इति।** वाच्यवाचकभावाख्यसम्बन्धविशेष एव च शब्दार्थयोः शक्तिरिति भावः। मतान्तरमाह। **शक्तिरिति।** परं केवलम्। **उक्तमिति।** केनचिदिति शेषः। तथा च तद्वीत्याऽपि प्रागुक्तं सुवचमिति भावः। वस्तुतश्चिन्त्यमिदमित्येवं तत्रैवोक्तमिति तत एव बोध्यमिति बोध्यम्। **न चैवं** सर्वस्य सर्वार्थवाचकत्वाङ्गीकारे। **इत्यस्य** न्यायस्य। सिद्धान्तमतसंग्रहायाह। **पौरुषेयसङ्केतेति।** इतरेतराध्यासमूलतादात्म्यनिरपेक्षेत्यर्थः। तत्सापेक्षस्य तु तदस्त्येवेति भावः। बोधजनकत्वरूपशक्तिरूपसम्बन्धनिरासायाह। **प्रसिद्धतरेति।** वाच्यवाचकभावस्येत्यर्थः। नन्वेवमपि गौणमुख्यविभागोच्छेदापत्तिरत आह। **गौपेति।** नन्वेवमपि लक्षणोच्छेदाप-

गाव्यादीनामसाधुतापि सङ्केतविरहे सत्येव । अत एव प्रसिद्धेऽपि पक्षे गोण्यादीनां गोण्यां साधुत्वमस्त्येवेत्यन्यत्र विस्तरः ।

त्तिरत आह । **गोऽपीति ।** तेन तन्निबन्धनस्य शक्तिलक्षणाव्यवहारस्य समुच्चयः । नन्वेवमपि गाव्यादीनां साधुत्वं स्यात् । तत्पक्षेऽपि शक्तेः सत्वादत आह । **गाव्यादीति ।** अपिना न्यायोक्तार्थसमुच्चयः । **सङ्केतेति ।** सङ्केताभावसत्वादेवेत्यर्थः । शक्तित्वमेव साधुत्वमित्यभिमानेनेदम् । तथा च सङ्केतत्वापेक्षं तत्वं साधुत्वम्, न केवलमिति भावः । **अत एव** साधुत्वस्य सङ्केताधीनत्वादेव । **प्रसिद्धेऽपीति ।** क्वचिदेव शक्तिरन्यत्र लक्षणेति पक्षेऽपीत्यर्थः । गोण्यादीनां आवयनादिवाचिनां गौण्या लक्षणया । प्रतिपादितमिदं **ऋलृक्**सूत्रे । वस्तुतस्तु शक्त्यवच्छेदकः शक्तिनिश्चयः । **शब्दार्थस्यानवच्छेद** इत्यादावच्छेदशब्दस्य तदर्थकत्वदर्शनात् । फलरूपे हेतौ तृतीया । विनियोगः उपदेशः । संज्ञिविशेषनिष्ठशक्तिनिश्चयफलकोपदेशादिति तदर्थः । एवञ्च तत्सङ्केतकरणज्ञानरूपप्रकरणादर्थान्तराप्रतीतिरिति बोध्यम् । युक्तं चैतत् । सर्वेषां सर्वार्थसाधकत्वेऽपि सङ्केतरूपत्वेनाज्ञातशक्तिबोधकतया विधित्वसम्भवेनैषां संज्ञासूत्राणां नियमार्थत्वासम्भवात् । **व्यवहाराय नियम** इत्याद्यपि तत्र तत्र सङ्केते कृते तत्तत्सङ्केतज्ञानरूपप्रकरणवशात्तत्स्यैवोपस्थितिर्नान्यस्येति फलितनियमपरम् । तदेतद्विशेषणविशेष्यवदित्यनेन सूचितम् । यथा नीलो घट इत्यनेन विद्यमाने एव घटे नीलसम्बन्धः पुरुषेण बोध्यते, न तु तेन नीलादियोगः क्रियते, नील एव न पीत इति नियमश्च फलति तद्वदित्यर्थात् । पाणिन्युपदेशादिरूपसङ्केतग्राह्यत्वात्तत्तत्संज्ञात्वस्य संज्ञानामनित्यत्वव्यवहारोऽपि । वाचकता बोधकताऽपि तदनुत्पादकत्वान्न शब्दार्थसम्बन्धनित्यताहानिः । तयोश्च वृद्धिपदादिवाच्यत्वोपदेशे वक्त्रिच्छाया नियामकत्वाच्च यदृच्छाशब्दत्वव्यवहारः, स्वेच्छया संज्ञा क्रियन्त इति च व्यवहारः । वेदमात्रप्रसिद्धशब्दभिन्नत्वरूपलौकिकाच्छिष्टप्रयुक्तत्वेन साधुत्वाच्चासां शास्त्रविषयता । **अन्यायोऽनेकार्थत्वमिति** त्वश्रद्धेयमेवेति निरूपितं **मञ्जूषायां गुरुचरणैः**[१] । किञ्च सर्वेषां सर्वार्थवाचकत्वमस्माभिर्दुर्ज्ञेयम् । विशिष्य सकलशब्दार्थज्ञानाभावात् । सामान्यज्ञानं तु न बोधोपयोगि । शास्त्रं त्वस्मदाद्युपदेशेनैव प्रवृत्तमे । योगिदृष्ट्या तु तथाव्यवहारे शास्त्रेऽत्र पक्षे गौणमुख्यविभागे शक्तिलक्षणाव्यवहारे च नानुपपत्तिः । गाव्यादिषु शक्तिः, शक्तेऽपि साधुत्वस्यान्यादृशस्य गमकाभावादभाव एव । शक्तिरपि सम्बन्धान्तरं, न तु कारणतारूपेति बोध्यम् । तदेतद् ध्वनयन्नाह । **इत्यन्यत्रेति ।** अत एवोभयमतसाधारण्येन

---

१. ल.म.पू.सं. ९२

उक्तं च – व्यवहाराय नियमः संज्ञायाः संज्ञियाः संज्ञिनि क्वचित् ।
नित्य एव तु सम्बन्धो डित्थादिषु गवादिवत् ।। (वा.प. २-३६४)
वृद्ध्यादीनां च शास्त्रेऽस्मिन् शक्त्यवच्छेदलक्षणः ।
अकृत्रिमोऽभिसम्बन्धो विशेषणविशेष्यवत् ।। इति । (वा.प. २-२६५)

वस्तुतस्तु साध्वसाधुबहिर्भावपक्षेऽप्येषामनुशासनविषयताऽस्त्येवेति पस्पशायां साधुत्वनिर्वचनप्रसङ्गेनोपपादितम् । तस्मात्सर्वथापि कुत्वं प्राप्नोत्येवेति चेत् ?

सत्यम्, ''अयस्मयादीनि छन्दसि'' (पा०सू० १-४-२०) इति भत्वप्रवृत्त्या कुत्वोपयोगिनी पदसंज्ञा प्रतिबध्यते । जश्त्वविध्येकवाक्यतापन्ना तु पदसंज्ञाऽस्त्येव । 'ससुष्टुभा स ऋक्वता गणेन' इत्यत्र तु विपरीतम् - कुत्वे पदत्वमस्ति जश्त्वे तु नेति । विषयभेदेन संज्ञाद्वयमस्तीत्यंशे परं दृष्टान्तता बोद्धव्या । तेन ''उपदेशेऽजनुनासिक इत्'' (पा०सू० १-३-२) इत्यादौ कुत्वाभावो जश्त्वं च सिद्ध्यति । ''छन्दसि विहितस्य

हरिसम्मतिमपि तावदंश आह । **उक्तं चेति । व्यवेति ।** व्याख्यातमुभयथापि **पस्पशाया**मिदं सर्वम् । एवं सिद्धान्तं कैयटोक्तरीत्या प्रतिपाद्य स्वरूपव्याक्रियैव पराक्रियेति न्यायेनैकदेशिनः सिद्धान्तोक्तिमनुवदति । **वस्त्विति । एषां** संज्ञाशब्दानाम् । अत एवाह । **प्रसङ्गेनोपेति ।** प्रासङ्गिकमन्यदीयसिद्धान्तभूतमुक्तं, न तु सिद्धान्तितमित्यर्थः । अत्रानाग्रहादेवोपसंहरन्नाह । **तस्मादिति ।** सर्वथापि लौकिकत्वसाधकप्रकारत्रयेणापि । अत्र लौकिकशब्दत्वं साध्यं शास्त्रीयसंज्ञात्वसमानाधिकरणं नित्यत्वं हेतुः । अतो न वैदिकेषु व्यभिचारः । सर्वसंज्ञानामिति वदता कैयटेन सूचितमिदम् ।

३.५ आदैच्शब्दे कुत्वाभावनिरूपणम्

कार्यकालपक्षेणाह । **कुत्वोपेति ।** अत एव जश्त्वेत्युक्तिरिति केचित् । वस्तुतो यथोद्देश एवायं ग्रन्थः । तत्र तस्यैव सिद्धान्तितत्वात् । तत्राप्येकवाक्यतायाः [१]सत्वादिति बोध्यम् । **अस्त्येवेति ।** संहितायाः सूत्राणां पाठे इत्यर्थः । एवमग्रेऽपि । तत्र भाष्योक्तदृष्टान्तस्य विषयत्वं ध्वनयन्नाह । **ससुष्टुभेति ।** अत एव तुः प्रयुक्तः । नन्वेवं कथं भगवताऽयं तत्र दृष्टान्तो दत्तोऽत आह । **विषयेति ।** परं केवलम् । स्वयं सजातीयं दृष्टान्तं प्रदर्शयन् संज्ञाद्वयफलमाह । **तेनोपेति ।**

---

१. 'सत्वादिति' इत्यारभ्य 'भाष्योक्तदृष्टान्तस्ये'ति पर्यन्तं पाठः कपुस्तके नास्ति ।

सूत्रे कथं प्रवृत्तिः'' इत्याशङ्क्य, 'छन्दोवत्सूत्रापि भवन्ति'' इति भाष्यम् इष्टिरियं भाष्यकृतः। यद्वा, छन्दःशब्दः स्वर्यते। ''स्वरितेनाधिकारः'' (पा०सू० १-३-११) अधिकं कार्यं गौपस्यापि ग्रहणमित्यर्थः। तेन छन्दोङ्गेष्वपि तत्तत्कार्यप्रवृत्तिर्बोध्या संज्ञाद्वयसमावेशस्तु ''उभयसंज्ञान्यपीति वक्तव्यम्'' इति वार्त्तिकवचनात्

एतत्सजातीयविषयभेदेन संज्ञाद्वयाङ्गीकारेणेत्यर्थः। **सूत्रे इति।** जातावेकवचनम्। **भाष्यमिति।** भाष्यकृता उक्तमित्यर्थः। तेन ल्यबुपपत्तिः। अत एवाह। **इष्टिरिति।** अत्र **प्रवर्तकरत्नकृदा**द्युक्तं तु न युक्तमिति स्फुटीकृतं [1]**छायायाम्**। तथा च भाष्यकारीयातिदेशात्सूत्रेषु छन्दःकार्यप्रवृत्तिरिति भावः। नापूर्वोऽयं भगवतोऽतिदेशः, किन्तु सूत्रसिद्धार्थकथनमेवेति **यूस्त्र्ये**ति सूत्रस्थकैयटाभिप्राय इति **दण्डिकृष्णा**भ्यां मतेनाह। **यद्वेति।** अधिकार इत्यस्याधिकः कार इत्यर्थः। कार इत्यत्र च कर्मणि घः। अतस्तदर्थमाह। **अधिकमिति।** प्रकृतार्थमाह। **गौपेति।** उभयपक्षसाधारणं फलमाह। **तेनेति।** उक्तप्रकारद्वयेनेत्यर्थः। अस्यामिष्टौ नार्षत्वं प्रयोजकम्। 'नैवेष्टिरस्ति छन्दोवत्कवयः कुर्वन्ति' इति **यूस्त्र्याख्या**वित्यत्र भाष्योक्तेः। किन्त्वङ्गत्वमेव प्रयोजकम्। तदाह। **छन्दोङ्गेष्विति।** पदपदार्थबोधनादिद्वारा वेदोपकारकत्वात्। **मुखं व्याकरण**मित्यादिनाऽङ्गत्वेन निरूपणाच्च। **प्रधानं च षट्स्वङ्गेषु व्याकरण**मिति भाष्योक्तेश्च। एवञ्चेतरसूत्रमात्रव्युदास इति भावः। ननु तदग्रे पाठाद्भमित्यनुवृत्त्या भसंज्ञाया एव विधानेन कथं पदत्वम्। न च सामान्यसूत्रेण तत्। आकडारादिनियमादत आह। **संज्ञाद्वयेति। उभयेति।** उभे संज्ञे येषामिति विग्रहः। अयस्मयादीनां विशेष्यत्वं। अपिना केवलं पदसंज्ञासमुच्चयः, कार्यानुरोधः सर्वत्र बीजम्।

---

१. इत्थं हि तत्रत्य छायाग्रन्थः - यत्तु तत्सूत्रे प्रवर्तकेनोक्तम् - नेदमपूर्वं वचनं, किन्तु छन्दः – शब्दशक्तिरेव प्रदर्श्यत इति। तन्न। तादर्थ्यादिति कैयटविरोधात्। नहि शक्यार्थो गौणो भवति। तस्मादिष्टिरेवेत्येव ज्यायः। एतेन – 'इजादेश्च' इति सजश्त्वेकेनाकुत्वनिर्देशेनैव ज्ञापितम् – तत्र सूत्रशब्दः सूत्राधानाजादिसंज्ञानां भाष्यवार्तिकयोश्चोपलक्षणम्। तेनादैच्चेत्याद्यस्मदादिप्रयोगेऽपि कुत्वाद्यकरणे दोषो न। ईदृशव्याख्याने मूलं तु 'भत्वाज्जश्त्वं न' 'आदैज्मात्रस्य' इत्यादिभाष्यप्रयोगः, 'अजुपलक्षणार्थम्' इत्याद्याधुनिकशिष्टप्रयोगश्च। एतेन कैयटोक्तं चिन्त्यम्, उक्तभाष्यादिप्रयोगाणामसाधुतापत्तेः ज्ञापकसिद्धस्येष्टित्वकथनानौचित्याच्च इति रत्नोक्तमपास्तम्। **यूस्त्र्याख्या**विति सूत्रे **'नह्येषेष्टिरस्ति'** इति भाष्योक्त्या पूर्वस्यास्तत्वस्याभिमतत्वेन तद्विरोधापत्तेः। अत्र प्रथमसूत्रे विचारस्य सर्वत्र निर्वाहस्य सत्वेनेतः पूर्वमज्ञापितत्वेन तथाभिमतत्वे **कुर्वन्तीत्यग्रे** शङ्कापूर्वकं तत्कथनौचित्येन तदर्थमूरीकृत्य शङ्कान्तरकरणानौचित्येन च तथान्येनेष्टत्वात्। सूत्रशब्देन भाष्यवार्तिकग्रहणेऽप्यन्येषां ग्रहणे मानाभावेन तेषामसाधुत्वे इष्टापत्तेः। तत्प्रयोगस्य ज्ञापकत्वेऽतिप्रसङ्गात्। तेषां साधुत्वे आग्रहे प्रोक्तभाष्यादिप्रयोगाणामेव तत्वसम्भवादुत्तरभाष्यस्य निर्दलतापाताच्चेति दिक्। इति। छाया.पृ.सं. १५४ प्रथमभागः।

''षष्ठीयुक्तः'' (पा०सू० १-४-९) इति सूत्रे 'छन्दसि वा' इति विभज्य एका संज्ञेति नियमस्य छन्दसि विकल्पनाद्वा ।

यद्वा, ''अयस्मयादीनि'' (पा०सू० १-४-२०) इत्यनेनोभयसंज्ञाप्रयुक्तकार्यभाजः समुदाया निपात्यन्ते, न तु प्रकृता भसंज्ञैव विधीयते । अत एव कार्यविशेषपुरस्कारसम्भव इति बोध्यम् । तस्मात्कुत्वं नेति स्थितम् । कुशब्दस्य ''अणुदित्'' (पा०सू० १-१-६९) इत्यनेन संज्ञात्वेन विनियोगात्तत्र च प्रागुक्तरीत्य मतभेदसत्वाज्जातिविशेषः प्रवृत्तिनिमित्तम्, व्यक्तिविशेषोपहिता सत्तैव वा, शब्दस्वरूपं वा, तस्यापि ग्राह्यत्वं

अयस्मयेत्यत्रत्यं वार्तिकमिदम् । तस्यानुक्तदुरुक्तचिन्ताकरत्वादिति भावः । तस्यानपूर्वत्वयोः दण्डिकृष्णाभ्यां यत्तदाह । **षष्ठीति ।** मण्डूकप्लुत्यैका संज्ञेत्यस्या तत्रानुवृत्तेरिति भावः ।

३.६ कुत्वाभावे पक्षान्तरोपन्यासः - कुत्वमित्यत्र त्वप्रत्ययार्थविचारः

योगविभागस्योक्तार्थकस्य भाष्यानारूढत्वादाह । **यद्वेति ।** तथा च संज्ञाद्वयहेतुककार्य-द्वयदर्शनेन तद्वत्वकान्यं नेत्येवमपि नापूर्ववार्तिकमिति भावः । अस्य व्याख्यान्तरं **दण्डिकृष्णा**द्युक्तं न युक्तमिति स्पष्टीकृतं **छायायां** तत एव बोध्यम् । अत एव विशिष्टनिपातनादेव । **पुरस्कारेति । अत एव** विपर्ययशङ्का नेति भावः । ननु कुत्वमित्यत्र कुशब्दस्य संज्ञात्वपक्षे ककारादिपञ्चक-गतस्यानुगतस्य जात्यादिरूपस्याभावेन प्रवृत्तिनिमित्ताभावाद्भावप्रत्ययोऽर्थगतप्रवृत्तिनिमित्तेच्छया विधीयमानोऽनुपपन्नः । एतेन कत्वाद्येव तदित्यपास्तम् । अक्षादिवन्नानार्थतापत्तेः 'चोः कु' रित्यादावावृत्तिप्रसङ्गात् । तत्र युगपदन्वयबोधेऽप्यत्रानन्वयाच्च । न हि चस्य स्थाने कत्वाद्यापादनं युक्तम् । एतेन कुत्वं नाम कुशब्दनिष्ठा जातिरित्यपि अपास्तम् । किञ्चात्र ककारस्य प्राप्तिर्न तु कुवृत्तिधर्मस्य । स च यदि वाचककुशब्दनिष्ठस्तर्हि तस्य वाच्यावृत्तित्वेन तदर्थत्वासम्भवः । अथ चोः कुरित्यादिस्थकुशब्दानुकरणेनानुकार्यनिष्ठसामान्यं तदर्थस्तर्हि तच्छब्दस्वरूपं तद्गता जातिर्वा अतिदेश्येत न कादिस्तद्बोध्यः । एवञ्च सर्वथा कुत्वमित्यसङ्गतमत आह । **कुशब्दस्येति । तत्र च** संज्ञापक्षे च । तत्रादौ त्रयीति पक्षे साधारणमतमाह । **जातीति ।** प्रवृत्तीत्यस्याग्रे उभयत्राप्यनुषङ्गः । तत्रैव सिद्धान्तमतमाह । **व्यक्तीति ।** चतुष्टयीति मत आह । **शब्देति ।** ननु वाचकस्य वाच्यावृत्ति-वृत्तित्वेन कथं तत्वमत आह । **तस्यापीति ।** शब्दस्वरूपस्यापीत्यर्थः । तथा च कुशब्दः कुशब्दवत् ककारादिषु शक्त इत्येवं शक्तिग्रहात्कुशब्दस्य प्रवृत्तिनिमित्तत्वम् । सम्बन्धश्चानादितादृशव्यव-हारसिद्धतादात्म्यम् । तेन कुशब्दं प्रवृत्तिनिमित्तीकृत्य शक्तित्वेन तस्य ग्रहे बाधकाभावादिति

ग्राहकत्वं चेति पस्पशोक्तरीत्या व्यक्तिविशेषणतया भानाभ्युपगमात्। तथाचोक्त-त्रितयान्यतममिह त्वप्रत्ययार्थः, प्रकृतिजन्यबोधे प्रकारीभूतत्वं, प्रयोगोपाधिमाश्रित्य तथाभूतधर्मस्य त्वतलर्थताया वक्ष्यमामत्वात्। यद्वा, प्रकृतिः शब्दस्वरूपपरा, तत्प्रवृत्तिनिमित्तत्त्वे तु त्वतलादीनां शक्तिरेवेति मतान्तरमपि वक्ष्यते। उभयथाऽपीह

बोध्यम्। **दण्ड्या**द्युक्तं तु न युक्तमिति स्पष्टं **छायायाम्।** नन्वेवमन्यस्यापि यस्य कस्यचिद्धर्मस्य[१] तन्निष्ठस्य तदर्थत्वापत्तिः। किञ्चैवं [२](भावप्रत्ययो न स्यात्। प्रकृत्यैवोपात्तत्वादत आह। **प्रकृतीति।** प्रयोगे उपाधिं निमित्तं प्रकृत्यर्थे) प्रकारकतया भासमानं धर्मं तत्वेन वाच्यतयाऽऽश्रित्य त्वादयो जायन्ते, प्रकृतिजन्यबोधे प्रकारधर्मस्त्वाद्यर्थ इत्यर्थः। वस्तुगत्या प्रकृतिजन्यबोधे प्रकारो यस्तस्य बोध्यत्वेन शक्यत्वमिति यावत्। एतावतैव प्रयोगोपाधित्वव्यवहारः। **तथाभूतेति।** प्रकारीभूतेत्यर्थः। **त्वतलेति।** वाच्यतयेति शेषः। अत्र मते प्रकृतिरर्थपरा। सर्वत्र वृत्तित्वं संसर्ग इति बोध्यम्। लक्षणया शब्दस्वरूपपरा सर्वत्रेत्याशयेन कस्यचिन्मतमाह। **यद्वेति।** इदमनास्थायाम्। प्रकृते प्रकृत्या जन्यत्वस्य संसर्गमर्यादया लाभात्। अत्र मते बोधः प्रकारत्वेन, चरमे शक्तिः सा। तदाह। **प्रवृत्तीति।** बोधकप्रकारत्वे इत्यर्थः। अयं भावः। यदा शब्दस्वरूपं प्रकृत्यर्थस्तदा भावप्रत्ययस्य जातिविशेषरूपप्रवृत्तिनिमित्तमर्थो व्यक्तिविशेषावच्छिन्नसत्ता च। एवञ्च कादिपञ्चकवृत्तिजातिविशेष इत्यादिबोधः। यदा तु प्रकृत्या व्यक्तिः बोध्यते न शब्दस्वरूपं तदा तदेव त्वाद्यर्थः। इदं च प्रयुक्तमेवेति। केचित्तु प्रवृत्तिनिमित्तत्व इति यथाश्रुतं व्याचक्षाणा कुशब्दप्रवृत्तिनिमित्तं कुत्वशब्दस्यार्थ इत्याहुः। **दण्ड्या**दयस्तु शब्दस्य स्वरूपं कुशब्दत्वम्। सामान्यं तत् कादिष्वारोपितं प्रवृत्तिनिमित्तंतव्यक्तिश्च वाचिकेति संज्ञेत्यादेरर्थमाहुः। अत्र तुनाऽरुचिर्बोधिता। तद्बीजं तु सर्वत्र लक्षणायां न मानम्। किञ्च तस्य कुत्वस्यात्र शब्दपरत्वे **गुणवचनेति** सूत्रे कर्मणीत्यनेनान्वयः, भाष्ये तु संज्ञाशब्द एव द्रव्यमात्रबोधकत्वमिति मते प्रकृतिप्रत्ययार्थयोः भेदानुपपत्तिमाशंक्यायं पक्ष एकदेशिनोक्त इति **गुरुचरणाः।** वस्तुतस्तदपि यथायुक्तं तथा [३]**कौस्तुभपूरणे** तत्रैव सूत्रे प्रतिपादितं तत एव बोध्यम्। अत एवाह। **मतान्तरमिति।** अत एव चैवमाद्यदोषमुद्धृत्य द्वितीयदोषमुद्धरति। **उभयथापीति।** जातिः

---

१. कस्याचिद्धर्मस्येत्यनन्तरं 'तन्निष्ठस्ये'त्यधिकं खपाठे।

२. 'भाव' इत्यनन्तरं 'प्रत्ययोन' इत्यारभ्य 'प्रकृत्यर्थे' इत्यन्तं ( ) कपाठे न।

३. अपूर्वः कौस्तुभव्याख्यानरूपः नागेशविरचितः इतोऽपि अमुद्रितः।

त्वप्रत्ययेन स्वार्थाश्रयः ककारो लक्ष्यते। तेन कुत्वम् नेत्यस्य ककारादेशो नेति पर्यवसितोऽर्थः। आह च—

सामान्यान्यभिधीयन्ते सत्ता वा तैर्विशेषिता।
संज्ञाशब्दस्वरूपं वा प्रत्ययैस्त्वतलादिभिः॥ इति।
इत्थं पदविभागः पदसाधुत्वं चोक्तम्।

वाक्यार्थस्तु संज्ञासंज्ञिभावः। तथा हि, समानविभक्तिकनामार्थयोरकभेदान्वयस्य

शब्दस्वरूपं वेति पक्षद्वयेऽपीत्यर्थः। **त्वप्रेति।** तदन्तेनेत्यर्थः। स्वार्थेत्यनेन लक्षणामूलसम्बन्ध-प्रदर्शनः। नेत्यस्य उपसंहारग्रन्थस्य भाष्यस्थस्यात्रत्यस्य च अन्यतमस्य तदर्थत्वे हरिसम्मतिमाह। **आह चेति।** [१](सामान्यानि जातिविशेषः। **तैरिति।** व्यक्तिविशेषैरुपहितेत्यर्थः। वेति व्यवस्थि-तोऽयं विकल्पः। यद्वाऽयं वाशब्दश्चार्थे। अयं भावः। संज्ञाशब्दस्थले सर्वत्र स्वरूपमेव प्रवृत्तिनि-मित्तम्। तथा एव त्वर्थगतं तत् क्वचिदस्ति। क्वचित् डित्थादौ नास्ति, अपि तत्र सैव तत्। तदुक्तम् - **संज्ञास्वरूपमाश्रित्य निमित्ते सति लौकिकी। क्वचित्प्रवर्तते क्वचिन्निमित्तासन्निधावपि।** इति। न चार्थगतत्वेऽस्य स्वरूपस्यावाच्यत्वात् कथं तत्वम्। ग्राह्यत्वमित्यादिना परिहृतत्वात्। तथा चारोपितत्वानारोपितत्वोभयेनैकस्यैव भेदेन तयोर्भेदे च वाचकत्वेन दृष्टस्य वाच्यमदृष्टता दृष्टस्यापि शब्द इति शब्दवाच्यताया दर्शनादिति। वस्तुतः संज्ञाशब्दे तन्नास्त्येव। डित्थत्व-मित्यादौ) वस्तुतो विशेष्यत्वेनाभिमतोऽर्थ एव त्वार्थः। प्रकृतिश्चेदृशेषु शब्दपरा। डित्थवानर्थ इत्यादिक्रमेणैव बोधः। ततः संख्यादिप्रकारकबोधान्न निर्विकल्पकत्वं। कुत्वमित्यादिः कुशब्दार्थः कवर्ग इत्यादिरीत्या बोधः। अन्यथा कुत्वशब्दार्थे कुशब्दाप्राप्तेस्तस्य लक्षणाश्रयणापत्तिरित्यादि **चोद्योते छायायां**[२] च स्पष्टम्। भावत्वेन च तच्छक्यं, न तु धर्मत्वेन। सूत्रानुसारात्। प्रकृतीत्यादि तदुपलक्षकम्। घटत्वमित्यादेः घटसम्बन्धी भव इत्यादिक्रमेण बोध इत्यादि बोध्यम्।

३.७ वृद्धिरादैच् सूत्रशाब्दबोधः

वाक्यार्थस्तु वाक्यतात्पर्यविषयस्तु। ननु विभिन्नविभक्तिकत्वाभावेन कथं तस्य तत्त्वमत आह। **तथा हीति।** अत एव तमुपपादयितुमादौ शाब्दमाह। **समानेति। वृद्धिं प्रति** तदर्थं प्रति।

---

१. 'आह चेति' इत्यनन्तरं कपुस्तके ग्रन्थपातः। इत्थञ्च ( ) 'सामान्यानि' इत्यारभ्य 'डित्थत्वमित्यादौ' इति पर्यन्तं खपाठे उपलभ्यत इति तमनुसृत्य ग्रन्थपातस्य पूरणं कृतम्। २. म.भा.प्र.उ.पृ.सं. १५२ प्र.भागः

व्युत्पन्नतयाऽऽकारादयो वृद्धिं प्रत्यभेदेन संसर्गेप विशेष्याः। विरूपोपस्थितिस्तु विशेषणीभूतं शब्दस्वरूपमादाय बोध्या। एतेन ''इन्द्रो मरुत्वान्मघवा'' (अ०को० १-१-४४) इत्यादि व्याख्यातम्। न तु तत्रापि मरुत्वदादिशब्दानां तत्तद्वाच्ये लक्षणेति ग्राह्यम्, उक्तरीत्या लक्षणां विनैवोपपत्तेः। अत एवोद्भिदधिकरपे विशिष्य विधिपक्षं मत्वर्थलक्षणाप्रसङ्गेन दूषयित्वा नामधेयत्वं सिद्धन्तितम्। अन्यथा नामधेयत्वेऽपि लक्षणायास्तुल्यतयाऽधिकरणस्यासम्भवदुक्तिकतापत्तेरिति दिक्।

विशेष्या इति। संज्ञाशब्दे च शब्दप्रवृत्तिनिमित्तसंज्ञिनि तत्सम्बन्धात् इत्युक्तमेव। संज्ञिबोधकशब्दे च संज्ञिगततत्तद्धर्मः प्रवृत्तिनिमित्तम्। एवञ्च वृद्धिशब्दवदभिन्ना आदैच इति बोधः। वृद्धिशब्दवत्वं च लोकसिद्धतादात्म्येनेति भावः। नन्वेवं कथं वृद्धिशब्दस्य प्रतिज्ञातं संज्ञात्वमत आह। **विरूपोपेति।** आदैचो वृद्धिसंज्ञका इति भेदेन बुद्धिस्त्वित्यर्थः। **एतेनेति।** कोशे इन्द्रादीनामर्थ-परत्वेनादावभेदान्वयस्तत उक्तरीत्या भेदान्वयः इति प्रकारेणेत्यर्थः। प्राचोक्तं खण्डयति। **न त्विति। तत्रापि** कोशेऽपि। अपिनैतत्सङ्ग्रहः। आद्यस्यार्थपरत्वादाह। **मरुत्वदिति।** शाब्दबोधे शब्दस्य प्रकारतया भानानङ्गीकारेण विरूपोपस्थित्यर्थं तस्य लक्षणेति तद्भावः। **उक्तेति।** शब्दस्य प्रकारतया भानादिनेत्यर्थः। **अत एव** शब्दप्रकारकोपस्थित्यङ्गीकारादेव। ननु उभयविधाने वाक्यभेदो, यागस्यान्यतोऽप्राप्तेरत आह। **विशिष्टेति।** पशुरूपफलोद्देशेन खनित्ररूपगुणविशिष्ट-यागविधीत्यर्थः। **उद्भिदा यजेत पशुकाम** इत्यत्रेति भावः। **अन्यथा** पदप्रकारकोपस्थित्यनङ्गीकारे। **लक्षणेति।** तद्वाच्ये लक्षणाया इत्यर्थः। वस्तुतस्तु सर्वे सर्वार्थेत्यस्य दूषितत्वेन वृद्धिशब्दोऽत्र पदपर एव, अर्थपरत्वासम्भवात्। वृद्धिशब्दाभिन्ना आदैच इति बोधः। पदपदार्थयोस्तादात्म्याङ्गीकारात्। 'रामेति द्व्यक्षरमि'त्यादौ तयोरभेदप्रतीतेरनुभवसिद्धत्वात्। तदुक्तं हरिणा[1] :–

> वृद्ध्यादयो यथा शब्दाः स्वरूपोपनिबन्धनाः।
> आदैच्प्रत्यापितैः शब्दैः सम्बन्धं यान्ति संज्ञिभिः॥

इति। अत्र पक्षे सामानाधिकरण्यं चैकविशेष्यकप्रतीतिजनकत्वम्। नान्तरीयकत्वाद्धि संज्ञासंज्ञिभावसिद्धिरिति बोध्यम्। तदाह। **दिगिति॥**

---

१. वाक्यपदीये ब्रह्मकाण्डे (पृ.सं. १०७. श्लो.सं. ५९ प्रथमभाग)

स्यादेतत्। किमादैज्मात्रस्य वृद्धिसंज्ञा आहोस्विद् वृद्धिशब्दमावर्त्त्य वृद्धिरिति ये आदैचस्ते वृद्धिसंज्ञा इति व्याख्यानाल्लुक्ष्लुप्संज्ञावत्तद्धावितानामेवेति ? नाद्यः, 'सर्वभासः' 'सर्वकाकः' इत्यादौ ''उत्तरपदवृद्धौ सर्वं च'' (पा०सू० ६-२-१०५) इति सूत्रेण पूर्वपदान्तोदात्तत्वप्रसङ्गात्। इष्यते तु ''समासस्य'' (पा०सू० ६-१-२२३) इत्यन्तोदात्तः। न च 'सर्वस्य सुपि'' (पा०सू० ६-१-१९१) इत्याद्युदात्तता शङ्क्या, सतिशिष्टेन समासस्वरेण बाधात्। ''सर्वस्तोमः'' इत्यादौ तु ''बहुव्रीहौ प्रकृत्या पूर्वपदम्'' (पा०सू० ६-२-१) इत्यनेन समासान्तोदात्तत्वे बाधिते ''सर्वस्य सुपि'' (पा०सू० ६-१-१९१) इति भवत्येव। इह तु कर्मधारयत्वात्समासान्तादोत्तत्वमेवेति बोध्यम्। किञ्च तावती भार्या यस्येति बहुव्रीहौ ''तावद्भार्यः''न सिद्धचेत्। ''वृद्धिनिमित्तस्य च तद्धितस्य'' (पा०सू० ६-३-३९) इति पुंवद्भावप्रतिषेधप्रसङ्गात्।

३.८ आदैज्मात्रग्रहणपक्षस्य दोषताप्रतिपादनम्

एवं पदपदार्थशुद्धिं सम्पाद्य प्रतिज्ञातं वाक्यार्थं निश्चेतुं शङ्कते। **स्यादेतदित्यादिना। तद्धावितानामेवेतीति।** इतिः सन्देहसमाप्तौ। न च सूत्रादादैज्मात्रग्रहणपक्षस्यैव प्रतीत्या प्रश्नानुपपत्तिरिति वाच्यम्। तथापि लुगादिसंज्ञासु तद्धावितपक्षस्य, लोपसंज्ञायामदर्शनमात्रस्य संज्ञित्वस्य दर्शनेनात्रापि तद्दृष्टान्तेन तदुदयात्। न चैवं टिघुभादिषु अतद्धावितपक्षस्यैव दर्शनात्सोऽपि किं न शङ्कितः। कल्पकाभावात्। आवृत्तित्यागेऽविशेषपक्षस्यैव सम्भवात्। तद्धावितत्वासम्भवाच्च। **सिचि वृद्धि**(पा०सू० ७-२-१) रित्यादेर्मे माता वन्ध्येति वाक्यतुल्यता-पत्तेश्च। तत्र पक्षे मालीय इत्यादौ छो न स्यादिति दोषस्त्वयुक्तः। अस्य वृद्धिशब्दभावितत्वानुप-पत्त्या अतद्धावितत्वेन वृद्धित्वेन वृद्धित्वसम्भवात्। तस्यैव वाऽसिद्धेश्च तत्र तदसम्भवादतद्धाविता-नामेव ग्रहणम्। तथा च वृद्धिशब्दे तन्त्राद्यङ्गीकारेऽतत्पक्षस्तदभावेऽऽद्य इति भावः। **अन्तोदत्त इति।** स्वर इत्यर्थः। **न चेति।** सौवर्यसप्तम्यस्तदन्तसप्तम्य इत्युक्तेः प्रत्ययलक्षणं सुवचम्। तथा च तस्य केवलस्य तत्वेन समासोऽपि, तथा शेषनिघातादिति भावः। **सतीति।** पश्चात्प्रवर्त्येनेत्यर्थः। **समासस्वरेण** समास-स्येत्यन्तोदात्तत्वेन। नन्वेवं सर्वस्तोम इत्यादावपि पूर्वपदाद्युदात्तत्वं न स्यादत आह। **सर्वस्तोम इति। भवत्येवेति।** तद [१]..... देवेति भावः। ननु वक्ष्यमाणरीत्या नास्य दोषोऽत आह। **किञ्चेति। तावद्भार्य इति।** तावद्भार्यशब्दे पुंवद्भावप्रतीतिः 'आसर्वनाम्न' (पा०सू० ६-३-९१) इत्यात्वस्य हि वतुर्निमित्तमिति भावः।

---

१. अत्र ग्रन्थः त्रुटितः।

न द्वितीयः, 'शालीयः' 'मालीयः' इत्यादौ वृद्धलक्षपस्य च्छप्रत्ययस्यासिद्धि-प्रसङ्गात्। किञ्चैवम् 'आम्रमयं' 'शालमयम्' इत्यादौ ''नित्यं वृद्धशरादिभ्यः'' (पा०सू० ४-३-१४४) इति नित्यो मयट् न स्यात्। किञ्च 'आम्रगुप्तायनिः' 'शालगुप्तायनिः' ''उदीचां वृद्धादगोत्रात्'' (पा०सू० ४-१-१५७) इति वृद्धलक्षपः फिञ्न स्यात्। ननु ''प्राचामवृद्धात्फिन् बहुलम्'' (पा०सू० ४-१-१६०) इति फिनाऽप्येतत्सिद्धम्। न ह्यत्र फिञ्फिनोः स्वरे रूपे वा विशेषोऽस्ति ''ञ्नित्यादिर्नित्यम्'' (पा०सू० ६-१-१९७) इत्याद्युदात्तस्योभयत्राविशिष्टत्वात्। न च 'आम्रगुप्तायनीभार्यः' इत्यत्र ''वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे'' (पा०सू० ६-३-३९) इति पुंवद्भावप्रतिषेधसिद्धये फिञेव कर्त्तव्य इति वाच्यम्। ''जातेश्च'' (पा०सू० ६-३-४१) इत्यनेनापि प्रतिषेधसिद्धेः। न चाम्रगुप्तायनेश्छात्रा इति वृद्धाच्छे विवक्षिते ''फक्फिञोरन्यतरस्याम्'' (पा०सू० ४-१-९१) इति लुग्विकल्पेन 'आम्रगुप्तीयाः' 'आम्रगुप्तायनीयाः' इति द्वैरूप्यमिष्टं, तच्च फिञं विना न सिध्यतीति वाच्यम्। ''फक्फिञोः'' (पा०सू० ४-१-९१) इत्यत्र यूनीत्यनु-वृत्या त्वदुदाहृतरूपद्वयस्य सिद्धान्तेऽप्यसम्मतत्वात्। अत एव तत्र यून्येवोदाहृतम्। यस्कस्यापत्यम् 'शिवादिभ्योऽण्'(पा०सू०४-१-११२) यास्कः, तस्यापत्यं युवा 'अणो द्व्यचः' (पा०सू० ४-१-१५६) इति फिञ् यास्कायनिः, तस्य छात्राः 'यास्कीयाः'

३.९ तद्भावितग्रहणपक्षस्य सदोषतानिरूपणम्

वृद्धलक्षपेति। अत्रत्यानां तेषामवृद्धित्वेन समुदायानामवृद्धत्वादिति भावः। दोषान्तरमाह। **किञ्चैवमिति।** एवं तद्भावितपक्षाङ्गीकारे। अस्याग्रेऽप्यनुषङ्गः। **नित्य इति।** वृद्धिलक्षण इत्यर्थः। अनेन विकल्पस्यानिष्टत्वं सूचितम्। **यनिरिति।** इत्यादाविति शेषः। एतत् उक्तरूपम्। रूपेऽविशेषः स्पष्टेनोपपादितः। तत्रापि अवेति फिनि त्ववृद्धिनिमित्तत्वात्स न स्यादिति भावः। विशेषं शङ्कते। **न चेति।** एवमग्रेऽपि न्यायसमभिव्याहारे। अपिः तस्यैव समुच्चये, एवार्थे च। अगोत्रं चेति जातित्वात्। इति इत्यर्थे। **वृद्धादिति।** छ इत्यर्थः। **असम्म-तेति।** अस्य गोत्रार्थकत्वादिति भावः। **अत एव** उक्तरीत्या तस्यासम्मतत्वादेव। तत्र फक्फिञो-रित्यत्र। उदाहृतं वृत्तिकारादिभिः। अन्यथा तदसम्भवे तद्विहाय तत्पर्यन्तधावनासङ्गतिरिति भावः। तदेवाह। **यस्केति**। भ्योऽणिति शेषः। इति उदाहरणसमाप्तौ। अवान्तरपूर्वपक्षमुपसंहरति।

'यास्कायनीयाः, इति तस्मात्फिनाऽपि सिद्धौ किमर्थं फिञेवेष्यते इति चेत् ? उच्यते, उक्तरीत्या रूपसिद्धावपि प्राचामुदीचां वाचार्याणां स्वस्वमतप्रच्युतिरेव तावद्दोषः। सिद्धान्ते ह्युदीचाम्। 'आम्रगुप्तायनिः' इष्टः, प्राचां त्वनिष्टः। उक्तरीत्या तूदीचां न सिद्ध्येत्, प्राचां तु सिध्येदिति स्पष्ट एवोभयोरपि स्वमतप्रच्यवः। तथा च ''ऋतो भारद्वाजस्य'' (पा०सू० ७-२-६३) इति सूत्रे 'जहर्थ' इत्यादौ गुपे रपरत्वे च कृतेऽनजन्तत्वाद् ''अचस्तास्वत्'' (पा०सू० ७-२-६१) इत्यस्याप्राप्तौ नियमानुपपत्तेः ''ऋतो भारद्वाजस्य'' (पा०सू० ७-२-६३) इतीदं विधायकं स्यात्ततश्च 'पेचिथ' इत्यादाविष्न स्यादिति दूषणे प्राप्ते ''अचस्तास्वत्थल्यनिटो नित्यं भारद्वाजस्य। उपदेशे त्वतः, भारद्वाजस्येत्येव। ततः – ऋतः, भारद्वाजस्येति निवृत्तम्। एवञ्च सकललक्ष्यप्रसिद्धिः'' इति सूत्रभङ्गेन समाधाय भाष्यकारो वक्ष्यति– ''सिद्धचत्येवम्। अयं तु भारद्वाजः स्वस्मान्मतात्प्रच्यावितो भवति'' इति। अत एव ''अचस्तास्वत्'' (पा०सू० ७-२-६१) इत्यत्र ''उपदेशेऽत्वतः'' (पा०सू० ७-२-६२) इत्येतदुपदेशग्रहणमपकृष्य सिद्धान्तयिष्यतीति दिक्। किञ्च फिनि सत्याम्रगुप्तायनेरपत्यं

तस्मादिति। तमेव समाधत्ते। **उच्यत इति।** दोषान्तरस्य वक्ष्यमाणत्वादाह। **तावदिति।** स्वस्वमतप्रच्यवोऽपि दोषोऽस्तीत्यत्रोपष्टम्भकमाह। **तथा चेति।** (पा०सू० ७-३-६२) सूत्र इत्यस्य भाष्यकारो वक्ष्यतीत्यत्रान्वयः। तीदं नियामकत्वेनाभिमतं न स्यात्। **उपदेशेऽत्वत** इति निषेधात्। प्राप्त इत्यस्य समाधायेत्यत्रान्वयः। **अच इति।** अत्र भरद्वाजस्येति कृते स्मृत्यन्तरानुसन्धानाद्विकल्पसिद्धिरिति [1]सर्वेष्टसिद्धिरिति भावः। **एवञ्च** न्यासभेदाङ्गीकारे च। एवमिति पाठे न्यासभेदेनेत्यर्थः। तदा इती इत्यादिः। तु परन्तु। अस्यैकदेश्युक्तित्वनिरासेन तस्य दोषत्वं दृढयति। **अत एवेति।** स्वस्वमतप्रच्यवस्य दोषत्वादेवेत्यर्थः। अन्यथा तया सिद्धान्तोक्तिरयुक्ता स्यादिति भावः। **इत्येतत्** इत्यत्रत्यं। **सिद्धान्तेति।** भाष्यकार इति भावः। उपदेशश्च स्थानिवदादेशस्यापि गृह्यते। तेन विवेथ विवयिथेत्यादिसिद्धिः। अधिक**मुद्योते** द्रष्टव्यम्। तदाह। **दिगिति।** सर्वरूपसिद्धिमभिप्रेत्येदमुक्तम्। वस्तुतस्त्वेवं नेत्याह। **किञ्चेति।** स्थितं आकारे। अनेनारुचिः सूचिता हेत्वंशे। तद्बीजं तु फिनन्तस्यासौवीरगोत्रप्रतिपादकत्वात् फिञन्तादेव भविष्यतीति आवृत्तं वृद्धादिति चिन्त्यप्रयोजनमिति। तदुक्तिस्तु **नारायणा**नुरोधेनेति

---

१. विकल्पसिद्धिरिति अनन्तरं 'सर्वेष्टसिद्धिरिति' अधिकः कपाठे नास्ति।

कुत्सितमित्यर्थे सौवीरगोत्रे 'फेश्छ च' (पा०सू० ४-१-१४९) इति छठकौ न स्याताम्। तत्र फिञेव गृह्यते न तु फिन् वृद्धादित्यधिकारादिति स्थितम्। ततश्च 'आम्रगुप्तायनीयः' 'आम्रगुप्तायनिकः' इति न स्यात्। न च

यमुन्दश्च सुषामा च वाष्र्यायणिः फिञः स्मृताः।

इति वृत्तौ त्रयाणामेव परिगणनादन्येभ्यश्छठकौ न भवत एवेति वाच्यम्, भाष्यकृता परिगणनस्यानाश्रयणात्। अन्यथाऽत्रैव सूत्रे 'सौवीरेष्विति किम्? तैकायनिः' इतिप्रत्युदाहरणं न सङ्गच्छेत। तैकायनिशब्दस्य तत्रापाठात्। अत एव ''यूनि लुक्'' (पा०सू० ४-१-९०) इत्यत्रोदाह्रियते – तिकस्यापत्यं ''तिकादिभ्यः फिञ्'' (पा०सू० ४-१-१५४) तैकायनिः, तस्यापत्यं युवा ''फेश्छच'' (पा०सू० ४-१-१४९) तैकायनीयः, तस्य छात्राः युवप्रत्ययस्य लुकि कृते ''वृद्धाच्छः'' (पा०सू० ४-२-११४) 'तैकायनीयाः' इति। न हि सति परिगणने तैकायनेश्छः सम्भवति न वा तल्लोपः। अत एव यूनिलुक्सूत्रे स्थित्वा परिगणनमर्वाचीनमिति हरदत्तादयोऽप्याहुः। अपि च फिञि सत्याम्रगुप्तायनेरपत्यं युवा ''प्राग्दीव्यतोऽण्'' (पा०सू० ४-१-८३) तस्य ''ण्यक्षत्रियार्षञितो यूनि लुगणिञोः'' (पा०सू० १-४-५८) इति लुकि 'आम्रगुप्तायनिः' इत्येवं रूपं पितरि पुत्रे चेष्यते। फिनि तु सति तन्न स्यात् ञितः परत्वाभावात्। न च 'अब्राह्मणगोत्रमात्राद्युवप्रत्ययस्योपसंख्यानम्' इति तत्सिद्धिः, ब्राह्मणगोत्रे तदप्रवृत्तेः।

बोध्यम्। सुपामिति पाठः। यणिति लुप्तस्वन्तम्। **परिगणनादिति।** 'फेश्छ च' (पा०सू० ४-१-१४९) इत्यत्रेति भावः। तदनाश्रयणमेव दृढयति। **अन्यथेति। अत्रैव** प्रक्रान्ते 'फेश्छ च' इत्यत्रैव। प्रत्युदाहरणं वृत्तिकारोक्तमेव। **तत्र** परिगणनमध्ये। ननु तदीयप्रत्युदाहरणासङ्गत्यापत्या तदीयपरिगणनानाश्रयणालाभेऽपि भाष्यकृतः कथं तदनाश्रयणम्। भगवता तत्सूत्रस्यास्पृष्टत्वात्। एवञ्च विनिगमनाविरहात् वृत्युक्तप्रत्युदाहरणस्यैवानाश्रयणमस्त्विति परिगणनं सम्यगेवेति नायं दोषोऽत आह। **अत एवेति।** परिगणनानाश्रयणस्याभिमतत्वादेवेत्यर्थः। **उदाह्रियत इति।** भाष्यकृतेति शेषः। **लुकि कृत इति।** 'यूनि लुगि'(पा०सू० ४-१-९०)त्यनेनेति भावः। **तैकायनेश्च इति।** न चैवं कथं प्रागुक्ततदीयप्रत्युदाहरणसङ्गतिरिति वाच्यम्। तैकायिने सौवीरस्यासौवीरस्य च सत्वात्। **तल्लोप इति।** तल्लुगित्यर्थः। तस्यैवाभावादिति भावः। **अत एव** उक्तभाष्योदाहरणादेव। परिगणनमभ्युपेत्यापि तत्र दोषान्तरमाह। **अपि चेति।** युवप्रत्ययेति तल्लुक्

किञ्च तद्भावितग्रहणपक्षे ''मालादीनां च'' (पा०सू० ६-२-८८) इत्यनारम्भणीयं स्यात् ''प्रस्थे वृद्धमकर्क्यादीनाम्'' (पा०सू० ६-२-८७) इत्यनेनैव पूर्वपदाद्युदात्तत्वसिद्धेः। अपि च वृद्धिशब्दे तन्त्रावृत्त्याद्याश्रयणाद्गौरवम्। ''मृजेर्वृद्धिः'' (पा०सू० ७-२-११४) इत्यादिविधिप्रदेशेष्वितरे-तराश्रयणपरिहाराय सूत्रशाटकवद्भाविसंज्ञा विज्ञेया स्यादिति चापरं गौरवमिति।

अत्रोच्यते, आदैज्मात्रस्य वृद्धिसंज्ञा। न चैवं सर्वभासादावुक्तदोषः स्यादिति वाच्यम्। ''उत्तरपदवृद्धौ सर्वं च'' (पा०सू० ६-२-१०५) इत्यत्र ह्युत्तरपदग्रहणं

इत्यर्थः। एतावता ग्रन्थेन द्वितीयपक्षे लक्ष्यस्यापि सिद्धिरूपदोषानुक्त्वा तत्र फिञ् न स्यादिति तृतीयदोषं दृढीकृत्य द्वितीयपक्षे सूत्रान्तरवैयर्थ्यरूपं दोषं भाष्याद्यनुक्तमप्याह। **किञ्चेति।** मालादेरेव वृद्धित्वादिति भावः। तत्रैव तादृशं गौरवरूपं दोषमाह। **अपि चेति।** आदिनैकशेषपरिग्रहः। गौरवान्तरमाह। **मृजेरिति।** इति स्यादेतदिति पूर्वपक्षसमाप्तौ। पक्षद्वयमप्युक्तरीत्या दुर्वचमिति भावः॥

३.१० आदैज्मात्रग्रहणपक्षस्य निर्दुष्टत्वप्रतिपादनं - प्रभायां कैयटमतविमर्शः।

द्वितीयपक्षे दोषाणां बाहुल्याद् दुरुद्धरत्वाच्चाद्यपक्षमाश्रयते। **आदैजिति।** यत्तु कैयटः समासाक्षिप्तोत्तरपदेन सामानाधिकरण्यायोत्तर [१](पदस्येत्येवं वृद्धिर्यस्मिन्निति बहुव्रीहिः सूत्रेऽस्ति। तत्र हि वृद्धो सर्वथेत्युच्यमाने वृद्धिमात्रस्योत्तर)पदस्याभावात्सामर्थ्यात् वृद्धिमदुत्तरपदं ग्रहीष्यत इत्यधिकमुत्तरपदग्रहणसामर्थ्यात् उत्तरपदाधिकारं लक्षयति। वृद्धिशब्दस्तु न गृह्यते। अशब्दसंज्ञेति निषेधादिति। तन्न। आ अवतीति-औः। अवतेः क्वावठ्। आङा सह एत्येधेति वृद्धौ रूपम्। एवञ्च सर्वस्य औः - सर्वौरित्यत्र वृद्धिरूपोत्तरपदसम्भवेन लक्षणायामसम्भवरूपबीजाभावेन तस्या असम्भवात्। नन्वेकादेशे व्यपवर्गाभावः। न च स्थानिवद्भावः। आद्यकारस्य स्वरेऽन्त्येन व्यवधानादप्रसङ्गात्। सर्वान्त्यस्य स्वरे **स्वरविधा (परि. ८०)** विति निषेधादपूर्वविधित्वाच्चेति चेन्न **नेन्द्रस्य परस्ये(पा०सू० ७-३-२२)ति** निषेधेन पूर्वोत्तरपदसम्बन्धिकार्यस्यान्तरङ्गादप्येकादेशात्प्राक् प्रवृत्तिज्ञापनात्। तथा च तेन सर्वशब्दान्तोदात्तत्वे कृते शेषनिघातेन औकारस्यानुदात्तत्वे एकादेशस्य 'स्वरितो वानुदात्तेप-दादा'(पा०सू० ८-२-६)विति पाक्षिकः स्वरितः स्यात्। न च तेषामत्रत्यभाष्यादनभिधानम्। तस्य वक्ष्यमाणरीत्या सुयोजत्वात्। न चैवमपि सवृद्धौ वृद्धिमतीति

---

१. 'सामानाधिकरण्यायोत्तरे'त्यनन्तरं 'पदस्येत्येवं' इत्यारभ्य 'वृद्धिमात्रस्योत्तर' ( ) इति पाठः कपुस्तके नास्ति।

स्वर्यते । स्वरितेनाधिकारो विज्ञायते । तेनोत्तरपदस्येत्यधिकृत्य या वृद्धिर्विहिता सैव गृह्यते । यथा 'सर्वपाञ्चालः' ''सुसर्वार्द्धाज्जनपदस्य'' (पा०सू० ७-३-१२) इति वृद्धिः । इदं च तद्भावितग्रहणेऽप्यवश्यं वक्तव्यमेव । अन्यथा 'सर्वः कारकः' 'सर्वकारकः' इत्यादावतिप्रसक्तेः । एवं तावद्भार्येऽप्यदोषः, तन्त्रावृत्त्याद्याश्रयणेन वृद्धिशब्देन च विधौ कृत्स्ना वृद्धिः प्रतीयते इत्याशयेनैवोक्तं भाष्ये – ''यत् कृत्स्नाया वृद्धेर्निमित्तम्''इति ।

वा वक्तव्ये उत्तरपदग्रहणं व्यर्थमिति [१]कैयटाशयः । व्यपदेशिवद्भावस्य दुर्वारत्वात् । न च युक्तिसामर्थ्यात् स न, अधिकसंग्रहकतया तस्य साफल्यादतस्तदुपेक्ष्याह । **स्वर्यत इति । अधिकार इति ।** अयमपि तत्सूत्रस्यार्थ इति भावः । एवं सति शाब्दोऽर्थः प्रागुक्तो बोध्यः । तत्फलितमाह । **तेनोत्तरेति ।** एवव्यवच्छेद्यमेवाह । **अन्यथेति ।** तत्र तदनुक्तावित्यर्थः । **कारक इति ।** कृधातोर्ण्वुलि 'अचो ञ्णिति' (पा०सू० ७-२-११५) इति सूत्रेण वृद्धिशब्देन वृद्धेर्विधानात् । इदं च विग्रहप्रदर्शनं द्विगुशङ्कानिवृत्त्यर्थम्, न तु बहुव्रीहिशङ्कानिरासार्थम् । तत्र हि पूर्वपदप्रकृतिस्वरेण भाव्यमाद्युदात्तेन वेति भावः ।

आद्यपक्षे उक्तं द्वितीयं दोषमुदाहरति । **एवमिति ।** सर्वभासादाविवेत्यर्थः । यद्यपि निमित्तपदोपादानसामर्थ्यान्न तत्पुरुषः, किन्तु व्यधिकरणपदो बहुव्रीहिः । अन्यथा वृद्धे तद्धितस्येत्येव वृद्ध्यात्मकतद्धिताभावाद्वृद्धिनिमित्ततद्धितस्यैव वृद्धिशब्देन ग्रहणे वैयधिकरण्येन वा सम्बन्ध इत्येवं सिद्धे किं तेन । व्यधिकरणबहुव्रीह्याश्रयणसामर्थ्यादेव व्यपदेशिवद्भावाप्रवृत्तिः । तथा च कादिविशिष्टस्य तद्रूपेण निमित्तत्वाश्रयणे [१]तद्भावभावितामात्रेण नागृहीतविशेषणन्यायेन च अन्वयव्यतिरेकाभ्यां च तेषामपि निमित्तत्वम्, यद्वा तत्र कितीत्यादिकर्मधारयेण वैयाधिकरण्येन सम्बन्धात्तेषामेव निमित्तत्वमितीष्टसिद्धिरनिष्टाभावश्चेति पूर्वं समाहितं भाष्यकैयटयोः । तथापि तन्न युक्तम् । इत्संज्ञकोकारोपलक्षिते वति परे अत्वमिति तत्सूत्रार्थतोक्तरीत्येत्संज्ञकोकारस्यापि निमित्तत्वेनातिप्रसङ्गताद्वयं स्यात् । अत एव भाष्ये 'अथ वा यः कृत्स्नाया वृद्धेर्निमित्त मित्यादिना पक्षान्तरमादृतम् । तस्य च कैयटोक्ताशयो न युक्तः । निमित्तपदस्यान्यार्थत्वेन विनिगमकाभावेन बहुवचनान्तेन विग्रहात्सम्मतात्, तन्मते वृत्तावभेदैकत्वसंख्यावगतेरौत्सर्गिकत्वादित्यभिप्रेत्यान्यथा तदाश्रयपरां नारायणोक्तिमादृत्य समाधत्ते । **तन्त्रेत्यादिना ।** तत्र तत्पाद इत्यादिः । आदिनैकशेष-परिग्रहः । **विधाविति ।** विधान इत्यर्थः । **कृत्स्नेति ।** सैवेत्यर्थः । वृद्धिसंज्ञायास्त्रितयसाधारण्यात् ।

---

१. म.भा.प्र.पृ.सं. १५५ २. तदावभावितामात्रेणेति अधिकः कपाठे न ।

३. कैयटोक्ताशयस्तु - 'निमित्तशब्दोपादानादेवाश्रितबहुत्वसंख्यो वृद्धिशब्दः समस्यते, वृद्धीनां निमित्तं वृद्धिनिमित्तमिति' । म.भा.प्र.पृ.सं. १५५ प्रथमो भागः ।

न च वैयाकरणभार्ये तथा सौवश्यभार्येऽतिप्रसङ्गः फलोपहितस्यैव निमित्तत्वेन विवक्षितत्वात्। ऐचौ प्रति फलोपधानमप्यस्तीति चेत् ? न, तयोर्वृद्धिशब्देनाविधानात्।

तथा चानुवादे तेन विहितवृद्धे यन्निमित्तमित्युक्तावपि कृत्स्नवृद्धिग्रहणमिति भावः। अत एवाह। **इत्याशयेनैवोक्तमिति।** एवेन कैयटोक्ताशयनिरासः। तत्रादौ प्रमाणं च निमित्तग्रहणमेव। अन्यथा वृद्धिरूपतद्धितासम्भवेन वृद्धिनिमित्तग्रहणसिद्धौ किं तेन। न च दण्डप्रहरणमस्यां क्रियायां सा दण्डा सा क्रिया यस्येत्यत्र, अर्शः शब्दन्मत्वर्थे अचिऽर्शसा भार्या यस्येत्यादौ वृद्धिरूपतद्धित-सम्भवः। तस्य तद्धितत्वं च पूर्वविधत्वेन तद्धितत्वस्य विशिष्टेऽपि वृत्तेर्वर्णमात्रावृद्धित्वेनात्र तत्प्र-वृत्तिसौलभ्यात्। न च रक्तपर्युदासाद्वृद्धिरूपतद्धितग्रहणम्, न हि रक्तार्थे तादृशः सम्भवतीति दण्ड्युक्तं युक्तम्। नील्या आनैल्या नीला वृहतिका यस्येत्यादौ तत्सम्भवादिति वाच्यम्। विकार-पर्युदासेन तस्याग्रहणात्। न हि विकारार्थे वृद्धिरूपस्तद्धितोऽस्तीति भावः। भाष्याद्यनुक्तदोषमाह। **न चेति।** एवमपीति शेषः। **वैयाकरणेति।** 'न य्वाभ्याम्'(पा०सू० ७-३-३) इति सूत्रस्थकैयट-प्रयोग इत्यर्थः। व्याकरणमधीते वेत्ति वा वैयाकरणः। 'तदधीत' (पा०सू० ४-२-५९) इत्यण्। स्वश्वस्यापत्यं स्त्री सौवश्वी। 'तस्यापत्यम्' (पा०सू० ४-१-९२) इत्यण्। उभयत्र णित्वात्प्राप्तां वृद्धिं निषिध्यैजागमो विधीयते। अत्र वृद्धेर्निमित्तं तद्धितो भवत्येवेति निषेधातिप्रसङ्ग इत्यर्थः। तथाशब्दः समुच्चये व्युत्क्रमे च। **फलोपहितेति।** वृद्धेस्तद्धितस्येत्युक्तावपि निमित्तनिमित्तिभाव एवोक्तरीत्या सम्बन्ध इत्युक्तार्थलाभे निमित्तग्रहणात् फलोपहितनिमित्तस्यैव ग्रहणमिति भावः। **एचाविति।** नन्वित्यादिः। **मप्यस्तीतीति।** एचौ प्रति निमित्तत्वात्तयोर्वृद्धिसंज्ञकत्वाद्वृद्धिं प्रति फलोपहितोऽपि भवत्ययं तद्धित इत्यर्थः। वस्तुतस्तु तन्त्रेत्यादिर्विधानादित्यन्तं तदनुरोधेनोक्तं चिन्त्यम्। समस्तैकदेशे वृद्धिशब्दे तन्त्राद्यसम्भवात्। समुदाये तु न तदुपयोगः। वृद्धिशब्दस्य सौत्रत्वात्। लुप्तविभक्त्यन्तत्वमित्यप्युक्तादिभाष्यादिविरुद्धम्। किञ्च फलोपहितनिमित्तग्रहणे मानाभावात्। त्वन्मते निमित्तग्रहणस्य तन्त्रादिप्रतिपादकतया साफल्यात्। अन्यथा तदुक्ततन्त्रादि-लाभो न स्यात्। एतेन शब्दव्यापाराश्रयणे तात्पर्यमित्यपास्तम्। तन्त्रादीत्याद्यसङ्गत्यापत्तेः। बहुवचनान्तसमासपर्यन्तधावनासङ्गत्यापत्तेश्च। एवञ्च वैयाकरणीभार्य इत्येव प्रयोगः सत्यभिधाने। अत एवादैज्मात्रस्येति पक्षे अदोषानुद्धावनं भाष्ये। तद्धावितग्रहणपक्षेऽपि **नय्वाभ्या**मिति सूत्रे ऐजंशेऽपि वृद्धिपदसम्बन्धेन निषेधप्रवृत्तिरत्र सूपपादा। अत एव **देविकाशिंशपेति (पा०सू० ७-३-१)** सूत्रे भगवता तत्सम्बन्धो दर्शितः। अत उक्तभाष्यस्थनिमित्तशब्दोपादानादेव गमकाद्वृद्धीनां निमित्तं तस्येति बहुवचनान्तेन समास इति कैयटोक्ताशय एव युक्तः। तदाशयस्त्वनया रीत्यैवोक्तो वक्ष्यते चेति बोध्यम्।

***केचित्तु यावद्बुद्धिजननयोग्यत्वे सति किञ्चित्फलोपहितस्तद्धितो निमित्तशब्देनोच्यते। वैयाकरपे तु ऐचं प्रति तद्धितो न निमित्तं निषेधसन्नियोगशिष्टतामात्रेणातिप्रसङ्गभङ्गात्। तेन वैयाकरणभार्ये नातिप्रसङ्गः। ''परिषदो ण्यः'' (पा०सू० ४-४-४४) 'पारिषद्या भार्या' इत्यादौ त्वाकारमात्रोपहितत्वेऽपि स्वरूपयोग्यता सकलवृद्धिं प्रत्यस्तीत्याहुः। तस्मात् —**

आवृत्तौ गौरवापत्तेः शालीयादेरसिद्धितः।

३.११ सूक्तिरत्नाकरोक्तकैयटाशयवर्णनं - प्रभायां तद्विमर्शश्च

तदाकूतं **नारायणादय** इत्थं वर्णितवन्तः। उक्तहेतोः बहुवचनान्तेनैव समासः। हेतुमद्भावलक्षणसम्बन्धे षष्ठी। तथा च वृद्धीनामपि षष्ट्यर्थः स्वरूपयोग्यत्वरूपं तादृशं हेतुत्वं तद्बुद्धिनिमित्तं, परिशेषात् फलोपहितमेव। तच्च सामर्थ्यात् यत्किञ्चित्प्रत्येव। नह्याकारादिवृद्धीनां स्वरूपयोग्यो हेतुः स्वसन्निधिवृद्धीनां फलोपहितः सम्भवति। किन्तु वृद्धेरेवेति तन्मतेन फलितमाह। **केचिदिति।** वृद्धीत्यादिनोक्तभाष्यकैयटयोः तथा तात्पर्यं वर्णितवन्तो नारायणादय इत्यर्थः। **न किञ्चिदिति।** वृद्धिरूपेति शेषः। **निमित्तेति।** वृद्धीत्यादिः। **नोच्यत इति।** एवञ्च तावद्भार्ये न दोष इति भावः। अत्रापि पक्षे इतः प्रागुक्तरीत्या [१]निषेधातिप्रसङ्गनिरासासम्भवादन्यथा तमाह। **वैयाकरणे त्विति।** तच्छब्दे त्वित्यर्थः। ऐचमैकारम्। इदमुपलक्षणं सौवश्वादेरपि। एवमग्रेऽपि। नन्वेवमैजतिप्रसङ्गापत्तिरत आह। **निषेधेति।** ऐचो वृद्धीत्यादि। पारिषद्याभार्येत्यत्र तु निषेध इष्ट एवेत्याह। **पारीति।** अत्र मते केचिदाहुरित्याभ्यां तुना चारुचिः सूचिता। तद्बीजं तूक्तभाष्यकैयटयोर्युक्तत्वेऽपि तयोस्तथाशयवर्णनं **नारायणा**दिकृतमयुक्तम्। स च वृद्धेः स्वरूपयोग्यत्वरूपनिमित्तत्वबाध्यतद्धितस्तद्ग्रहणमिति स्पष्टं भाष्यादितः प्रतीयमानार्थेन तावद्भार्ये दोषवारणेनाधिकार्थकल्पने मानाभावात्, न य्वाभ्यामिति सूत्रस्थैकैयटप्रयोगे वैयाकरणभार्येत्यत्र दोषस्योक्तत्वच्च। अत एव भाष्यादि संगच्छत इत्यादि प्रागुक्तमेव। अन्यथा तद्विरोधापत्तिरिति। तस्मात् कृत्स्नप्रतिपत्तिकालिकेन प्रयोगसमवायात् न पारिषद्याभार्ये दोष इति तत्वम्। हेत्वन्तरमपि प्रतिपादयन् सिद्धान्तमुपसंहरति। **तस्मादिति।** अत्र पक्षे उक्तदोषद्वयाभावादित्यर्थः। कारिकेयम्। तत्र पक्षे प्रोक्तदोषाननुवदति। **आवृत्तावित्यादिना।** आदिना दोषद्वयपरिग्रहः। हेत्वन्तरमाह।

---

* केचिदिति प्रभासम्मतः पाठः।

१. निषेधासम्भवादिति खपाठः।

मालादीनां चेति लिङ्गाव्याप्तिन्यायात्तथैव च ।।

भाविसंज्ञात्वविज्ञाने गौरवाच्चेह निश्चितम् ।
आदैज्मात्रस्याविशेषाद्वृद्धिसंज्ञा विधीयते ।।

अनर्थकं साध्वनुशासनं प्रयोगनियमार्थमादेशार्थमागमार्थं विशेषणविशेष्यभावार्थं चेदं सूत्रमिति षट्पक्षी तु भाष्य एव निराकृतत्वादसम्भवदुक्तिकत्वाच्च नेह तन्यते ।

व्याप्तीति । तथैवेति । यथा गौरवापत्यादिर्हेतुः प्रागुक्तस्तथा व्याप्तिन्यायोऽपि स बोध्य इति भावः । अत एव तथैवेति सफलम् । चो व्युत्क्रमे वा । **इह** एतत्सूत्रस्थभाष्ये । मात्रपदेनोक्तमर्थं विशदयति । **स्याविशेषादिति ।** तेन भावितानामेवेत्येवं विशेषानङ्गीकारादित्यर्थः । ननु प्रागुक्तयुक्तिभिरादैज्मात्रस्य ग्रहणेऽपि प्रागुक्तफलितवाक्यार्थस्य कथं सिद्धिरत आह । **वृद्धिसंज्ञेति ।** अर्थान्तरासम्भवादाचार्याचाराच्च तथा शाब्दमूरीकृत्य फलिततया सा संज्ञा विधीयत इत्यर्थः । **इतीति ।** बोध्यमिति शेषः ।

३.१२ वृद्धिरादैजित्यस्य संज्ञासूत्रत्वसाधनम् - प्रभायां रत्नप्रकाशविमर्शः ।

ननु कथमर्थान्तरासम्भवो यावता भाष्येऽन्येऽपि षट्पक्षा उक्ता अत आह । **अनर्थकमिति ।** संज्ञाधिकाराभावे दश दाडिमानीत्यादिसमूहवदनर्थकमिदं सूत्रमित्यर्थः । ननु विजातीयोच्चारिणा महता यत्नेन सूत्राणां प्रणीतत्वात्तस्यापि तत्वं दुर्वचं किं पुनः सूत्रस्यात आह । **साध्वनुशासनमिति ।** शास्त्रस्य साध्वनुशासकत्वाद्वृद्धिपदादैच्पदयोः साधुत्वमनेन क्रियत इत्यर्थः । ननु साधुत्वमपि धातुपाठादिना प्रकृतिप्रत्ययादिद्वारा समुदायस्य कृतमेवात आह । **प्रयोगेति ।** यथाश्रुतप्रयोगो यथा स्यादादैज्वृद्धिरिति प्रयोगो मा भूदित्यर्थः । ननु प्रकृतिप्रत्ययोपसर्जनादैज्नियमेऽपि न शास्त्रस्य लोके प्रयुज्यमानस्वतन्त्रपदप्रयोगनियामकत्वम् । लोके वृद्धानां यथेष्टं सम्बन्धदर्शनात्तस्या नियमनासम्भवादत आह । **आदेशार्थमिति ।** ननु षष्ठीबोध्यस्थान्यर्थाभिधानस्य सामर्थ्याभावान्नादेशताऽत आह । **आगमार्थमिति ।** वृद्धिशब्दस्यादैच् आगमा विधीयन्त इत्यर्थः । नन्ववयवषष्ट्या लिङ्गस्य वा भावान्नागमत्वमत आह । **विशेषणेति ।** वृद्धिविशिष्टा आदैच् इत्यर्थोऽनेन प्रतिपाद्यत इत्यर्थः । अत एव चासङ्गतिरिति बोध्यम् । **निराकृतेति ।** तत्र पञ्चानां निराकरणं कृतमेव । षष्टस्य तु वृद्धिशब्दार्थत्वयोग्यआदैच्शब्दस्य लोकेऽर्थो न प्रसिद्ध इति [१]विशेषणविशेष्यभावार्थत्वमपि नेति

---

१. विशेषणविशेष्यभावाभावार्थत्वमपि इति कपाठः ।

संज्ञासंज्ञिभावे सत्यपि का संज्ञा कः संज्ञीत्यत्र तात्पर्यग्राहकास्तु बहवो न्यायाः । तथा हि,

यच्छब्दयोगः प्राथम्यमित्याद्युद्देश्यलक्षणम् ।
तच्छब्द एवकारश्च स्यादुपादेयलक्षणम् ।।

इत्यभियुक्तोक्तेस्तथैवानुभवाच्च प्राथम्यं तावत्संज्ञित्वे लिङ्गम् । तच्च ''अदेङ् गुणः'' (पा०सू० १-१-२) इत्यादौ स्पष्टमेव । वृद्धिसंज्ञासूत्रे तु मङ्गलार्थं वृद्धिशब्दस्यादौ प्रयोगेऽपि वक्ष्यमाणैर्न्यायान्तरैरादैचां संज्ञित्वे निर्णीते सत्यादैज्वृद्धिरित्याकारकपदानुपूर्वीज्ञानानन्तरमेव वाक्यार्थबोधाभ्युपगमात्तज्जनकीभूतानुपूर्वीज्ञाने आदैचामेव प्राथम्यान्न व्यभिचारः । पदानुपूर्वीज्ञानमेव चासत्तिज्ञानमित्युच्यते । इदं च शाब्दबोधे

निराकरणं बोध्यम् । ननु निराकृतमप्यन्यत्र प्रतिपाद्यत अत आह । **असम्भवादिति ।** सर्वत्र स्वल्पस्यापि साधकस्याभावात्, द्विरेफसाधकवशेन सम्भवाच्चेति भावः । **नेह** कौस्तुभे । नन्वेवमपि वैपरीत्यमुचित आह । **संज्ञासंज्ञीति ।** तत्र तावद्भाष्योक्तहेतुचतुष्टयं व्युत्क्रमेणाह । **यच्छब्देत्यादि ।** प्राथम्यं **प्राथम्यं** च । आदिना प्राप्तत्वादिसमुच्चयः । अत एवाग्रे चेनाप्राप्तत्वादिसमुच्चयो बोध्यः । तच्छब्दस्तद्योगः । एवमग्रेऽपि । ननु निर्मूलत्वेनाभियुक्तोक्तिरप्रमाणमत आह । **तथैवेति ।** प्राथम्यं पूर्वबुद्धिविषयत्वम् । प्रयोगेऽपीत्यस्य न व्यभिचार इत्यत्रान्वयः । ननु पूर्वोच्चारणस्य मङ्गलार्थत्वेऽपि व्यभिचारस्तदवस्थः । न चानन्यफलकत्वे सति तत्वं तल्लिङ्गं । 'भूवादयो धातव' इत्यादावव्याप्तेः, तस्य मङ्गलार्थत्वेन तत्वाप्राप्तेः । न च यस्य प्राथम्यमुद्देश्यत्वसिद्धिमात्रफलकं तदन्यफलाभावो विवक्षितः । अस्ति चेदं तत्र भूवादिशब्दस्य मङ्गलस्मारकत्वेऽपि तदीयप्राथम्यस्य मङ्गलार्थत्वाभावात् परोच्चारिततत्स्मारकत्वाव्याघातात् । अत्र तु शास्त्रादौ मङ्गलापेक्षेति परोच्चारणेन नेष्टसिद्धिः स्यादिति तन्मङ्गलार्थमेवेति वैषम्यं वाच्यम् । अदेङ् गुण इत्यादौ अदेङामपि तस्य तत्सिद्धफलकत्वेन तत्र दोषाभावात्, [1]अभियुक्तोक्तच्या तदनिवेशाच्चात आह । **वक्ष्येति । न्यायान्तरैरिति ।** प्राथम्यभिन्नावृत्त्यादिभिरित्यर्थः । आकार उभयोरपि ज्ञेयः । अत एवैकदेशान्वयः । **आनुपूर्वीज्ञान इति ।** तादृशतद्विषयानुपूर्व्यामित्यर्थः । **न व्यभिचार इति ।** उपेयसिद्ध्यर्थं नोपायानुसरणम् । तस्य तैः सिद्धत्वात् । किन्तु तस्य तदर्थमादौ पाठेऽपि तल्लिङ्गस्यास्याप्युक्तरीत्या सत्वप्रतिपादनमिति न व्यभिचार इत्यर्थः । अत एवोपसंहारैकवाक्यता । एतेन प्रकारान्तरेण निर्वाहे आर्थक्रमेण तथा कल्पनानुपयोगात्तत्र मानाभावाच्च चिन्त्यमिदमिति

---

१. अभियुक्तोक्तौ इति खपाठः ।

हेतुरिति यैर्नेष्यते तेषामासन्नानासन्नकथोच्छेदः स्यात्, पदसमूहालम्बने सकलपदानां पदार्थस्मरपे च सकलपदार्थानां विषयत्वाविशेषात्। आवृत्तिश्च संज्ञात्वे लिङ्गम्, व्यवहारार्थमेव संज्ञाकरपात्। भेदाभेदाभ्यामपि संज्ञित्वसंज्ञात्वे क्वचिन्निर्पीयेते। बहूनां ह्येका संज्ञोचिता लाघवात्, न त्वेकस्य वह्वचः संज्ञा गौरवात्। न्यूनाधिकव्यक्तिकास्तु बह्वचः संज्ञा इष्यन्त एव, तत्तत्प्रयुक्तकार्यवैलक्षण्यात्, कृत्कृत्यप्रत्ययसंज्ञावत्,

---

कृष्णरत्नाद्युक्तमपास्तम्। ननु पदानुपूर्वीज्ञानस्य तत्र न कारणत्वम्। मानाभावात्, आकाङ्क्षादिसत्व एव बोधाङ्गीकारात्। एवञ्च कथं तदनन्तरमेवासौ अत आह। **पदेति।** इदं चोच्चारणरूपाऽऽसत्तिरिति मतेन। तद्रूपया तया यत् ज्ञानं पदादिज्ञानमित्यर्थः। उपस्थितिरूपाऽऽसत्तिरिति मते तु आसत्तिरूपं ज्ञानमित्यर्थः। एतेन पदसन्निधिरूपासत्तेः स्वरूपसत्याः कारणत्वाङ्गीकारेणैव वक्ष्यकथोपपत्तौ यत् ज्ञानस्य कारणत्वेन मानमिति चिन्त्यमिदमिति [१]**रत्नोक्त**मपास्तम्। आसत्तेस्तु हेतुत्वमावश्यकमित्याह। **इदं चेति।** तयाऽऽसत्तिरूपमित्यर्थः। **आसन्नेति।** तादृशानां पदानां पदार्थानां च कथेत्यर्थः। तदेवाह। **पदेति।**

ननु यो होता सोऽध्वर्युरित्यादौ चरमबोध्यस्य तच्छब्दयुक्तस्यापि तस्य होतृकार्यकारित्वविधानाव्यभिचार एवेति अभियुक्तोक्तेरनुभवस्य च न सार्वत्रिकत्वमिति प्रागुक्तमेव। उद्देश्यविधेयभावव्यवस्थापकं तु प्राप्तत्वमप्राप्तत्वं चेति न क्वापि दोषः। किञ्च वृद्धिशब्दस्य संज्ञात्वे सिद्धे एव तस्य विधेयत्वेन पश्चात्वप्राप्ते पूर्वपाठो मङ्गलार्थ इति वाच्यम्। तस्य तत्वप्रतीतिरेव तु आदौ कथम्। न च व्याख्यानात्सा। तस्यागतिकगतित्वात्। अतस्तस्य तत्प्रतीतिफलकन्यायान्तराण्याह। **आवृत्तिश्चेत्यादि।** चः प्राथम्यसमुच्चायकः। एवमग्रेऽपि यथायथं बोध्यम्। **मेवेति।** दानादिप्रतिपादनार्थमेवेत्यर्थः। तदर्थं तेषामेवावृत्तिर्न मांसपिण्डस्य। लोके इतरस्थस्यापि नाम्नो धारणमात्रेण दानादिसम्भवादिति भावः। **अनाकृतिः संज्ञे**त्यादिभाष्यस्य [२]कैयटोक्तमर्थमेवाह। **भेदाभेदेति।** यथाक्रममन्वयः। अनयोरसार्वत्रिकत्वादेवाह। **क्वचिदिति।** समनियतस्थले फलभेदाभावादितीत्यर्थः। नन्वावृत्तौ न मानमत आह। **बहूनामिति।** हि यतः। नन्वेकस्यापि तव्यादेरनेकाः कृत्कृत्यप्रत्ययसंज्ञाः क्रियन्त एव। किञ्च क्वचिदित्यधिकम्, भाष्यानुक्तत्वादतः कैयटोक्तमेवाह। **न्यूनाधिकेति।** एकस्येत्यादि इष्टो, न न्यूनाधिकव्यक्तिकत्वं निमित्तप्रसङ्गात्। किन्तु फलभेदस्तदाह। **तत्तदिति।** तथा च सति प्रयोजने तथा नान्यत्र तदभावादिति

---

१. (र.प्र.पृ.सं. २३६) प्रथमो भागः। २. म.भा.प्र.पृ. सं. १५८ प्रथमो भागः।

तद्धिततद्राजप्रत्ययसंज्ञावच्च । लघ्वक्षरत्वमपि टिघुभादौ संज्ञालिङ्गं यथायथं बोध्यम् । इह त्वावृत्त्याऽभेदेन च वृद्धिशब्दः संज्ञेति स्थिते तद्बलेन श्रुतानुपूर्वीभङ्गादादैचां प्राथम्यमपि योजनीयम् । यद्वा, स्वेच्छया संज्ञाः क्रियन्ते इति पक्षं विहाय व्यवहाराय नियम इति पक्षे योज्यम् । आद्येऽपि कार्यकालपक्षाश्रयपेन वा समाधेयमिति दिक् ।

एतेन ''आर्द्धधातुकं शेषः'' (पा०सू० ३-४-११४) ''कृदतिङ्'' (पा०सू०

क्वचिदित्युक्तिरिति भावः । सम्प्रसारण सर्वनामसंज्ञादावभावादाह । [१]**टिघुभादाविति ।** कथं तर्हि वृद्धिशब्दस्य संज्ञात्वप्रतीतिरत आह । **इह त्विति ।** लघ्वक्षरत्वस्यावच्छेदकस्तु आचार्याचारात् संज्ञासंज्ञयसन्देहसिद्धिरिति भाष्योक्तं पक्षमाह । **यद्वेति ।** तत्र पक्षद्वयेऽपि क्रमेण प्रसिद्धिमाह । **स्वेच्छयेति ।** अपूर्वाः संज्ञाः क्रियन्त इत्यर्थः । तदा हि सन्देह इति भावः । **इति पक्ष इति ।** अत्र पक्षे, अस्मच्छास्त्रे वृद्धिपदेनादैचो बोद्धव्या इत्यर्थः । न ह्यत्र पक्षे सन्देहः इति भावः । **कार्यकालेति ।** अत्र पक्षे आदैचो वृद्धिसंज्ञका भवन्ति, तदभिन्नास्ते च मृजेर्भवन्तीति वाक्यार्थः । न ह्यत्रादैच्पदे न विधानम्, येन तस्य संज्ञात्वसम्भवो ना, नाप्यन्यत्र तथापि न तत्र संज्ञाशास्त्रगतिः स्यादिति भावः । **दिगिति ।** तदर्थस्तु यथोद्देशपक्षेऽपि एवंविधे संज्ञाशास्त्रे तत्राप्य ..... गमनात् । अत एव पक्षान्तरैरिति बहुवचनं वक्ष्यति । अत एव चाचार्याचारात्संज्ञासिद्धिरित्येतादिहैव तावदित्यादित्यादिनोक्तरीत्या मतभेदेन विवृतं भगवतेति ।

३.१३ नारायणमतविमर्शः - प्रभायां रत्नप्रकाशविमर्शः

नारायणोक्तिं खण्डयति । **एतेनेति । आदिरन्त्येने**ति सहेता मध्यमोवर्णः संज्ञीति यैर्व्याख्यातं तन्मतेनेदम् । अत एव इग्यणसङ्गतिः । एतेनात्र यद्यपि न संज्ञाश्रितः, किन्त्वाक्षिप्तस्तथापि शब्दाध्याहारवादे तादृशशब्देन तथैवानुपूर्वीकल्पनमिति न दोषः । अर्थाध्याहारवादे तु [२]चिन्त्यस्त-

---

१. कपुस्तके 'टिघुभादाविति' प्रतीकग्रहणानन्तरं ''ननु पूर्वं न्यायान्तरैरित्युक्तम् । अत्र तु लक्ष्वक्षरत्वं टिघुभादौ लिङ्गमित्युक्तमिति मिथो विरोधोऽतो वक्ष्यमाणसङ्गत्यर्थे चोपसंहरति । **इहत्विति ।** तु टिघुभादिवैलक्षण्ये । तत्र लघ्वक्षरत्वमपि, अत्र तु तन्नेति भावस्तदाह । **आवृत्त्येति ।** अनेनाद्यौ पक्षावेव भाष्याभिमतावन्ये शिष्यबुद्धिपरीक्षार्थमुक्ता इति । कृष्णाद्यसाङ्गत्यध्वननायाह । **भेदेनेति ।** चो मिथः समुच्चये । तथा च पूर्वं साधारणोक्तिरिति न विरोध'' इति पाठः उपलभ्यते । खपुस्तकेऽयं पाठ '( )' इति चिह्नमध्ये स्थापितः । 'कथं तर्हि' इत्यारभ्य 'इति पक्षे' इति प्रतीकपर्यन्तपाठस्तु उपरि स्थापितः कपुस्तके नास्ति ।

२. चिन्त्यमत्रानुपूर्वीकल्पनमिति खपाठः ।

३-१-९३) ''अपृक्त एकाल्प्रत्ययः'' (पा०सू० १-२-४१) ''स्वं रूपं शब्दस्य'' (पा०सू० १-१-६८) ''अनुदित्'' (पा०सू० १-१-६९) ''तपरः'' (पा०सू० १-१-७०) ''आदिरन्त्येन'' (पा०सू० १-१-७१) ''येन विधिस्तदन्तस्य'' (पा०सू० १-१-७२) इत्यादावपि व्यभिचार उद्धृतः, तत्रापि विपरीतानुपूर्वीकल्पनात्। कल्पकत्वस्य च प्रागेवोक्तत्वात् पक्षान्तरैरपि समाधानाच्च। अत एव स्थानिवत्सूत्रे 'वत्करणज्ञापनार्थम्' इत्याशङ्क्य ''स्थान्यादेशस्य संज्ञा मा विज्ञायि'' इति भाष्यमप्युपपन्नम्। यत्तु ''अपृक्त एकाल्'' (पा०सू० १-२-४१) इति परिभाषा, न तु संज्ञा इत्युक्तं, तद् वृद्ध्यादावपि सुवचम्। ''अपृक्तसंज्ञायां हल्ग्रहणं स्वादिलोपे हलो ग्रहणार्थम्'' इति वार्त्तिकस्य तद्भाष्यस्य च प्रतिकूलम्। तस्मादुक्तैव गतिः समीचीनेति दिक्।

न्मात्रानुपूर्वीकल्पनमितीदमयुक्तमित्यपास्तम्। आश्रयस्योक्तत्वात्, आद्यन्तेन तथाकल्पनेनापि दूषणसङ्गतेश्च। यत्तु संज्ञी नोपात्त इति सिद्धान्तपक्षे आनुपूर्व्या एवाश्रुतत्वात्तद्भङ्गाभावात् प्राथम्यस्य पूर्वोच्चारितत्वस्य च व्यभिचारो दुरुद्धरः। तस्य शब्दस्याक्षेपेऽपि न श्रोतत्वम्। श्रोत्राग्राह्यत्वात्, उच्चारणघटिताया आनुपूर्व्या अनुमितशब्देऽभावाच्च। प्राथम्यमात्रस्य न लिङ्गत्वं, दोषस्योक्तत्वाच्चेति **नारायणः।** तन्न। प्राथम्यस्य भाष्योक्तेः। पूर्वोच्चारितत्वस्य च उभयोल्लेखविषयत्वेन दोषात्। अत एव नानालक्षणोक्तिः सफला। एतेन पूर्वोच्चारितः संज्ञीति प्रायोवादस्तेना**पृक्त एकालि**त्यादौ च दोष इति [1]**शिवरामेन्द्रसरस्वत्युक्तमपास्तम्।** एतेनेत्यस्याद्यरीत्याऽर्थमाह। **तत्रापीत्यादि।** तेष्वपीत्यर्थः। कल्पकस्य च आवृत्यादेः। द्वितीयरीत्या तदर्थमाह। **पक्षान्तरैरपीति।** व्यवहारानियम इति पक्षादिभिरपीत्यर्थः। **अत एव** विपरीतानुपूर्वीकल्पनादेव। **भाष्यमप्युपेति।** समादधदित्यादिः। अत एवाप्युपपत्तिः। अपिः प्रागुक्तसूत्रजातसमुच्चायकः। तत्र व्यभिचारवारकावृत्त्ययूनकैयटोक्तिं खण्डयति। **यत्त्विति। परिभाषेति।** तदा हि यत्रापृक्तपदं तत्रैकालित्याद्युपतिष्ठत इत्यर्थात् प्राथम्यं युक्तमेवेति तद्भावः। **सुवचमिति।** यथाऽपृक्तशब्देनैकाकी कथ्यत इत्यनियमे प्रसक्ते तेन नियमः क्रियते, तथाऽत्रापि वर्धनगुणयोगादिकारादिष्वपि अतिप्रसङ्गे नियमसम्भवात्। पङ्क्त्यादिवद्रूढ्यर्थमिह संज्ञाकल्पनं चेत्तत्रापि तत्तुल्यमिति भावः। **तद्भाष्यस्य चेति।** एक हल्प्रत्ययोऽपृक्तसंज्ञो भवतीत्यस्य चेत्यर्थः। न च तत्र संज्ञापदं परार्थ्यात्परिभाषापरम्। मानाभावात्। किञ्च परिभाषात्वे एकाल्पदं व्यर्थम्। अपृक्तपदादेव तत्र तदुपस्थितेः। अप्रत्ययनिवृत्यर्थमेव परिभाषाश्रयणात्। किञ्च तत्वेऽप्येकाल्प्रत्ययोद्देशेनापृक्तपदोद्देशस्थत्वविषयं पदपरार्थत्वं तवापि लक्षणाऽऽवश्यकत्वेन

---

१. शिवरामेन्द्रसरस्वती रत्नप्रकाशकारः (पृ.सं. २३६, F.I.P.)

ननु ''मृजेर्वृद्धिः'' (पा०सू० ७-२-११४) इत्यादावन्योन्याश्रयः, संज्ञया हि विधिर्विहितानां च संज्ञेति। न च मालादौ संज्ञाप्रवृत्तिसम्भवे सतीह भाविसंज्ञाविज्ञानं सम्भवति। तस्माद् वृद्धिशब्द एवादेशः स्यात्। अन्यत्र वृद्धि संज्ञाप्रवृत्तावपि

सामानाधिकरण्यान्वयार्थं तावत्पर्यन्तं लक्षणाया उचितत्वात्। पदत्रयाध्याहारे गौरवाच्च। एवञ्च तथैव पाठो युक्तः। बोधोपपत्तिस्तु प्राग्वत् [१]सममेव इत्यपि दूषणं बोध्यम्। वस्तुतस्तु एकशब्दस्य प्रथमार्थकत्वेन प्रथमं आनुपूर्वीव्यत्यासेन विलम्बेन बोधजनकशब्दोच्चारणं मङ्गलार्थमेवेति भाष्येणान्यत्रापि तथाकरणमुद्देश्यविधेयभावेनान्वये तादृशस्यैव साधुत्वमिति भ्रमवारणार्थमिति बोधितम्। ''नेह[२] प्रयोग नियम आरभ्यते, किं तर्हि संस्कृत्य संस्कृत्य पदान्युत्सृज्यन्ते, तेषां यथेष्टमभिसम्बन्धो भवति। तद्यथा। आहर पात्रं, पात्रमाहरेती''ति भाष्येणापि बोधितमिदम्। उद्देश्यविधेयभावव्यवस्थापकं च प्राप्तत्वमप्राप्तत्वं चेति प्रागुक्तमेव। अतो न कोऽपि दोष इति बोध्यम्। तदाह। **दिगिति।** एतेनाहर पात्रं पात्रमाहरेति वत् उद्देश्यविधेयभावस्थलेऽपि पौर्वापर्यनियमाभावस्य नेह प्रयोगनियम आरभ्यत इत्यादिना भगवतैवोक्तत्वाच्चिन्यमिदमपीति [३]**शिवरामेन्द्रसरस्वत्यु**क्तमपास्तम्॥

३.१४ अन्योन्याश्रयपरिहाराधिकरणविचारः

तद्भावितग्रहणपक्षे संज्ञाविधेः अचारितार्थ्याद्भावसंज्ञाविज्ञानेन तत्र निर्वाहेऽपि आदैज्मात्रस्य संज्ञेति सिद्धान्तपक्षे दोषमाह। **नन्विति।** एतेन तद्भावितपक्षे दोषमाह - सतो वृद्ध्यादिष्वितीति **नारायणो**क्तमपास्तम्। वृद्धिर्यस्येत्याद्यनुवादे दोषाभावात्। **मृजेरिति।** ननु संज्ञाविधानसामर्थ्याद्विधिषु भाविसंज्ञात्वविज्ञानान्नेतरेतराश्रयदोषोऽत्र पक्षे **इग्यण** इति वदित्याशङ्क्य निरस्यति। **न चेति।** न हीत्यर्थः। मालादौ संज्ञाशास्त्रस्य चारितार्थ्याद्विधिषु संज्ञाविज्ञाने मानाभावात्, इग्यण इत्यादौ तु सामर्थ्यात् तत्कल्पनमिति भावः। तत्र तस्मिन् सति दोषमाह। **तस्मादिति।** तत्रैतदनुपस्थित्या तस्य संज्ञात्वाभावेनाशब्दसंज्ञेति निषेधाप्रवृत्तिरिति भावः। नन्वेवमपि मालादिस्थवृद्धिसंज्ञकाकार एव विधीयतामिति नोक्तदोषोऽत आह। **अन्यत्रेति।**

---

१. साम्यमेवेति ख।

२. 'नेह' इत्यतः पूर्वं केचित्तु' इत्यधिकम् खपाठे। म.भा.पु. १६१ प्रथमो भागः।

३. र.प्र.पृ.सं. २३६।

मालादिशब्दान्तर्गतस्याकारस्य तत उत्कृष्येह विधातुमशक्यत्वादिति ।

अत्राहुः – 'मार्ष्टि' इत्यादौ सिद्धस्यैवाकारस्य मृज्युपदेशादसाधुत्वे प्रसक्ते साधुत्वं ''मृजेर्वृद्धिः'' इत्यादिना बोध्यते न त्वपूर्व आकारो भाव्यते, येनान्योन्याश्रयः स्यात् । उक्तं च वार्तिककृता - ''सतो वृद्ध्यादिषु *संज्ञाभावात्तदाश्रय इतरेतराश्रयत्वाद-प्रसिद्धिः । सिद्धं तु नित्यशब्दत्वात्'' इति । अथ लक्षपैकचक्षुष्कः कश्चिद्व्याकरणबलेनैव

मालादावित्यर्थः । **सत इति ।** सतो - निष्पन्नस्य संज्ञाभावात् - संज्ञासम्बन्धात् तदाश्रये संज्ञाश्रये संज्ञया संज्ञिविधायके शास्त्रे मृजेर्वृद्धिरित्यादौ मृजे [१]वृद्ध्यादिपदेषूच्चारितेषु इतरेतराश्रयत्वाद-प्रसिद्धिः - वाक्यार्थाप्रसिद्धिरित्यर्थः । अविद्यमाने संज्ञासम्बन्धस्य वक्तुमशक्यत्वादिति भावः । निमित्तभावादिति त्वपपाठः । भाष्यविरोधात् । अस्यार्थान्तरं **दण्डिकृष्णाद्युक्तमयुक्तमिति** स्पष्टं **छायायाम् ।** यद्यस्य सूत्रस्य शाकटं [२]वहेत्यादाविव भाविसंज्ञाविज्ञानेन सिद्ध्यति, यथा च तत्रोत्पत्यनन्तरं गृहीतशक्तिकशाकटसादृश्याच्छाकटपदशक्तिग्रहः, तथा प्रकृतेऽपि । स्पष्टं चेद**मिग्यप** इति [३]सूत्रभाष्ये । न च तत्र गत्यन्तराभावात्तदाश्रयणेऽपि प्रकृतेऽनुवादविषये मालादौ चारितार्थ्येन कथं तदाश्रयणमिति वाच्यम् । सिद्धान्तिनाऽऽदैज्मात्रग्रहणपक्षोपपत्त्यर्थमनुवाद इव विधावप्यस्योपस्थितेरवश्यं वाच्यतयैव तदुपस्थितिसामर्थ्येनात्रापि तदाश्रयणस्य सुवचत्वात् । अन्यथा तद्भावितग्रहणपक्षस्यैव सिद्ध्या आदैज्मात्रग्रहणमिति पक्षासङ्गतेः स्पष्टत्वात् । अयमे**वोद्योतस्याशयः**[४] । एवञ्च न चेत्यादि प्रागुक्तं प्राचामनुरोधेनेति बोध्यम् । एतेन तथा **नारायणा**द्युक्तमपास्तम् । तथापि वास्तवमेवात्र परिहारमाह । **सिद्धं त्विति ।** सिद्धमेतत् । कथम् ? । नित्यशब्दत्वात् । नित्याः शब्दाः नित्येषु शब्देषु सतामादैचां संज्ञा क्रियते, न संज्ञया आदैचो भाव्यन्ते । एवञ्चेति कर्मधारयः । प्रथमोपात्तस्यापि नित्यत्वस्य सामर्थ्याद्विधेयत्वम् । तत्रानुपूर्वीनियमाभावस्य प्रागुक्तत्वात् । एतेन नित्यशब्दत्वादिति बहुव्रीहिः, वैयाकरणानां नित्यशब्दवादित्वादिति, नित्यान् शब्दान् विषयीकृत्य व्याकरणस्य प्रवृत्तत्वादिति वाऽर्थ इति **नारायणो**क्तमपास्तम् । न चैवं शास्त्रं व्यर्थम् । धातुपाठे मृजावुपदिष्टे माष्टीत्यादीनां प्राप्तासाधुत्वबुद्धिनिवारणाफलकसाधुत्वान्वाख्यानार्थत्वादित्यर्थः । स्पष्टं चेदं **मञ्जूषायाम्**[५] । एकदेशिनारायणानुरोधेनाह । **अथेति ।** प्रयोगेषु इति विषयसप्तमी । तथा चान्योन्याश्रय एवेति

---

* मुद्रितपाठे निमित्तभावादित्यस्ति । प्रभाया असम्मतत्वात् पाठः विपर्यस्तः ।

१. वृद्ध्यादिपदेष्वित्यनन्तरं उच्चारितेष्विति कपाठे नास्ति । २. वयेत्यादौ इति ख ।

३. म.भा.पृ.सं. ३९५ (प्रथमो भागः) ४. म.भा.प्र.उ.पृ.सं. १६७ (प्रथमो भागः) ५. ल.म.पृ.सं. २१५ ।

'मार्ष्टि' इत्यादिप्रयोगेषु व्युत्पित्सेत, तथापि न क्षतिः, शालामालादावाकारे श्रुते आत्वसामान्यलक्षणप्रत्यासत्या 'मार्ष्टि' इत्यादिप्रयोगसमवायिनां सर्वेषामाकाराणां वृद्धिशब्दवाच्यताग्रहात्। सामान्यलक्षणानभ्युपगमपक्षे त्वात्वजातौ शक्तिग्रहात् शक्त्यनुभवपदार्थस्मरणवाक्यार्थबोधानां समानप्रकारकत्वेनैवातिप्रसङ्ग-भङ्गाभ्युपगमाद्वा। अन्यथा 'गेहे घटोऽस्ति' इति वाक्यादप्यपूर्वव्यक्तिर्न गृह्येतेति दिक्। अत एव 'नवेति विभाषा' (पा०सू० १-१-४४) इति सूत्रे भाष्यकारो वक्ष्यति – साधुत्वस्य विधेयत्वे ''विभाषा श्वेः'' (पा०सू० ६-१-३०) इत्यादिना तस्यैव विकल्पापत्तिः। तस्मात्सम्प्र-

---

भावः। **आकाराणामिति।** भूतवर्तमानभाविसकललक्ष्यविषयसकलाकाराणामात्वजात्यवच्छिन्नानामित्यर्थः। अन्यथा तवापि तत्तद्बुद्धावसन्निहितसकलाकारविषयकशक्तिग्रहसम्भवेनानुवादेऽपि दोषः स्यात्। एवञ्च न कस्यचिद्वैयर्थ्यं नान्योन्याश्रयदोषश्चेति भावः। **आत्वजातावितिः।** अस्या नित्यत्वादेकत्वाच्च नान्योन्याश्रयः। विधिस्तु सामर्थ्यात् तदाश्रयस्य लक्षणयाऽऽक्षेपाद्वा। एतेन सामान्यस्य कथं विधेयत्वमित्यपास्तमिति भावः। तत्रै [1]..... पक्षे विशिष्य जात्यवच्छिन्ने शक्तिग्रहपक्षे आह। **शक्त्यनुभवेति।** शक्तिग्रहेत्यर्थः। **प्रकारत्वेनैवेति।** कार्यकारणभावाभ्युपगमेनेति शेषः। एवेन प्रमातृविशेष्यकत्वव्यवच्छेदः। **अतिप्रसङ्गेति।** अगृहीतशक्तिकस्यापि बोधे घटादिपदात्पटादिबोधापत्तिरूपेत्यर्थः। **अन्यथा** समानप्रकारत्वेन कार्यकारणभावाभ्युपगमे। तदा हि ततः सामान्यतो बोधः स्याद्विशिष्य रक्तपीतादि न स्यादिति भावः। वस्तुतस्तु अथेत्यादि चिन्त्यम्। लक्षणैकचक्षुष्कापेक्षया लक्ष्यैकचक्षुष्कस्य प्राथम्यात्। किञ्च जातिप्रकारकशक्तिग्रहस्य स्वाश्रयीभूतसकलव्यक्तिबोधकत्वेऽप्युनुत्पन्ने जात्याश्रयत्वसम्बन्धस्य वक्तुमशक्यतया भाविव्यक्तेर्जात्याश्रयत्वाभावेन तद्बोधासम्भवेन **मृजेर्वृद्धि**(पा०सू० ७-२-११४)रित्यत्र तज्जन्यज्ञप्त्युत्पत्त्योः परस्पराश्रय इति भाष्यादिभावात्। अपि च **वृद्धिरादै**जित्यस्य विद्यमानेषु बुद्धिस्थेषु चरितार्थेन भाविनामुद्देश्यत्वा-सम्भवेन तत्र वृद्धिस्थेषु चरितार्थेन भाविनामुद्देश्यत्वासम्भवेन तत्र वृद्धिपदस्य शक्तिग्रहासम्भवादिति बोध्यम्[2]। तदाह। **दिगिति।**

निष्प्रमाणत्वादुक्तभाष्यविरोधान्नायं पक्ष एव नेति कस्यचिदुक्तिखण्डनं ध्वनयितुं स्वरूपव्याक्रियैव पराक्रियेति न्यायेनाह। **अत एवेति।** प्रक्रियादशायामुक्तपक्षत्वादेवेत्यर्थः। एतेन

---

१. अत्र ग्रन्थः त्रुटितः। तत्रैत्पक्षे इति पाठः स्यात्।

२. बोध्यमित्यनन्तरं कपाठे पत्रद्वयं गलितम्। अतः 'दिगिति' इत्यारभ्य **२८६ पत्रे 'शासनरूपार्थः'** इति पर्यन्तं कपाठे नास्ति। खपाठमनुसृत्य प्रदत्तम्।

सारपाद्येव विकल्प्यत इति । एषैव लडादिविधौ गतिः । न चैवं साध्वनुशासनत्वभङ्गः, साधुत्वविशिष्टस्यैव सर्वत्र लक्षणया विधानमिति कृन्मेजन्तसूत्रे विवरणकारादिभिरुक्तत्वात्, केवलविधानेऽपि 'यदिह परिनिष्ठितं, तत्साधु' इति श्रुतार्थापत्तिं प्रकल्प्य वाक्यात्साधुत्वसिद्धेश्च ।

इह च प्रत्येकं वाक्यपरिसमाप्तिः, ''मालादीनां च'' (पा०सू० ६-२-८८) इत्यादिलिङ्गात् 'ब्राह्मणा भोज्यन्याम्' इत्यादौ तथा दर्शनाच्च । यद्यपि 'गर्गाः शतं

लक्षणैकचक्षुष्कः स्वमते सम्मतिमाह अत एवेतीत्यपास्तम् । स एवास्यावश्यकतामाह । **एषैवेति ।** अन्यथा लडादिमात्रघटितप्रयोगापत्तिरिति भावः । तदनुपपत्यभावात् कथं लक्षणाऽत आह । **केवलेति । श्रुतार्थापत्तीति ।** श्रुतार्थापत्तेः प्रमाणकल्पकत्वोपगमादिति भावः । यद्यप्येवमयं पक्ष उपपादितस्तथापि प्रक्रियायां न सिद्धान्त इति स एव निर्दुष्टः प्रबलो युक्तश्चेति स्पष्टमन्यत्रेति तत एव बोध्यम् ।

३.१५ समुदितसंज्ञानिराकरणविचारः

अथ प्रत्येकं वृद्धिगुणसंज्ञे भवत इति भाष्यार्थमाह । **इह चेत्यादिना ।** चो वाक्यालङ्कारे उत्तरसूत्रसमुच्चायको वा । अन्यथा द्वन्द्वनिर्देशात्समुदायस्यैव सा स्यादिति भावः । यत्तु अन्यार्थकस्मृत्युपारूढनानापदजनितैकस्मृतिविषययोरादैचोः तन्त्रेण संज्ञासम्बन्धाय संभूयोपस्थितेः सत्वेन समुदितः स्यात् । सा तु प्रत्येकम् । न च समुदाये वाक्यपरिसमाप्तावेकपदोपस्थितत्वं तन्त्रम् । द्वन्द्वोपस्थितस्यापि साहित्यस्योद्देश्यविशेषणतयाऽविवक्षितत्वेन प्रत्येकमेवोपस्थितिसम्भवादिति **हरदत्ता**दयः । तन्न । द्वन्द्वे साहित्यस्य विशेष्यत्वेन अविवक्षायाः सम्भवात् । यत्तु प्रत्याहारेण अन्योन्यसापेक्षप्रतीतेऽपि नित्य [१]..... परिसमाप्तिश्च । वाक्यस्य क्रियाफलस्य वाक्योपात्तेषु प्रत्येकमेककस्मिन् पृथक् पृथक् प्रवृत्तिलिङ्गादिति **प्रस्थेऽवृद्ध**मिति निषेधबाधनार्थं हि तत्सूत्रम् । समुदाये वृद्धिसंज्ञापरियोगे तु मालादीनामबहुत्वात्पूर्वेणैव स्वरसिद्धौ किं तेन । न च समुदाये साम्प्रतिकनामधेयरूपमालादीनां आद्युदात्तार्थं तत्, तस्य **वा नामधेयस्ये**ति वृद्धत्वादिति वाच्यम् । अभिव्यक्तेति न्यायेन तत्राप्रवृत्तेरिति भावः । [२]तदुक्तम् –

---

१. अत्र ग्रन्थः त्रुटितः ।

२. हरिणेति शेषः । वाक्यकाण्डे (वा.प.पूं.सं. ४४४, श्लो.सं. ३७७ द्वितीयभागः)

दण्ड्यन्ताम्' इत्यादौ समुदायेऽपि वाक्यपरिसमाप्तिर्दृश्यते गुणकर्मभूतानामपादानस्थाना-पन्नानां गर्गाणामनुरोधेनेप्सिततमकर्मतया प्रधानभूतस्य शतस्यावृत्त्ययोगात्, तथापीह शास्त्रे यत्नं विना समुदाये शास्त्रं न समाप्यते। अत एव ''उभे अभ्यस्तं सह'' इति

लक्ष्यस्य लोकसिद्धत्वाच्छास्त्रे लिङ्गस्य दर्शनात्।
अर्थे चादैक्षु भेदेन वृद्धिसंज्ञा समाप्यत ।। इति ।।

न ज्ञापकादेव, किन्तु लोकयुक्तितोऽपि प्रत्येकं सेत्याह। **ब्राह्मणादिति।** [1]तदुक्तम्

संघैकशेषद्वन्द्वेषु केचित्सामर्थ्यलक्षणम्।
प्रत्याश्रयमवस्थानं क्रियाणां प्रतिजानते ।।

भोजनं फलरूपाभ्यामेकैकस्मिन् समाप्यते।
अन्यथा हि व्यवस्थाने न तदर्थः प्रकल्पते ।।

अन्नादनादिरूपां च सर्वे तृप्तिफलां भुजिम्।
प्रत्येकं प्रतिपाद्यन्ते न तु नाट्य प्रक्रियामिव ।।

दृश्यादिस्तु क्रियैकापि तथाभूतेषु कर्मसु।
आवृत्तिमन्तरेणापि समुदायाश्रया भवेदिति ।।

दृश्यन्ते इति। तथा च लोकेषु क्रियामात्रानुसरणैः लोके द्वैविध्यदर्शनेन शास्त्रेऽप्यनिश्चयः स्यादिति भावः। गुणकर्मभूतत्वोपपादकं विशेषणं। **अपादानेति।** तथा च दुह्यादिषु ..... स्तिपाद्य इति भावः इति केचित्। वस्तुतस्तु उद्देश्यरूपमार्थं प्राधान्यं शतस्येनुद्देश्यत्वे न गर्गाणां गुणकर्मदण्डेश्च स्वसम्प्रदानकस्य दानानुकूलव्यापारानुकूलव्यापारः शासनरूपार्थः।

शासनं नियन्त्रणम्। एवञ्च ण्यन्त इति कर्तुरित्युभयोः कर्मत्वम्। कर्तृप्रत्ययसमभिव्याहारे धात्वर्थप्रधानव्यापारविशेषणफलाश्रयत्वेन गर्गाणां शाब्दं प्राधान्यमिति तत्रैव प्रधानकर्मणि लकारः। **प्रधानकर्मण्याख्येये** इत्युक्तेः। एतेन दुहादिष्वस्याप्रामाणिकः पाठः। **अपादानस्थानापन्नाना-**मित्यनेनाप्यनुद्देश्यत्वमात्रं, इप्सिततमेत्यनेन चोद्देश्यत्वमभिमतमिति बोध्यम्। ननु गुणभेदेन प्रधानभेदाभावेऽपि गर्गाणां गुणत्वं स्यात्। शतस्य च प्राधान्यमित्येवं कुतः दण्डेर्निग्रहार्थत्वादिति

---

१. वाक्यपदीये वाक्यकाण्डे (वा.प.पूं.सं. ३७१, श्लो.सं. ३७१, ३७२, ३७३) द्वितीयभागः।

सहग्रहणं वार्त्तिककृद्वक्ष्यति। भाष्यकारस्तूभेग्रहणमेवैतदर्थमिति वक्ष्यति। अन्यथा ''एकाचो द्वे'' (पा०सू० ६-१-१) इत्यनुवृत्त्या सिद्धेः किमुभेग्रहणेन ? संयोगसंज्ञायां समाससंज्ञायां च महासंज्ञाकरणमेवान्वर्थताविज्ञानार्थमिति यत्नः। अत एव ''सह सुपा'' (पा०सू० २-१-४) इति सहग्रहणं योगविभागेन तिङन्तादिसमासविधानार्थमिति स्थापयिष्यते।

चेत् शृणु। यदि शारीराभिहननलक्षणो दण्डोऽभिमतो भवेत्तदा दण्डस्य दण्डसंस्कारार्थत्वात्प्रति गर्गं भोजनादिवदावृत्तिः स्यात्। स एव न। किन्तु हिरण्यदानरूपः। अर्थिनश्चेत्यादिवाक्यशेषात्। तस्य च राजानो हिरण्येन तद्दानेन हेतुना, फलमिह हेतुः, अर्थिनः इच्छावन्तः सप्रयोजना वा भवन्ति न तु तद्धनेन। अत एव न प्रत्येकं दण्डयन्ति शतं शतं न गृह्णान्ति। गुणानुरोधेन प्रधानावृत्तेर्न्याय्यत्वादित्यर्थः। यत्नं विना तत्र शास्त्रसमाप्तौ लिङ्गं ध्वनयन्नाह। **अत एवेति। सहेतीति।** वक्तव्यमितीति शेषः। **भाष्येति।** तदेकदेशीत्यर्थः। ननु संज्ञिनिर्देशार्थं तदावश्यकमत आह। **अन्यथेति।** तस्यैतदर्थकत्वाभाव इत्यर्थः। **इत्यनुवृत्त्येति।** इत्यतो द्वे इत्यनुवृत्यैवेत्यर्थः। सिद्धेः सिद्धत्वात्। सप्तम्यन्तपाठे सतीति शेषः। वस्तुतस्तु उभेग्रहणं स्पष्टार्थं, न तु सहार्थकम्। अशब्दार्थत्वात् इति। शब्दाधिक्यादर्थाधिक्यस्य बहुशो भाष्यकृताऽप्यभिहितत्वाच्च। लक्षणानुसारेण तु तत्र गर्गदण्डन्यायाश्रयणमिति बोध्यम्। ननु संयोगसंज्ञायाः संयुज्यन्ते वर्णा यत्रेत्यन्वर्थत्वेन प्रत्येकमप्रवृत्तिरिति दुर्वचम्। पटः पटो संयुज्यते यत्रेत्यादौ संयुज्यमानपदार्थान्यस्यैवान्यपदार्थतया प्रतीतेः व्युत्पन्नत्वेन तदन्यतद्घटितपदवाक्यरूपसमुदायस्य संज्ञापत्तावनिष्टापत्तेः। महासंज्ञा तु प्राचामनुरोधादेव। लक्ष्यानुसारात्सम्भवति विशेषणत्वे उपलक्षणत्वस्यान्याय्यत्वेनानन्तरा इति विशेषणाच्च गर्गदण्डन्यायाश्रयणं तत्रात आह। **समासेति। अत एव** समस्यते सम्बद्ध्यतेऽस्मिन् समुदाय इत्यन्वर्थत्वाङ्गीकारेण सहभूतयोरेव समाससंज्ञायाः सिद्धत्वादेव षेति इत्यत्र आदिना धात्वादिपरिग्रहः। अत एवात्र भाष्ये अन्तरेण सहग्रहणमित्युक्तं, न त्वन्तरेणापि सहग्रहणमिति। एतेन गुणप्रधानभावपुरस्कारेणैव वाक्यसमाप्त्यसमाप्त्योः सह सुपेति सहग्रहणं कुर्वता सूत्रकृता बोधितत्वेन तदावश्यकत्वेन **कुगती**त्यत्र वार्तिकानां सत्वेन च चिन्त्यमिदमिति [१]**सरस्वत्युक्त**मपास्तम्। दोषाणां **छायायां** प्रतिपादितत्वादिति दिक्॥

---

१. र.प्र.पृ.सं. २४२ प्रथमो भागः।

इह तपरकरणमैजर्थमीदूदेदितिवदुच्चारणार्थमसन्देहार्थं चेति प्रपञ्चितम् ''एओङ्'' ''ऐऔच्'' (मा०सू० ३।४।) इति सूत्रयोः। यत्त्विहोक्तं वार्त्तिककृता – ''आकारस्य तपरकरपं सवर्णार्थम्'' इति, तत्तु 'भेदका गुणाः' तपरसूत्रं चानपि विध्यर्थम्' इत्यभिप्रेत्य। भाष्ये त्वभेदका गुणा इति स्थितम्। गुणा उदात्तानुदात्तस्वरितानुनासिका नान्तरीयकतयोच्चार्यमाणा अपि यत्नं विना न विवक्ष्यन्ते इत्यर्थः। ''अनुदात्तः'' (पा०सू०ए० ७-१-७५) ''अनुदात्तः'' (पा०सू०ए० ६-४-७१) इत्यादावुदात्तग्रहणं चेह ज्ञापकम्। अन्यथा ह्युदात्तमेवोच्चारयेल्लाघवात्।

३.१६ गुणाभेदकत्वनिरूपणम्

अथ किमर्थमिति भाष्यार्थमाह। **इहेति। ऐजर्थमिति।** देवैश्वर्यमित्यादौ त्रिमात्रादिव्यावृत्तय इति भावः। ननु शुद्धे जश्त्वार्थे पूर्वेण शेषशेषिभावाभावात्तत्वस्यापदत्वेन जश्त्वं न स्यादत आह। **इदूदेदिति।** विनिगमनाविरहादाह। **असन्देहार्थं चेतीति।** सन्देहनिवृत्यर्थतया बोधनार्थमित्यर्थः। उच्चारणार्थत्वासन्देहार्थत्वयोर्विकल्पः। चस्त्वेजर्थत्वसमुच्चायकः। चशून्यपाठे वा चार्थे तयोर्विकल्प-स्त्वार्थिक इति बोध्यम्। एवञ्च न प्रागुक्तदोष इति भावः। इहैव कण्ठतो भाष्यकृता उक्तत्वादाह। **प्रपञ्चितमिति।** विस्तरस्तत्रेति भावः। **तपरेति।** तपरस्य करणमिति गुरुकुलवत्समासः। करणमुच्चारणम्। यद्वा तपरेति भावपरम्। **सवर्णार्थमिति**। सवर्णग्रहणायेत्यर्थः। एतेन सवर्णाः प्राप्ताणुत्वेनार्थः प्रयोजनमस्येत्यर्थः इति। यद्वा उक्तसवर्णशब्दस्य लक्षणया तद्ग्रहणपरस्यार्थशब्देन बहुव्रीहिरिति [१]**सरस्वत्युक्तमपास्तम्**। **भेदका इति।** उपात्तविजातीयव्यावर्तका इत्यर्थः। अत्र पक्षे यद्गुणकस्यैव सूत्रे उच्चारणं तद्गुणकस्यैव संज्ञाप्रसङ्गे गुणान्तरयुक्तानामपि संज्ञाप्रवृत्त्यर्थं तपरत्वमिति भावः। इदं च तपरसूत्रस्य नियामकत्वे न सङ्गच्छतेऽत आह। **तपरेति। स्थितमिति।** उक्तफल-खण्डनायैवेति भावः। अत एवाभिप्रेत्येत्युक्तम्। अभेदका गुणा इत्यस्यार्थान्तरभ्रमनिरासायार्थ-माह। **गुणा इति। नान्तरीयकतयेति।** अविनाभूततयेत्यर्थः। आवश्यकतयेति यावत्। गुणरहितस्योच्चारणासम्भवादिति भावः। त्रैस्वर्येण सूत्रपाठ इति सिद्धान्तपक्षेणेदम्। यत्नं स्वशब्देनोपादानरूपं। **न विवक्ष्यन्ते** उपात्तविजातीयाव्यावर्तका न भवन्ति। विधेयाणभिन्नविषय इति शेषः। तत्रैतत्कृतस्याप्यतिप्रसङ्गस्याप्रत्यय इति निषेधात्। अतस्तथैव ज्ञापकमाह। **अनुदात्त इति।**

---

१. र.प्र.पृ.सं. २४६।

ननु यद्यभेदका गुणास्तर्हि यद्वक्ष्यति भाष्यकारः - ''हन्त्यादेशस्य वधेः स्थानिवद्भावादनुदात्तत्वादिट्प्रतिषेधे प्राप्ते तद्वारणाय वध्यादेशे उदात्तनिपातनं करिष्यते। तथाच ''एकाच उपदेशे'' (पा०सू० ७-२-१०) इति सूत्रे एकाज्ग्रहणं न कर्त्तव्यम्'' इति, तदेतद्विरुध्येत, अविवक्षाप्रसङ्गात्। अथोच्येत - तत्रापि ''स्थानेऽन्तरतमः'' (पा०सू० १-१-५०) इति वचनादादेशस्य यः स्वरः प्राप्तस्तस्मिन्नुच्चारयितव्ये उदात्तोच्चारणं यत्नेन विवक्षार्थं ज्ञायते इति। एवमपि यद्वक्ष्यति षष्ठे ''चतसर्याद्युदात्तनिपातनं करिष्यते स निपातनस्वरः ''चतुरः शसि'' (पा०सू० ६-१-१६७) इत्यस्य वाधको भविष्यति'' इति तद्विरुध्यते। चतुश्शब्दो ह्यव्युत्पत्तिपक्षे ''व्रः संख्यायाः'' (फि०सू० २८) इति फिट्सूत्रेणाद्युदात्तः। ''चतेरुरन्'' (उ०सू० ७४७) इति व्युत्पादनेऽपि नित्स्वरेणाद्युदात्त एव। तत्स्थानिकस्य चतसुश्शब्दस्यापि स्थानिस्वरेणाद्युदात्तस्योच्चारणोपपत्तौ

३.१७ गुणाभेदकत्वे रत्नप्रकाशोक्ताक्षेपानुवादः

यत्तु ज्ञापकेनैकश्रुत्याऽष्टाध्यायीपाठ एव ज्ञाप्यते, नोक्तार्थः। **स्थानिव**त्सूत्र**त्रिचतुरो**रिति-सूत्रभाष्यविरोधापत्तेः। ज्ञापकपरप्रकृतभाष्यविरोधापत्तेश्चेति चिन्त्यमिदमिति [1]**रत्नो**क्तम्। तत्खण्डयति। **नन्वित्यादिना। वक्ष्यतीति।** स्थानिवत्सूत्र इति शेषः। **प्राप्त इति।** आवधिष्टेत्यादाविति भावः। **करिष्यत इति।** तथा च तेनानुदात्तत्वस्य तथाप्राप्तस्य बाधात् प्रतिषेधाप्राप्ताविट्-सिद्धिरिति भावः। तथा सत्याह। **तथा चेति। एतत्** एतेन सह। अव्ययमिदम्। **अविवक्षेति।** तत्रापीत्यादि। तदुदाहारिकां कैयटोक्तिमाह। **अथोच्येतेति। यः स्वरः प्राप्त इति।** हन्तेरनुदात्त-त्वादनुदात्त इत्यर्थः। **यत्नेन** तदुपपत्तेन। **विवक्षार्थमिति।** एवञ्चोदात्तोच्चारणरूपयत्नसत्वाद्वध्यादेशे उदात्तत्वविवक्षायामनुदात्तत्वप्रयुक्तेण्निषेधाप्रवृत्त्या तत्रेडसिध्या नैकाज्ग्रहणं तत्र कार्यमित्यविरोध इति भावः। **एवमपि** उक्तार्थे तु वैपरीत्या चोक्तदोषाभावेऽपि। यद्वक्ष्यति भाष्यकार इति शेषः। षष्ठे 'चतुरः शसि'(पा०सू० ६-१-१६७) इत्यत्र। [2]तिसृचतसृ (पा०सू० ७-२-९९) इति सूत्रेऽपि बोध्यम्। **चतुर इति।** चतुरोऽन्त उदात्तः शसि पर इति सूत्रार्थः। चतस्रः पश्येति भाष्यकृत उदाहरणम्। विरोधे मानमाह। **चतुरित्याद्ययोगादित्यन्तेन।** हिश्चार्थे। **अव्युत्पत्तीति।** पाणिन्यादिसम्मतसिद्धान्तपक्ष इत्यर्थः। शाकटायनमतमाह। **चतेरिति।** अपिरनास्थायाम्। उक्तहेतोस्तत्समुच्चये वा। **नित्स्वरेण** ञ्नित्यादिर्नित्य (पा०.सू० ६-१-१९७) मित्यनेन। एवेत्यग्रे इतीति शेषः।

---

१. र.प्र.पृ.सं. २४७। २. म.भा.पृ.सं. १६४ (षष्ठो भागः)

''चतुरः शसि'' (पा०सू० ६-१-१६७) इत्येतद्बाधकत्वायोगात्। अपि च अस्थ्यादिनामप्याद्युदात्तत्वादन्तादेशस्यानङोऽपि स्थान्यनुरूपेऽनुदात्ते एवोच्चारणीये उदात्तोच्चारणं विवक्षार्थं भविष्यतीत्युदात्तग्रहणं निष्फलमेव, प्रत्युत क्रियमाणं तद्यत्नाधिक्येऽप्यविवक्षां ज्ञापयेत्। यदप्येकश्रुत्या सूत्रपाठात्कचिदुदात्तोच्चारणं विवक्षार्थमिति, तदपि चिन्त्यम्, एवं सत्यनङोऽप्युदात्तोच्चारणेनैव सिद्धावुदात्तग्रहणवैयर्थ्यापत्तेः उक्तज्ञापनासम्भवाच्च। तथा हि, किं ज्ञाप्यम् – स्वरशब्देनानुपात्तो गुणो न विवक्ष्यते इति अहोस्विदसति यत्नविशेषे न विवक्ष्यते इति ? आद्ये निपातनस्वरो न विवक्ष्येत। अन्त्ये तूदात्तोच्चारण एव विवक्षाहेतौ यत्नविशेषे स्थिते कथं ज्ञापकोत्थानं, मूलशैथिल्यात्। तस्माद् गुणानामभेदकत्वप्रतिपादकमत्रत्यं भाष्यमुत्तरग्रन्थविरुद्धमेवेति चेत् ?

उच्यते, ''विभाषा छन्दसि'' (पा०सू० १-२-३६) इति वैकल्पिपकमैक-

आद्युदात्तस्योच्चारणोपपत्ताविति। तस्यैव यथाप्राप्तस्योच्चारणेनाद्युदात्तनिपातनेनोपपत्ताविति्यर्थः। **यत्नाभावेन** निपातनस्वरस्य विवक्षाया अभावेनेति शेषः। एवं भाष्याद्युक्तदोषे स्थितेऽपि **प्रवर्त्तको**क्तदोषमाह। **अपि चेति।** आद्युदात्तत्वात् नापि **द्व्यचश्चे**त्यनेन। **अन्तादेशस्यानङोऽपीति।** अन्तस्यानुदात्तस्य लः स्थाने जायमानादेशस्यानङोऽपीत्यर्थः। एतेन सप्तमीतत्पुरुष इत्यपास्तम्। अनुदात्ततैवोच्यत इतीति शेषः। उदात्तोच्चारणं तद्विलक्षणत्वेनायमेव यत्नः। **निष्फलमेवेति।** एवञ्च ज्ञापितेऽपि चारितार्थ्याभावात् ज्ञापकत्वासम्भवेन तत्परभाष्यासङ्गतिरिति भावः। न केवलमयमेव दोषः, किन्तु वैपरीत्यापत्तिरपीत्याह। **प्रत्युतेति।** इदं चिन्त्यम्। परमास्थिशब्दादावन्तोदात्त उदात्तगुणकस्य स्थानिन स्थानेप्यनङो जायमानत्वेनोक्तरीतेर्दुर्वचत्वेन विवक्षायां मानाभाव इति भाष्याशयात्। एवं विरोधात् प्रकृतसूत्रस्थभाष्यं संदूष्य तत्समर्थकं कैयटाद्युक्तिं दूषयति। **यदप्येकेति। सूत्रेति**। सर्वेत्यादिः। **कचित्** चतसर्यादौ। **नारायणो**क्तिमाह। **एवं सत्येत्यादि।** तद्वैयर्थ्ये इष्टापत्तावाह। **उक्तेति। आद्य इति।** स्वरशब्देनानुपात्तत्वादिति भावः। **मूलशैथिल्यादिति।** ज्ञापितेऽप्यचारितार्थ्यादिति भावः। इदमपि प्राग्वत् चिन्त्यमिति द्वितीयपक्षो भाष्याभिमत इति न प्रकृतसूत्रभाष्यविरोध इत्यनुपदमेव स्फुटीभविष्यति इति बोध्यम्। अतस्तथैव पूर्वपक्षमुपसंहरति। **तस्मादिति।**।

३.१८ अत्र प्रवर्त्तकोपाध्यायसमाधानम्

[1]**प्रवर्तको**क्तिमाह। **उच्यत इत्यादिना।** अच्छन्दसीति छेदः। छन्दोवत्सूत्राणीतीत्यङ्गीकारो

---

१. प्रवर्तकोपाध्यायः महाभाष्यप्रदीपप्रकाशकारः।(म.भा.प्र.प्रका.पृं.सं. ५९) F.I.P.

श्रुत्यमङ्गीकृत्य ''पक्षान्तरैरपि परिहारा भवन्ति'' इति न्यायेन तत्र तत्राद्युदात्तनिपातनं करिष्यते इत्युक्तम्, इह तु त्रैस्वर्येण सूत्रापां पाठमाश्रित्य स्वरूपेणोपात्तस्य गुणस्य नान्तरीयकत्वेनाविवक्षितत्वसम्भवा-दुदात्तग्रहणं ज्ञापकमित्युक्तम्, अतो न विरोधः। यद्वा ''अणुदित्सवर्णस्य'' (पा०सू० १-१-६७) इत्यत्राजग्रहणेनैव सिद्धे गुणभिन्नानां यवलानां संग्रहाय क्रियमाणमणग्रहणं गुणानां भेदकतामपि ज्ञापयति। भेगकाभेद-कत्वपक्षयोश्च जातिव्यक्तिपक्षयोरिव लक्ष्यानुरोधाद्व्यवस्थेत्युक्तं हल्सूत्रे। तेन भेदकत्वपक्षाश्रयणेन ''आद्युदात्तनिपातनं करिष्यते'' इत्यादि भाष्यं बोध्यम्। अत एव चेदमस्त्यदाद्यत्वे ''अष्टन आविभक्तौ'' (पा०सू० ७-२-८४) इत्यादौ चानुनासिको न प्रवर्त्तते। नन्वणग्रहणं ''हलो यमाम्'' (पा०सू० ८-४-६४) इति लोपेऽन्यतरस्यांग्रह-णानुवृत्तिज्ञापनार्थमित्युक्तमिति चेत् ? न, उभयज्ञापकत्वेऽप्यविरोधात्। न ह्येकेनैकमेव ज्ञाप्यमिति नियमः, यावता विनानुपपत्तिस्तस्य सर्वस्य ज्ञाप्यत्वात्। अत एवाऽऽत्व-विकल्पः कृतात्वस्य षट्संज्ञा चेत्युभयमपि ''अष्टनो दीर्घात्'' (पा०सू० ६-१-१७२) इति दीर्घग्रहणेन ज्ञापयिष्यते। अत एव च ''संहितायाम्'' (पा०सू० ६-१-७२)

वा। **इत्युक्तमिति।** भाष्यकारेणेति शेषः। एवमग्रेऽपि। **इह त्विति।** इत्युक्तमित्यत्रान्वयः। त्रैस्वर्येण सर्वत्र पाठेऽपिः। **कृष्णोक्तं** पक्षान्तरमाह। **यद्वेति।** यद्वा तथा सति। **नागुणेति।** गुणैर्भिन्नानामित्यर्थः। परं त्विदं विधेयाविषय एव नान्यत्र, भाष्यविरोधात्। तस्य प्रत्याख्यानाच्च। एवश्चात्र द्वितीयं समाधानं चिन्त्यम्। प्रथमसमाधिरप्ययुक्त इत्यनुपदमेव स्फुटीभविष्यति। नन्वेवमपि विनिगमकाभावाद्दोष एवात आह। **भेदकाभेदकत्वेति।** द्वन्द्वोत्तरस्त्वप्रत्ययोऽद्भूतावयव-भेदजातिसमूहैव। वर्तिपदार्थस्येव तन्निष्ठधर्मस्यापि तत्र प्रकारत्वात्। अत एव द्विवचनम्। क्वचिच्छून्यः पाठः। स एव युक्तः। **बोध्यमिति।** अत्रत्यभाष्यस्य गतिरुक्तैवाभेदपक्षेणेति भावः। अस्यावश्यकतामाह। **अत एव चेति।** विधेयाणभिन्नविषये अभेदकत्वस्य तेन ज्ञापितत्वेऽप्य-प्रत्ययनिषेधेन जातिपक्षाणुदित्सूत्रयोरिव तस्याप्यप्रवृत्तेर्विधेयाणंशे एवाणग्रहणेन भेदकत्वस्य ज्ञापनाच्चेत्यर्थः। अन्यत्रादोषादाह। **इदम इति।** आदिना **विड्वनोरनुने**(पा०सू० ६-४-४१)त्यादिपरिग्रहः। **इति लोप इति।** यरो लोपविधायकेत्यर्थः। **अनुवृत्तीति। झयो ह** इत्यत इति भावः। अविरोधे हेतुमाह। **न ह्येकेनैकमिति।** ज्ञाप्यत इत्यस्येत्युक्तमिति शेषः। अइउण्सूत्र इति भावः।

इत्यधिकरपे संहिताया अनित्यत्वं कालव्यवायेऽप्यानङादिप्रवृत्तिश्चेत्युभयं ज्ञाप्यते इति दिक् ।

३.१९ प्रभायां कैयट - प्रवर्त्तक - रत्नप्रकाशविमर्शः

अत्रेदं बोध्यम् । नान्तरीयकत्वादुच्चार्यमाणो गुणोऽसति यत्नविशेषे न विवक्षित इति गुणा अभेदका इत्यस्यार्थः । स च यत्नविशेषत्वशब्देनोपादानरूपोऽन्यो वा । इदमेव चाश्रीयमाणत्व-मित्याश्रीयमाणो गुणो भेदको भवतीत्युत्तरभाष्यसङ्गतिः । एवं निपातनं नामान्वादेशे प्रयोगे प्राप्तेऽन्यादृशप्रयोगकरणं, तद्रूपाद्यत्नात् तत्र तत्रोदात्तादिविवक्षिततद्भाष्यसङ्गतिः कथमिति चेत् श्रुणु । तत्र स्थानिवत्सूत्रस्थभाष्यविरोधोद्धारप्रकारस्तावदुक्त एव । **तिसृचतसृ** इत्यत्र यद्यपि शुद्धचतसृशब्दःस्थानिस्वरेणाद्युदात्तस्तथापि द्वन्द्वे कृते तत्प्रयुक्तेऽन्तोदात्ते उच्चारणीये तत्राद्युदात्तो-च्चारणं विवक्षार्थं इति नैकश्रुत्यादिरूपप्रवर्तकाद्युक्तदोषस्तूद्धृत एव । सम्पूर्णाष्टाध्यायी आचार्येणैकश्रुत्या पठितेत्यत्र तु न मानम् । क्वचित्कस्यचित्पदस्यैकश्रुत्या पाठः, यथा 'दाण्डिनायनादिसूत्रे' - ऐक्ष्वाकेत्यस्येति । एतावदेव भाष्याल्लभ्यते । एवञ्चैकश्रुत्या सूत्रपाठमादृत्य **कैयटप्रवर्तका**द्युक्तमत्र पूर्वमुक्तसमाधानं चिन्त्यमेवेति बोध्यम् । [१]एतेनाष्टाध्यायी प्रायेणैकश्रुत्या पठितेति गुणा अभेदका इत्येव न्याय्यमित्यस्याशयः । तदज्ञानेन कुत एतदिति शङ्काज्ञापके-नैकश्रुतिपाठो ज्ञाप्यत इत्युत्तरमित्येवं भाष्यं संयोज्यम् । यदप्येकेत्यादिवैयर्थ्यापत्तेरित्यन्तमूलमनूद्य तन्न उदात्तोच्चारणादेव सिद्धे तदपहायाद्योदात्तशब्दमुच्चारयता पाणिनिना एकश्रुतिपाठस्या-ष्टाध्याय्यां ज्ञापितत्वेन तत्रोदात्तग्रहणानर्थक्यापादनस्य गुणत्वात् । यदि भेदका गुणास्तर्हि उदात्तमेवोच्चारयेदिति वदता भाष्यकृतैव तदानर्थक्यस्योक्तत्वेन तदनवबोधाच्चेति उक्तम् । यत्नेन पुनश्चोक्तेत्यादिशैथिल्यादित्यन्तमनूद्य तन्न ज्ञाप्यस्य वस्तुतोऽन्यस्यैवोक्तत्वादित्युक्तम् । पुनश्चोच्यत इत्यादिना विरोध इत्यन्तमनूद्य तन्ना एकश्रुतिपाठपक्ष एवोदात्तग्रहणस्य 'न्यायसिद्धे लिङ्गदर्शन' मिति न्यायेन तत्पाठज्ञापनसम्भवात्, पक्षान्तरे ज्ञापनासम्भवस्य स्वयमेवोक्तत्वाच्चेत्युक्तम् । पुनश्च यद्वेत्यादि भाष्ये बोध्यमित्यन्तमनूद्य तन्न उदात्तादिगुणानां भेदकत्वस्य लोकसिद्धताया भाष्यकृतैवोक्तत्वेन तत्र ज्ञापकपर्यन्तानुधावनस्य विफलत्वात्, अष्टाध्याय्यास्त्वैस्वर्येणैव पाठ इति पक्षमाश्रित्य तस्य कौस्तुभस्य प्रवृत्तत्वेनोदात्तग्रहणं ज्ञापकमिति भाष्येण सह विरोधाच्च, भेदकत्वाभेदकत्वयोर्हि लक्ष्यानुरोधेनैव व्यवस्थासिद्धौ तत्रोदात्तग्रहणमतदर्थकमेव सर्वथा भवतीत्युक्तं

---

१. र.प्र.पृ.सं. २४७ (प्रथमो भागः)

एवञ्चाकारस्य तपरकरणं सवर्णार्थमितीहत्यं वार्तिकमपि भेदकत्वपक्षेण साध्वेव। भाष्ये तु पक्षान्तराभिप्रायेण ऐजर्थत्वमुक्तम्, तदपि तथोद्देशपक्षे बोध्यम्, आदैचां संज्ञाविधावनुवाद्यत्वेन सवर्णग्राहकत्वप्रसक्तेः। कार्यकालपक्षे तु विधिवाक्येनैव वृद्धिसंज्ञा, विशिष्टानामादैचां भाव्यमानतया सवर्णग्रहणं न प्राप्नोत्येव। यथा च

यत् सर्व**मपास्तम्।** अष्टाध्याय्या एकश्रुत्या पाठेत्यत्र मानाभावात्। ज्ञाप्यस्वरूपस्यान्यादृशस्यो[1]क्तत्वाच्च। तदुक्तज्ञापने 'यदि तर्हि अभेदका गुणा अनुदात्तादे'रित्यादिभाष्यासङ्गत्यपत्तेश्च। अत एवोदात्तोच्चारणादेवेति दोषासङ्गतिश्च तदानर्थक्ये ज्ञापकत्वभङ्गपत्त्या गुणत्वस्य दुर्वचत्वाच्च। अत एव यदि भेदका इत्यादेस्तत्सार्थक्योपपादकत्वाच्च, अत एव ज्ञाप्यस्य वस्तुनोऽन्यस्यासत्वाच्च, अत एवैकश्रुतीत्यादिदूषणसम्भवाच्च, पक्षान्तरे ज्ञापनस्योपपादितत्वाच्च, भेदकत्वस्य लोकसिद्धेऽपि अभेदकत्वस्य ज्ञापितत्वेन शास्त्रेण तदनादरे प्राप्ते क्वचित्तदादय ज्ञापकपर्यन्तानुधावनस्य साफल्याच्च। अन्यथा अभेदकत्वस्यापि लोकसिद्धत्वेन तज्ज्ञापकपरभाष्यासङ्गत्यापत्तेश्च। त्रैस्वर्येण पाठे एकज्ञापकत्वसत्वेन भाष्यविरोधाभावाच्च। प्रकारान्तरेणापि ग्रन्थप्रवृत्तेरुक्तत्वाच्च। ज्ञापकद्वयेन ज्ञापितयोर्द्वयोलक्ष्यानुरोधेन व्यवस्थेत्युदात्तग्रहणस्यानर्थक्याभावाच्च। तस्यानर्थक्ये प्रकृतभाष्यविरोधापत्तेश्च। उक्तरीत्या सर्वस्य दूषितत्वाच्चेति दिगिति। तदाह। **दिगिति।**

३.२० प्रकृतभाष्यार्थनिरूपणम्

प्रवर्त्तकमतेनैवाह। **एवञ्चेति।** अण्ग्रहणेन भेदकत्वस्य ज्ञापितत्वे चेत्यर्थः। वस्तुतस्तु चिन्त्यमिदम्। उक्तरीत्या तस्यात्र दुर्वचत्वात्। अन्यथा प्रकृतसूत्रभाष्यस्य दत्तजलाञ्जलित्वापत्तेश्च। तस्मादभेदकत्वादत्र सिद्ध्या वार्तिकमयुक्तमेवेति बोध्यम्। तद् ध्वनयन्नाह। **भाष्ये त्विति।** अत्रत्य इत्यर्थः। **पक्षान्तरेति।** गुणा अभेदका इति पक्षेणेत्यर्थः। ऐजर्थत्वं एजर्थत्वमपि तत्समुच्चेयं प्रागुक्तमेव। नारायणाद्यनुरोधेनाह। **तदपीति।** अत्र पक्षे स्वगृहे स्वातन्त्र्येणैकदैव शक्तिग्रहात्सर्वत्र बोध इति तद्भावः। **आदैचामिति।** तत्र पक्ष इत्यादिः। **सवर्णेति।** ऐचोरित्यादिः। एवमग्रेऽपि। एवेन वाक्यान्तरव्यावृत्तिः। **भाव्यमानतयेति।** अत्र पक्षे **मृजेर्वृद्धि**रित्यादौ वृद्धिपदार्थजिज्ञासायामादैजित्यस्योपस्थित्या पदैकवाक्यतयाऽन्वयादिति भावः। **न प्राप्नोत्येवेति।** एवञ्चात्र पक्षे नैजर्थं तपरकरणं, किन्तु स्पष्टार्थतया पूर्वार्थमेवेति न प्रागुक्तदोष इति भावः। ननु तथापि तेन संज्ञाया

---

१. अतादृशस्येति ख।

ज्योतिष्टोमराजसूयादिशब्दानां यागविधावेव सामानाधिकरण्यान्नामधेयत्वावगतिर्न तु वाक्यान्तरेण, तथाऽस्मिन्पक्षे वृद्ध्यादीनामपि, ''वृद्धिरादैच्'' (पा०सू० १-१-१) इति सूत्रं तु ''इको गुणवृद्धी'' (पा०सू० १-१-३) इतिवत्पदोपस्थापकम्। उपस्थाप्यस्य संज्ञितया परं संज्ञासूत्रव्यवहारः। आद्यपक्षे तु ''यन्न दुखेन'' इत्यादौ स्वर्गशब्दार्थावगमवदिहैव वृद्ध्यादिशब्दार्थावगम इति विशेषः।

अविधानेन कथं तद्विशिष्टानां तेषां विधानमत आह। **यथेति।** आदिनोद्भिदादयः। **यागविधा**विति जातावेकवचनम्। एवव्यावर्त्यमेवाह। **न त्विति। वृध्यादीनामपीति। मृजेर्वृद्धि**रित्यादिष्वादैच्सामानाधिकरण्याद्वृद्धिशब्दस्य संज्ञाशब्दत्वावगतिरिति तत्रैव संज्ञासंज्ञिभावावगम इत्यर्थः। ननु तर्हि **वृद्धिरादैजि**ति सूत्रं व्यर्थमत आह। **वृद्धिरिति।** यत्र वृद्धिपदं तत्रादैजित्युपतिष्ठत इति वाक्यार्थः। अस्मिन् पक्षेऽपि वृद्धिशब्दस्य प्राथम्यमेव युक्तम्। उक्तयुक्तैः प्रदेशेषु आदैच्कल्पनयैव बोधः। प्रथमाया विधेयविभक्तित्वेन विधीयत इत्यध्याहारेण इको गुणवृद्धीतिवत् यत्र वृद्धिर्विधीयते तत्रादैजित्युपतिष्ठत इति वाक्यार्थस्तु न। **वृद्धिर्यस्ये**त्यादावनुवादेऽनुपस्थित्यापत्या तत्पदार्थज्ञानानापत्तेः। तदुपस्थितेः भाष्ये तत्रापि स्पष्टत्वाच्च। वृद्धिपदस्य शब्दपरत्वेन तथा वाक्यार्थासम्भवाच्च। एतेन कल्प्यमानपदस्य चोपस्थापकं समानविभक्तिकं पदम्। अत एवोत्तरपदवृद्धिरित्यत्र न दोष इत्यपास्तम्। तत्रापि उपस्थितेरिष्टत्वात्। एवञ्च पदोपस्थापकत्वमात्रांशे दृष्टान्तो न सर्वांशे इति बोध्यम्। तदाह। **पदोपस्थापकमिति।** नन्वेवमस्य संज्ञासूत्रत्वव्यवहारानुपपत्तिरत आह। **उपस्थाप्येति।** उपस्थापकेन वृद्ध्यादिपदेनोपस्थाप्यस्यावृत्त्या बोधनात्तस्य तत्वादिति भावः। **आद्येति।** यथोद्देशपक्षे त्वित्यर्थः। **यन्नेति।** 'यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम्' इत्यत्रेत्यर्थः। तस्यातीतत्वेऽपि[1] शब्दत एव यथा तदवगमस्तथा विध्यसान्निध्येऽपि संज्ञासूत्र एव वृद्ध्यादिशब्दार्थावगम इत्यर्थः। आदिना गुणादिसंग्रहः।।

३.२१ प्रभायां कौस्तुभचिन्त्यताप्रदर्शनम्

वस्तुतश्चिन्त्यमिदम्। 'कार्यकालं संज्ञापरिभाषं भस्येत्युपस्थितमिदं भवति - यचि भमितीति' **ष्यङः सम्प्रसारण**(पा०सू० ६-१-१३)मिति सूत्रस्थभाष्येण[2], 'कार्यकालं संज्ञापरिभाषं प्रगृह्यः प्रकृत्येत्युपस्थितमिदं भवति - ईदूदेद्विवचनं प्रगृह्यं इति' इती**दूदेदि**ति

---

१. अतीन्द्रियत्वेऽपि इति ख। २. म.भा.पृ.सं. ३४ (पञ्चमो भागः)

तदयं निर्गलितः सूत्रार्थः - कृतानामकृतानां चादैचां प्रत्येकं वृद्धिसंज्ञा स्यात्। आश्वलायनः, ऐतिकायनः। अश्वलेतिकशब्दाभ्यां नडादित्वात्फक्यादिवृद्धिः। उपगोरपत्यमौपगवः ।।

सूत्रस्थभाष्येण[१] च विरोधापत्तेः। त्वद्रीत्या ह्युपस्थितमिदं भवति यचीतीत्येव वक्तव्यं स्यात्। अथ संज्ञेत्यादि प्रकृतसूत्रस्थवार्तिकेनान्यथा तत्प्रत्याख्यानपरात्रत्यभाष्येण च विरोधाच्च। **मृजेर्वृद्धि**-रित्यादिसूत्रस्थवृद्ध्यादिपदानामादैजुपस्थितिसम्पादकतया चारितार्थ्ये तस्योपस्थापितपदार्थेऽन्वये मानाभावेन वृद्धिपदेनाविधानेन तत्रेक्परिभाषानुपस्थित्यापत्तेश्च। सिद्धान्ते तु **मृजेर्वृद्धि**रित्यादा-विक्पदोपस्थापकस्यापि वृद्ध्यादिपदस्य मृजेरित्यादीनां विधेयाकाङ्क्षासत्वाद्विधिविषय एव तत्प्रवृत्तेश्च भवत्येवान्वयः। अनुवादेऽपि संज्ञासूत्रोपस्थिति**रणोऽप्रगृह्यस्य वृद्धिर्यस्ये**त्यादौ भाष्ये स्पष्टा। एवञ्च ज्योतिष्टोमादिवाक्याद्वैलक्षण्येन सा रितिरत्र दुर्वचः। उपस्थाप्यस्य वृत्त्या बोधनात्संज्ञासूत्रत्वं उत इको गुणेत्यादिवदुपस्थापकत्वात् परिभाषात्वमित्यत्र विनिगमकाभावात्, वृद्ध्यादिपदैर्वृत्त्या बोधनस्य दुरुपपदत्वाच्चेति[२] दिक्। तस्मात्पक्षद्वयेऽपि संज्ञासूत्राणां विध्येकवाक्यता। तत्राद्ये संज्ञासूत्रे द्वितीये विधौ तत्र पदैकवाक्यताङ्गीकारे एकस्य वृद्ध्यादिपदस्य प्रत्यभिज्ञामात्रफलकानुवादकत्वापत्तिरुक्तदोषापत्तिश्चातो वाक्यैकवाक्यता। तथा च मृजेर्वृद्धिरित्यादौ वृद्धिपदार्थजिज्ञासायां वृद्धिरादैजित्युपस्थित्या वृद्धिरादैजित्यनेन तत्रैवादौ [३]तदर्थबोधरूपशक्तिग्रहस्ततो विध्यर्थबोधः। अत्र पक्षे एकत्र शक्तिग्रहे वृत्ते तया प्रदेशान्तरेषु बोधात् प्रदेशस्थस्यैव तत्रार्थे शक्तिरिति सम्भवनया प्रदेशान्तरस्थो बोधो न स्यादिति सर्वप्रदेशेषु ततत्पदशक्तिग्रहपूर्वकं विधिवाक्यार्थबोधः। यथोद्देशे तु एकदैव शक्तिग्रहात्सर्वत्र बोध इति शेषः, सोऽपि संज्ञाप्रदेश एव। ज्योतिष्टोमेन यजेतेत्यादौ तु शक्तिग्राहकशास्त्रान्तराभावादगत्या तथा कल्पना। न तु विद्यमाने शक्तिग्राहके तथा कल्पनं पदस्यानुवादकत्वकल्पनं चोचितमिति बोध्यम्। उपसंहरति। **तदिति। निर्गलितः** फलितः। शाब्दस्तु आदैचो वृद्धिपदाभिन्ना इति। शब्दार्थयोस्तादात्म्याङ्गीकारादित्युक्तमन्यत्र स्पष्टं च। **फकीति।** गोत्रापत्य इति भावः। अकृतोदाहरणं त्वाकारस्य शालीय इत्यादि प्रागुदाहृतमेवेति पुनस्तन्नोक्तं। ऐकारौकारयोः तयोर्लक्ष्ये तु रैकुलमयं नौकुलमयमिति बोध्यम् ।।

---

१. म.भा.पृ.सं. २५८ (प्रथमो भागः)

२. दुरुपपादकत्वाच्चेति इति ख।

३. तदर्थकत्वरूप इति ख।

अदेङ् गुणः (पा०सू० १-१-२) ।। अदेङां गुणसंज्ञा स्यात् । तपरकरणमिह सर्वार्थम् । तेन 'तरति' इत्यत्राकार एव न तु कदाचिदाकारः । न च प्रमापत आन्तर्येण नियमसिद्धिः, रपरत्वे कृते एकस्याध्यर्द्धमात्रत्वादपरस्यार्द्धतृतीयमात्रत्वात् । 'पचन्ति' 'चेता' 'स्तोता' ।।

इको गुणवृद्धी (पा०सू० १-१-३) ।। यत्र ब्रूयाद् गुणो भवति वृद्धिर्भवतीति तत्र 'इकः' इति षष्ठ्यन्तमुपस्थितं बोध्यम् । चेता, स्तोता; अहार्षीत् इत्यादि । इक इत्युक्तेर्नेह

३.२२ 'अदेङ्गुण' सूत्रार्थनिरूपणम्

अदेङ्गुणः । पूर्ववदाह । **अदेङामिति ।** कृतानामकृतानां चेत्यर्थः । प्रत्येकमिति शेषः । **सर्वार्थमिति ।** तपरसूत्रप्रवृत्त्या तत्कालव्यावर्त्तकतयोभयार्थमित्यर्थः । तदेवाह । **तेनेति ।** अन्यथाऽनियमः स्यात् । न चाकारस्य वृद्धिसंज्ञा बाधिका, एकसंज्ञाधिकारादन्यत्र समावेशस्येष्टत्वात् इति भावः । ह्रस्वस्य रपरत्वेन दीर्घत्वमित्यभिमानेनाशङ्क्ते । **न चेति । नियममेवेति ।** सर्वदाऽकार एवेति नियमसिद्धिरित्यर्थः । एतेन प्रकृते दीर्घ एवापादयितुमुचितोऽस्या इत्याशय इत्यपास्तम् । तथा च न पूर्वाथमिति पूर्वसूत्रतुल्येति भावः । **एकस्या**कारस्य । **अध्यर्द्धेति ।** अधिकमर्धं यस्या सा मात्रा यस्य तत्वात् सार्द्धमात्रत्वादित्यर्थः । तथा च स्थानिनो द्विमात्रत्वात्प्रमाणतः आन्तर्याभाव इति भावः । नन्वेवमाकार एव सर्वदाऽस्तु । तावताऽपि नियमः सिद्धो, ह्रस्वाकरणादत आह । **परस्येति ।** अकारस्येत्यर्थः । **अर्द्धतृतीयेति ।** अर्द्धं तृतीयं यासां ता मात्रा यस्य तत्वात् सार्द्धमात्राद्वयमात्रत्वादित्यर्थः । तथा चानेनापि न तदिति भावः । **पचन्तीति ।** अत्रा**तो गुण** इति पररूपम् । इदमकृतोदाहरणम् । कृतस्य तरतीत्युक्तमेव । चेतेत्यादि तु कृतोदाहरणम् । अकृतोदाहरणमेकारस्य पचे इति । औकारस्य तु न सम्भवतीति बोध्यम् ।।

३.२३ 'इको गुणवृद्धी' इति सूत्रप्रयोजननिरूपणम्

इको गुणवृद्धी । प्राग्वदाह । **यत्रेति । इक इति षष्ठ्यन्तमिति ।** सूत्रे षष्ठ्यन्तस्यानुकरणाच्छब्दस्वरूपपरतया नपुंसकत्वम् । सोर्लुक् । अत **एवात्वसन्तस्येति(पा०सू० ६-४-१४)** दीर्घो न । एवञ्च इक इत्यस्यैव, षष्ठ्यन्तं पदमिति स्वरूपकथनम्, न त्वनुवृत्त्यादिलभ्यम् । अत एव भेदविवक्षाङ्गीकारः । अन्यथा इकः प्रत्येकान्वयो न स्यात् । अत एव पदादिशब्देन सामानाधिकरण्यमिति भावः । **इक इत्युक्तेरिति ।** इको गुणेति योगविभागोक्तेरित्यर्थः । **नेहेति ।**

- याता, ग्लायति, उम्भितेति। तथा च वार्त्तिकम् - ''इग्ग्रहणमात्सन्ध्यक्षरव्यञ्जन-निवृत्त्यर्थम्'' इति। ननु नैतानि सन्ति प्रयोजनानि, ज्ञापकेनानिकां व्यावृत्तिसिद्धेः। तथा हि, अकारस्य 'पचति' इत्यादौ श्नपं तिपं चाश्रित्य यथाक्रमं ''पुगन्त'' (पा०सू० ७-३-८६) इति ''सार्वधातुकार्द्धधातुकयोः'' (पा०सू० ७-३-८४) इति च सूत्रेण सत्यपि गुणे रूपे विशेषो नास्ति। 'अचिकीर्षीत्' इत्यादौ त्वतो लोपेन वृद्धिर्बाध्यते ''ण्यल्लोपौ'' (का०वा०) इति पूर्वविप्रतिषेधस्य वक्ष्यमाणत्वात्। सूत्रारम्भपक्षेऽपि ह्येषैव 'चिकीर्षकः' इत्यादौ गतिः। ''अचो ञ्णिति'' (पा०सू० ७-२-११५) इत्यत्र निर्दिष्ट-स्थानिकत्वेन इक्परिभाषाया अप्रवृत्तेः। 'अयासीत्' इत्यादौ तु सिचि वृद्धौ सत्यामपि न

---

[1]वक्ष्यमाणेषु गुणे नेत्यर्थः। **याता वातेति।** अन्यथा यतेत्यादि स्यात्। न चात्वालोपः। आर्धधातुकोपदेशे यदकारान्तं तस्य लोपविधानात्। इदं त्वावश्यकमित्यनुपदमेव स्फुटीभविष्यति मूले। ग्लायतीत्यत्र ग्लयतीति स्यात्। उम्भितेत्यत्र सर्वतः स्थानत आन्तर्यस्य बलवत्त्वेन भकारस्यौष्ठ्यस्योकारे गुणेऽवादेशे उनवितेति स्यात्। गुणे कर्तव्येऽनुस्वारपरसवर्णयोरसिद्धत्वात्। **इग्ग्रहणमिति।** इक् गृह्यतेऽस्मिन् इति व्युत्पत्त्या पृथक् सूत्रमित्यर्थः। **निवृत्त्यर्थमिति।**

३.२४ आकारनिवृत्तिफलखण्डनम्

ननु सूत्रेणाकारादीनां निवृत्तिर्दुष्करेति चेन्न इतिच्छब्देन स्थानिवत्वं लक्ष्यत इति तेषां स्थानित्वस्य निवृत्त्यर्थमित्यर्थात्। **ज्ञापकेनेति।** जातावेकवचनम्। छत्रिन्यायेन **अनिकामिति।** अकारादीनामित्यर्थः। स्थानित्वस्येति शेषः। यद्यपि वार्तिकं साधारण्येन प्रवृत्तम्, तथापि वृद्धिविषये दोषाभावं कैयटाद्युक्तं हृदि निधाय प्रकृतसूत्रस्य क्रमानुरोधेन गुणपरतया योजितं भगवता। वृद्धिविषये विशेषं वरमेव वक्ष्यति स एवेति तदभिप्रायेण व्याख्यातुं वर्णसमाम्नाये प्रथमा-कारत्यागे बीजं तदुक्तं प्रकटयति। **तथाहि अकारस्येत्यादिना। सूत्रेणेति।** जातावेकवचनम्। एवमकारस्येत्यत्रापि बोध्यम्। **सत्यपि** जायमानेऽपि। अत एव त्त्वोपपत्तिः। तस्यावश्यकतामाह। **सूत्रेति।** प्रकृतसूत्रेत्यर्थः। हि यतः। अन्यथा हि तत्र परत्वाद्वृद्धौ **आतो युगिति (पा०सू० ७-३-३३)** युकि चिकीर्षायक इति स्यादिति भावः। ननु तत्पक्षेऽप्येतदुपस्थित्या कथं वृद्धिरत आह। **अच इति। सिचीति।** इति वृद्धाविति शेषः। अग्रिमभाष्यानुरोधेनाह। **सत्यामपीति।**

---

१. वक्ष्यमाणो गुणो नेत्यर्थ इति क।

क्षतिः। वस्तुतस्तु सा परत्वात् सगिड्भ्यां बाध्यते। येन नाप्राप्तिन्यायेनापवादत्वाद्बाध्यते इति तु निष्कर्षः। न च 'याता' 'वाता' इत्यादावातो गुपप्रसङ्गः, ''गापोष्टक्'' (पा०सू० ३-२-८) इति टकः कित्त्वेनाकारस्य गुपो न भवतीति ज्ञापितत्वात्। तद्धि कित्त्वं 'सामगः' इत्यादावाल्लोपार्थं क्रियते। यदि त्वाकारस्य गुपः स्यात्तर्हि द्वयोरकारयोः पररूपेप 'सामगः' इत्यादिरूपसिद्धौ किं कित्त्वेन ? न चेह 'चिकीर्षकः' इत्यादाविव परत्वादाङ्गत्वाच्चातो लोप एवोदाहर्त्तुमुचितो न तु पररूपमिति वाच्यम्, तावतापि ज्ञापकत्वे बाधकाभावात्। वस्तुतस्तु नेह लोपेन भवितव्यम्। तत्र हि ''अनुदात्तोपदेश'' (पा०सू० ६-४-३७) इत्यतोऽनुवृत्तेनोपदेशग्रहपेनार्द्धधातुकस्य विशेषणादार्द्ध-धातुकोपदेशे यदकारान्तं तस्यातो लोपो विधीयते। अन्यथा 'गतो गतवान्' इत्या-दावतिप्रसङ्गात्। न चासिद्धवत्सूत्रेप निर्वाहः, तस्य भाष्यकृता प्रत्याख्यास्यमानत्वात्। किञ्च ''अय पय गतौ'' (भ्वा०आ०) आभ्यां किपि 'अत्' 'पत्' इति रूपं माधवादिभिरुदाहृतं, तदपि यथाश्रुते न सिद्धेत्। तस्मादुपदेशानुवृत्तिरेव शरपम्।

विशेषाभावादिति भावः। अपिसूचितामरुचिं तत्रैव कैयटोक्तामाह। **वस्तुतस्त्विति।** कैयटोक्तपरत्वमसङ्गतम्। तत्र परशब्द उत्कृष्टवाची वा इत्याशयेनाह। **येनेति।** अथ परिशेषाद्वार्तिकार्थमाह। **न चेति।** सार्वधातुकार्थेत्यनेन 'अतोऽनुपसर्गेक' (पा०सू० ३-२-३) इति कस्योत्तरार्थत्वादाह। **गापोरिति।** चेह 'सामग' इत्यादौ गुणोत्तरम्। एवमग्रेऽपि। साध्यांशेऽयं दृष्टान्तो न तु हेत्वंशेऽपि। तथा च पररूपेण सिद्धं रूपमिति भाष्यमप्ययुक्तमिति भावः। अभ्युपेत्याह। **तावतापीति।** अत एवाह **वस्तुतस्त्विति।** हि यतः। **अनुवृत्तेनेति।** एकदेशे स्वरितत्वप्रतिज्ञानादिति भावः। **विशेषणा**द्विशेषणत्वकरणात्। तत्र कस्योपदेशे इत्याका-ङ्क्षायामुपस्थितत्वादार्धधातुक इत्येव विभक्तिविपरिणामेन सम्बध्यते। गुणनिष्पन्नश्चार्ध-धातुकविधा-नोत्तरकालिक इति भावः। **अन्यथा** तदननुवृत्तौ। ननु प्रत्याख्यानमेकदेश्युक्तिरत आह। **किञ्चेति। किपीति।** यलोपे **ह्रस्वस्येति** तुकीत्यपि बोध्यम्। अपिरेवार्थे न सिद्धचेदित्यग्रे योज्यः। [१]गत इत्यादिरन्यथासिद्धावपि [२]..... नसिद्धचेदेवेत्यर्थः। अत एवोपसंहरति। **तस्मादिति।**

---

१. 'गत' इत्यादि 'अन्ये त्विति' पर्यन्तं कपाठमात्रे उपलभ्यते। अत्र ग्रन्थः त्रुटितः।

२. अत्र ग्रन्थः त्रुटितः।

कथं तर्हि 'धिनुतः' 'कृणुतः' इत्यादौ ''अतो लोपः'' (पा०सू० ६-४-४८) इति चेत् ? सन्नियोगशिष्टतया उप्रत्ययोपदेशवेलायामेवाकारस्यापि बुद्ध्यारोहादिति केचित्। अन्ये तु ''धिन्विकृण्व्योर च'' (पा०सू० ३-१-८०) इति सौत्रक्रमानुरोधात्प्रथममकारादेशस्तदनन्तरं चशब्दाकृष्ट उप्रत्यय इति नोक्तदोष इत्याहुः।

नन्वेवं सति 'सामगाय' इत्यादावेकादेशस्य पूर्वान्तरत्वेन ग्रहणाद् 'आतो धातोः' (पा०सू० ६-४-१४०) इत्यालोपः स्यादिति चेत् ? अत्र कैयटः - ''अकारमाश्रित्य कृतो यशब्दः सन्निपातपरिभाषया लोपं न प्रवर्त्तयति। दीर्घत्वं तु ''कष्टाय'' (पा०सू० ३-१-१४) इति निपातनाद्भवति'' इति ''एओङ्'' सूत्रे स्थित्वा समाहितवात्। तस्यायमाशयः - यादेशे हि ह्रस्वत्वविशिष्टमत्वं प्रयोजकम्, तद्विधावत इत्यनुवृत्तेः। तत्र यद्यपि दीर्घेण ह्रस्वत्वांशो निवर्त्तितस्तथाप्यत्वमात्रमादेशेऽप्यनुवर्त्तते। तदपि चेल्लोपेन निवर्त्त्येत तर्हि परिभाषाविरोधः। दीर्घांशे परं ज्ञापकात्परिभाषा बाध्यते।

सिद्धान्ते शङ्कते। **कथमिति। सन्नियोगेति।** उभयोरेककालत्वेन तत्काले तत्वसत्वादिति भावः। आर्धधातुकोच्चारणे कर्तव्ये पूर्वं यदकारान्तमित्यर्थे पूर्वयुक्तीरसम्भवादाह। **अन्ये त्विति।** तस्माल्लोपाप्राप्त्या भाष्यमपि सङ्गतमेव।

३.२५ अत्र कैयटाशयविवेचनम्

तत्र शङ्कते। **नन्विति। एवं सति** पररूपेण रूपसिद्धौ सत्यां। **पूर्वान्तत्वेनेति।** अर्श आद्यचः पूर्वान्तत्वेन। ननु सन्निपातपरिभाषया समाधिरयुक्तः। अकारलोपे यशब्दस्यानिमित्तत्वादतो **नारायणो**क्तिमाह। **तस्यायमिति।** हिश्चार्थे। **तत्र** तयोर्मध्ये। **आदेशे** दीर्घेऽपि। **तर्हि परीति।** शब्दस्य सन्निपातविघातित्वादिति भावः। ननु तथासन्निपातविघाताभावेऽपि कविक्षतिमादाय दीर्घेऽपि तद्विरोधः कुतो न। एवञ्चानित्यत्वावश्यकतया अतो लोपः स्यादत आह। **दीर्घांश इति।** तत्र मन्दप्रवृत्ताया बाधे क्षिप्रं तस्य प्रवृत्तेः। तथा च ज्ञापकवशात्तत्रैवानित्यत्वं, नान्यत्रेति भावः। बाध्यत इत्यग्र इतीति शेषः। स चाशयसमाप्तौ। अत्र कैयटस्तस्यायमाशय इति सूचिताऽरुचिस्तु इत्थं। जातिपक्षे तपरसूत्रं व्याप्यजातिनिर्देशस्यैव बोधकमिति, यत्त्वनिमित्तसन्निपातस्य दीर्घेण निवृत्तिर्जातैवेति न कस्याप्यनुवृत्तिः। तस्माद्व्याप्यत्वजातियञादिसंनिपातनिमित्तो दीर्घो न संनिपातविघातकलोपनिमित्तमिति वाच्यम्। संनिपातपरिभाषायाश्च स्वप्रवृत्तेः प्राक् स्वनिमित्तभूतो यादृशः सन्निपातः स्वान्यतद्विघातकस्य स्वयमनिमित्तमित्यर्थः। मात्राकालिकत्व-

न चैवमंशान्तरेऽपि तद्बाधोऽस्त्विति वाच्यम्, तदबाधेऽप्युपपत्तेः। प्रकृतसूत्रे ''एओङ्'' सूत्रे च गापोष्टकः कित्त्वस्यानन्यार्थतां वदन् भाष्यकारश्चात्र प्रमाणम्। एतेन शुभंया-शब्दस्य नपुंसके ह्रस्वत्वे ङेर्यदेशे दीर्घे च सति ''आतो धातोः'' (पा०सू० ६-४-१४०) इत्यालोपे च 'शुभंय्यः' इत्यादि माधवोदाहृतं भाष्यविरोधाच्चिन्त्यम्। अत एव नपुंसके ''श्रीपं ज्ञानवत्'' इति ग्रन्थे श्रीपायेतिरूपपरतया यथाश्रुतमेव समञ्जसं भङ्क्त्वा माधवानुरोधेन 'प्रायेण ज्ञानवत्' इति व्याचक्षाणा अपि प्रत्युक्ताः।

तथा 'ग्लायति' इत्यादौ सन्ध्यक्षरापामप्युपदेशसामर्थ्याद् गुणो न भविष्यति।

समानाधिकरणव्यापकजातिनिर्देशपक्षेऽप्यङ्गसंज्ञा तर्ह्यनिमित्तं स्यादिति कल्पे जात इति सूत्रवक्ष्यमाणभाष्यरीत्या यादेशनिमित्तसन्निपातस्य न लेशतोऽपि सत्तेति। **माधवा**नुरोधेन शङ्कते। **न चैवमिति।** ज्ञापकेन बोध्याङ्गीकारेत्यर्थपरामर्शान्तरेऽपिः, लोपरूपेऽपि। **तद्बाधः** परिभाषाबाधः। विनिगमनाविरहादिति भावः। **तदबाधेऽप्युपेति।** लोपे परिभाषाया अबाधेऽपि कष्टायेति रूपोपपत्तेरित्यर्थः। एवं सूत्रप्रमाणकेऽर्थे भाष्यसम्मतिमप्याह। **प्रकृतेति। टक इति।** चोऽप्यर्थे। **अत्र** अंशान्तरे। **एतेन** तदबाधेन। यदि लोपेऽपि परिभाषाबाधः स्यात्तदा सामाग इति रूपं प्राप्नोति। एकादेशस्य पूर्वान्तवत्त्वेन धातुत्वात् अन्यतररूपपक्षे चेदम्, किन्त्वेतल्लोपे धातुत्वाभावेन लोपाप्राप्त्या सामगायेति प्राप्नोति। तथा च फलभेद इति। किन्तु साफल्ये कथमनन्यार्थत्वेन ज्ञापकत्वमिति तथा वदन् अप्यत्र प्रमाणमित्यर्थः। आदिना श्रीपेत्यादिसंग्रहः। एतेनेत्यस्यार्थमाह। **महाभाष्येति। अत एव** भाष्यविरोधादेव। **नपुंसके** तत्प्रकरणे। **ग्रन्थं** प्रक्रियाग्रन्थं। **व्याचक्षाणा अपि** प्रकाशकृतः। अत्राद्यः सामञ्जस्ये हेतुरित्यो [१]..... व्याचक्षाणा।

३.२६ सन्ध्यक्षरांशे फलाभावनिरूपणम्

एवमाकारांशे प्रायो सखण्डय्य सन्ध्यक्षरांशे तत्खण्डयति। **तथेति।** अकारवदित्यर्थः। **सामर्थ्यादिति।** न चायादेशार्थमेव तदुपदेश इति कथं सामर्थ्यमिति वाच्यम्। एतदभावेऽवश्यं गुणप्राप्त्या तस्यैव दौर्लभ्यात्। न च एकारपाठेऽपि गुणस्य पर्जन्यन्यायेन प्रवृत्तौ कथं प्रतिपत्तिलाघवं कैयटाद्युक्तम्। तावतापि अयादेशार्थं तस्यापेक्षाया अभावेन प्रक्रियालाघवसत्वात्,

---

१. अत्र ग्रन्थः त्रुटितः।

इतरथा हि एकारमेवोपदिशेत्। मात्रालाघवविरहेऽपि प्रक्रियालाघवसत्त्वात्। न चैवमायादेशोऽपि न स्यादिति वाच्यम्, ''यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते यस्य तु विधेर्निमित्तमेव नासौ बाध्यते'' इति न्यायात्। गुणं प्रति ह्यैकारोपदेशोऽनर्थकः, ग्ले इत्यस्यापि सुपठत्वात्। आयादेशस्य तु निमित्तमेव। न च 'ग्लाय' इत्येव पठ्यतामिति वाच्यम्, तथा सति हि 'त्वया ग्लायते' इति रूपं न स्यात्, यकारद्वयश्रवणप्रसङ्गात् 'जग्लौ' इत्याद्यसिद्ध्यापत्तेश्च। यत्तु एकाजजन्तत्वाभावादिट्प्रसङ्गेन 'ग्लाता' इत्यादि न स्यादिति। तन्न, अनुदात्तोपदेशेष्वेषां सुपठत्वात्। न चैवम् 'अग्लासिष्टाम्' इत्याद्यसिद्धिः, अनादन्तत्वेन सगिटोरसम्भवादिति वाच्यम् ''लोपो व्योः'' (पा०सू० ६-१-६६) इति यलोपे कृते सगिटोः सुलभत्वात्। सन्निपातपरिभाषा त्वनित्येति कृति

एतेभ्योऽपि विवृताविति पाणिनिशिक्षोक्तेः प्रयत्नलाघवसत्वाच्च। एतेनोपदेशसामर्थ्यादिति भाष्यस्योपदेशार्थस्यैकारस्योपदेशादिति भावं सल्लिख्यैतेन प्रतिपत्तिलाघवार्थमेकारमेवोपदिशेदिति कैयटोक्तं प्रत्युक्तम्। पर्जन्यवल्लक्षणप्रवृत्त्या एकारेऽपि गुणप्रवृत्तेरवार्यत्वेन प्रतिपत्तिलाघवस्याप्यभावादिति [1]**सरस्वत्युक्त**मपास्तम्। आयादयोऽपि तर्हि न प्राप्नुवन्तीत्युत्तरभाष्यासङ्गत्यापत्तेश्च। तदेतद्धृदि निधायाह। **इतरथा हीति। सत्वादिति।** उक्तरीत्या प्रयत्नलाघवसत्वाच्चेत्यपि बोध्यम्। **चैवं** उपदेशसामर्थ्याद्गुणाबाधे। **आयादेशोऽपीति।** अविकृतरूपश्रवणार्थत्वादैकारोच्चारणस्येति भावः। ग्लायतोपक्रमादायादेश इत्यादावयादिरपि बोध्यः। एवमग्रेऽपि। न्यायमन्वयः। **गुणमिति। उपेति।** हि यतः। एवमग्रेऽपि। अपिरेवार्थे। **निमित्तमेवेति।** स्थानिवत्त्वेनेति भावः। ननु वर्णमात्राश्रितत्वेनान्तरङ्गत्वाद्यलोपोत्तरं विकरणप्रवृत्त्या ग्लायत इति सिद्धमत आह। **जग्लाविति।** एतेनैतस्तरदोषत्वेन नारायणादीनां तदुक्तिरपास्ता। नारायणोक्तिं खण्डयति। **यत्त्विति। एकाजिति।** ग्लायतिपाठे एकाच्त्वेऽपि हलन्तत्वेनानजन्तत्वेनाननुदात्तत्वेन निषेधाप्राप्त्या इट्प्रसङ्गेन ग्लायितेति स्यान्न तु ग्लातेति भावः। [2]..... त्त्वेति तु दुर्वचम्। अयासिष्टामित्याद्यसिद्धेः। **अनुदात्तोपदेशेष्विति।** तेषामसत्वेऽपि क्रमप्राप्तस्थल इत्यर्थः। तत्र तदुक्तदोषमेव परिहरति। **न चैवमित्यादि।** एवं यान्तपाठे, विशिष्यात्र भावः। प्रयुक्तविशिष्टाभावस्थले तु लोपोत्तरं सन्निपातपरिभाषया तौ दुर्लभाविति तेनैवोक्तमतमाह। **सन्निपातेति।** वृत्रहभ्यामित्यादौ यदात्वद्वारा भ्यांप्रकृतिसन्निपातनिमित्तो नलोपो

---

१. र.प्र.पृ.सं. २५३

२. अत्र ग्रन्थः त्रुटितः।

तुग्ग्रहपेन ज्ञापयिष्यते। तेन वल्सन्निपातेन कृतो यलोपो वल्सन्निपातविघातकमपीटं प्रवर्त्तयिष्यत्येव। अनित्यताश्रयपेनैव हि 'दाक्षिः' 'गोदः' इत्यादावदातोर्लोपः। अन्यथा इञ् कप्रत्ययौ प्रति तयोरूपजीव्यत्वाल्लोपो न स्यात्। अस्तु वा 'सन्निपातपरिभाषाश्रयपाद् 'अग्लासिष्टाम्' इत्यादि न सिध्येद् इत्यपि यान्तोपदेशे दोषान्तरम्। सर्वथापि संध्याक्षरापामुपदेशसामर्थ्याद् गुणो न। आयादयस्तु भवन्त्येवेति सिद्धम्।

स्यादेतत्। ''आदेच'' (पा०सू० ६-१-४५) इत्यात्वमपि तर्हि बाध्यताम्। नह्यौजुपदेश आत्वस्य निमित्तम्, ग्ले इत्युपदेशेऽपि तस्य सुकरत्वात्।

ह्रस्ववर्णावयवत्वेन व्यवधायकत्वात् न तद्विघातकं तुकं न प्रवर्त्तयेदिति व्यर्थं कृति तुग्ग्रहणं तदनित्यत्वे ज्ञापकमिति भावः। **तेन** तदनित्यत्वेन। तदनित्यत्वमावश्यकमित्याह। **अनित्यतेति।** एवेन प्रकारान्तरनिरासः। हि यतः। **तयोः** अदात्सन्निपातयोः। न च 'न प्रत्ययः सन्निपातलक्षण' इत्यनेनेदं दूषितं 'कृन्मेजन्त' इति सूत्रभाष्य[1] इति वाच्यम्। तावतापि अङ्गसंज्ञा तर्ह्यनिमित्तं स्यादित्यनेनाग्रिमेणानित्यत्वावश्यकत्वस्योक्तत्वात्। वस्तुतोऽग्रिमस्यैवैकदेश्युक्तित्वेनास्य युक्तत्वाच्च सन्निपातस्य सर्वविध्यर्थस्य तत्र ग्रहणादिति भावः। वस्तुतस्तु अनित्यतेत्यादिग्रन्थ सौष्टवेत्यन्तो, लोपो व्योरित्यादि ष्यचेत्यन्तं [2]**सीरदेवा**नुरोधेनोक्तं चिन्त्यम्। कृतितुक्ग्रहणस्य प्रत्याख्यानात्। अन्यथा चासाफल्यात्। अवयवावयवस्य समुदायावयवत्वेनाव्यवधायकत्वेन तदविघातकत्वात्। अत एव परिभाषाया अनित्यत्वेऽपि तत्फलपरिगणनमध्ये दाक्षिरित्यादिवदनुल्लेखेनात्राभित्यस्य दुर्वचत्वाच्च। एतेन दीर्घे सा अनित्या नान्यत्रेति **नारायणो**क्तमपास्तम्। एवञ्च दोषस्तदुक्तो युक्त एवेति बोध्यम्। तदेतदभिप्रेत्याह। **अस्तु वेति। यान्तोपेति।** यान्तानामनुदात्तोपदेशेषु तत्रोपदेशेत्यर्थः। अपिर्जग्लावित्याद्यसिद्धिसमुच्चायकः। उपसंहरति। **सर्वथापीति।** तदाश्रयणेऽनाश्रयणेऽपीत्यर्थः। सिद्धमित्यत्रान्वयः।।

३.२७ सन्ध्यक्षरांशे फलाभावे कैयटाशयः

एवं भाष्योक्तमुक्त्वा कैयटोक्तमाह। **स्यादेतदित्यादि। आत्वमपीति।** एजुपदेशस्याविकृतरूपश्रवणार्थत्वादिति भावः। **तर्हि** यं विधिं प्रतीति न्यायाङ्गीकारे। नन्वात्वसिद्ध्यर्थमेवैजुपदेशोऽत आह। **न ह्योति।** मात्राप्रक्रियालाघवाभावेऽपि उक्तरीत्या प्रयत्नलाघवादाह। **ग्लो इत्युपेति।** ननु

---

१. म.भा.पृ.सं. ३६३ (प्रथमो भागः) २. सीरदेवः बृहत्परिभाषावृत्तिकारः। (बृ.परि.पृ.सं. २२९)

श्नितीति गुणेनाश्नित्यात्वेनैचोऽपहारे प्राप्ते ऐजुपदेशसामर्थ्येन गुणात्वयोर्मध्ये कतरद्बाध्यं कतरन्नेत्यत्र विनिगमनाविरहेणोभयबाधप्रौव्यात्। न चैवमात्वविधेः कोऽवकाश इति वाच्यम्। ''धेट् पाने'' (दि०प०) ''श्नो तनूकरपे'' इत्यादेरवकाशस्य स्पष्टत्वात्। नन्वेवमादेङ् इत्येव ब्रूयात्, तथा चैज्ग्रहणं निरवकाशमेवेति चेत् ? न, उत्तरार्थत्वात्। ''मीनातिमिनोति'' (पा०सू० ६-१-५०) इत्यत्र ह्येच इत्यनुवृत्त्या 'आकारान्तानामेजन्ताः प्रकृतयः, एजन्तानामपीकारान्ता' इति घुसंज्ञासूत्रे वार्तिककारः स्फुटीकरिष्यति।

अत्राहुः – अन्यतरबाधेनैव सम्भवे उभयबाधकल्पनं तावदन्याय्यम् तत्र यद्यपुरपि विशेषो नावधार्येत तर्हि विनिगमनाविरहात्स्यादेवोभयबाधः। अस्ति चेह विनिगमकम् ''न ध्याख्या'' (पा०सू० ८-२-५७) इति सूत्रे ध्यायतेः कृतात्वस्य निर्देशेनात्वाबाध-

---

गुणबाधेन साफल्ये सामर्थ्याभावात् कथमात्वबाधः। किञ्च यादेशार्थं तदुपदेशे गुणे वा निर्णये [१]..... तीति रूपंहि नैवेष्टम्। अत एव ग्ला इत्यपि सुपठत्वादिति नोक्तम्। ग्लायतीत्याद्यसिद्ध्यापत्तेः, सूत्रं एडर्थमत आह। **श्नितीति।** एवञ्च नियतीत्येवेदानीं रूपमिति नोक्तदोष इति भावः। **चैवं** आत्वस्यापि बाधे। आदिना दो खण्डने [१]..... नियमव्रतादेशेष्वित्यादिपरिग्रहः। न च तत्राप्युपदेशसामर्थ्यात्तदभावः। अन्यथा धाडित्याद्येव वदेदिति वाच्यम्। एवमपि धयति च्यवत इत्याद्यर्थं तदुपदेशसाफल्येनात्वविधेः साफल्यादिति भावः वार्तिकमतेन। **एवं** आत्वविधेरेङि साफल्ये। **निरवेति।** तथा च तत्सामर्थ्येनैकारादेरप्यात्वे निमित्तत्वेनात्वाबाध इति भावः। **उत्तरेति।** इह किञ्चित्त्रपो इति न्यायस्तु न, तत्रैङ इति पाठेऽग्रे चैच इति पाठे गौरवात्। हि यतः। **एच इत्यनुवृत्त्येति।** 'क्रीङि' (६-१-४८)त्यतो णावित्यनुवृत्त्य [१]..... त्यनुवृत्या नैतत्सिद्धिरिति भावः।

सम्भवे उपदेशसार्थक्यसम्भवे। ननु कस्य बाध इत्यत्र नियामकाभावाद्वैपरीत्यापत्तिः। किञ्च विनिगमनाविरहादुभयबाध उक्तोऽत आह। **तत्रेति।** कल्पनापेक्षयाऽन्यतरबाधे इत्यर्थः। एवोऽप्यर्थे बाधोत्तरं योज्यः। स च वैपरीत्यसमुच्चायकः। **अस्ति चेह विनिगमकमिति।** न **ध्याख्येति** निर्देशरूपमित्यर्थः। ननु कथं तस्य तत्वमत आह। **न ध्येति। निर्देशेनेति।** एजुपदेशसामर्थ्यप्राप्तात्वबाधाभावज्ञापनस्य सम्भवादित्यर्थः। यत्तु सौत्रत्वादेव प्रयोगोपपत्तावात्त्वबाधकल्पने मानाभाव इति। तन्न। आनुमानिकवचनकल्पने मानाभावात्। बाधकत्वमङ्गीकृत्य सौत्रत्वकल्प-

---

१. अत्र ग्रन्थः त्रुटितः।

ज्ञापनात्। किञ्च एज्ग्रहणसामर्थ्यादप्यात्वं भवति। यत्तूक्तमुत्तरार्थं तदिति। तन्न, ''मीनाति'' (पा०सू० ६-१-५०) इति सूत्रेण हि नैचः स्थाने आत्वं विधीयते। किन्त्वेज्निमित्ते प्रत्यये विवक्षिते उपदेशावस्थायामेवान्त्यमात्रास्यात्वं विधीयते। अन्यथा 'दायः' इत्यादौ भावे घञं बाधित्वा ''एरच्'' (पा०सू० ३-३-५६) स्यात्, 'ईषदव-दानः' 'स्ववदान' इति ''आतो युच्'' (पा०सू० ३-३-१२८) च न स्यात् 'अवदायः'उ इति ''श्याव्यधा'' (पा०सू० ३-१-१४१) इति पो न स्यात्। स्पष्टीकरिष्यते चेदं षष्ठे एव भाष्यकृता। एवञ्चैड्निमित्ते प्रत्यये इत्युच्यमानेऽपि 'दापयति' मापयति' इत्यादि सिध्यत्येव, पिचो गुणं प्रत्यपि स्वरूपयोग्यत्वात्, वृद्ध्या गुणबाधेऽपि योग्यतान-

---

नापेक्षयाऽबाधकत्वज्ञापनस्य लघुत्वाच्च। समत्वैजुपदेशसामर्थ्यस्यैकान्तिकत्वाकल्पनमिति प्राप्तात्वबाधकवचनस्याभावमात्रकल्पनमिति न किञ्चिदपूर्वकल्पनमिति दिक्। नन्वेवं पाक्षिकतदभावज्ञापनेनापि निर्देशोपपत्तेर्नियमासिद्धिः। किञ्च प्रागुक्तवार्तिकमतं न प्रयुक्तमिति तदुक्तसमाधिरपि युक्त एवेति कथं तत्त्यागोऽत आह। **किञ्चेति।** एतेन ध्या इति कृतात्वनिर्देशेन सामान्येनात्वस्य निमित्तमैकार इति ज्ञाप्यत इति [1]**विवरणकृदु**क्तमयुक्तम्। लिङ्गात् पृथगुपदेशसामर्थ्याच्च तदभाव इति विकल्पकल्पनयाऽप्युपपत्तेरात्वस्यैकान्तिकत्वासिद्धेः। न चैवं **न ध्याख्येति** निपातनादात्वं न बाधिष्यत इति कैयटासङ्गतिरिति वाच्यम्। अनुमितानामप्येचां निपातनादेवात्वमिति तदर्थात्। अत एवोक्तं निपातनादिति। निपातनानां च वाचकत्वस्याङ्गीकारादैचां नित्यमेवात्वं भवति। सर्वनामनीत्यत्र णत्वाभाववत्, न विकल्पनेन। गुणे तु तथानिपातनादर्शनात् यं विधिं प्रतीति न्यायात्सर्वथा बाध एव। तेन ध्यायतीत्यादावैजुपदेशस्यायर्थत्वात्सामर्थ्योपक्षयादात्वे विकल्पोदयशङ्केति **कृष्णो**क्तमपास्तम्। हि यतः। मात्रपदेनैजूव्यावृत्तिः मीत्यादीनामिति भावः। **अन्यथा** उक्तार्थानङ्गीकारे। अस्य त्रिषु अन्वयः। दाय इत्यादीनि दीङो रूपाणि। **इत्यादौ** इत्यत्र। एवमग्रेऽपि। **युच्चेति।** इति युच्चेत्यर्थः। चः पूर्वोत्तरसमुच्चायकः। पूर्वोक्तं तु वार्तिकमतं, न भगवत इत्याह। **स्पष्टीकेति।** एवोन्ते योज्यः। एवं चः। एचः स्थाने आत्वाविधाने चः। नन्वेङोऽजायमानत्वादत्र पक्षे कथं तन्निमित्तताऽत आह। **पिच इति।** अपिना वृद्धिसमुच्चयः। एच इत्युक्तावस्योपयोगः। ननु वार्तिकमते यथा वृद्धिरेव भवति न गुण इत्येच् इत्यावश्यकम्। एवमत्र पक्षेऽपि वृद्धिं प्रति तत्वेऽपि गुणं प्रति तत्वे एङ्निमित्तत्वाभावादैच इत्यावश्यकमेवात आह। **वृद्ध्येति।** वार्तिकमते नित्यत्वेनेत्यभिमानः।

---

१. महाभाष्यप्रदीपविवरणकृत् ईश्वरानन्दः। (प्र.वि.पृं.सं. २५१) F.I.P. प्रथमो भागः

पायात्। न चेह फलोपधानं विवक्षितम्, आत्वस्यैज्विषये प्रागेव प्रवृत्तेरभ्युपगमात्। अन्यथा घञ्युच्णप्रत्यया न स्युरिति समनन्तरमेवोक्तम्। तस्मादात्वं भवत्येव। गुणस्त्वैकारोपदेशसामर्थ्याद् बाध्यते इति स्थितम्।

विवक्षितमिति। एवमपीति शेषः। असम्भवादिति भावः। कुतोऽसम्भवोऽत आह। **आत्वस्येति। प्रागेव** उपदेश एव। एवञ्चात्वविषये एजूनिमित्तताऽपि दुर्लभा स्यादिति भावः। यत्तु अकारान्तानामेजन्ता प्रकृतय इत्यादिः प्रागुक्तवार्तिकमतेऽप्युत्तरत्रैजग्रहणस्य न प्रयोजनम्। वृद्धीकृतायामपि पुनः प्रसङ्गविज्ञानाद्गुणे कृते एङ्त्वेन भाव्यमित्येङ इत्येवेष्टसिद्धिः। अत एव विषयसप्तमीं प्रक्षेप्य एङ्निमित्तत्वमव्याहतम्। कृतायामपि वृद्धौ गुणप्रवृत्तेरवश्यंभावादिति **नारायणः**। तन्न। गुणशास्त्रस्यैव परत्वात्। नित्यत्वेन बाधे तु न पुनः प्रसङ्गविज्ञानम्। तस्या [१]..... नार्हता भाष्यमते तन्निमित्तत्वस्यान्यथोपपादितत्वाच्च। त्वयापि प्रकृते तथैवोक्तत्वेन पूर्वविरोधाच्च। न हि तत्प्रवृत्तावेव योग्यत्वव्यवहार इति दिक्। **अत्रेदं बोध्यम्।** 'इको गुणेति' सूत्राभावेऽयं विचारः। तत्र वृद्ध्या गुणबाधो न, परत्वेन गुणस्यैव। नापि नित्यत्वेन। प्रकृतसूत्राभावेन वृद्धौ कृतायां गुणस्यापि प्राप्त्या तस्यापि नित्यत्वात्। शब्दान्तरप्राप्त्या अनित्यत्वमपि उभयोः समम्। प्रकृतिप्रत्ययनिमित्तकत्वेन बहिरङ्गत्वमप्युभयोः समम्। प्रत्युत त्वयाऽधिकसापेक्षत्वेन वृद्धेरेव बहिरङ्गत्वं च। वृद्धेः 'गोसखाया'वित्यादौ चारितार्थ्येनापवादत्वमपि न। **गोतो णिदिति(पा०सू० ७-१-९०)** कार्यातिदेशेऽपि निमित्तरूपकार्यस्यैवातिदेश इत्यन्यत्र स्पष्टम्। एवञ्चेदृशे विषये परत्वादन्तरङ्गत्वाच्च गुणे कृते वृद्धेः प्राप्तत्वेन वार्तिकमते एङ्ग्रहणेनानिर्वाह इति दुर्वचमेव। भाष्यमते तु सुवचम्। गुणवृद्धिसम्भावनायामप्येङ्निमित्तत्वसत्वात्। एवञ्च वृद्ध्या गुणबाधेऽपीत्युक्तिर्चिन्त्यैव। वार्तिकमते वृद्ध्या तदुत्तरमवश्यं प्राप्त्या गुणस्य पूर्वजातस्य बाधेनांशेऽश्रवणेऽपीति वा सिद्धान्ते वृद्ध्या एङ्त्वनिष्पन्नाकाररूपया गुणस्योक्तरीत्या सम्भावितस्याप्रवृत्तिलक्षणाबाधेऽपीति वा तदर्थ इति दिगिति। उपसंहरति। **तस्मादिति।** न चैवमपि रैशब्दादिभ्य आचारक्विपि रायतीत्यादौ सन्ध्यक्षरस्य गुणः स्यादेवेति वाच्यम्। एजन्तेभ्य आचारक्विबभावादेतद्भाष्यप्रामाण्यात्। तदूध्वनयन् आह। **स्थितमिति।** अत्र भाष्य इति शेषः॥

---

१. अत्र ग्रन्थः त्रुटितः।

व्यञ्जनानां गुपः स्यादिति परमवशिष्यते। ततश्च 'ईहिता' इत्यत्र हकारस्य कण्ठ्यत्वादकारः स्यात् 'उम्भिता' इत्यत्र भकारस्यौष्ठ्यत्वादोकारः ; ततश्च 'येता' 'उनविता' इति स्यात्। ईकारस्य यपि कृतेऽकारस्येटा सहादृगुपो न त्वल्लोपः, आर्द्ध-धातुकोपदेशे यदकारान्तं तस्य लोप इति व्याख्यातत्वात्। उम्भेश्चानुस्वारपरसवर्णयोर्गुपे कर्त्तव्येऽसिद्धत्वादिति। नैष दोषः ''सप्तम्यां जनेर्डः'' (पा०सू० ३-२-९७) इत्यत्र डप्रत्ययस्य डित्करणं ज्ञापकं न व्यञ्जनस्य गुपो भवतीति। यदि हि स्यात्तर्हि नकारस्यार्द्धमात्रिकस्य मात्रिके अकारे गुपे कृते त्रयापामकारापाम् ''अतो गुणे'' (पा०सू० ६-१-९७) इति पररूपे च सिद्धं रूपम् 'उपसरजाः' मन्दुरजः' इति, तत्किं टिलोपार्थेन डित्करणेन ? स्त्रीगवीषु पुंगवानां गर्भाधानाय प्रथममुपसरणमुपसरः। ''प्रजने सत्तेः'' (पा०सू० ३-३-७१) इत्यप्प्रत्ययो घञोऽपवादः। प्रजनः स्यादुपसरः'' (अ०को० ३-२-२५) इति सङ्कीर्णवर्गेऽमरः। प्रजायतेऽस्मिन्प्रजनः पशूनां गर्भग्रहणकाल इति क्षीरस्वामी। उपसरे जात उपसरजः, मन्दुरायां जातो मन्दुरजः ''ङ्यापोः संज्ञाछन्द-सोर्बहुलम्'' (पा०सू० ६-३-६३) इति ह्रस्वः। ''वाजिशाला तु सन्दुरा'' (अ०को० २-२-७) इत्यमरः। न च डकारः श्रवणार्थोऽस्त्विति वाच्यम्, ''प्रावृट्शरत्कालदिवां जे'' (पा०सू० ६-३-१५) इति कृतटिलोपनिर्देशाल्लिङ्गात्। ननु नेदं लिङ्गं ''जै क्षये'' (भ्वा०प०) इत्यस्य कप्रत्ययान्तस्य 'ज' इति निर्देशोपपत्तेः। कथं तर्हि कर्मण्युपपदे विहित आतः कः 'प्रावृषिजः' इत्यादौ स्यादिति चेत्? 'द्विपः' 'पादपः' इत्यादिसिद्धये

३.२८ व्यञ्जनांशे फलाभावनिरूपणम्

एवं सन्ध्यक्षरांशे फलाभावमुक्त्वा व्यञ्जनांशे तमाह। **व्यञ्जनानामिति। परं** केवलम्। **ओकार इति।** स्थानत आन्तर्यस्य सर्वतो बलवत्त्वात्। **ईकारस्येति।** यत इत्यादिः। इतिः पूर्वपक्षानुवादसमाप्तौ। अग्रे इतिर्हेतौ। तदेवाह। **यदि हीति।** यतः स्थानत आन्तरतमाभावादाह। **मात्रिक इति।** प्रमाणत आन्तर्यात्। न च व्यञ्जनस्यार्द्धमात्रिकत्वादेङ्वदकारेणापि कथं तत्वमिति वाच्यम्। अत्यन्ताधिककालापेक्षया स्वल्पाधिककालस्यैवान्तरतमत्वात्। तथैव लोके व्यवहारात्। यथा सहस्रधनस्य द्विसहस्रधनसमो न चतुःसहस्रधन इति भावः। **परेति।** सिद्धिरित्यादिः। **उपसरणं** गमनम्। मतान्तरमाह। **प्रजायत इति।** आद्ये भावेऽप्, द्वितीयेऽधिकरणे। **कृतेति।** जनेर्ड इत्यादिः। **नन्विति।** तथा च श्रवणार्थ एवेति भावः। **उपपत्तेरिति।** तस्या तेन

''सुपि स्थः'' (पा०सू० ३-२-४) इत्यत्र सुपीति योगविभागाभ्युपगमात्। सत्यम्, डकारस्य श्रवणार्थत्वे इत्संज्ञाशास्त्रं बाध्येत। न च प्रयोजनाभावः, टिलोपार्थत्वात्। न च गुपेनान्यथासिद्धिः, तदभावस्यापि ज्ञाप्यत्वात्। निषादस्थपत्यधिकरणन्यायेन (जै०न्या० ६-१-१३) फलमुखगौरवस्यादोषत्वात्, डकारस्य श्रवणार्थताभ्युपगमे ''सिद्धं तु नित्य-शब्दत्वात्किमर्थं शास्त्रमिति चेन्निवर्त्तकत्वात्सिद्धम्'' इति वृद्धिसूत्रस्थवार्तिकविरोधाच्च। नन्वसति डित्त्वे रूपं न सिध्यति, नकारस्थाने गुणस्यापि सानुनासिकस्य प्रसङ्गात्। न च निरनुनासिकेन प्रत्ययाकारेण सह पररूपाच्छुद्धो भविष्यतीति वाच्यम्, पररूपविधानेऽपि गुणानामभेदकतया पर्यायेण सानुनासिकप्रसक्तेर्दुर्वारत्वादिति। मैवम्, ''एङि परः'' इतीयता सिद्धे रूपग्रहणादधिकाद्यत्नाद् गुणविवक्षोपपत्तेः। तस्य ह्येतदेव फलम् - यादृशं

सूत्रस्योपपत्तेरित्यर्थः। आकारान्तात् पूर्वत्रान्वयः। चेन्नेति पाठः। **सुपीति।** सुबन्त उपपदे आदन्तेभ्यो धातुभ्यः कप्रत्ययः स्यात्। द्वाभ्यां पिबतीति द्विप इत्यादि। **तदभावेति।** डित्करणेनेति भावः। नन्वेवं कल्पनागौरवमत आह। **निषादेति।** न्यायस्वरूपं प्रागुक्तम्। श्रवणार्थत्वे प्राचोक्तं दोषमाह। **डकारस्येति।** तथा च ततः श्रवणं न, तथाऽप्रयोगात्। वस्तुतस्तु चिन्त्यमिदम्। एवं सत्यकारादिष्वपि तत एव गुणाभावादिसिद्धौ ज्ञापकोद्भवनतत्खण्डनादिप्रयासवैयर्थ्यापत्तेः। नित्यत्वेन परिहारस्य वास्तवत्वेन तत्रोक्तावपि प्रकृते प्रक्रियायां शिष्यबुद्धिवैशद्यर्थं गत्यन्तरसम्भवेन [1]तदनभ्युपगमाच्च। एतेन नित्यत्वेन परिहारस्यानन्यगतिकत्वेन सति गत्यन्तरे तदभ्युपगम-स्यान्याय्यत्वम्, वृद्धिसूत्रे तु गत्यन्तराभावात् तथाश्रितमिति **नारायणो**क्तमपास्तम्। अङ्गसंज्ञासूत्रे तथाशब्देन पूर्वपक्षसिद्धान्तयोरुक्तत्वाच्च। अपिना सानुनासिकपदं योज्यः। **प्रसङ्गादिति।** अन्तरतमपरिभाषया गुणानामभेदकतया चेति भावः। [2]इममजानन् शङ्कते। **न चेति।** तं भावमाह। **परेति। पर्यायेणेति।** कदाचित्सानुनासिकोऽपि स्यादित्यर्थः। इतिः पूर्वपक्षसमाप्तौ। कैयटदण्डिनारायणसरस्वत्याद्यनुरोधेन समाधत्ते। **एङीति।** इतिः समाधिसमाप्तौ। वस्तुतस्तु चिन्त्यमिदम्। पररूपशब्देन परशब्देन वा यदुपस्थितं रूपं प्रयोगस्थं तस्य तत्र ग्रहणम्, स्थाने जायमानः परः किंगुणक इत्याकाङ्क्षायामन्तरतमपरिभाषयोभयगुणकः। प्रकृते चोभयान्तरतमा-सम्भवात्परशब्देन यद्गुणकस्योपस्थितिस्तद्गुण एव भविष्यतीति पररूपेण शुद्धो भविष्यतीति

---

१. तदनभ्युपगम इति ख।

२. इमं भावमजानन् इति ख।

परस्य रूपं निरनुनासिकत्वाद्युपेतं तादृगकेव यथा स्यादिति दिक्* । तस्माज्जनेर्डवचनं ज्ञापकं न व्यञ्जनस्य गुणो भवतीति ।

एवञ्च ''इग्ग्रहणमात्सन्ध्यक्षरव्यञ्जननिवृत्यर्थम्'' इति वार्त्तिकमसङ्गतमिति प्राप्ते भगवान् भाष्यकार इत्थं सिद्धान्तमाह – उक्तरीत्या ज्ञापकेनैवात्सन्ध्यक्षराणां निरासेऽपि व्यञ्जननिवृत्यर्थं सूत्रं कर्त्तव्यमेव । यत्तूक्तं जनेर्डवचनं ज्ञापकमिति । तन्न, गमेरपि ह्ययं डो वक्तव्यः । गमेश्च गुणे क्रियमाणे आन्तर्यत ओकारः स्यात् । ततश्च 'नगः' 'अगः' 'अभ्युद्गः' 'समुद्गः' इत्यादि न सिध्येत् । ततश्च तत्र चरितार्थं डित्त्वं कथं व्यञ्जनस्य गुणाभावं ज्ञापयेदिति । ननु ''जनेर्डः'' (पा०सू०ए० ३-२-९७) इत्येव डप्रत्ययो गमेर्न विधीयते किं तु ''गमश्च'' (पा०सू० ३-२-४७) ''अन्तात्यन्ताध्वदूरपार'' (पा०सू० ३-२-४८) इति प्रकरणे पठितेन ''अन्यत्रापि दृश्यते'' (का०वा०) इति वार्त्तिकेन डप्रत्ययान्तरमेव । तथा च कथं भाष्यकृतोक्तं ''गमेरप्ययं डः'' इति ? सत्यम्, ''सप्तम्यां जनेर्डः'' (पा०सू० ३-२-९७) इति प्रकरणे तावद् ''अन्येष्वपि दृश्यते'' (पा०सू० ३-२-१०१) इति सूत्रेण डो विधीयते इति निर्विवादम् । तत्र चान्येष्वप्युपपदेषु जनेर्डो

भाष्याशयात् । गुणानां शाब्दत्वादिवच्छब्दरूपत्वाभावेन रूपग्रहणेन व्यावर्त्यसम्भवाच्च । अत एव रूपग्रहणं चिन्त्यप्रयोजनमिति **मनोरमायां** संगच्छते । अधिकं **शब्दरत्ने**[1] स्पष्टम् । एवञ्च कैयटाद्युक्तमपि चिन्त्यमिति बोध्यम् । तदाह । **इति दिगिति ।** प्रकृतमुपसंहरति । **तस्मादिति ।**

३.२९ भाष्योक्तं व्यञ्जनांशे फलनिरूपणम्

परमप्रकृतमुपसंहरति । **एवञ्चेति ।** फलत्रयान्यथासिद्धौ चेत्यर्थः । **ज्ञापकेनैवेति ।** तदादिनैवेत्यर्थः । **गमेरेति ।** यत इत्यादिः । **अयं ड इति ।** सप्तम्यां जनेर्ड इत्यतोऽन्येष्वपि दृश्यन्त इत्यत्रानुवर्तमानो डो गमेरपि वक्तव्य इत्यर्थः । **गमेश्चेति ।** असति डित्व इति शेषः । **आन्तर्यतः** स्थानत आन्तर्यस्य बलवत्वात् । **ओकार इति ।** मकारस्यौष्ट्यत्वादिति भावः । इति भाष्योक्तिसमाप्तौ । तत्र शङ्कते । **नन्विति । इत्येवेति ।** इत्ययमेवेत्यर्थः । **पठितेनेति । अन्तात्यन्तेति** सूत्र एवेति भावः । प्रकरण इत्युक्तिस्तु प्रकरणभेदसूचनाय । अत एव गमेश्चेत्यस्यानुवृत्तिसूचकोल्लोखः सफलः । तावत् आदौ । निर्विवादमित्यत्रान्वयः । **तत्र चेति ।** तस्य चेत्यर्थः ।

---

* मुद्रित पाठे दिगिति नास्ति । प्रभायां दिगिति पाठमनुसृत्येदम् ।

१. प्रो.म.श.पृ.सं. २३१ ।

दृश्यते इत्यक्षरार्थः। तेन 'अजः' 'द्विजः' 'अनुजः' इत्यादि सिद्धम्। एवमपि धात्वन्त-राडुविधायकाभावात् 'परितः खाता परिखा' इत्यादि न सिद्ध्येदित्याशङ्क्य तत्र वार्त्तिक-कृतोक्तम् ''अन्येभ्योऽपि दृश्यते'' (का०वा०) इति। अयं च सौत्रदृश्यपिग्रहणसूचित एवार्थो वार्त्तिकेन विवृतो न त्वपूर्वः संगृहीतः। तथा च तत्र वृत्तिकार आह — ''अपिशब्दः सर्वोपाधिव्यभिचारार्थः। तेन धात्वन्तरादपि भवति – परितः खाता परिखेति। दृशिग्रहणात्कारकान्तरे कालान्तरे च'' इत्यादि तत्रैव स्पष्टम्। एवं स्थिते सौत्रेणैवानेन 'परिखा' इत्यादेरिव 'नगः' 'अग' इत्यादेरपि सिद्धौ ''अन्तात्यन्त'' (पा०सू० ३-२-४८) इति प्रकरणे ''अन्यत्रापि दृश्यते'' इति वार्त्तिकं न कर्त्तव्यमेव। क्रियमाणं वा एतसूत्रसिद्धार्थविवरणपरतया नेयमित्याशयेन भगवतोक्तम् – ''गमेरपि ह्ययं डो वक्तव्यः'' इति।

तस्मिन् सतीति वा। **एवमपि** उक्तसिद्धावपि। **तत्र** अन्येष्वपीति सूत्रे। एवमग्रेऽपि। **दृश्यपीति।** उभयेत्यर्थः। अपिरुपपदान्तरादिसमुच्चायकः। अत एव सर्वपदसङ्गतिः। उक्तमपि वैशद्याय मानान्तरवचनद्वारा तत्रत्यमाह। **दृशीति।** अत एव दृश्यपीति प्रागुक्तसङ्गतिः। इतेः प्रागेदनुक्तिस्तु एवमानुपूर्व्यभावाकल्पाशयका वा चेति बोध्यम्। **तत्रैव** वृत्तिग्रन्थ एव। **वार्तिकमिति।** इदमुपलक्षणं अन्तेति सूत्रस्य तत्स्थानां सर्वत्र त्रयोरित्यादि वार्तिकानां चापि। तेषामप्येतत्प्रपञ्चत्वात्। प्राग्वदाह। **क्रियमाणं वेति।** एवञ्च गमेरपीति भाष्यस्थान्येभ्योऽपि दृश्यन्त इति वार्तिकेनेति भावः। इतिकथनं विवरणकारादीनां तात्पर्यतो युक्तं न तु यथाश्रुतमिति बोध्यम्। एतेन भाष्यकारवचनादेव सङ्गमे इति कस्यचिदुक्तं, न तु यथाश्रुतमिति बोध्यम्। नन्वन्येष्वपीत्युक्त्या उपपदान्तर एव स्यान्न धात्वन्तरादत आह। **अन्येभ्योऽपीति।** तत्र कैयटाद्युक्तं कर्मयुक्तं असौत्रं डोविधानं सौत्रडित्वस्य कथमवकाश इत्याशङ्क्य व्यञ्जननिवृतौ सत्यां जनेर्ड इति सौत्रमेव डविधानं जनावनर्थके सति गमेरप्येतत्कल्पयति। न च व्यञ्जनस्य गुणाभावज्ञापनेन साफल्यात्क्रमस्यान्यतस्तत्कल्प्यत्वमिति वाच्यम्। शास्त्रान्तरप्राप्तातिव्यवहितगुण-कल्पनिवृत्तिकल्पनापेक्षया स्वस्यान्यतो विधिकल्पनालाघवात्। न चैवमन्येभ्योऽपीति वार्तिकं व्यर्थम्। डविधिसामर्थ्यप्रपञ्चार्थत्वादिति **नारायणो**क्तं, अन्येष्वपीत्यनेन न जनेर्डः, किन्त्वन्यत्रापीति प्रकरणान्तरस्थवार्तिकेनैवेति कथं जनेर्डविधानमत्र लिङ्गम्। न चोक्तरीत्या सप्तम्यन्तस्यैव प्रपञ्चः। तथा हि सति जनेर्डस्य भूते विधानाद्गमेरपि डो भूत एव स्यान्न कालान्तरे। दृश्यते च ग्रामं गच्छत्यपि ग्रामग इति प्रयोगः। न च तर्हि 'नगोऽगो गुरुतल्पग' इत्यादौ भूते डो न

नन्वेवमपि डित्त्वं व्यर्थमेव, गमेर्विचैव सिद्धे ''गमेर्डोः'' इति डोप्रत्ययविधानेन मकारस्य गुप ओकारो न भवतीति ज्ञापितत्वात्। तस्माड्डप्रत्ययस्य डित्त्वं पूर्वोक्तरीत्या ज्ञापकमेव। किञ्च, डोप्रत्ययविधानमेव व्यञ्जनस्य गुप इति ज्ञापयति। अन्यथा विचैव सिद्धौ किं तेनेति चेत् ? न, विचि हि सति गुपः क्रियमाणः सानुनासिक ओकारः स्यादिति निरनुनासिकसिद्धये डोप्रत्ययविधानादिति दिक्।

स्यादिति वाच्यम्। अन्तेत्यादि डस्य कालानधिकारात् कालत्रयेऽपि जायमानत्वेन भूतेऽपि सुलभत्वात्। अत एव तयोर्न प्रपञ्चप्रपञ्चिभावः। तथा हि सति प्रकरणभेदानर्थक्यं च। एकप्रकरणे हि पुनर्डग्रहणं न कार्यमिति लाघवमपि भवति। न च दृशिग्रहणात्कारकान्तर एव कालान्तरेऽपीति युक्तः प्रपञ्चप्रपञ्चिभाव इति वाच्यम्। अन्तेत्यादिना प्रतिपदोक्ते सार्वकालिकत्वाद्भूतेऽपि डे सम्भवति दृश्यपि ग्रहणानुसरणरूपब्रह्मास्त्राश्रयणस्यानवसरात्। दृश्यपि ग्रहणादिकं हि यत्रार्थं प्रति यदोक्तलक्षणं नास्ति तत्संग्रहाय प्रवर्तते, नान्यत्र। सम्भवति च कालभेदेनोभयोः स्वातन्त्र्ये प्रपञ्चप्रपञ्चिताऽपि नोचिता। निरर्थकानुवादकल्पनायाः आनर्थक्यापरपर्यायत्वात् गमेरपीति भाष्यं न श्रद्धेयमिति **नारायणगुरु**क्तं चापास्तम्। तस्माद्गुणांशव्यञ्जननिवृत्त्यर्थमिदमिति भाष्याभिमतं युक्तमिति सिद्धम्।

एवं स्थिते नारायणाद्यनुरोधेनाह। **नन्वित्यादिना।** एवमपि गमेर्मस्यैव विधानेऽपि। **विचैवेति।** तत्र मस्य गुणेनौकारेऽत इति पररूपेण गोरूपसिद्धेरिति भावः। तदाह। **तस्मादिति।** तद्धेतोरेवेति न्यायेनाह। **किञ्चेति।** यद्यपि तर्हि त्यवतृडोर्डित्वं ज्ञापकं औत्यपि कृते प्रागुक्तरीत्या मस्य मात्रिके गुणेऽकारे हि पररूपत्वे च तत्सिद्धेः, औकारस्तु नेति उक्तमेवेति नारायणेनोक्तं, तथापि उक्तार्थज्ञापनं विना न तस्या ज्ञापकत्वमिति प्रत्ययेन मस्यौकाराभावज्ञापनापेक्षया व्यञ्जनस्य गुणाभावज्ञापने लाघवं, सामान्ये प्रमाणानां पक्षपात इत्यस्यानुग्रहश्चेत्याशयेनाह। **डोप्रत्ययेति।** एवोऽप्यर्थे। अत एवाह। **अन्यथा विचैवेति।** हि यतः। **स्थानेन्तरेति** सूत्रादिति यावत्। **सानुनासिक इति।** तथा च **गोपयसो(पा०सू० ४-३-१६०)**रित्यादिनिर्देशाविरोधायेति भावः। **विधानादिति।** न च **गोस्त्रियो(पा०सू० १-२-४८) गोपयसो**रित्यादिनिर्देशान्निरनुनासिक एव, अन्यथा तद्विरोधापत्तिः स्पष्टैवेति तदुक्तं युक्तमिति वाच्यम्। सौत्रत्वेन तस्योपपत्तेः। एवमपि चित्रगुचित्रग्वोरित्यादावडापत्तेश्च। क्वापीदानीमनुनासिकपाठाभावेन तथा दुर्वचत्वाच्च। उणादीनामव्युत्पन्नत्वस्य सिद्धान्ततया तथौचित्याच्चेति तत्वमिति भाष्यं युक्तमेव। तदाह। **दिगिति ॥**

अत्र वदन्ति– ''तनोतेर्डउः सन्वच्च'' इति डित्करणान्न व्यञ्जनस्य गुणो भविष्यति। यत्तु शास्त्रातिदेशोऽयं कार्यातिदेशो वा ? आद्ये 'ऊर्पुनविषति' इत्यत्रेव ''द्विर्वचनेऽचि'' (पा०सू० १-१-५९) इति स्थानिवद्भावेन 'तँतँ अउ' इति स्थिते ''सन्यतः'' (पा०सू० ७-४-७९) इतीकारः सानुनासिकः स्यात्। द्वितीये त्वभ्यासकार्यं दुर्लभमिति। तन्न आद्ये गुणानां भेदकत्वाद् 'इमौ' 'इमे' इति वदुपपत्तेः।

३.३० व्यञ्जनांशे सूक्तिरत्नाकराशयखण्डनम्

अत्र भाष्ये। **वदन्ति** नारायणादयः। इतिस्तद्ग्रन्थसमाप्तौ। एवञ्च भाष्यकारस्यापि तत्फलमयुक्तम्। न च डित्वाभावेऽकारोच्चारणसामर्थ्यात्पररूपं बाधित्वा सवर्णदीर्घापत्तिः। अन्यथा डमात्रमेव वाच्यम्। व्यञ्जनस्य गुणेन रूपसिद्धेरिति वाच्यम्। अनुनासिके गुणे तस्य पुनः पररूपेण शुद्धाकारस्थितस्य साफल्येन दीर्घार्थत्वस्य दुर्वचत्वेन परत्वाद्बाधकपररूपस्यैव प्रवृत्तेः। असत्यकारे प्रत्ययेन सहाद्गुणापत्तेश्च। अत एव व्यस्तोक्तिः सफला। न च सति गुणे **सन्वदि**ति शास्त्राति-देशेऽसनेति दीर्घापत्तिः, कार्यातिदेशे तस्याप्यतिदेशापत्तिरिति वाच्यम्। झलीत्यनुवृत्त्या तदप्राप्तेः। न च तदप्यतिदिश्यते। सामान्यातिदेशे विशेषानतिदेशात्। तस्य झलादिसन्निमित्तकत्वात्। कथमन्यथा सत्यपि डित्वे तनियतीति वलादिलक्षणेटोऽभावः। न च सन्वदिति सप्तम्यन्ताद्वतिरिति नेट्। **सन्यङो**रित्यस्य षष्ट्यन्तत्वेन द्वित्वस्याप्यप्रसङ्गात्। न च षष्ट्यन्ताद्वतावित्वासंग्रहः। षष्ट्याः सम्बन्धमात्रार्थकत्वेन सनः सनि च कार्यमात्रस्य संग्रहात्। एवञ्च डित्वज्ञापकं सम्यक् इति तदाकूतम्। तद्धृदि निधाय प्राचोक्तं तत्र दोषमुद्धर्तुमाह। **यत्त्विति।** अयं सन्वच्चेति आर्धधातुकत्वाद्यर्थमिति भावः। **तत अ उ इतीति।** त अ उ इत्यत्राद्वित्वात्परत्वाद्गुणे द्विःपररूपे च त उ इति जातेऽव्ययवर्गेण सनन्तत्वाद्द्वित्वाप्राप्तौ **द्विर्वचनेऽची**ति रूपातिदेशेन दृष्टान्तेऽवादेशे ओकारमानीय द्वित्वे अभ्यासह्रस्वे च रूपसाधनम्। तथा सचक्रतुरित्यादाविवाकारस्य द्वित्वनिमित्तत्वेन द्वितीयपररूपस्योनातिदेशेन भेदे त अ उ इति स्थिते सन्नन्तत्वद्वित्वे तत अ उ इति स्थितिरिति भावः। द्वितीये तु तेनैव सर्वमिति न रूपातिदेशादिप्रवृत्तिरिति प्रागुक्तदोषाभावादाह। **अभ्यासेति।** तेनैव द्वित्वे सन्यङोरित्यस्याप्राप्त्याऽभ्याससंज्ञाया अभावात्। एकाचो द्वे इति प्रकरणोक्तद्वित्व एव तेन तद्विधानात्। तथा चेष्टरूपसिद्धिः पक्षद्वयेऽपीति भावः। **उपपत्तेरिति।** यत्तु त्यदादीनामित्यत्रातपरत्वात्तपरसूत्राप्रवृत्तेर्भाव्यमानत्वेनाणुदिदित्यस्याभेदकत्वस्य जातिपक्षस्य चाप्रवृत्तेः शुद्धोच्चारणाच्च तत्र निरनुनासिकता युक्ता, प्रकृते तु इदिति तपरत्वात्

द्वितीयेऽपि 'बभ्रुः' 'जुहूः' इत्याद्यर्थं धात्वधिकारीयद्वित्वेऽभ्याससंज्ञास्वीकारात्। अत एव ''लिटिधातोः'' (पा०सू० ६-१-८) इति सूत्रे ''धातुग्रहणं तिष्ठतु तावत्सांन्यासिकम्'' इति भाष्यम्। ''आदेच'' (पा०सू० ६-१-४५) इति सूत्रे धातुग्रहणानुवृत्ते-

---

तत्प्रवृत्तेरान्तरतम्यादनुनासिक एव युक्त इति दृष्टान्त [१].... एतेन न हि कार्येति तु न निषेधः। निषेधात्प्राक् कार्याननुभावात्, तन्निमित्तत्वनिषेधे कार्यानुभवनिश्चयस्तत्र सति स इत्यन्योन्याश्रयापत्तेश्चेति रत्नाकरोक्तमपास्तम्। अकारस्य तत्वाश्रयणात्। अर्धमात्रालाघवाय डित्वाकरणजलाघवाय च भृञामित्येव सूत्रं कार्यमित्याश्रयात्। इ इति च नपुंसकनिर्देशः। तेन विभक्तिश्रवणं नापाद्यम्। यदपि सः गमेर्ग इति पूर्वग्रन्थविरुद्धमिदमिति। तदपि न। तत्र गुणशब्देन विधानेन वैलक्षण्यात्। यदपि गुणानामभेदकत्वेऽपि न दोषः। सन्यत(पा०सू० ७-४-७९) इत्यनेन सनि इ अत इति प्रश्लेषेणेतो विशेषणेन शुद्धस्यैव विधानादिति। तदपि न। विधेयाणभिन्नस्थले एवाभेदकत्वाङ्गीकारात् इति दिक्॥

द्वितीयेऽपीति। उपपत्तेरित्यस्यानुषङ्गः। अत एवापिः। कथमित्यत आह। **बभ्रुरिति। कुर्भ्रश्चेति** (उ० २२) सूत्रे चकरा**द्यो द्वे चे**त्यतो द्वे इत्यनुवर्त्तते। भृधातोः कुर्द्वित्वं च, उरत्यत्वहलादिःशेषादि च। उणादीनामव्युत्पन्नत्वान्नेदं फलमत तत्राह। **जुहूरिति।** अन्येभ्योऽपीति सूत्रप्रपञ्चभूतेन 'द्युतिगमिजुहोतीनां द्वे चेति' वार्तिकेनास्य सिद्धिः। तत्र हि धातू चात् क्विप्दीर्घौ अनुवर्तेते। आदिना दिद्युदित्यादिपरिग्रहः। हुवः श्लुवच्चेति सूत्रेण क्विप् दीर्घः श्लुवद्भावश्च विधीयते। जुहोतेरिति व्याख्यानं तूक्तदोषाक्रान्तम्। यद्यपि उः ओर्डित्वस्य ज्ञापकत्ववादिनेदं ज्ञायते, तथापि नायं तस्य ग्रन्थो अपि तु तदाशयः। प्रदर्शकस्यात्परस्येति[२] सिद्धान्तरीत्येदं योजनमुचितम्। सोऽपि तादृशश्चेदस्तु, तथा उभयथाप्यनयोरषष्ट्यन्तत्वा-दभ्याससंज्ञा न स्यात्। तस्मादीदृशार्थोऽभ्युपगन्तव्य इति भावः। उक्तार्थे प्रमाणमाह। **अत एवेति।** उक्तार्थस्वीकारादेवेत्यर्थः। **धात्विति।** तदेतदित्यादिः। ननु ससृवांसो विश्रृण्विर इत्यत्र श्रुण्विति विकरणविशिष्टस्य लिट्परस्याङ्गस्य सम्बन्धिनः प्रथमैकाचः प्राप्तद्वित्ववारणाय धातुग्रहणमावश्यकमिति चेन्न छन्दसि वा वचनेनैव किञ्चित्सिद्धत्वादत आह। **सान्यासिकमितीति।** सम्यक् न्यासो योगः येन सः सन्यासः सूत्रार्थबोधस्तत्प्रयोजनं यस्य तत्सान्यासिकम्। एवञ्च धात्वधिकारीयद्वित्व इत्यर्थलाभार्थं धातुग्रहणमिति भावः। **भाष्यमिति।** सङ्गच्छत इति शेषः। नन्वेवमप्यत्र तदनुवृत्तेः

---

१. अत्र ग्रन्थः त्रुटितः।

२. प्रदर्शकस्यान्यस्येति ख।

रापाततो भाष्ये प्रदर्शितत्वेऽपि ष्यङ्विधिभाष्येऽननुवृत्तेरेव सिद्धान्तिततया भाष्याशयस्येत्थमेव वर्णनीयत्वादिति दिक् ।

किञ्च, यथा स्थानेऽन्तरतमपरिभाषासंस्कृतावनुनासिकपरसवर्णविधी स्थानप्रयत्नाभ्यामन्तरतम 'एतन्मुरारिः' 'त्वं करोषि' इत्यादिकं विषयं लब्ध्वा चरितार्थौ 'चतुर्मुखः' 'कुण्डं रथेन' इत्यादौ न प्रवर्त्तेते इति ह्यवरट्सूत्रे सिद्धान्तितम्, तथेहापि सार्वधातुके जुसि गुपः सिचि वृद्ध्यादयः 'नेता' 'अबिभयुः' 'अनैषीत्' इत्यादौ चरितार्थाः 'उम्भिता' 'अनेनिजुः' 'अभैत्सीत्' इत्यादिषु न भविष्यन्ति । न चैवं 'नेता'

फलमस्तीति कथमुक्तार्थसिद्धिरत आह । **आदेच इति । आपातत इति ।** गोभ्यामित्यादिवारणरूपतत्फलस्योपदेशग्रहणेनैव सिद्धत्वादिति भावः । अत एवाह । **ष्यङिति ।** ष्यङः सम्प्रसारणविधीत्यर्थः । **ष्यङः सम्प्रसारण**मिति सूत्रभाष्य इति यावत् । **भाष्येति ।** उक्तेत्यादिः । वस्तुतस्तु अत्र वदन्तीत्यादि चिन्त्यम् । उणादीनामव्युत्पत्तिपक्षाङ्गीकारात् । अत एव धात्वधिकारीयद्वित्व इत्यर्थस्यापि न प्रयोजनं, जुहूरित्यत्राद्यव्याख्यानेऽपि तत्र दाशीर्ग्रहणादेव सैवेति द्वितीयेऽपि तथैवेति तदापि तत्र तस्य नफलत्वम् । सान्यासिकमित्यस्य व्युत्पत्तिः सैव । अर्थस्तु लिटीत्यादेर्धातुविशेषणत्वं यथा स्यात्प्रथमैकाज्विशेषणत्वं मा भूदिति । तथा हि सति पपाचेत्यादावेव स्यान्न तु 'जजागार' इत्यादाविति बोध्यम् । तदाह । **इति दिगिति ।।**

३.३१ सूक्तिरत्नाकराक्षिप्तसूत्रवैयर्थ्यशङ्कानुवादः

नारायणीयं तत्त्वमाह । **किञ्चेति । तथेहापि** इको गुणेति विषयेऽपि । तुकार्धेति पाठः । तदुभयविधेयमाह । **गुपेति । चारीति ।** स्थानगुणप्रमाणान्तर्यसत्वादिति भावः । **न भवीति ।** क्वचित् किञ्चित्साम्येऽपि सर्वान्तर्याभावात् तमग्रहणबोधितबहुत्वस्य विवक्षितत्वादनुनासिकवदिति भावः । यत्तु दृष्टान्तेति निर्दिष्टस्थानिकत्वेनालोन्त्येत्प्रवृत्त्या तोर्लीत्यादौ विशेष्यत्वार्थं अलोन्त्यपरिभाषया परत्वात् स्थानेन्तरतमपरिभाषाया बाध इति तत्रातिप्रसङ्गो दुर्वार इति **रत्नाकरः**[१] **।** तन्न । कार्यकालपक्षे परत्वस्यैवासत्वात् । सत्वेऽपि नेतेत्यादौ समावेशसम्भवेन विरोधाभावाच्चेत्याहुः । एवं अनेकविधान्तर्यग्रहणेऽगुणेति विकारादिबाह्यप्रयत्नेत्यर्थः । अचां हि घोषसंवारनादाल्पप्राणमन्यत्र स्पष्टम् । तमग्रहणेनानेकविधान्तर्यसम्भवे तद्ग्रहणस्य युक्तत्वबोधनादिति भावः ।

---

१. रत्नाकरः सिद्धान्तकौमुदी व्याख्या रामकृष्णभट्टविरचितः ।

'अनैषीत्' इत्यादावेव स्थानगुणप्रमाणैस्त्रिभिरान्तर्यलाभात् 'चेता' 'अचैषीत्' इत्यादौ प्रमाणान्तर्यविरहेण गुणवृद्धी न स्यातामिति वाच्यम्। ''सृघस्यदः क्मरच्'' (पा०सू० ३-२-१६०) इति क्मरचः क्नोश्च कित्करणेन प्रमाणत आन्तर्यस्याविवक्षाया ज्ञापनात्। न चैवमपि 'ईहिता' 'ईशिता' इत्यत्र कण्ठ्यतालव्ययोर्विवृतयोश्च हकारशकारयोस्ता-दृशावेवादेतौ स्यातामिति वाच्यम्, ''नाज्झलौ'' (पा०सू० १-१-१०) इति सूत्रस्य प्रत्याख्यानावसरे ऊष्मणामीषद्विवृतताया: सिद्धान्तयिष्यमाणत्वात्। न चैवं 'विवृतकरणाः स्वरास्तेभ्य एओ विवृततरा'वित्यादि शिक्षाऽनुरोधात् 'चेता' 'नेता' इत्यादावपि गुणाप्रवृत्तिः स्याद्विवृतविवृततरत्वकृतवैलक्षण्यसत्त्वादिति वाच्यम्, तथा सति विधेर्निर्विषयतापत्तेः, ''जयः करणम्'' (पा०सू० ६-१-२०२) इत्यादिनिर्देशैः

लाभादिति। स्यातामितीति शेषः। प्रमाणान्तर्येति **सुप्सुपे**ति तृतीयासमासः। प्रमाणत इति पाठस्तु युक्त एव। **सृघस्यद इति।** प्रमाणत आन्तर्याभावेन ऋकारे गुणाप्राप्तेरन्यत्र फलाभावाच्च तद्वैयर्थ्यम्। अकारस्य गुणसंज्ञा **त्वतो गुण** इत्यादौ चारितार्थ्येति भावः। ननु गुणशब्दस्य वस्तुतो बाह्यप्रयत्ने वृत्तावपि स्थानार्थगुणेत्यत्र गुणशब्देन न स एव, किन्तूक्तत्रितयातिरिक्तं धर्ममात्र-मित्यन्यत्र स्पष्टम्। एवञ्च बाह्यप्रयत्नसाम्यवदाभ्यन्तरप्रयत्नसाम्यमपि प्रयोजकम्। अत एव रामेष्वित्यादौ तकारो न। एवञ्च बाह्यप्रयत्नसाम्याभावेऽपि स्थानाभ्यन्तरसाम्यादपि स्यादित्याशयेनाशङ्कते। **न चैवमित्यादि। एवमपि** प्रमाणत आन्तर्यस्याविवक्षणेऽपि। एव स्यातामित्यग्रे योज्यः। स्यातामेवेत्यर्थः। सूत्रमते स्थानप्रयत्नैक्यात् उभयान्तरतमस्य करणादिति भावः। **सिद्धान्तयिष्यमाणत्वादिति।** तथा चाभ्यन्तरयत्नभेद इति भावः। **चैवं** तथा आभ्यन्तर-प्रयत्नभेदस्वीकारे। आदिना **स्वराणा**मिति पाणिनिशिक्षापरिग्रहः। गुणेत्युपलक्षणं वृद्धेरपि। एवमग्रेऽपि। **विवृतेति।** बाह्यप्रयत्नसाम्येऽपीत्यादिः। सति सम्भवे यावत्प्रयत्नसाम्यस्या-पेक्षितत्वादिति भावः। **विवृततरत्वेति।** द्वन्द्वे वर्त्तिपदार्थवत् तन्निष्ठधर्मस्यापि प्रकारत्वात् तत्समूहे भावप्रत्ययः। **विधेरिति।** स्थानत आन्तर्याभावेनोकारस्याप्यप्राप्तेः स्मादाभ्यन्तरप्रयत्नभेदेऽपि बाह्यप्रयत्नसाम्या गुणादिप्रवृत्तिरिति भावः। एतेन ऋकाराद्यंशे चारितार्थ्यमित्यपास्तम्। नन्वेवं विनिगमनाविरहाद्व्यञ्जनेन गुणप्रवृत्त्या विधिसाफल्यमास्ताम्। किञ्चेशितेत्यत्र द्विविधप्रत्यत्नसाम्या-भावेऽपि नेता चेतेत्यादिवदीहितेत्यत्र किञ्चित्बाह्यप्रयत्नसाम्येन तदापत्तिरेवात आह। **जय इति।** आदिना 'स्यदो जवे' (६-४-२८) इत्यादि। **क्नेति। रुदविदे**त्यादिनेति भावः। वस्तुतस्तु किञ्चेत्यादि चिन्त्यम्। 'स्थानेन्तरतमे' इति सप्तम्यन्तपाठस्य भाष्ये प्रत्याख्यातत्वेनैवं दुर्वचात्।

क्नसुन्क्मरच्प्रभृतीनां कित्त्वेन चेकारादिषु गुणप्रवृत्त्यनुमानाच्च । आत्सन्ध्यक्षरव्यञ्जनेषु तु गुणाद्यप्रवृत्तिरेवोचिता । तथा च निर्देशाः ''यातिवातिद्रातिप्सातिं'' (पा०सू० ८-४-१७) ''ध्यायतेः सम्प्रसारपं च'' (का०वा०) ''वहतिचिनोतिदेग्धिषु च'' (पा०सू० ८-४-१७) इत्यादि । अथ क्नोः कित्त्वेनापि गुणवृद्धिविधावन्तरतमपरिभाषाऽनुपस्थितिरेव ज्ञाप्यतामिति चेत् ? न, सत्यामपीकूपरिभाषायामीकारस्याकारादिनिवृत्तयेऽन्तरतमपरिभाषाया आवश्यकत्वादिति । तदेवं डओर्डित्त्वादनान्तर्यान्निर्देशाच्च

किञ्च संग्राहकवाक्ये प्रागुक्तरीत्या समावेशेनाविरोधेऽपि उपप्लुतलक्ष्यसंस्कारके उम्भितेत्यादिविषयके विरोधेन परत्वात्तया तस्या बाधात् । किञ्च पूर्वं कस्येत्याकाङ्क्षायामलोन्त्यस्येत्यस्योपस्थितिरनन्तरं स्थानिनिर्णयेन तदुपस्थितिः कोपेत्याकाङ्क्षायामिति तदनुरोधेन यथाकथञ्चिदान्तर्यग्रहसम्भवात् । अत एवाहुरिति प्रागुक्तम् । लक्ष्यानुरोधेन सति सम्भवे यावत्प्रयत्नसाम्यग्रहणेऽपि असम्भवे क्वचिद्बाह्यसाम्याभावेऽपि आभ्यन्तरसाम्येन कार्यवदाभ्यन्तरसाम्याभावेऽपि बाह्यसाम्येन प्रवृत्तिरित्यर्थस्यैव निर्देशादिना ज्ञाप्यत्वेनेहितेत्यत्र दोषतादवस्थ्यात् । निर्देशादिनाऽपूर्वगुणादिकल्पने विधिवैयर्थ्यापत्तेस्तदवस्थाच्च । तैः सर्वथा तत्परिभाषाबाधकल्पने व्यञ्जने गुणादि (वारणाभावा) दिष्टासिद्धेश्चेति बोध्यम् । अत एव नारायणोक्तं आत्सन्ध्यक्षरसाधारणं व्यञ्जनतद्द्वारकं युक्त्यन्तरमाह । **आत्सन्ध्येति ।** तुश्चार्थे । स च किञ्चेत्यर्थे । तथा च निर्देशैरपि गुणाद्यभावो ज्ञाप्य इति भिन्नसूत्रं मास्त्विति भावः । तत्समर्थयत्त्युक्तयुक्त्या[1] । पूर्वमते सिंहावलोकनन्यायेनाशङ्कते । **अथेति ।** अपिना जय इत्यादिनिर्देशानां सनादिकित्त्वानां च परिग्रहः । एवेनोक्तज्ञाप्यव्यवच्छेदः । एवञ्च व्यञ्जनादिति प्रसङ्गवारणाय पृथक्सूत्रमावश्यकमिति भावः । एवमप्यनिष्टमेवेत्याह । **सत्यामपीति ।** इतिः सूत्रनिराकरणसमाप्तौ । वस्तुतस्तु इदमपि चिन्त्यम् । निर्देशैर्वाक्यशेषानुमाने गौरवात्तज्ज्ञानादिलाघवार्थं कृतभिन्नसूत्रप्रत्याख्यानानर्हत्वात् । अन्यथा 'दित्यदित्यादित्य' 'जयः करणं' 'भवतेरः' ण्यः नाव इत्यादिनिर्देशै 'रिको यण्' 'एचोऽयवे'त्यादिप्रत्याख्यानापत्त्या समस्तशास्त्रस्याकुलीभवापत्तेश्च । यत्तु प्रकृतसूत्रोक्तज्ञापकैर्लत्वाभावार्थं प्रत्यय इत्यादिनिर्देशैश्च तुल्ययोगक्षेमत्वादिदं चिन्त्यमिति नारायणः । तन्न । अत्र सूत्रे ज्ञापकाद्युक्तावपि निर्देशानुक्तेः । ज्ञापकाद्यनाश्रयणे बहुषु इष्टार्थालाभेन [2]पाणिनेरतज्ञापितेश्च प्रत्य इतीणोरुपाद्येति ? बोध्यम् । अत एव तदनुरोधेनैव परमपूर्वपक्षमुपसंहरति । **तदेवमिति ।** श्लोकचूर्णिकेयम् । तस्मादुक्त-

---

१. तत्समर्थयत्तुल्ययुक्त्या इति ख ।

२. अत्र मातृकासु किमपि पदं वाक्यं वा लुप्तमिति भाति । अतः प्रकृतेऽन्वयः न लगति ।

निराकृतं व्यञ्जनं भाष्य एवैच आकारश्च निराकृतः। तस्माद्व्यर्थं सूत्रमिदम्। अथ यद्युत्तरार्थता, विभज्य योगं किमिति परिभाषात्वमिष्यते ?

अत्रोच्यते, ''क्ङिति च'' (पा०सू० १-१-५) इति सूत्रे चकारस्य इतिशब्दपर्यायतामाश्रित्येक इति ये गुपवृद्धी तयोर्निषेध इति तावद्वक्ष्यते। अन्यथा 'लैगवायनः' इत्यत्र ओर्गुणोऽपि निषिध्येत। औपगवादिस्तु तस्यावकाशः। तथा 'पौरोहित्यम्' इत्यत्रादिवृद्धिश्च न स्यात्। एवं स्थिते यदीयं परिभाषा प्रत्याख्यायते तदा कथञ्चित्तत्र तत्र गुपवृद्धिविधाविकामेव स्थानित्वपर्यवसानेऽपीक इति पदानुच्चारपे-नेग्लक्षपत्वविरहान्निषेधो न प्रवर्त्तेत। ततश्च 'कृतः' 'कृतवान्' 'कुरुतः' 'छिन्नं'

प्रकारेणेत्यर्थः। **निराकृतं** नारायणादिनेति भावः। व्यञ्जनमिति पूर्वान्वयि। निराकृत इति पाठः ।।

३.३२ सूक्तिरत्नाकराक्षिप्तसूत्रवैयर्थ्यशङ्कानिरासः

अथेति तत्परिहारे। **विभेति।** तर्हीत्यादिः। अत एव यक्षानुरूपो बलिरिति न्यायेन तथैव कृष्णाद्युक्तासाङ्गत्यं ध्वनयन् समाधत्ते। **अत्रोच्यत इत्यादिना।** अत एवास्यार्थस्य **न** धातुसूत्रप्रयोजनसत्वेऽपि तत्र गमकाभावात्तस्य प्रत्याख्यानाच्च न तत्र फलमित्यभिप्रेत्याह। **क्ङितीति।** इको गुणेत्यनुवृत्येति शेषः। वस्तुतस्तु अर्थाधिकारबलेन स्वरूपपरस्यैवानुवृत्तिः। अत एव न धात्विति सूत्रेऽपि तथेति चकारो वृथेति चिन्त्यमिदम्। अत एव वक्ष्यति अस्तु वाऽर्थाधिकराश्रयणेनेति न धात्विति सूत्र इति बोध्यम्। अन्यथा कामयत इत्यादौ णिङो ङित्वेन वृद्धि [१]..... द्यापत्तेः। णिङो णित्वं तु **णेरनिटी**त्यादौ विशेषणार्थम्। एवञ्च चस्येत्यर्थकतया शब्दव्यापाराश्रयणमर्थाधिकाराश्रयणं वा फलमत आह। **अन्यथेति।** उक्तार्थानङ्गीकार इत्यर्थः। लिगुशब्दान्नडादित्वात्फक्। अपिना तत्रैव वृत्तिसमुच्चयः। **तस्य** 'ओर्गुण' इत्यस्य। दोषान्तर-माह। **तथेति।** तथा चेत्यपपाठः। तद्वदित्यर्थः। पुरोहितशब्दात् 'पत्यन्त' (७-१-१२८) इति यक्। 'किति च' इति तु नाडायनादौ चरितार्थः। **एवं स्थिते** तस्य तथार्थावश्यकत्वे। **प्रत्याख्ययते** एकमेव सूत्रं क्रियते। कथञ्चित् क्लेशेन। स च स्फुटीभविष्यत्यनुपदमेव। सर्वत्र शब्दतोऽलाभादाह। **पर्यवेति। पदानुच्चारणेति।** परिभाषात्वाभावेन तत्रैतदनुपस्थित्येति भावः।

---

१. अत्र ग्रन्थः त्रुटितः।

'छिन्नवान्' इत्यादि न सिध्येत्। निषेधसूत्रं च निर्विषयं स्यात्, परिभाषापरित्यागपक्षे इग्लक्षपयोर्गुपवृद्ध्योरप्रसिद्धत्वात्। तदेतत्स्फुटीकृतं भाष्यकृता - ''उत्तरार्थमेव तर्हि सिजर्थं वृद्धिग्रहणम्'' इति। तस्य ह्ययमाशयः – यद्यपि ''सिचि वृद्धिः'' (पा०सू० ७-२-१) इति विधौ वक्ष्यमाणरीत्या परिशेषादिकामेव स्थानित्वं लभ्यते। तथापीग्लक्षपत्वं विना निषेधो न प्रवर्त्तेत। तस्मादुत्तरार्थं निषेधप्रवृत्यर्थं च वृद्धिग्रहणमिति। एवञ्च वदता

गुणवृद्ध्योरिति शेषः। कुत्रेत्याकाङ्क्षायामाह। **ततश्चेति।** दोषान्तरमाह। **निषेधेति।** निरिति बहुव्रीहिः। चो व्युत्क्रमे। तस्मान्निषेधप्रवृत्त्यर्थं परिभाषेति सिद्धम्। अत्र तथैव भाष्यसम्मतिमाह। **तदेतदिति।** एवेनेहार्थत्वव्यवच्छेदः। **तर्हि** इहार्थाभावे। स्थानिनिर्देशार्थत्वाभाव इति यावत्। उभयथापि मृज्यर्थत्वस्य[1] खण्डितत्वादाह। **सिजर्थमिति।** उत्तरत्रानुवृत्त्यर्थमित्यर्थभ्रमवारणायाह। **तस्य ह्येति। विधौ** विधायके। **लभ्यत इति।** तथा चेकः स्थानित्वलाभार्थं वृद्धिग्रहणम्। न्यायसाम्याद्गुणाग्रहणं च मास्त्विति नेयं परिभाषा कार्येति भावः। **इग्लक्षपत्वमिति।** इदं च परिभाषायां विना दुर्लभमिति भावः। **न प्रवर्तेतेति।** सर्वथैव तत्सूत्राभावे पूर्वसूत्राभ्यामनुवृत्यर्थपरत्वं सम्पाद्य क्ङिति निमित्ते गुणवृद्धी न स्यात् इत्येवं तद्व्याख्याने कामयत इत्याद्यसिद्धिः। परिभाषामात्रत्वानङ्गीकारेण तन्निमित्तइको ते न स्त इति व्याख्याने तु लैगवाद्यसिद्धिरित्यवश्यमाश्रयणीयं तद्व्याख्यानम्। तथा च तत्र निषेधाप्रवृत्त्या स निर्विषय एव स्यादिति भावः। उत्तरार्थमित्यस्या व्याख्या। **निषेधेति।** इतिराशयसमाप्तौ। ननु वृद्ध्यंशे भगवता तथोक्तं, न तु गणांश इति कथं ततस्तदर्थलाभोऽत आह। **एवं वदतेति।** एवञ्चेति पाठे चस्त्वर्थे। वस्तुतस्तु इदमपि चिन्त्यम्। व्यञ्जनस्य गुणव्यावृत्त्यर्थं स्थानिनिर्देशार्थमस्य आवश्यकत्वेन तत्पर्यन्तधावनासङ्गतेः। एवं सति फलस्यान्यथासिद्धत्वेन तस्य मुख्यत्वाभावात्। उत्तरार्थमेवेत्यादिभाष्यमभ्युपेत्यवादेन प्रवृत्तेरिष्टासाधकत्वाच्च। गुणांशे व्यञ्जननिवृत्त्यर्थत्वस्य कण्ठत उक्तत्वेन एवं वदतेत्यादिना सूचितार्थाङ्गीकारस्यायोग्यत्वाच्च। एतेन क्लृकृक्लृकनादीनां कित्वाज्ज्ञापकादनिग्लक्षणयोरिति तयोर्निषेधः। तच्च साजात्याद्धातुप्रत्ययनिमित्तकयोरेव तयोर्निवर्त्तकमिति लैगवायनः पौरोहित्यमित्यादौ न तन्निमित्तयोस्तयोर्निवृत्तिः। 'घेर्ङिति' गुणस्तु वचनसामर्थ्यादपि न निषेध्य इति गुणवृद्धिविधौ नास्त्युपयोगोऽस्या इति **कौस्तुभो**क्तमपि फलं चिन्त्यमिति भाष्यमयुक्तमेवेति **नारायणो**क्तमपास्तमिति दिक्।

---

१. मृज्यर्थस्य इति ख।

न्यायसाम्याद् गुणग्रहणस्याप्येतदेव प्रयोजनं सूचितम्। कथं पुनर्गुणवृद्धिविधौ सर्वत्र परिभाषाव्यतिरेकेपेकः स्थानित्वपर्यवसानं येन निषेधार्थता वर्ण्यते इति चेत् ? शृणु, ''सार्वधातुकार्द्धधातुकयोः'' (पा०सू० ७-३-८४) ''जुसि च'' (पा०सू० ७-३-८३) इति गुणौ तावदलोन्त्यपरिभाषयाङ्गान्त्येऽलि प्राप्तौ प्रागुक्तज्ञापकादिभिरात्सन्ध्यक्षरव्यञ्जनेभ्यो व्यावर्त्तिताविक्ष्वेव विश्राम्यतः। मिदि पुगन्तलघूपधादिगुणेषु तु स्थानी निर्दिष्ट एव। तथा हि, ''मिदेर्गुणः'' (पा०सू० ७-३-८२) इत्यत्र मिद इर्मिदिस्तस्य मिदेरित्यर्थः, पुक्यन्तः पुगन्तः लघ्वी उपधा लदूपधा पुगन्तश्च लगूपधा चेति समाहारद्वन्द्वात् षष्ठी। न चैवं 'यापयति' इत्यादावतिप्रसङ्गः, सन्निपातलक्षणपरिभायाऽऽदन्तलक्षणस्य पुको गुणाप्रवर्त्तकत्वात्। ''ऋच्छत्यृताम्'' (पा०सू० ७-४-११) इत्यत्रापि द्वयोर्ऋतोर्दीर्घस्य चेति त्रयाणां प्रश्लिष्टनिर्देशः। तद्यथा – आ च ऋच्च ऋतः ऋच्छतेरा

तदेतद्धृदि निधाय तदाश्रयेन तच्छेषपक्षे भाष्योक्तसकलदोषान् प्रसङ्गतो वक्तुं स्वयं शङ्कते। **कथमिति। सर्वत्र** बहुषु। **निषेधार्थता** तदर्थकतापि। तन्मात्रार्थकतेत्त्यर्थस्तु न। उक्तदोषगणापत्तेः। तत्र तद्वार्तिकखण्डैकैकदेशिमतेनाह। **सार्वधातुकेति।** आदिना सामर्थ्यनिर्देशादिसंग्रहः। वार्तिकसमर्थकभाष्यमते तु नेदमत आह। **मिदीति। पुकि अन्त इति।** सुप्सुपेति समासः। आदिना याजयतीत्यादिपरिग्रहः। **सन्निपातेति।** ननु पुग्निमित्तककार्ये कर्तव्येऽस्या अप्रवृत्तेः भाष्यसिद्धत्वात् कथमेतत्। अत एवादीदयदित्यादिसिद्धिः। किञ्च क्ष्मापयतीत्यादि च तया न निर्वाहः। पुकीति विवक्षितसप्तमीत्यत्र तु न मानम्। क्ष्मापयंतीत्यादौ लोपं बाधित्वा यकारस्य तु न। 'चेले क्नोपे' (३-४-३३) रिति निर्देशादिति चेन्न गुणे कृते**ऽत उपधाया** इति वृद्ध्या रूपसिद्धेः। अङ्गवृत्ते इति तु **द्वयोरि**त्यादिनिर्देशादनित्या। अत एव समयाच्च यापनाया(पा०सू० ५-४-६०)मित्यादिनिर्देशः सङ्गतः। एवञ्च मूलमुपलक्षणं बोध्यम्। [१](एतेन क्ष्मापयतीत्यत्राकारस्य तु न गुणः, पुकि विवक्षितेऽन्त्यस्य गुण इत्यर्थात्। पकारस्य तु न, अन्तरङ्गत्वाल्लोपप्रवृत्तेः) स्थानप्रयत्नाभ्यामन्तरतमे चारितार्थ्याच्चेत्यपास्तम्। वर्णादाङ्गेत्यस्याः प्राप्त्याऽन्तरङ्गत्वस्य दुर्वचत्वाच्च। विवक्षितसप्तमीत्वे अन्तरङ्गत्वादित्युक्तेर्विरुद्धत्वाच्च, तत्पाठस्य खण्डितत्वाच्चेति दिक्। **ऋतोर्ह्र**स्वऋकारयोः। **प्रश्लिष्टेति।** प्रश्लेषेण निर्देश इत्यर्थः। लाघवादाह। **ऋच्छत्या चेति।** आचेति बहुवचननिर्देशादेत्प्रश्लेषोऽस्त्येव। अन्यथा ऋ अतुरिति स्थिते द्वित्वात्परत्वाद्यणि **द्विर्वचनेऽचीति** रूपातिदेशेन तन्निषेधेनैकचो प्रथमैकाच्त्वप्रयुक्तद्वित्वे

---

१. ( ) 'एतेन' इत्यारभ्य 'अन्तरङ्गत्वाल्लोपप्रवृत्तेः' इति पर्यन्तं पङ्क्ति कपाठे गलिता।

ऋच्छत्या, स च ऋतश्च तेषामिति षष्ठीतत्पुरुषद्वन्द्वोभयगर्भो द्वन्द्वः : ऋच्छत्या च आ च ऋतश्चेति त्रिपदद्वन्द्वो वा । तेन ऋच्छत्यृकारस्य स्थानित्वं लभ्यते । वस्तुतस्तु चतुर्णामिह प्रश्लेषा बोध्याः, तेन 'आरिवान् सर्वभूणान्यारूषि' इत्यादावर्त्तेः कसौ गुपः सिद्धः पुनर्विधानसामर्थ्यात् । अन्यथा कसोः कित्करपसामर्थ्यात् 'तितीर्वान्' इत्यत्रेव गुपो

सवर्णदीर्घं बाधित्वा परत्वादुरदत्वेऽभ्यासविकारेषु बाध्यबाधकभावाभावेन युगपत् 'हलादिः शेषः' 'अत आदे'(पा०सू० ७-४-७०)रिति लोपदीर्घयोः प्राप्तयोरपि न्याय्यक्रमेण हलादिः शेषाद्युत्तरत्वा**दत आदे**रिति दीर्घे ततो हलादिः शेषे उत्तरखण्डे प्राप्त**मिको यणि**ति यणं बाधित्वा परत्वादाद्गुणे अरतुरिति स्यात् । न च पूर्वपरानिमित्तकत्वेन यणोऽन्तरङ्गत्वम् । अबर्हिभूतानिमित्त-कत्वेन गुणस्याप्यन्तरङ्गत्वात् । आततुरानृजे आनर्देत्यादावपीयमेव प्रक्रिया बोध्या । **नामधातुप्रकरणे** औ अतुरित्यत्र [१]**कौमुद्या**द्युक्तप्रक्रिया तु **माधवाद्य**नुरोधेन ज्ञेया । **अत आदे**रित्यस्यात्र मते गुणापवादकत्वस्य कथमपि दुर्वचत्वेऽपि पररूपापवादकत्वमे**कशेषन्यायेन** बोध्यम् । अत एवा**द्गुण** इत्यस्योल्लेखः । ऋवर्णेति धातुमात्रस्य तु न ग्रहणम् । **ऋतश्च संयोगादे**(पा०सू० ७-४-१०)रित्यस्य च वैयर्थ्यापत्तेः । न चाद्यस्यास्तु वैयर्थ्यमिति तदकरणेन लाघवमेव । अन्त्यं तु नियामकं भविष्यतीति वाच्यम् । विपरीतनियमेनापि तत्सार्थक्यापत्तेः । एतेनात्र ऋदिति सम्बद्धस्यैकस्य ऋकारस्यैव प्रश्लेषो न स्वतन्त्रऋधातोः, तस्य गुणं विनैव **द्विर्वचनेऽचीति** स्थानिवद्भावेनारतुरित्यादिसिद्धेः । अन्यथा तत्र ऋच्छत्यसम्बद्धऋकारप्रश्लेषेणैव ऋकारान्तमात्रे गुणसिद्धौ ऋद्ग्रहणं व्यर्थं स्यात् । न चैवं चक्रतुरित्यादावतिप्रसङ्गः । **ऋतश्च संयोगादे**रित्यस्य नियामकत्वात् । एवञ्च भाष्ये तथोपलभ्यमानपाठः कल्पितो, न तु वास्तव इति [२]**सरस्वत्यु**क्तमपास्तम् । तदेतद्धृदि निधाय प्रथमं ह्रस्वऋकारप्रश्लेषमूलमाह । **तेनेति ।** न तावन्मात्रेण निर्वाहः, किन्तु अन्येऽपि प्रश्लेषा इति तस्याधिकमज्ञानमेवेति स्फोरयितुमाह । **वस्तुतस्त्विति ।** तेनेत्यस्यार्थमाह । **पुनरिति । अन्यथा** तृतीयह्रस्वऋप्रश्लेषाभावे । **कित्करपेति ।** नित्यसापेक्षत्वात् समासः । तच्च **ऋच्छतृता**मिति प्रतिनिषेधविषयगुणस्य तेरतुरित्यादाविव तितीर्वानित्यादौ प्रवृत्तिवारणाय । अन्यथा संयोगादित्येव सिद्धे तद्वैयर्थ्यापत्तिः । एवं कानच्यपि फलं बोध्यम् । तत्रापि तत् तस्य तितिराण इत्यादावप्रवृत्तये । इजान इत्यादौ त्विटः कित्वादेव

---

१. सि.कौ.पृ.सं. ४४७ (चौ.सं.प्र. तत्वबोधिनी सहिता)

२. र.प्र.पृ.सं. २७७ प्रथमो भागः ।

निषिध्येत । एतच्च ''कसुश्च'' (पा०सू० ३-२-१०७) इति सूत्रे स्फुटीकरिष्यामः । तथा ''ऋदृशोऽङि''(पा०सू० ७-४-१६) इत्यत्राप्युरङि गुप इति योगो विभज्यते । ततो दृशः । उरित्याद्यनुवर्त्तते । 'स्थूलदूर' (पा०सू० ६-४-१५६) इति सूत्रेऽपि योगविभागः कर्त्तव्यः,

---

सम्प्रसारणं सिद्धम् । अञ्जेराजिवानित्यादौ नलोपोऽपि **छन्दस्युभयथेति** सार्वधातुकत्वा**त्सार्वधातुकमपिदिति** ङित्वादेव सिद्धः । एतेनैतदर्थात्तस्य कित्वं सफलमित्यपास्तम् । स्पष्टं चेदं सर्वं **ऋच्छत्यृता**मित्यादौ **शब्देन्दुशेखरादौ** । **आदृगमहनेति** (पा०सू० ३-२-१७१) सूत्रे तु पूर्वोत्तरसाहचर्यात् ऋकारान्तधातुमात्रग्रहणम् न तु ऋधातोः । एव [१]..... व्यपदेशभावेनापि न तस्य ग्रहणम् । मुख्ये सम्भवति गौणग्रहणस्यान्याय्यत्वात् । असंयोगादिसिद्धेः 'किकिनोः कित्वं ऋकारगुणप्रतिषेधार्थ'मित्यादिभाष्यप्रामाण्याच्च[२] । अन्यथा ऋधातोरारित्यत्रैव हि प्रयोजने प्रागुक्तरीत्या सम्भवाति तत्पर्यन्तानुधावनमफलं स्यात् । अत एवायं दकारोऽसन्देहार्थो न तु तकारः, तथा सति तात्परत्वाद्दीर्घग्रहणं न स्यादित्युक्त्वा तपरत्वेऽपि ऋकारगुणनिषेधार्थत्वाय किकिनोः कित्वादृकारनिर्देशावसाय इति[३] **कैयटो**क्तिः सङ्गच्छते । ऋकारे गुण इत्यस्य तदर्थमेव कृता न तु गमाद्यर्थमित्यर्थः । ऋकारनिर्देशेत्यस्य दीर्घात्तस्यापि ग्रहणेत्यर्थः । एवं भाष्यकैयटयोः सामञ्जस्येऽपि तत्र**त्योद्योतो**[४] प्राचामनुरोधेनेति बोध्यम् । यदि तु छान्दसत्वादेव तत्रानिषेधेन गुणसिद्धिरित्युच्यते, तर्हि मास्तु चतुर्थप्रश्लेषः । अत एव शब्देन्दुशेखरे तत्र प्राञ्च इत्त्युक्तम् । उद्योते कौस्तुभे च तत्र दिगित्युक्तमिति बोध्यम् । तदेतद् ध्वनयन् आह । **तथेति ।** ऋदृश इति समाहारद्वन्द्वान्ते श्रूयमाणषष्ट्याः प्रत्येकं सम्बन्धादाह । **उरङीति । विभज्यत इति ।** भगवतेति शेषः । **ततो दृश इति ।** अनेन भाष्येऽपीत्थमेव पाठः सूचितः । एतेन **ऋदृशोऽङी**त्यत्र ऋ इति लुप्तषष्ठीकमिति वाक्यभेदेन व्याख्यानादयमर्थ लभ्यते । तथा चोरङि गुणो दृशेरिति सूत्रस्याष्टाध्याय्यमभावेऽपि न दोष इति **'सरस्वत्यु**क्तमपास्तम् । कण्ठतो भगवता योगविभागस्यानुक्तत्वादाह । **कर्तव्य इति । अयं भावः ।** यद्यपि स्थूलादावोर्गुणेन सिद्धावपि क्षिप्रादेर्गुणस्य सर्वादेशत्वस्येष्टत्वे पूर्वस्थानेति विहायैतेषां यणादिपरं लुप्यतेऽवशिष्टस्य गुण इत्यर्थैकैकन्यासेन सिद्धिरिति पूर्वग्रहणमिगर्थमित्येव भाष्ये उक्तम्, तथापि तदुक्तावपि 'यणपेक्षादेः परं' इत्यर्थे तत एव पूर्वस्य गुणापत्तौ स्थूलादिषु थकारादेर्गुणापत्तिः । यण् आदिर्यस्य तच्च तत्परं तद्रूपं परं शब्दरूपं च लुप्यते, ततः पूर्वस्य गुण इत्यर्थे क्षिप्रादेरन्त्यस्य गुणापत्तिरिति यथाश्रुतं न युक्तमिति पूर्वग्रहणात्

---

१. अत्र ग्रन्थः त्रुटितः ।
२. म.भा.पृ.सं. २११ (तृतीयो भागः)
३. म.भा.प्र. पृ.सं. २११ (तृतीयो भागः)
४. म.भा.प्र.उ. पृ.सं. २११ (तृतीयो भागः)
५. र.प्र.पृ.सं. २७८ प्रथमो भागः ।

'स्थूलदूरयुवह्रस्वानां यणादिपरम्' इत्येको योगः, 'क्षिप्रक्षुद्रयोः पूर्वस्य च गुणः' इति योगान्तरम्। तत्र 'स्थवीयान्' इत्यादावोर्गुणेन सिद्धम्। आभीयस्यासिद्धत्वस्य ''श्नसोरल्लोपः'' (पा०सू० ६-४-१११) इति तपरकरणेनानित्यताज्ञापनात्, भाष्यकृता प्रत्याख्यानाच्च। यण आदिर्यणादिः ततः परमिति समासः। तथा च क्षिप्रक्षुद्रयोर्यण आदी

योगविभागो भगवतोऽभिमत इति। तत्र यदि परमित्यन्त इको योगः पूर्वस्य च गुण इत्यपरः, तत्रापि प्रथमार्थत्वे एकदेशे स्वरितत्वात् क्षिप्रक्षुद्रयोरेवानुवृत्तिः, न स्थूलादेः फलाभावात्। तेनान्यार्थासिद्धत्वात् यणादिपरमित्यस्य चानुवृत्तिः पञ्चमीसमासः, तेन प्रथमार्थ एवेति **कैयटकृष्णसरस्वत्याद्युक्त**योगविभागोऽङ्गीक्रियते, न तदा एकदेशानुवृत्तिक्लेशो दोषः। अथ यदि यणादिशब्दानामावृत्तिर्ह्रस्वशब्दान्तं लुप्तषष्ठीकं, क्षिप्रक्षुद्राणामिति व्यत्ययेन बहुवचनमुभयत्र विधेयमिति **सरस्वत्यु**क्तपक्षान्तरादरस्तर्हि गौरवं स्फुटमेव। अतस्तत्सर्वमुपेक्ष्य प्राग्वत् द्वन्द्वान्तषष्ठ्याः प्रत्येकं सम्बन्ध इत्याशयेनाह। **स्थूलेति।** ननु एवं योगविभागे पूर्वस्य च गुण इत्यस्य स्थूलादावसम्बन्धे स्थवीयानित्यादीनां कथं सिद्धिरत आह। **तत्रेति।** स्थूलादीनां यणादिपरलोपे सतीत्यर्थः। सिद्धं इष्टमिति शेषः। ननु यणादिलोपस्या**सिद्धवदत्रे**त्यसिद्धत्वात्कथं ओर्गुणेन सिद्धिरत आह। **आभीयेति।** यत्तु पूर्वग्रहणमेव तदनित्यत्वे ज्ञापकमिति **सरस्वत्यु**क्तम्। तन्न। प्रागुक्तरीत्यापि तस्य साफल्यादत आह। **तपरेति।** आसन्नित्यत्र लोपनिवृत्त्यर्थेनेत्यादिः। तथा हि। अस् अन्तीति स्थिते विप्रतिषेधे अभावासिद्धत्वाभावेन परत्वादल्लोपे तस्याभीयत्वेनासिद्धत्वात्पुनः प्रसङ्गविज्ञानेनाटि कृते आगमस्याविकारित्वेनाविकारान्यानुपूर्व्यैक्यमित्यस्याभावेन **लक्ष्ये लक्षण**स्येति न्यायाप्राप्तौ प्राप्तल्लोपवारणार्थं तपरत्वं नित्येऽसिद्धत्वे आटः सिद्धत्वाल्लोपो न भविष्यतीति व्यर्थं सत्तदनित्यत्वे ज्ञापकम्। न च ज्ञापितेऽपि न चारितार्थ्यम्। असिद्धत्वस्यानित्यत्वादत एवाप्राप्तेरिति वाच्यम्। तत्रानित्यत्वे मानाभावात्। अन्यथा तपरकरणानर्थक्यापत्तेः। न च श्नसाहचर्यादाटो लोपो नेति व्यर्थमेव तदिति वाच्यम्। साहचर्यस्यानित्यत्वेनात्रानाश्रयणात्। अत एव तद्वर्णनपरभाष्यादिसङ्गतिः। एतेन तथा लोपाभावेन चिन्त्यमेतज्ज्ञापकमित्यपास्तम् इति दिक्। एकदेश्युक्तिमाह। **भाष्येति।** तदेकदेशिनेत्यर्थः। **समास इति।** योगद्वयेऽपि उभयत्र सुप्सुपेत्यनेन पञ्चमीसमास इत्यर्थः। न चैवमुत्तरसूत्रे पूर्वशब्देन कथमन्वयःसुकर इति वाच्यम्। पूर्वत्वस्यावध्याकाङ्क्षायामतत्वेऽबाधत्वेन क्लृप्तत्वादुपस्थितत्वाच्च तस्यैवाधित्वेनान्वयो नत्वेकदेशानुवृत्तिरित्याशयात्। एतेन यणादीति लुप्तपञ्चमीके भिन्ने पदे वक्तुं युक्त इत्यपास्तम्। न चैवं ह्रस्वशब्दे रस्वशब्दस्यापि लोपापत्तिः। यत्तु शब्दपरविप्रतिषेधाल्लक्ष्ये

पकारदकारौ ततः परस्य रशब्दस्य लोपस्ताभ्यामेव च पूर्वस्येकारस्योकारस्य च गुण इत्यर्थः । तदित्थं गुणाः सर्वे इकि विश्रान्ताः । मृजेर्वृद्धावप्यच इत्यपकृष्यते । मृजेर्वृद्धिरचः, ततो ञ्णिति, अच इत्येव । न चैवम् 'अमार्ट्' इत्यत्राटोऽपि वृद्धिः स्यादिति वाच्यम् ।

लक्षणस्येति न्यायाच्च न दोषः । न च वर्णपाठे रेफस्यैव परत्वात् तथैव स्यात् । तद्योगश्च तवर्णपाठापेक्षयैव शब्दपरविप्रतिषेधेन विप्रतिषेधस्य प्रसिद्धेत् । अन्यथा यद्येत्यादौ भाष्योदाहृतः स बाध्येत । वर्णपाठे उकारस्येव परत्वादिति नारायणः । तन्न । शब्दपरविप्रतिषेधेन विप्रतिषेधाप्रवृत्तेरेव तद्भाष्यसम्मतत्वात् । लक्ष्यभेदेन तन्न्यायाप्रवृत्तेश्च[1] । पूर्वं तस्यैव बाध्यत्वाच्चेति वाच्यम् । स्थूलादिसाहचर्येणोपान्त्ययणादेः परस्यैव लोपात् । न चैवमपि पञ्चमीसमासो दुर्वचः । तथा हि सति अवध्यवधिमतोः साजात्येन यणपेक्षादेः वर्णस्यैव ग्रहणेन ततः परस्यापि वर्णस्यैव ग्रहणापत्त्या यण्मात्रलोपापत्त्याऽवशिष्टश्रवणापत्तेः । एवञ्च बहुव्रीहिरेवोभय (भाष्यमेकदे) श्युक्तिः । एवमपि न समासभेदजावैरूप्यमिति वाच्यम् । टेरिति टिलोपेन निर्वाहात् । द्वितीययोगन वा निर्वाहाच्च । इष्टानुरोधेन योगद्वयेन समासद्वयाङ्गीकारे वैरूप्यस्य दुरुद्धरत्वाच्च । सम्भवत्येकरूप्ये वैरूप्यस्यान्याय्यत्वाच्च । कैयटेनाप्येवमेवोक्तम् । एतेन (तन्म) तानुवादमध्ये आद्ये बहुव्रीहिघटितः सः, कर्मधारयो द्वितीयः । उभयत्र पञ्चमीसमास इति वर्णयन्नारायणः प्रत्युक्तः । तदेतद् ध्वनयन्नाह । **तथा चेति ।** उक्तसमासाङ्गीकारे चेत्यर्थः । **रशब्दस्येति ।** रे फलाच्चेत्यर्थः । अत एव शब्दोपादानम् । अन्यथा यणो लोपेन स्थवीयानित्यादिसिद्धावपि षष्ट्यपेक्षया पूर्वत्वग्रहणापत्तौ तयोः पाठे गुणापतिः । सिद्धान्ते तु यणादीति बहुव्रीहिः लुप्तषष्ठीकं च । परमिति षष्ट्यर्थे प्रथमा । पूर्वत्वेऽविधिस्तु यणादिरेव । प्रकृतपरिभाषया क्षिप्रादौ न दोष इति बोध्यम् । सर्वं तच्छेषपक्षे दोषवत्वेनोद्भाविताः ।

अथ वृद्ध्यंशे तदाह । **मृजेरिति ।** अपिः पूर्वसमुच्चये । **अच इति । अचोञ्णिती**त्यत इति भावः । **अपकृष्यत इति ।** सूत्राणां विधिष्वपाठेऽन्यथाविभक्तौ उक्तसूत्रादपकृष्यत इक्घटितपूर्वयोगैः करिष्यत इत्यर्थः । अत एव अग्रिमग्रन्थसङ्गतिः । अत एव च योगविभागः करिष्यते इति भाष्यं सङ्गच्छते । तस्य चाकृतं योगविभागं विहायान्यथा योगविभागः करिष्यत इत्यर्थः । **अटोऽपीति ।** लावस्थायामडिति वादे वृद्धिः स्यात् । ततः पूर्वं ङित्वादप्रवृत्तेरिति भावः । तत्र तावत्कैयटनारायणाद्युक्तसमाधिमाह । **लादेशेष्विति ।** यत इत्यादिः । **परत्वादिति ।** इदं चिन्त्यम् ।

---

१. तन्न्यायाप्राप्तेश्च इति ख ।

लादेशेषु कृतेष्वडिति पक्षे परत्वाद् वृद्धौ सत्यामट्। तत्र कृते पुनर्वृद्धिर्न भवति सकृत्प्रवृत्त्या चरितार्थत्वात्।

यदा त्वसिद्धवत्सूत्रप्रत्याख्यानाय ''ह्लुङ्'' इति द्विलकारकनिर्देशमाश्रित्योपदेशे आर्द्धधातुक इत्यनयोरन्यतरदनुवर्त्त्य वा लावस्थायामेवाट् क्रियते, ''एरनेकाचः'' (पा०सू० ६-४-८२) इति विभज्य 'इणो यण्' इत्यनुवर्त्त्यानेकाचश्चेत्तर्हीप एवेति नियममाश्रित्य 'अद्धचैयाताम्' इत्यादौ यण् वार्यते, तदा लावस्थायां यद्यपि वृद्धिर्न भवति, लकाराणां ङित्त्वेन 'मृष्टः' इत्यादाविव तन्निषेधात्। ततश्चान्तरङ्गत्वादडागम एव, तथापि 'अन्त्याभावेऽन्त्यसदेशस्य' (परि. १०४) इति परिभाषामाश्रित्याटो

द्वयोर्यौगपद्यासम्भवात्। **सकृदिति।** विकारान्यानुपूर्व्या अभेदेऽप्यागमानुपूर्व्या भेदेन लक्ष्य-भेदादिदमपि चिन्त्यम्। एतेन 'विप्रतिषेधानपेक्षयैवात्र चोद्यपरिहाराव'ति [१]**कैयटो**क्तमपास्तम्। तदपेक्षयापि प्रागुक्तरीत्या तदविषयत्वेन तदुपपत्तेः। नन्वेवमपि लावस्थायामडिति पक्षे कथं निर्वाहोऽतः कैयटाशयं ध्वनयन्नाह। **यदा त्विति।** आयनित्यादाविणो लङो झेरन्तादेशे 'इणो यणिति' परत्वाद्यणि अनजादित्वादप्राप्ताट्प्रवृत्त्यर्थं क्रियमाणमपि तन्न कर्तव्यम्, अन्यथा-सिद्धेरित्येकदेशिमतेनाह। **असिद्धवदिति।** ननु विच्छित्तिपाठे तदसम्भवः। तथा अपाठात्। संहितायां सम्भवेऽपि लुङ्येव तथा स्यान्न सर्वत्र। लक्षणापत्त्या गौरवं चात आह। **उपदेश इति।** 'स्यसिच्सीयुडि' (६-४-६२) त्यतः। तथा चान्तरङ्गानपि विधीन् बाधित्वा लुङाद्युपदेशाव-स्थायामेव तौ भवतः। अस्यास्वरितत्वादाह। **आर्धधातुक इति।** ततश्च तदनुवृत्तिसामर्थ्या-दकृतेष्वादेशेषु लब्धार्धधातुकसंज्ञकेषु लुङादिषु तौ भवतः। नन्वेवमध्यैयातामित्याद्यसिद्धिरत आह। **एरनेकाच इति। अनेकाचश्चेत्तर्हीप इति।** आडादिसहितानेकाच इवर्णान्तस्य चेदित्यर्थः। अन्यथा विव्यतुरित्याद्यसिद्धिः स्पष्टैव। इदमपि चिन्त्यम्। शब्दमर्यादयोक्तार्थालाभात्। उक्तरूपं तु छान्दसं, लोके त्वनभिधानमेवेत्यादि स्पष्टं **शेखरे** तिङन्ते। **तन्निषेधादिति।** पूर्वव्याकरणोक्तवचनस्येहाश्रयणेन तत्राचि क्ङिति ततो चेति योगं विभज्याजादावेव किति नान्यत्रेति नियमेन तन्निषेधादित्यर्थः। **ततश्चेति।** निषेधेन तदप्राप्तेश्चोपस्थितनिमित्तकत्वादित्यर्थः। तथा च भिन्नकालप्राप्तत्वाद्विप्रतिषेधो नेति तदनपेक्षयेति कैयटतात्पर्यम्। भाष्योक्तं समाधिमाह। **तथेति। अनन्त्यविकारेऽन्त्यसदेशस्येति** परिभाषा। अन्त्यसदेशानन्त्यसदेशयोरेकप्रयोगे युगपत्प्राप्तावन्त्यसदेशस्यैवेति तदर्थः। अनन्त्यविकार इति लिङ्गं तात्पर्यतः पठति। **अन्त्यभाव**

---

१. म.भा.प्र.पृ.सं. १९३ (प्रथमो भागः)

वृद्धिर्निवर्तनीया। परिभाषाप्रत्याख्यानपक्षे त्वङ्गाक्षिप्तेन प्रत्ययेनाञ्चिञ्शेष्यते येन नाव्यवधानन्यायाच्च सिद्धम् 'अमार्ट्' इत्यादि रूपम्। सिचि वृद्धावपि विधेयायां नास्तीक्परिभाषाया उपयोगः व्यावर्त्याभावात्। न च 'अचिकीर्षीत्' इत्यकारो व्यावर्त्यः ''ण्यल्लोपावियङ्ण्यण्गुपवृद्धिदीर्घेभ्यः पूर्वविप्रतिषिद्धम्'' (का०वा०) इति वचनादल्लोपेनैव सिद्धत्वात्। अन्यथा 'चिकीर्षकः' इति न स्यात् 'चिकीर्षायकः' इति च प्रसज्येत। आकारस्य तु नास्ति विशेषः सगिड्भ्यां बाधश्चेत्युक्तम्। एजन्तमपि न सम्भवति, आत्वविधानात्। 'उदवोढाम्' इत्यादौ तु ढलोपस्यासिद्धता। रैनौग्लौशब्दानामा-

---

इति। मृजेरित्यवयवषष्ठीत्यालोच्य परिभाषाया अप्रवृत्त्या अन्त्याभावे तस्य कार्याप्राप्तावर्थादनन्त्यस्य सर्वस्य प्राप्तावन्त्यसमीपस्यैवेत्यर्थः। ननु ष्यङः सम्प्रसारणमित्यत्र भाष्ये 'सा नैतदर्था। अन्यार्थमिक्ग्रहणे कृते तेन चाटोऽपि व्यावृत्तिसिद्धे'रित्युक्तत्वादिदं भाष्यं तद्विरुद्धम्। एतेन फलान्यथासिद्धचा यद्यपि व्यर्थेयम्। तथापि इदमेव फलमस्त्विति अत्रत्यभाष्याशय इत्यपास्तमत आह। **परीति।** नारायणोक्तं समाधिमाह। **अङ्गाक्षीति।** चः समुच्चये। इदमपि चिन्त्यम्। अङ्गांशे प्रत्ययस्योत्थिताकाङ्क्षत्वेनाक्षिप्तस्याक्षेप-कान्वयस्यैवौचित्येन चैवं दुर्वचत्वात्। यत्तु अच्चेव धीरिति नियमादपि न वृद्धिरिति नारायणः। तन्न। तथा सति हि मृजेरपि न स्यात्। लाश्रितमनुबन्धप्रयुक्तं कार्यमादेशानां नेति निषेधाच्च। तस्माद्यञ्जनागुणायां स्थानिनिर्देशार्थमावश्यकमिदम्। एवं च भिन्नमित्यादौ गुणनिषेधसिद्धिरपि। अत एव भाष्ये मृष्ट इत्यादौ मृजेरिति वृद्धेर्निषेधार्थं वृद्धिग्रहणमित्युक्त्वा एतत्खण्डनं वक्ष्यमाणमपि गुरुभूतत्वादयुक्तमिति ध्वनयितुमत्रानुक्त्वा मृजेरित्युक्त्या संखण्ड्य योगविभागेऽनिग्लक्षणत्वात्प्रतिषेधाप्राप्तिरिति पूर्वफलांशे आशङ्क्य [1]तस्मान्मृजे (वृद्धिरिग्लक्षणा एषितव्येति उपसंहृतं सङ्गच्छते। अनेनेहान्त्ये इत्यादि – वक्ष्यमाणस्यैकादेश्युक्तित्वं ध्वनितम्) इग्लक्षणेत्यस्य इक्स्थानिकेत्यर्थः। तदर्थत्वे सापि सुलभेति तदपि न कार्यमिति अनिक व्यावृत्त्यर्थं निषेधप्रवृत्त्यर्थं चेति तद्भाव इति तत्वं बोध्यमिति दिक्॥

षिद्धमिति भावे क्तः क्रियाविशेषणम्। **अन्यथा** अचिकीर्षीदित्येतदर्थमिमामङ्गीकृत्य वार्तिकानङ्गीकारे। **यक इति।** परत्वादचो ञ्णितीति वृद्धौ पुगिति भावः। **एजन्तमपीति।** सिचूपरं वृद्धियोगमिति शेषः। **आत्वेति।** उपदेश इत्यादिः। उदवोढामित्यादौ तु ढलोपस्यासिद्धतेति क्वचित्पाठः। तथैचौकाराणामन्त्यत्वादनेजन्तत्वमिति तत्रापि आत्वाभावः

---

१. ( ) 'तस्मान्मृजे वृद्धि'रित्यनन्तरं 'इग्लक्षणा एषितव्ये' इत्यारभ्य 'ध्वनितम्' इत्यन्तं कपाठे लुप्तम्।

चारक्विबन्तानां सत्यामसत्यां वा वृद्धौ न कश्चिद्विशेषः। गोशब्दात्क्विपि 'अगवीत्' इत्यत्रापि नातिप्रसङ्गः। ''ऋत इद्धातोः'' (पा०सू० ७-१-१००) इत्यतोऽनुवृत्तेन धातुग्रहपेन सिजाक्षिप्तस्य धातोर्विशेषणे सति धातुरेव यो धातुर्न तु कथंचित्प्रातिपदिकमिति व्याख्यानादिति कैयटादयः।

नन्वेवं कवेः अकवायीत्, विधोः अविधावीत्, पितुः अपितारीत्, अन्तरङ्गमपि गुणं सिचि वृद्धिर्बाधत इति वदन्माधवो विरुध्येत। सत्यम्,

यद्यविरोधः सम्पादनीय इत्याग्रहस्तर्हीत्थं वर्णनीयम् – धातोरितिवदोत इत्यप्यनुवर्त्तते। तच्च वाक्यभेदेन सम्बध्यमानं नियमार्थं सम्पद्यते – ओदन्तस्य धातोश्चेद् वृद्धिस्तर्हि धातोरेव धातोर्न तु नामधातोरिति। यद्वा, ''नेटि'' (पा०सू० ७-२-४) इत्यत्र नेति योगं विभज्य मण्डूकप्लुत्या सम्बन्धानुवृत्त्या वा 'गोतः' इत्त्यनुवर्त्त्यौका-

---

लोपादीनामसिद्धत्वात्पूर्वं हलन्तलक्षणा वृद्धिस्ततो ढलोपादिषु कृतेषु ढलोपस्यासिद्धत्वादौकारस्य **सिचि वृद्धि**रिति वृद्धिरिति, एतत्पक्षे लक्षेति न्यायप्रवृत्तिरिति भावः। **हरदत्ता**नुरोधेनाह। **रैनाविति।** अरायीदित्यादाविति भावः। कैयटहरदत्तनारायणाद्यनुरोधेनाह। **गोशब्दादिति।** आचार इति शेषः। विशेषणे विशेष्याकरणे। **यो धातुरिति।** तथा चौपदेशिकधातुपरिग्रहः, न नामधातोर्ग्रहस्तदाह। **कथञ्चिदिति।** अतिदेशिकधातुर्वस्तुतः प्रातिपदिकमित्यर्थः। एवञ्च कव्यादिभ्य आचारक्विपि आकवयीदित्यादौ वृद्धिर्नेति भावः। अत एव शङ्कते। **नन्वेवमिति।** उक्तार्थाङ्गीकार इत्यर्थः। अयं भावः। इष्यते एवात्र वृद्धिः। प्रकृतसूत्रारम्भे तदनुवृत्तेर्भाष्यादावनुक्तत्वात्। पूर्वपक्षावसर एवौकारान्तव्यावर्तनायैव तदुपायस्य कैयटेनाश्रयणात्। एवञ्चेगन्तेऽपि नामधातावव्याप्तिः प्रसज्येतेति। यदीत्यनेन विरोधे इष्टापत्तिः सूचिता। कैयटस्य चिन्त्यत्वात्। तत्र नारायणानुरोधेनादौ समाधिद्वयमाह। **धातोरितीति। वाक्यभेदेनेति।** तस्याविवक्षितत्वादोदन्तस्य धातोः सिचि वृद्धिरितीत्यर्थः। **न त्विति।** तथा च ओदन्त एव व्यवर्त्त्य इति न विरोध इति भावः। अत्र वाक्यभेदनियमजगौरवात् इति न विरोध इति भावः। अत्र वाक्यभेदनियमप्रयुक्तगौरवादाह। **यद्वेति। मण्डूकेति।** तत्रेत्यादिः। अत्र गौरवादाह। **सम्बन्धेति**। कर्मणि घञ्, 'गोतो णिदि'ति सम्बद्धस्य प्रतिसूत्रमनुवृत्त्येत्यर्थः। तत्र तस्यैव सम्बन्धो, न तु णिदित्यस्य। योगविभागादेव हलन्तस्येत्यस्य प्रकृतत्वेऽपि न सम्बन्ध इति भावः। इदमुभयं चिन्त्यम्। तपरत्वस्य भाष्ये प्रत्याख्यातत्वेन तस्या विवक्षायां मानाभावात्। घोश्चेति वार्तिकेन तत्र निर्वाहः। अन्योकारान्तानां

रान्तस्य धातोर्वृद्धिर्निषिध्यते । अथवा ''बहुलं छन्दसि'' (पा०सू० ७-१-१०३) इत्यतो बहुलमित्यनुवर्त्त्य सिचि वृद्धिर्नामधाताविगन्तस्य भवति न त्वोदन्तस्येति कथञ्चित्समाधेयम् ।

व्यञ्जनेष्वन्तरतमपरिभाषाबलेनैवानुनासिकपरसवर्पयोरिवातिप्रसङ्ग उद्धृत एव । अभ्युपेत्य तु ब्रूमः, नाप्राप्तायां सिचि वृद्धावारभ्यमाणा हलन्तलक्षणा वृद्धिर्बाधिका

त्वनभिधानमेव । योगविभागादेर्निमूलत्वाच्च । एतेनौतो णिदित्येव सिद्धे गोत इति यत्नादिह सम्बन्धः । पूर्वत्र तूक्तरीत्या न । न चैवमन्यस्योकारः स्यात् । गोशब्दादन्यत अनभिधानात् । अस्तु वा तत्रापि तदविवक्षा, तथापि अधिकशब्दोपादानस्य यत्नत्वं न हीयत इति नारायणोक्तमप्यपास्तम् । अनभिधानस्यात्रापि सुवचत्वाच्च । वैषम्ये बीजाभावाच्च । अतः स्वयं समाधत्ते । **अथ वेति ।** सेशब्दे आचारक्विबन्तेऽतिप्रसङ्गस्य तथापि तदवस्थत्वादाह । **कथञ्चिदिति ।** तदनुवृत्त्या सन्ध्यक्षरान्तनामधातोर्वृद्धिर्न, अन्यत्र तु भवत्येवेति सेशब्दादिभ्य आचारक्विप्यपि न वृद्धिरिति तु **माधवा**शयो वक्तुं युक्तः । यत्तु पुनर्वृद्ध्यर्थमनुवृत्तं धातुग्रहणं पूर्वविधेरनित्यत्वज्ञापकम् । तेन नामधातोरोदन्तस्य न, रायादिभ्यस्त्वनभिधानात् क्विबेव नेति **नारायणः ।** तन्न । तदनुवृत्तेः फलस्योक्तत्वेनानित्यत्वज्ञापकत्वासम्भवात् । अनभिधानस्य सर्वत्र सुवचत्वाच्च । वस्तुतस्तु रैनौग्लावित्यादि चिन्त्यम् । नैव सन्ध्यक्षरमित्येवगर्भात्रत्यभाष्यप्रामाण्येन प्रागुक्तभाष्येण च सन्ध्यक्षरान्तेभ्य आचारक्विबभावानुमानादिति बोध्यम् । एतेनात्र भगवता गवीत्यत्रातिप्रसङ्गानुद्भावनेन धातुग्रहणानुवृत्त्यादिकल्पनं कैयटोक्तमयुक्तम्, पटुरिवाचारीत् अपटावीदित्यादौ वृद्ध्यनापत्तेः । एतादृशभाष्यानुरोधेन तत्र तत्र सूत्रार्थान्यथात्वाश्रयणे समस्तशास्त्रोपप्लवापत्तेश्चेति [1]**सरस्वत्यु**क्तमपास्तम् । **अन्तरेति ।** यद्यपीत्यादिः । **उद्धृत** नारायणादिना । तथापि स प्रकारो न युक्तः, सप्तम्यन्तपाठस्य भाष्ये दूषितत्वादिति शेषः । अत एवाह । **अभ्युपेत्य त्विति ।** भाष्योक्तिमनुसृत्यैवेत्यर्थः । यद्वा **उद्धृत एवेति ।** नारायणादिनेति भावः । तथापीति शेषः । तथाप्यतिप्रसङ्गं स्वीकृत्यैव ब्रूम इत्यर्थः । एवेन निरासव्यवच्छेदः । तत्पाठस्य दूषितत्वादिति भावः । **नाप्राप्तायां सिचीति ।** प्रकृतसूत्राभावेन व्यञ्जनस्येति भावः । **बाधिकेति ।** अभैत्सीदित्यादाविति भावः । नन्वेवमप्यकोषीदित्यादौ सा **नेटी**ति निषिद्धेति सिचि

---

१. र.प्र.पृं.सं. २८२ प्रथमो भागः ।

भविष्यति । ''नेटि'' (पा०सू० ७-१-४) इति निषेधस्तु हलन्तस्य यावती वृद्धिः प्राप्ता ''सिचि वृद्धिः'' (पा०सू० ७-२-१) इति वा ''हलन्तस्य'' (पा०सू०ए० ७-२-३) इति वा तस्याः सर्वस्याः, न तु सूत्रविशेषप्रापितत्वे आग्रहः । तेन 'अकोषीत्' 'अमोषीत्' इत्यादौ द्विविधाऽपि वृद्धिर्निषिध्यते इति सुस्थम् । तस्मान्निषेधसिद्ध्यर्थ-मिग्लक्षपतां सम्पादयितुं सूत्रमिति स्थितम् ।

स्यादेतत् 'कृतः कृतवान्' 'छिन्नश्छिन्नवान्' इत्यादौ निषेधसिद्धये गुपग्रहपमस्तु । वृद्धिग्रहपं तु व्यर्थम् । न च 'मृष्टो मृष्टवान्' इत्यादौ निषेधसिद्धिस्तत्फलं, योगविभागेन सिद्धत्वात् । तथा हि, मृजेर्वृद्धिरित्यस्यानन्तरम् 'अजादौ क्ङिति वा' इत्येवं रूपं वचनमवश्यं कर्त्तव्यम् - 'मृजन्ति' 'मार्जन्ति' इत्यादिसिद्धयर्थम् । एवं स्थिते अजादौ

वृद्धिः स्यादेवात आह । **नेटीति ।** तुश्चार्थे । नेटीत्यत्र हलन्तस्येत्यनुवृत्तेराह । **हलन्तस्येति ।** अत एवालावीदित्यादौ न दोषः । एतेनेडादौ सिचि वृद्धिर्नेति व्याख्यादिति सिचि वृद्धेरप्येष इति भाष्यस्याशय इति वदन् **दण्डी** प्रत्युक्तः । बाध्यसामान्यचिन्तापक्षे आह । **यावतीति ।** एतेनानन्तरस्येति न्यायात्तस्या एव बाध इति, निर्युक्तिकत्वादयं पक्षो न युक्त इति [१]**सरस्वत्यु**क्त-मपास्तम् । यद्यपि भाष्ये बाध्यविशेषचिन्तापक्षेऽप्यथ वेत्यादिना समाधानमुक्तम्, तथाप्येकदेश्युक्तिः सेत्यत्र न लिखितम् । **तेनेति ।** बाध्यसामान्यचिन्तापक्षाश्रयणेनेत्यर्थः । इदं चिन्त्यमित्यग्रे स्फुटीभविष्यति । एवञ्च बाध्यसामान्यचिन्तापक्षे निर्वाहेऽपि विशेषचिन्तापक्षेऽनिर्वाह इति इहार्थत्वं तस्यावश्यकत्वमेव । तदेतद् ध्वनयन् उपसंहरति । **तस्मादिति ।** निषेधसिद्धेरमुख्यफलत्वादाह । **इग्लक्षपतामिति ।** इक्स्थानिकतां चेत्यर्थः ।।

३.३३ इक्परिभाषायां वृद्धिग्रहणप्रयोजनविचारः

विशेषं प्रतिपादयितुं **नारायणा**नुरोधेन शङ्कते । **स्यादेतदित्यादि ।** ननु न प्रागुक्तयोगविभागेन सिद्धिरत आह । **हीति । हरदत्तानु**रोधेनाह । **अजादाविति ।**वस्तुतोऽचि क्ङिति इत्येव वचनम् । आदाविति तु यस्मिन्विधिरिति लब्धोऽर्थः । भाष्ये तथैव पाठात् । एवञ्च ममृजे यूयं ममृजेत्यादौ विकल्पो भवत्येव । एतेनादिग्रहणसामर्थ्यान्मुख्याजादावेव प्रवृत्तिः, तेनोक्तेषु न वृद्धिरिति [२]**हरदत्तो**क्तमपास्तम् । **तुन्दपरिमृज** इत्यत्र तु यदि वृध्यभाव इष्टस्तर्हि व्यवस्थितविभाषया न ।

---

१. र.प्र.पृ.सं २८२ प्रथमो भागः । २. का.वृ.प.पृ.सं. ३०

क्ङितीति योगो विभज्यते। नियमार्थं चेदम् - क्ङिति चेद्भवत्यजादावेवेति। तेन 'मृष्टो मृष्टवान्' इत्यादि सिद्धम्। ततोऽजादावपि विकल्पेनेत्येतदर्थं 'वा' इति द्वितीयो योग इति। तस्माद्वृद्धिग्रहणस्य फलं दुरुपपादमिति। अत्राहुः। ''पू स्तुतौ'' ''धू विधूनने'' कुटादिषु पठ्येते। ताभ्यां लुङि 'अनुवीत्' 'अधुवीत्' इतीष्यते। तत्र सिचि वृद्धेः क्ङितीति निषेधायेग्लक्षपतां सम्पादयितुमिह वृद्धिग्रहपमिति। नन्विहान्तर्भूत-सिज्मात्रापेक्षत्वादन्तरङ्गे उवङि कृते हलन्तत्वात् ''नेटि'' (पा०सू० ७-१-४) इति निषेधः सिद्ध इति चेत् ? न, सिच्यन्तरङ्गं नास्तीति सिद्धान्तादुवङः प्रागेव वृद्धिप्रसङ्गात्।

स्यादेतत्। ''अन्तरङ्गं बलीयः'' (पा०भा० ५०) इति तावद् ''अचः परस्मिन्'' (पा०सू० १-१-५७) इति सूत्रे स्थापयिष्यते। तदविशेषात्सिच्यप्यस्तु। न चैवम् 'अचैषीत्' 'अहैषीत्' इत्यादौ गुपः स्यादिति वाच्यम्, तस्यैव वृद्धिसम्भवेनेष्टापत्तेः। नहीदानीं विधाविग्रहपमस्ति येनैकारस्य वृद्धिर्न लभ्येत। न चैवमपि 'अस्तौषीत्' इत्यादावन्तरङ्गत्वाद् गुपे कृते ओतो नेति व्याख्यानपक्षे वृद्ध्यसम्भवः,

---

वस्तुतस्तत्रापि वृद्धिरेवेति बोध्यम्। एतेन तासां परिगणनात्कथमिदमित्यपास्तम्। **अजादावेवेतीति।** तर्हीत्यादिः। विपरीतनियमस्तु न इष्टानुरोधात्। **विकल्पेनेत्येतदिति।** भवत्विति शेषः। तदनुरोधेनैव समाधत्ते। **अत्राहुरिति। इतीति।** धा [१]..... शेषः। **तत्रेति।** उक्तनियमस्तु मृजिविषयकस्तस्य तदुत्तरं पाठात्। तस्य सामान्यविषयकत्वेऽप्यनेनाव्यावृत्तिः। अजादेर्ङितः सत्वादिति भावः। **इहान्तरिति।** अनुवीदित्यादावित्यर्थः। **अन्तरङ्ग इति।** उवङादेशे सिजनिमित्तवृद्धौ तु परस्मैपदे परसिच्। अत एव तत्र तस्यान्तर्भूतत्वम्। **निषेध इति।** प्रागुक्तरीत्योभयोरिति भावः। **प्रसङ्गादिति।** तदा प्रागुक्तरीत्या नेटीत्यस्याप्राप्तेरिति भावः॥

३.३४ सूक्तिरत्नाकरोक्तवृद्धिग्रहणवैयर्थ्यानुवादः

एवं च वृद्धिग्रहणसार्थक्ये उक्ते पुनर्वृद्धिग्रहणवैयर्थ्यं तदनुरोधेनैवाशङ्कते। **स्यादेत दित्यादिना।** असिद्धमित्यस्याप्रवृत्तेराह। **अन्तरङ्गमिति।** इदं चातिरिक्तमावश्यकमित्यभिमानेनाह। **स्यापयीति।** चैवं सिच्यन्तरङ्गाङ्गीकारे। न चैवमपि पूर्वत्रादोषेऽपि। **व्याख्यानेति।** द्वितीयेत्यादिः। **पक्षे तु** तृतीयपक्षे तु। तुना अरुचिः सूचिता। तद्बीजं तु नैव पक्षः प्रागुक्तः, सान्ततो नामधातावगन्तस्य भवति न त्वोदन्तस्येति संध्यक्षरान्तनामधातोर्न वृद्धिरन्यत्र तु

---

१. अत्र ग्रन्थः त्रुटितः।

बहुलग्रहणादनिगन्तानां नेति पक्षे तु 'अचैषीत्' इत्यादावपि दोष एवेति वाच्यम्, ओतो धातोरेव धातोर्न तु नामधातोरिति तृतीयपक्षाश्रयपेन सर्वसमाधानात्। 'अकार्षीत्' इत्यादौ हलन्तलक्षणा वृद्धिरस्तु। 'अतारीत्' इत्यादौ त्वन्तरङ्गत्वाद् गुणे हलन्तलक्षणायां वृद्धौ 'नेटि' (पा०सू० ७-१-४) इति प्रतिषिद्धायाम् 'अतो हलादेः' (पा०सू० ७-२-७) इति विकल्पं बाधित्वा ''अतो र्लान्तस्य'' (पा०सू० ७-२-२) इति नित्या वृद्धिः। 'अलावीत्' इत्यादावप्यन्तरङ्गत्वादगुणावादेशयोः कृतयोः ''अतो र्लान्तस्य'' (पा०सू० ७-२-२) इत्यत्र ''लोपो व्योः'' (पा०सू० ६-१-७६) इति लोपेन वकारस्यापि व्याख्यानान्नित्या वृद्धिर्भविष्यति-मा भवानवीत्। 'अमवीत्' इत्यत्रापि तर्हि नित्या वृद्धिः स्यादिति चेत् ? न, पिश्विग्रहणमपनीय तत्स्थाने अविमव्योः प्रक्षेपेण वृद्धिनिषेधात्। न ह्यस्मिन्पक्षे पिश्विग्रहणमुपयुज्यते। 'औनयीत्' अश्वयीत्' इत्यत्रान्तरङ्ग त्वाद् गुणायादेशयोः कृतयोर्यान्तानां नेत्येव निषेधसिद्धेः। नन्वेवमवेरिव मवेरपि नित्यं निषेध एव स्यात्, इष्यते तु विकल्पः। नैष दोषः ''अतो र्लान्तस्य'' (पा०सू० ७-२-२) इत्यत्र वकारप्रश्लेषेण या नित्यावृद्धिः प्राप्ता सैवेहाविमव्योर्नेत्यनेन

भवत्येवेति च प्रागुक्तम्। अतो नेदं युक्तमिति। **तृतीयेति।** विपरीतगणनया तृतीयेत्यर्थः। प्रागुक्तरीत्या तु प्रथमपक्ष एव सः। इदमुपलक्षणं तृतीयपक्षद्वयस्यापि। वस्तुत इदं चिन्त्यमिति प्रागुक्तमेव। तुर्वैलक्षण्ये। **हलन्तेति।** अन्तरङ्गत्वाद्गुणे कृत इति शेषः। एवञ्च तत्र तदङ्गीकारे न दोष इति भावः। एवमग्रे सर्वत्र बोध्यम्। अपिः पूर्वसमुच्चये। **अन्तरङ्गत्वादिति।** न च ततो गुणे कृते 'वार्णादाङ्गं' इति न्यायेनावादेशं बाधित्वा वृद्धावावादेशेऽलावीदित्यादिसिद्धौ च प्रश्लेषो व्यर्थ इति वाच्यम्। सिचि वृद्धिरित्यस्य तदपवादत्वाज्ञानेनैवैतत्परिभाषाया अज्ञानेनैवास्य पूर्वपक्षस्य प्रवृत्तेरदोषात्। **लोपेनेति।** अश्रवणेऽपीति शेषः। अपिर्लोः समुच्चायकः। **व्याख्यानात्** भाष्यकारस्मरणरूपव्याख्यानेन ग्रहणात्। वप्रश्लेषे शङ्कते। **मा भवानिति।** अवेराटि वृध्यवृध्योरविशेष इति तन्निवृत्तये मा इति प्रयुक्तः। एकादेशे पुनरप्यविशेषस्तदवस्थ इति भवानित्युक्तम्। यद्यप्येकरूप्याय भाष्ये मवावपि तथैवोक्तम्। तथापि फलाभावादाह। **अमवीदिति। तर्हीति** वप्रश्लेषे सतीत्यर्थः। इदमादौ योज्यम्। **पिश्वीति।** हन्यन्तेत्यत्रेत्यादिः। वृद्धिशब्दाकरणजलाघवेन सार्धमात्रागौरवं शङ्क्यम्, 'जाग्रवृमवेदिताम्' इत्यपि सुपठम्। नन्वेवं णिश्वोः प्रतिषेधोन स्यात् अत आह। **न ह्येति। औनयीदिति।** 'नोनयति' (३-१-५१) इति चङ्निषेधः अग्रे 'विभाषा धेट्श्व्यो' (६-१-४९) रिति वैकल्पिकः। एवं च प्रक्षेपे। **अत इति।**

मवोर्निषिध्यते न तु ''अतो हलादेः'' (पा०सू० ७-२-७) इत्येषाऽपि । ''मध्येऽपवादाः पूर्वान्विधीन्बाधन्ते नोत्तरान्'' (प०भा० ६०) इति न्यायात् । न चैवं जागर्त्तेरपि तथा प्रसङ्गः, तत्र बाध्यसामान्यचिन्तामाश्रित्य स्वविषये प्राप्तं सर्वं बाध्यते इति स्वीकारात् । यद्वा, अपवादे निषिद्धे उत्सर्गो न प्रवर्त्तते इति बाध्यसामान्यविशेषचिन्तयोर्बाधके निषिद्धे बाध्यस्य प्रवृत्त्यप्रवृत्योश्च लक्ष्यानुरोधेन व्यवस्थाया अनुपदमेव वक्ष्यमाणत्वात् । न चैवम् 'अगवीत्' इत्यत्रापि नित्या वृद्धिः स्याद्वकारप्रश्लेषादिति वाच्यम्, सिचि वृद्धेरिवास्या अपि धातुग्रहणेन वारणात् । तस्मात्सिच्यन्तरङ्गाश्रयणेनैव 'अनुवीत्' 'अधुवीत्' इत्यादेः सिद्धौ 'क्ङिति च' (पा०सू० १-१-५) इति प्रतिषेधस्यानपेक्षणाद्वृद्धिग्रहणं व्यर्थमेवेति ।

अत्रोच्यते - वकारप्रश्लेषे सति ''श्नवतिर्गतिकर्मा कम्बोजेषु विकार एवैनमार्या भाषन्ते'' इति पस्पशायां भाष्यकारैरभ्युपगतस्य श्नध्धातोरपि नित्यवृद्धिप्रसङ्गः, तस्यापि प्रतिषेधे वा कथं पिश्विभ्यां निमानम् ? गौरवप्रसङ्गात् ।

यत इत्यादिः । **वेह** अमवीदित्यत्र । अव् हितादाह । **मवेरिति । चैवं** मध्येऽपेति न्यायाङ्गीकारे । **तथा प्रसङ्गः** 'अत' इति विकल्पप्रसङ्गः । **तत्र** जागर्त्यंशे । **इतीति ।** इति व्याख्यानस्वीकारादित्यर्थः । अत एव त्त्वासङ्गतिः । एकदेश्युक्तिमाह । **यद्वेति । तौ सदि**त्यादिनिर्देशात् भ्रष्टावसरन्यायस्यात्र शास्त्रेऽनाश्रयणादिदं चिन्त्यम् । **प्रवर्त्तत इति ।** इत्यत्र आश्रयणीयमित्यस्यानुषङ्गः । ननु विनिगमनाविरहादुभयत्र वैपरीत्यं कुतो नात आह । **बाध्येति ।** निर्दुष्टत्वे क्तोक्तवप्रश्लेषेणालावीदित्यत्र नित्यवृध्यङ्गीकार इत्यर्थः । प्रागुक्तदोषाभावेऽपीत्यर्थः । अपिरहितपाठे तु **नित्येति ।** विकल्पं बाधित्वेति भावः । अपिना विकल्पवृद्धिसमुच्चयः । वस्तुतः शङ्का समाधानं चायुक्तमेवेति प्रागुक्तं न विस्मर्त्तव्यम् । सिचि वृद्धिस्तु अचैषीदित्यादौ गुणे कृते चारितार्थ्यं तन्मत इति बोध्यम् ।

३.३५ सूक्तिरत्नाकरखण्डनम्

तदनुरोधेनैव समाधत्ते । **वकारेति ।** ननु तत्राविमव्योरिव श्नवेरपि पाठान्न दोषोऽतः पक्षान्तरमाह । **तस्यापीति । कथमिति ।** ते त्रयस्तौ द्वावित्यतुल्यत्वात्परिवर्त्तनासम्भवस्तदाह । **गौरवेति ।** आधिक्येत्यर्थः । एतेन समत्वादिति वाच्ये गौरवप्रसङ्गादित्ययुक्तमित्यपास्तम् । वस्तुतस्तु सर्वमिदं चिन्त्यम् । णिश्विभ्यां तौ निमातव्याविति भाष्यप्रामाण्येन श्नव्धातोः पवर्गीयान्तत्वात्, वबयोः तुल्यश्रुतित्वाल्लोके दन्त्योष्ट्यश्रुतिः । वार्णादाङ्गमित्यनयाऽलावीदित्यादेः सिद्धे वकारप्रश्लेषानुपयोगाच्च । गुणादीनामन्तरङ्गत्वेऽपि वृद्धेरपवादत्वात्तद्विषयेऽन्तरङ्गप्रवृत्तेः

किञ्च, न वयं व्यसनितया सिच्यन्तरङ्गं नास्तीति ब्रूमः, किन्तु न्यायबलाज्ज्ञापक-बलात्फलानुरोधाच्च । तथा हि, येन नाप्राप्तिन्यायेनान्तरङ्गं वृद्ध्या बाध्यते 'सत्यपि सम्भवे बाधनं भवति' इत्यभ्युपगमात् । अन्यथा तक्रेप दधि न बाध्येत, श्नमकजादिभिश्च शप्प्रत्ययकप्रत्ययादयो न बाध्येरन्, देशभेदेनोभयसम्भवात् । न च मध्येऽपवादन्या-येनोवङेव वृद्ध्या बाध्यते न तु गुणोऽपीति वाच्यम्, बाध्यस्य भेदेन विवक्षायां ह्येतदेवं स्यात् । बाध्यस्य सामान्यचिन्तायां तु स्वविषये प्राप्तं स्वानपवादभूतं सर्वं बाध्यते, यथा ''अचि र'' (पा०सू० ७-२-१००) इत्येतेन गुपदीर्घोत्वानि । अन्यथा तत्रापि मध्येऽपवादन्यायेन रेफो दीर्घोत्वे एव बाध्येत न तु गुणम्, तस्य परत्वात् बाध्यस्य च क्वचिद्भेदेन चिन्ता क्वचित्सामान्यरूपेपेत्युभयमपि लक्ष्यानुरोधात्तत्रतत्राश्रीयते । णिश्विग्रहणं चात्र लिङ्गम् । अन्यथान्तरङ्गत्वाद् गुणायादेशयोः कृतयोर्यान्तानां नेति

दुर्वचत्वाच्चेति बोध्यम् । तदेतदभिप्रेत्याह । **किञ्चेति । व्यसनितया** दुर्गुणतया । कैयटोक्तिं सिद्धान्तभूतामादावाह । **न्यायेति ।** भाष्यकारैकदेश्युक्तिमाह । **ज्ञापकेति ।** कैयटाद्येकदेश्युक्तिमाह । **फलेति ।** तत्रादौ न्यायमाह । **येनेति । अन्तरङ्गं** गुणादिकं । ननु तदप्राप्तियोग्येऽचारितार्थेऽपि गुणे कृते वृद्धिश्चरितार्थाऽत आह । **सत्यपीति ।** यथा 'ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिण्याय' इति विहिततक्रदानं स्वदानात्पूर्वमुत्तरं वा सत्यपि सम्भवे दधिदानस्य निर्वर्त्तकं भवति, एवमिह अन्तरङ्गकर्मणः पूर्वसम्भवेऽपि वृद्ध्या बाध इति भावः । लौकिकदृष्टान्तमुक्त्वा शास्त्रीयदृष्टान्तमाह । **श्नमकेति ।** यद्यपि श्नमः कर्त्रर्थकसार्वधातुकपरत्वं विच्छिद्यते इति सम्भव एव, तथापि सामर्थ्याद्व्यवधाने सम्भवमात्रेण सिद्धे शास्त्रबाधकल्पने मानाभावः । एवमकचोक्तार्थत्वेऽपि द्वौ ब्राह्मणाविति वत्को दुर्वार इति भावः । **न चेति ।** तथा च वृद्धिग्रहणसाफल्येऽपि स्यादेतदित्याद्युक्तं न युक्तमिति भावः । हि यतः । अनतिप्रसङ्गायाह । **स्वानपेति ।** तस्यानित्यत्वमपाकर्तुं तद्विषयमाह । **यथेति । त्वानीति ।** बाध्यन्त इति शेषः । अन्यथा शास्त्रे तदनङ्गीकारे । नन्वेवमपि वैपरीत्ये दोष एवात आह । **बाध्यस्य चेति ।** चो वाक्यालङ्कारे । सिद्धान्तभूतमेवं न्यायबलमुक्त्वा एकदेश्युक्तज्ञापकबलमाह । **णिश्वीति ।** सूत्रे सिच्यन्तरङ्गाभावे । अन्तरङ्गत्वादिति क्वचित्पाठः । तत्राप्युत्कृष्टत्वादन्तरङ्गत्वादित्येवार्थः । न च णिश्विस्थानेऽविमवी पाठ्याविति वदन्तं प्रति णिश्विग्रहणज्ञापकत्वाभिधानमयुक्तमिति वाच्यम् । ज्ञापकत्वे सम्भवति नियमासम्भव इत्याशयात् । एतेनायुक्तमुक्तरीत्येदं भाष्योक्तमत आह न्यायादितीति **विवरणो**क्तमपास्तम् । ननु उक्तरीत्या णिश्वोर्गुणं वार्णपरिभाषयाऽयादेशं च बाधित्वा प्राप्तवृद्धेर्निषेधाय णिश्विग्रहणमावश्यकमिति कथं

निषेधादेव 'औनयीत्' 'अश्वयीत्' इत्यादेः सिद्धौ किं पिञ्चिग्रहणेन? ज्ञापकान्तरमप्युक्तं भाष्ये - यच्च करोत्यकारग्रहणं लघोरिति कृतेऽपीति। अस्यायमाशयः– 'अतो हलादेः'' (पा०सू० ७-२-७) इति सूत्रेऽदृग्रहणस्य न तावत्सन्ध्यक्षरादिकं व्यावर्त्यम्, लघुग्रहणेनैव व्युदासात्। इदुदृतः परमवशिष्यन्ते 'अचेतीत् 'अकोषीत्' 'अनर्तीत्' इति। तेऽप्यन्तरङ्गेण गुणेनापहृताश्चेत्तर्हि व्यर्थमदृग्रहणं स्यात्। न च 'अकुटीत्' 'अपुटीत्' इत्यादावुकारव्युदासाय तदिति वाच्यम्, तत्राप्यन्तरङ्गेण गुणेन वृद्धिबाधे सति गुणे ङित्त्वान्निषिद्धेऽपि वृद्धेरप्रवृत्तेः, न हि देवदत्तस्य हन्तरि हते देवदत्तस्य पुनरुन्मज्जनं भवतीति न्यायात्। अत एव ''नान्तः पादम्'' इति पाठे पूर्वरूपनिषेधे सत्ययादयोऽपि न प्रवर्त्तन्ते। तेन 'सुजाते अश्वसूनृते', इत्यादि च सिध्यतीति स्वीकृतं भाष्ये। न चैवमपवादाभावे पुनरुत्सर्गस्य स्थितिरिति निर्विषयं स्याद् 'वृक्षौ' इत्यादौ ''नादिचि'' (पा०सू० ६-१०४) इति पूर्वसवर्णे निषिद्धे वृद्धिश्च न प्रवर्तेतेति वाच्यम्। ''भिद्योद्धौ नदे'' (पा०सू० ३-१-११५) ''तौ सत्'' (पा०सू० ३-२-१२७) इत्यादि लिङ्गेनापवादे निषिद्धे उत्सर्गोऽपि न प्रवर्त्तते इत्यस्यासार्वत्रिकत्वाभ्युपगमात्। तदेतत्तत्रतत्रोच्यते - ''नोत्सहते प्रतिषिद्धा सती बाधितुम्'' इति। तथा च पक्षभेदाश्रयेण ''अतो हलादेः'' (पा०सू० ७-२-७) इत्यदृग्रहणमपि ज्ञापकमिति स्थितम्।

ज्ञापकमत आह। **ज्ञापकान्तरमिति। नन्वतो हलादे**रित्यत्रात्ग्रहणस्याकोषीदित्यादेरन्तरङ्गत्वाद्गुणे कृतेऽलघुत्वाद्वृद्ध्यभावेन सिद्धावव्यावर्त्यत्वेऽप्यकटीदित्यादौ अन्तरङ्गतया वृद्धिबाधकगुणस्य 'ङ्किति च' इति निषेधः भ्रष्टावसरन्यायाभावात्प्राप्तवृद्धिवारकतया साफल्ये सति कथं ज्ञापकमत आह। **अस्यायमाशय इति।** आदिना हलां परिग्रहः। तादृशलृकारस्याभावादाह। **इदुदृत इति।** ह्रस्वा इकारोकारऋकारा इत्यर्थः। **न चेति।** अत्र गुणस्य निषेधादविषय इति भावः। प्राचामनुरोधेनाह। **तत्राप्यन्तरित्यादिना। न हीति।** न्यायान्तर्गतम्। अत एव न्यायाङ्गीकारादेव। ननु प्रकृत्यान्तरिति पाठे प्रकृतिभावेन साक्षादेवोत्सर्गापवादयोर्निवृत्तिर्न त्वपवादस्य साक्षान्निवृत्तिस्तेन बाधादुत्सर्गस्यापीत्येवमत आह। **नान्तरिति। पूर्वरूपेति।** अनन्तरत्वादिति भावः। चो हेतौ प्रवर्त्तन्त इत्यग्रे संयोज्यः। न प्रवर्त्तन्त इति हेतोरित्यर्थः। **चैवं** न्यायङ्गीकारे। तत्रेष्टापत्तावाह। **वृक्षाविति।** चो व्युक्रमे। न प्रवर्त्तन्ते चेत्यर्थः। तदेतत् असार्वत्रिकत्वं अभिप्रेत्येति शेषः। **बाधितुमिति।** उत्सर्गमित्यादिः। **पक्षभेदेति।** अपवादे निषिद्धे उत्सर्गो नेति क्वचित्कत्वाय पक्षविशेषाश्रयणेत्यर्थः। अपिरेवार्थे। स च व्युत्क्रमे। ज्ञापकमेवेत्यर्थः।

फलमप्यस्ति। यदि हि सिच्यन्तरङ्गं स्यात्तर्हि चिनीप्रभृतिभ्यो यङ्लुगन्तेभ्यः चिरिपोतिजिरिपोतिभ्यां च लुङि सिचि 'अचेचायीत्' 'अनेनायीत्' 'अचिरार्यात्' 'अजिरायीत्' इति न स्यात्, गुणायादेशयोः कृतयोर्यान्तानां नेति प्रतिषेधप्रसङ्गात्। यदि तु बाध्यविशेषचिन्तायां मध्येऽपवादन्यायमाश्रित्य उवङेव बाध्यते न तु गुपे इत्याश्रीयते तदाप्येतन्न सिद्ध्येदेव। तस्मात्सिचि सर्वमप्यन्तरङ्गं नास्त्येवेति सिद्धान्तं साधयितुं बाध्यसामान्यचिन्तैवाश्रयणीया। एतदर्थमेव हि भाष्ये ज्ञापकोपन्यासः कृतः। अन्यथा

किञ्च वृद्धिग्रहणाभावे अकोषीदित्यादौ व्यञ्जनस्य वृद्धिवारणाय बाध्यविशेषचिन्तापक्षे पूर्वपक्षिणा सिचि वृद्ध्यपवादभूतहलन्तलक्षणाया **नेटी**ति निषेधे भ्रष्टावसरन्यायेन सिचिवृद्ध्यप्राप्तेः स्वीकारेण तद्रीत्या ज्ञापकमेवेत्यपि बोध्यम्॥

नन्विदमपि सर्वमयुक्तम्, भ्रष्टावसरन्यायानाश्रयणात्। हते देवदत्ते तद्धन्तरि हतेऽपि नोन्मज्जनम्। हतत्वारोपे तु सुतरां, हन्तुमुद्यतस्य हनने तूज्जीवनमस्त्येवेति न्यायशरीरेण तन्न्याय-स्याप्यत्राविषयत्वाच्च। अत एव वृक्षावित्यादिसिद्धिरिति। **तौ सदि**त्यादीनामज्ञापकत्वेना-सार्वत्रिकत्वस्यानुपयोगाच्च। 'नान्तः पाद'मित्यत्रैङोऽतीत्यनुवृत्त्य एङोऽति यद्यत्प्राप्नोति तस्य निषेध इत्यर्थमाश्रित्य पाठान्तरैकवाक्यत्वायनान्तरेति न्यायानाश्रयणेन वा सामान्यचिन्तामाश्रित्य वा तस्य सर्वनिषेधकत्वस्यान्यत्रोक्तत्वाच्च। 'नोत्सहत' इति भाष्यस्योक्ताशयकत्वस्यैव सत्वाच्च। एवञ्च कुटीदित्यादौ वृद्धिभावा अत इत्यावश्यकमितीदमपि न ज्ञापकमिति ज्ञापकबलाभाव एव। अतः फलानुरोधमाह। **फलमस्तीति। प्रसङ्गादिति।** नन्विदमप्ययुक्तम्। [1]अनेनायीदित्यादौ उक्तरीत्या गुणे कृतेऽपि वर्णपरिभाषयाऽयादेशात्पूर्वं वृद्धिप्राप्तेः। एवञ्च फलानुरोधोऽपि नेति न्यायबलमेव प्रथमोक्तं पर्यवसितम्। तदेतत् ध्वनयितुं लक्ष्यानुरोधेन व्यवस्थितपक्षयोरत्रैकदेशिना प्रतिबन्ध्या साधितां बाध्यसामान्यचिन्तां दृढयितुं च तत्रैकदेश्युक्तिमेवादावाह। **यदि त्विति। गुप इति**। गुणोऽपीत्यर्थः। अचैषीदित्यादीनां साधितत्वादाह। **एतदिति।** अचेचायीदित्यादिक-मित्यर्थः। प्रागुक्तरीत्याऽस्य सिद्धत्वादिदमपि चिन्त्यमत आह। **तस्मादिति।** बुद्धिस्थात्प्रा-गुक्ताल्लक्ष्यानुरोधादित्यर्थः। अपि व्युत्क्रमे। अन्तरङ्गमपीत्यर्थः। तेन परादिसमुच्चयः। **चिन्तैवेति।** अस्यां चाकृते चारितार्थ्येऽपि तदप्राप्तियोग्येऽचारितार्थ्यात्स्वप्राप्तिकाले प्राप्तसकलान्तरङ्गस्यापि येन नेति न्यायेन बाधः। एवञ्च न ज्ञापकोपयोगो, नापि ज्ञापकसम्भवः, नापि प्रयोजनं, नापि

---

१. अचेचायीदित्यादौ इति ख।

न्यायेनैव सिद्धेऽन्तरङ्गस्यापि बाधे किं ज्ञापकवर्पनेन ? एवं स्थिते 'न्यनुवीत्' 'न्यधुवीत्' इत्यत्र ''कृङिति च'' (पा०सू० १-१-५) इति निषेध एवाश्रयपीयस्तथा चेग्लक्षपत्व-सिद्धये वृद्धिग्रहणमपीह कर्त्तव्यमेवेति स्थितम्। एवञ्च सत्यसम्भवादपि वृद्ध्या

वकारप्रश्लेषस्य फलं, नाप्यविमव्योः प्रतिषेधस्येति, शवधातौ वृद्धिविकल्प एवेति बोध्यम्। नन्वेवं न्यायनिर्वाहे भाष्योक्तज्ञापकासङ्गतिरत आह। **एतदर्थमिति।** बाध्यसामान्यचिन्ताश्रयणार्थ-मेवेत्यर्थः। एवेन न्यायेन न बाधसम्भव इति भाष्ये ज्ञापकाश्रयणमित्यस्य व्यवच्छेदः। वस्तुतः उक्तरीत्या ज्ञापकत्वासम्भवोऽत आह। **उपन्यास इति।** तथा च न ज्ञापकत्वे भाष्यस्य तात्पर्यं, किन्तु तत्कथनमात्रेण न्यायेन बाधे बाध्यसामान्यचिन्तैवाश्रयणीया, न तु विशेषचिन्तेति प्रतिपादने। अत एवात्ग्रहणस्य ज्ञापकत्वं प्रागुक्तं संखण्ड्य 'यत्तर्हि णिश्वोः प्रतिषेधं शास्ति तेन नेहान्तरङ्गमस्तीति दर्शयतीत्येव'मुक्त्वा पुनर्यच्चेत्यनेन साकाङ्क्षमुक्तं भाष्ये। तेन तस्यापि तत्प्रदर्शकत्वं, न तु ज्ञापकत्वमिति सूचितमिति भावः। **अन्यथा** तस्यैतदर्थकत्वानाश्रयणे। अपिः परादिसमुच्चायकः। अत्र **भट्टनारायणगुरुनारायणसरस्वत्यादिभिर्यदुक्तं** तत्सर्वमसङ्गतमिति प्रतिपादितं **छायायाम्।** बहुवक्तव्यत्वादत्र न लिखितं तत एव बोध्यम्। वृध्यंशे परमप्रकृत-मुपसंहरति। **एवं स्थिते इति।** वृद्धेरन्तरङ्गस्यापि न्यायेन सर्वस्य बाधकत्वेन प्रागुक्तसकल-लक्ष्यसिद्धौ सत्यामित्यर्थः। **निषेध एवेति।** एवेनान्तरङ्गत्वादुवङि हलन्तत्वान्नेटीति निषेधव्यवच्छेदः। अन्तरङ्गस्य वृद्ध्या बाधनादिति भावः। अपिः सिद्ध्य इत्यत्र योज्यः। सिद्ध्येऽपीत्यर्थः। तेनाकोषीदित्यादौ व्यञ्जनस्य वारणाय स्थानिनिर्देशार्थस्य समुच्चयः। भ्रष्टाव-सरन्यायस्यानाश्रयणादत्र प्रागुक्तत्वाच्च। तेन तत्र निर्वाहः। नेटीत्यत्र प्रागुक्तबाध्यसामान्यचिन्ता-प्येकदेश्युक्तिः। अत एव न्यस्तारीदित्युपक्रम्य हलन्तलक्षणायास्तु नेटीति प्रतिषेध इत्युक्तं भाष्ये। अत एव च 'तस्मादिग्लक्षणावृद्धिरास्थेये'त्युपसंहृतं भाष्ये। यस्मादकोषीदित्यादौ व्यञ्जनस्य वृद्धिः प्राप्नोति एव। तस्मात् इक्लक्षणं स्थानितया निमित्तं यस्या तादृशी **सिचि वृद्धि**रिति वृद्धिरास्थेयेति तदर्थः। निषेधसिद्धिस्त्वेवं सत्यार्थिकीति न पृथगुक्ता। यदि तु यस्मात् सिच्यन्तरङ्गं नास्ति तस्मादित्यर्थोऽभिमतो भवेत्, तर्हि तस्मादुत्तरार्थं वृद्धिग्रहणमित्येवोपसंहृतं स्यात्। न च महता प्रयत्नेनोत्तरार्थत्वमुपपाद्येहार्थत्वोपसंहारो न युक्त इति वाच्यम्। उत्तरार्थता सम्यक् प्रतिपादिता, सा विनाऽप्युपसंहारं सुनिश्चयैव, सा तु प्रागुक्ता। इहार्थता प्रौढ्या निरस्तेति प्रौढ्यादिज्ञापनायैवमुप-संहार इत्याशयात्। एवमुक्तार्थिकया निषेधसिद्धये व्यञ्जनस्यावृद्धये शेषपूरणेनोभयोरुपसंहार-सम्भवाच्चेति दिक्। गुणांशे फलस्योक्तत्वादाह। **वृद्धीति।** एवं सति तेन येन नेति न्यायेनेव

सिच्यन्तरङ्गं सर्वं बाध्यते । यदि हि स्यात्तर्हि कापि सिचीगन्तमङ्गं न लभ्येतेत्यवधेयम् । तथा चेग्लक्षपत्वस्य निषेधप्रवृत्त्यर्थमावश्यकत्वे स्थिते तत्र तत्रात्सन्ध्यक्षरव्यञ्जनादिव्यावृत्तिरपीक्पपरिभाषयैव सिध्यतीति ज्ञापकवर्णनादिक्लेशोऽपि नाश्रयणीयः । न चैवं 'द्यौः' 'पन्थाः' 'इमम्' इत्यादावपीक्पदोपस्थितिवशादिकामेवौत्वमात्वमत्वं च स्यादिति वाच्यम्, गुणवृद्धिशब्दयोरनुवृत्तौ पुनर्गुणवृद्धिग्रहणसामर्थ्याद्धि शब्दव्यापारोऽप्याश्रीयते, गुणवृद्धी ये गुणवृद्धी न तु शब्दान्तरेण विहिते इत्यनुवृत्ताभ्यां विशेषणाद्वा । ननु

सर्वथाऽनवकाशत्वादपि बाध इति कैयटानुक्तमाह । **एवं चेति ।** वृद्धेरिग्लक्षणत्वे सतीत्यर्थः । अपि र्येन नेति न्यायसमुच्चये । **अङ्गं नेति ।** तथा च कृते चारितार्थ्यमपि नेति भावः । परमप्रकृतमुपसंहरति । **तथा चेतीति ।** प्रागुक्तलक्ष्याणां प्रकारान्तरेण सर्वथा सिद्ध्यभावे चेत्यर्थः । **निषेधप्रवृत्त्यर्थमिति ।** भिन्न इत्यादौ निषेधार्थमकोषीदित्यादाविक एव स्थाने, न तु व्यञ्जनस्थाने प्रवृत्त्यर्थं चेत्यर्थः । स्थिते **सार्वधातुकार्धधातुकयो**रित्यत्र **सिचिवृद्धिर्मृजेर्वृद्धि**रित्यत्र च तत्र तत्र च सूत्रे । ज्ञापकेत्यत्रान्वयः । **व्यञ्जनेति ।** उपसर्गाद्यभिप्रायमिदम् । आदिनाट्परिग्रहः । अपिना निषेधप्रवृत्तिसमुच्चयः । आदिनोपदेशसामर्थ्यपरिग्रहः । अपिना प्रागुक्तयोगविभागादिसकलसमाधिकृतक्लेशसमुच्चयः ।।

३.३६ इक्परिभाषायां गुणवृद्धिशब्दानुवृत्तिविचारः

एवं परिभाषाङ्गीकारे । **इक्पदोपेति ।** 'दिव औत्' इत्यादिष्वित्यादिः । **इकामिति ।** तथा च दौरिति, पन्था इत्यत्रेकारस्यात्वे हलन्तत्वेन सुलोपे नलोपे पथेति, इममित्यत्रेकारस्यात्वे अममिति स्यादिति भावः । उपक्रमस्थगुणवृद्धिग्रहणगुणवृद्धिशब्दस्वारस्यादाह । **गुणवृद्धीति । वृत्ताविति ।** इष्टे सिद्धे इति शेषः । हिरत्रान्वेति । हि यतः । संज्ञाकरणेनान्यत्र संज्ञिपरत्वेन योग्यतया 'न धात्वि' त्यादिसाहचर्येणेक इति षष्ठीनिर्देशेन च तस्यार्थपरत्वादिति तदर्थः । **शब्दव्यापेति ।** गुणवृद्धिग्रहणं गुणवृद्धिशब्दविहितगुणवृद्धिलाक्षणिकमित्यर्थः । तदेवाह । **गुणेति ।** इति विहिते इति शेषः । अत एवाह । **न त्विति ।** इको गुणवृद्धी इत्युच्चार्य गुणवृद्धिग्रहणमनुवर्त्तत इति सम्बन्धानुवृत्तिप्रदर्शनपरभाष्योक्तन्यनुरोधेनाह । **अनुवृत्ताभ्यामिति ।** इत्येवमित्यध्याहृत्यात्रत्ययोरर्थपरत्वेनानुवृत्तयोरर्थाधिकाराददेङ्गुणो वृद्धिश्चेत्यदेङां वृद्धिसंज्ञा प्राप्नोतीति भाष्याच्च शब्दपरत्वेन ताभ्यामनयोर्विशेषणादित्यर्थः [१]..... लाभ इति भावः । न चैवमुत्तरत्र निषेध्यसमर्पणाय

---

१. अत्र ग्रन्थः त्रुटितः ।

'अचश्च' (१-२-२८) इति सूत्रे ह्रस्वादिग्रहपानुवृत्त्या संज्ञया विधाने पदोपस्थितिरिति स्थास्यति। तत्सामर्थ्याद्'' ''दिव औत्'' (पा०सू० ७-१-८४) ''पथिमथ्यृभुक्षामात्'' (पा०सू० ७-१-८५) ''त्यदादीनामः'' (पा०सू० ७-२-१-२) इत्यत्रेक्पदोपस्थानं न भविष्यति। यदि हि स्यात्तर्हि ''अचश्च'' (पा०सू० १-२-२८) इति सूत्रे ह्रस्वादि-ग्रहपानुवृत्त्यासंज्ञया विधाने पदोपस्थितिरिति स्थास्यति तत्सामर्थ्याद्'' ''दिव औत्'' (पा०सू० ७-१-८४) ''पथिमथ्यृभुक्षामात्'' (पा०सू० ७-१-८५) ''त्यदादीनामः'' (पा०सू० ७-२-१-२) इत्यत्रेक्पदोपस्थानं न भविष्यति। यदि हि स्यात्तर्हि ''अचश्च'' (पा०सू० १-२-२८) इत्यत्र संज्ञया विधानेऽतियत्नाश्रयणं व्यर्थं स्यादिति चेत् ? न, ''दिव उत्'' (पा०सू० ६-१-१३१) इत्यादिष्वगुणवृद्धिसंज्ञकेष्वच्परिभाषानिवर्त्तनेन चरितार्थत्वात् ''अष्टन आ विभक्तौ'' (पा०सू० ७-२-८४) इत्यादाविकोऽसम्भवेन तत्र चरितार्थत्वाच्च। तस्मात् 'द्यौः' 'पन्था' 'इमम्' इत्यादिसिद्धये इहापि संज्ञाविधाने नियमं

गुणवृद्धिग्रहणावश्यकत्वे सामार्थ्याभावाद्गुणग्रहणसामर्थ्यादिति भाष्यासङ्गतिः। अनुवर्त्तमानयोः स्वरूपपरत्वेन निषेध्यसमर्पकत्वाभावादिति वाच्यम्। आगन्तूनामिति न्यायेनादेङ्सूत्रे गुणपदोत्तरं वृद्धिपदोपस्थित्या तत्साहचर्येण तत्र सूत्रे स्वरूपपरत्वेऽपि, अग्रे प्रागुक्तयुक्तिभिरर्थपरत्वात्। एवमप्यत्रत्ययोः शब्दपरत्वेन योजनासम्भव इति नैतन्मते छेदः। अत एव स्वरूपपदार्थकेनान्यतरेण विशेषणादीदृशार्थलाभ इत्युक्त**मुद्योते।**[1] अत्राद्यमतमेव युक्तम्। सम्बन्धानुवृत्तिप्रदर्शनपरभाष्यस्य यथान्यासाभिप्रायकत्वात्। अत एव कैयटेनोत्तरपक्षत्वेन तदुक्तम्। किञ्चानुवर्त्तमानासमस्तै-कवचनान्तगुणवृद्धिग्रहणयोर्द्विवचनान्तसमस्तपरपदार्थाविभागापन्नगुणभूतवर्तिपदार्थगुणवृद्धि-विशेषणत्वासम्भवात् प्रत्येकं समुदायविशेषणत्वं तु बाधितमेव। न हि सम्भवति देवदत्तयज्ञदत्तौ दण्डी कुण्डलीति। यत्तु विरुद्धसंख्यावरुद्धत्वेन विरोधात् समुदायविशेषणत्वं न समानाधि-करणस्थले। प्रकृत्यर्थयोरिव प्रत्ययार्थयोरप्यभेदान्वयव्युत्पत्तेरिति **नारायणः।** तन्न। वेदाः प्रमाणमित्यादौ दोषापत्तेः। सामानाधिकरण्येनान्वये समानविभक्तित्वस्येव समानवचनत्वस्यातन्त्र-त्वाच्च। **ह्रस्वादीति।** ऊकाल इत्यतः। आदिनाऽचो परिग्रहः। **व्यर्थमिति।** तस्यापीदमेव व्यावर्त्तमिति भावः। **वृद्धिसंज्ञकेष्विति।** द्वन्द्वगर्भबहुव्रीहिगर्भो बहुव्रीहिः। ह्रस्वांशे तदुक्त्वा दीर्घांशे तदाह। **अष्टन इति।** बाधात्तत्रास्या अप्रवृत्तिरिति भावः। **नियममिति।** इको गुणेति परिभाषायां

---

१. म.भा.प्र.उ.पृ.सं. १७८ पथमो भागः।

संपादयितुं पुनर्गुणवृद्धिग्रहणमिति प्राञ्चः। ननु 'पन्थाः' इत्यनुदाहरणम् ''इतोऽत्'' (पा०सू० ७-१-८६) इति सिद्धे आद्विधिसामर्थ्यादेवेक्पदस्यानुपस्थितेरिति चेत् ? न, ऋभुक्षिऋकारोकारयोरर्थे आद्विधिसम्भवात्। न चेकः सोश्चानन्तर्यविवक्षणाद्येन नाव्यवधानाश्रयणाच्च नैवमिति वाच्यम्, तथापि सम्बुद्ध्यर्थतया सामर्थ्योपक्षयात्। न चैवम् 'इत आत्' इत्येव ब्रूयादिति वाच्यम्, ऋभुक्षणमिन्द्रमित्यस्यासिद्ध्यापत्तेः।

प्रवर्त्तयितुमित्यर्थः। **प्राञ्च इति।** भाष्यकारादय इत्यर्थः। यत्तु दिवो यदिक् तस्येत्यर्थे नातिप्रसङ्गः। तत्र **लोपो व्यो**रिति वलोपः। सूत्रेऽपवादत्वात् दिव उदितु न। अभिव्यक्तेति न्यायात्। अनुकार्यानुकरणयोरभेदविवक्षायामपवादत्वाच्च। किन्तु दिव औदित्यत्रेक्पदोपस्थितावपि न दोषः। दिक् स इत्यत्रौत्वोत्वयोः प्रसङ्गे नित्यात्वादाक्षेपस्योत्वम्। एकदेशेति न्यायाद्विकारान्यानुपूर्व्यैक्याच्च। शब्दन्तरप्राप्तिरपि न, औत्वं तु कृते उत्वेऽन्तरङ्गत्वात् यणि चोकारस्य प्राप्योत्यकृते त्विकारस्येति शब्दान्तरप्राप्तेरनित्यं यणोत्वयोः व्याश्रयत्वाद्वार्णादाङ्गमिति न। एवञ्च तस्योत्वे कृते सिद्धं द्यौरिति **नारायणः।** तन्न। **लोपो व्यो**रित्यत्र वस्य भगवता प्रत्याख्यानात् सौत्रत्वकल्पनगौरवात्। सावपि पदमिति पक्षस्यासिद्धान्तत्वात्। औत्वस्योत्वापवादत्वाच्च। सत्यपि सम्भव इति भाष्योक्तः व्याश्रयेऽपि तत्प्रवृत्तश्चेदप्यनन्त्यगहणप्रत्याख्यानान्न यासयो (पा०सू० ७-३-५४) रित्यादिज्ञापकाच्च स इत्यादिसिद्धिः। एवं 'इदमो मः' 'इदोऽय् पुंसि' इति ज्ञापकादिममित्यादिसिद्धिः। न चाद्यं **मो राजीति** वदनुस्वारबाधनार्थम्। तस्यासिद्धत्वेन तथा दुर्वचत्वात्। न च सिद्धस्य बाध्यस्याभावात्तस्य सिद्धस्य मवि ज्ञाप्यत इति वाच्यम्। एवं ह्युभयबाधपत्तेर्गौरवात्। तथा च तत्र फलमुक्तार्थाङ्गीकारस्य। तथापि द्यौः पन्था इत्यादेरन्यथासिद्ध्यभावेन तदर्थं तस्यावश्यकत्वमिति। एवं स इत्यादीनां सिद्ध्या ज्ञापकाद्याश्रयणक्लेशो वाऽऽदर्तव्य इति भगवदाकूतम्। अत एव तयोः पृथगुक्तिः। तदेतत् ध्वनयितुं तस्यान्यथासिद्धिरिति सूचयितुं **कृष्णो**क्त्यसाङ्गत्यं ध्वनयितुं च तत्र शङ्कते। **ननु पन्था इति।** अतिप्रसङ्गस्येति शेषः। सिद्धे तेनात्वे सर्वनामेति दीर्घेणेदानीमिष्टना तरूपे सिद्धे। **आद्विधीति।** पथिमत्यग्रे एव। कार्यग्रहणं च तत्र न कार्यमिति भावः। अनिष्टसम्पादकतया साफल्यमाह। **ऋभुक्ष्यकेति।** षष्ठीतत्पुरुषः। पथिमथिग्रहणं तूत्तरार्थमेव स्यात्। पूर्वत्र पाठस्तु भिन्नविभक्त्यनुच्चारणजलाघवानुरोधेनेति भावः। सा किदानुवृत्तमिको विशेषणं, न पथ्याऽद्यंगस्येत्याशयेनाह। **न चेक इति। व्यवधानेति।** व्यवधानत्वानाश्रयणाच्चेत्यर्थः। **सम्बुद्ध्यर्थेति।** तत्र दीपाप्रवृत्तेरिति भावः। **इत आदिति।**

आद्विधौ हि ''वा षपूर्वस्य'' (पा०सू० ६-४-९) इति तत्सिद्धिरिति दिक् ।

यत्तु भाष्ये 'सः' 'इमम्' इत्युदाहृतं, तत्र ''स इमं मन्त्रमपश्यत्'' इति ब्राह्मणवाक्यैकदेशानुकरणमात्रम् । उदाहरणं तु 'इमम्' इत्येव न तु 'सः' इत्यपि, तच्छद्धे इकोऽसम्भवेन ''इकः'' (पा०सू० १-१-३) इति नियमस्याप्रवृत्तेरित्याहुः ।

वस्तुतस्तु स इत्यप्युदाहरणं साध्वेव । ''त्यदादीनामः'' (पा०सू० ७-२१-२) इति

इतोऽदिति सूत्रेऽत्स्थाने आदित्येवेत्यर्थः । **इतोदि**ति विहायावशिष्टं सूत्रभागमेकं पठेदिति यावत् । तथा चात्ग्रहणमेवोक्तार्थज्ञापकमिति भावः । यथाश्रुते त्वसङ्गतिः स्पष्टैव । **आद्विधाविति ।** 'वा षपूर्वस्य निगमे' (पा०सू० ६-४-९) इति सूत्रेण दीर्घविकल्पेन रूपद्वयसिद्धिरद्विधौ । आद्विधौ त्वेकमेव रूपं स्यात् । दीर्घविकल्पस्तु 'तक्षणं' 'तक्षाण' मित्याद्यर्थतया सफलः । एतेन तत्सामर्थ्यात्पक्षे ह्रस्वाभिज्ञानमित्यपास्तम् इति भावः । हिस्त्वर्थे । यत्तु वा अ इति छेदेन तेनाकारविकल्पविधानेन द्वैरुप्यसिद्धिरिति अद्वचनं ज्ञापकमेवेति **कृष्णः ।** तन्न । तथा सति 'सन्ते'त्यादावग्रे दीर्घग्रहणानुवृत्त्यभावापत्तेः । मण्डूकप्लुतौ इगनुवृत्तौ मानाभावात् गौरवाच्च । नचाद्विधावित इति स्थानिनिर्देशस्तत्र ज्ञापक इति वाच्यम् । ऋभुक्षणो ऋत्करोकरनिवृत्त्या तस्याप्यर्थवत्वात् । अनन्त्यविकार इति परिभाषा तु प्रत्याख्याता । न च सर्वनामेतीको विशेषणमित्युक्तरीत्या अनतिप्रसङ्गेन तदनर्थकमिति ज्ञापकमिति **नारायणो**क्तं युक्तमिति वाच्यम् । अङ्गांशे प्रत्यस्योत्थिताकाङ्क्षत्वेन तथाविशेषणविशेष्यभावासम्भवात् । पथीयतेः क्विपि अत्ववारणाय तस्यावश्यकत्वाच्च । न च 'न केवलः पथीति' [१]**युवोरनाका**विति सूत्रभाष्यादस्यानभिधानमिति वाच्यम् । स्त्रीप्रत्ययाप्रवृत्तिमात्रेण भाष्योपपत्तौ मूलानभिधाने मानाभावात् । एतेन नचैकः सोश्चेति प्रागुक्तशङ्कापि परास्ता । तथान्वयस्य दुर्वचत्वात् । पथीयतेः क्विपि चारितार्थ्येन येन नाव्यवधानन्यायाश्रयणस्य कर्तुमशक्यत्वाच्च । एतेन **मनोरमा**ग्रन्थविरुद्धमिदमित्यपास्तम् । तथा च पन्था इति मुख्यं व्यावर्त्यमित्युक्तार्थ आवश्यकः । **सुपां सुलुगि**त्यत्रादेशेऽपि फलं सुवचमिति बोध्यम् । तदाह । **दिगिति ।** तदेवं सर्वं ध्वनयितुमादौ कृष्णोक्तिमाह । **यत्त्विति ।** तत् स इममिति पाठः । तत्र स इममिति पाठे तत्रेत्यस्य भाष्य इत्यर्थः । तदेत्यध्याहारः । अत एव तत्रेत्यस्योदाहरणमित्यत्रान्वयो वा । अथाहुरिति सूचितामरुचिं प्रकटयन् तदर्थमेव सिद्धान्तमाह । **वस्तुतस्त्विति ।** साध्वेवेत्यत्रान्वयोऽस्य । न केवलमतिव्याप्तिरेव प्रदर्श्यते, किन्त्वव्याप्तिरपीति

---

१. 'पथिमथोरात्वे' इति तत्सूत्रस्थवार्तिकस्थमिदं भाष्यम् । म.भा.पू.सं. ८ षष्ठो भागः ।

विधिवाक्यम्। तत्र चेक इत्यस्योपस्थितौ द्वीदमोरेवात्वं स्यान्न त्वन्येषाम्। गपेन निर्देशस्तु संज्ञोपसर्जनव्यावृत्त्यर्थमुत्तरार्थं च स्यात्। ''तदोः सः सौ'' (पा०सू० ७-२-१०६) इति सत्वं हि त्यदादीनामेव तदोर्विधीयते।

अत्रेदमवधेयम्, शब्दव्यापाराश्रयपानुरोधेनापि गुणवृद्धिग्रहणं मास्तु, इकस्ता-वित्येतावतैव सिद्धेः। वस्तुतस्तु तावित्यपि व्यर्थम्। इक इत्येव सूत्र्यताम्। सम्पूर्णं पूर्वसूत्रद्वयमनुवर्त्य वृद्धिरित्यादैचौ यत्र विधीयेते, गुण इति चादेङौ, तत्रेक इत्युपतिष्ठते इति व्याख्यानात्। व्याख्याने लिङ्गं तु ''इतोऽत्'' (पा०सू० ७-१-८६) इतीद्ग्रहणम्। अन्यथा तत्रापीकूपदोपस्थितावुक्तरीत्या येन नाव्यवधानन्यायादृकारोकारव्यावृत्तौ च सत्यां किं तेनेति। तदेतद् ''इग्ग्रहणं किमर्थम्'' इति भाष्येण ''इग्ग्रहणमात्सन्ध्यक्षर'' इत्यादिवार्त्तिकेन च सूच्यते। अन्यथा हि सूत्रं किमर्थमित्याद्येव ब्रूयात्। यत्तूत्तरार्थं

भावः। तदाह। **त्यदिति।** हि यतः। अग्रेऽन्वयोऽस्य। यद्यपि सम्भवतीति न्यायेन सामानाधिकरण्येनान्वये द्वेरेव संग्रहः स्यात्, तथाप्यधिकसङ्ग्रहाय न ह्येकमिति न्यायविषयत्वाय च वैयाधिकरण्यमेवोचितमित्याशयेनाह। **द्वीदमोरिति। व्यावृत्त्यर्थमिति** सामान्ये नपुंसकम्। एवमग्रेऽपि। मुख्यं फलमुक्त्वा अन्त्ये हेतुमाह। **तदोरिति।** हि यतः॥

३.३७ नारायणोक्तसिद्धान्तानुवादः

नारायणादिसिद्धान्तमाह। **अत्रेदमित्यादिना।** अत एवापिसङ्गतिः। सः प्रागुक्तज्ञापकादि-समुच्चायकस्तन्मते। अन्यथा मूलमते पन्था इत्यस्यासिद्धेस्तदसङ्गतिः स्पष्टैव। **सिद्धेरिति।** लाघवात्। योजना प्राग्वत्। ततोऽपि लाघवादाह। **वस्तुतस्त्विति।** अत्र प्रयोजनमाह। **सम्पूर्णमिति।** यत्र विधीयते इत्यस्य मध्यमणिन्यायेनान्वयः। चो व्युत्क्रमे। सिद्धान्तमतेनाह। **तत्रेक इति। व्याख्यानादिति।** अकारादिशब्दैर्यत्र गुणवृद्धी विधीयेते इति विपरीतोऽर्थस्तु न, पूर्वत्रयोः शब्दपरत्वस्य क्लृप्तत्वादिति भावः। अत एवाह। **व्याख्यानेति। अन्यथा** उक्तव्याख्या-नाभावे। **उक्तरीत्येति।** सर्वनामस्थानस्येज्विशेषणत्वादित्यर्थः। चः प्रागुक्तपदोपस्थितावित्यस्य समुच्चायकः। एवं सूत्रसिद्धेऽर्थे भाष्यवार्तिकसम्मतिमाह। **तदेतदिति।** उक्तरीत्योक्तव्याख्यानेनैव सिद्धे गुणवृद्धिग्रहणं नैव कार्यमिक इत्येव कार्यमित्येतदित्यर्थः। अन्यथा इङ्मात्रप्रश्नो निर्बीज एव स्यात्। इदानीं तु तद्विषयकप्रश्नासम्भवात्तद्युक्तमेवेति भावः। **अन्यथा** सति गुणवृद्धिग्रहणे। हि यतः। सूत्रमादित्यादेरादिना परिग्रहः। विवरणकारोक्तिं खण्डयति। **यत्त्विति। उत्तरार्थं**

गुणवृद्धिग्रहणं कर्त्तव्यमेवेत्याशयेनेग्ग्रहणमित्युक्तमिति भाष्याभिप्रायवर्णनम्, तन्न, पूर्वसूत्रानुवृत्त्यैव सिद्धावुत्तरार्थत्वस्यापि दुरुपपादत्वात्, समुदायापेक्षायां मण्डूकप्लुतेः सम्बन्धानुवृत्तेर्वात्वयापि वाच्यत्वात्, इग्ग्रहणस्याप्युत्तरार्थतया तदंशेऽपि शङ्कानुत्थानाच्च। इक इति योगः किमर्थं विभज्यते इति प्रश्नबीजमिति चेत्तर्हि गुणवृद्ध्यंशेऽपि तस्याविशिष्टतया सूत्रं किमर्थमित्येव ब्रूयादिति दिक्।

यत्तु प्रधानावयवद्वारा समुदायाक्षेपोऽयमिति, तदपि नातीव शब्दस्वरसानुगुपम्। तस्मादुक्त एवाशयः साधुः। न चैवं ''गुणवृद्ध्यधिकारे पुनर्गुणवृद्धिग्रहणसामर्थ्याद्'' इत्युत्तरग्रन्थासङ्गतिः, तस्य यथाश्रुताभिप्रायकत्वात्। ग्रहणपदस्यानुवृत्तिपरतया

उत्तरनिषेध्यसमर्पणार्थं। **पूर्वसूत्रेति।** पूर्वसूत्रस्थेत्यर्थः। न मध्येऽपि सम्बन्धापत्तिरतः सिद्धान्ते भाष्योक्तषट्पक्षीमध्ये निर्दुष्टं पक्षत्रयं क्रमेण आह। **समुदायेति।** वृद्धिरादैजदेङ्गुण इति समुदायापेक्षायामित्यर्थः। एवञ्च निराकाङ्क्षत्वादन्यत्रान्यस्यासम्बन्ध इति भावः। **उत्तरार्थतयेति।** इकः स्यात् इत्याद्यर्थार्थमावश्यकतयेत्यर्थः। तथा च यथा तद्ग्रहणस्योत्तरार्थतया तद्विषयकशङ्कानुदयस्तथाऽस्याप्युत्तरार्थत्वे एतद्विषयकशङ्कापि नोदिता स्यादिति भावः। तावन्मात्रस्योत्तरार्थत्वेऽपि विशिष्टशङ्का सुवचेति खण्डयति। **इक इति। ब्रूयादिति।** एवञ्च गुणवृद्धिग्रहो न कार्यः, उत्तरत्रगुणवृद्ध्यनुवृत्त्यैव सिद्धेरित्येव भाष्याभिप्राय इति भावः। अथ वृद्ध्यंशे शङ्काया अग्रे कृतत्वात्तत्र तावदेवोक्तमिति चेत्तर्हि गुणांशेऽप्यग्रे शङ्काकरणौचित्यमिति भाष्यासङ्गतिः सर्वथा दुष्परिहरेति। तदाह। **दिगिति॥**

३.३८ प्रभायां नारायणमतखण्डनम्

नारायणोक्तिं खण्डयति। **यत्त्विति। विवरणा**द्युक्तभाष्याशयस्य दुर्वचत्वादाह। **प्रधानेति।** इक इत्यस्योपस्थित्त्या शब्दत्वेन विधेयत्वात्प्राधान्यं, गुणवृद्ध्योरनूद्यमानत्वादप्राधान्यमिति भावः। इको प्रगृह्यतेऽस्मिन्निति व्युत्पत्त्या सूत्रपरत्वसम्भवादाह। **नातीवेति।** बहुव्रीहेस्तत्पुरुषस्य लाघवादिति भावः। तदनुरोधेनोक्तमुपसंहरति। **तस्मादिति। एतद्ग्रे न चैवमित्यादिर्दिगित्यन्तो ग्रन्थः क्वचित्पुस्तके पूर्वत्र दृश्यते**, न स युक्तः। असम्बद्धत्वादिति बोध्यम्। **उत्तरेति।** भाष्यस्येत्यादिः। प्रश्नाद्युत्तरेत्यर्थः। **तस्य यथेति।** सम्पूर्णसूत्रद्वयाननुवृत्त्यभिप्रायकत्वादित्यर्थः। तदा सूत्रे तत्सत्वेन तदनुवृत्तौ यदि तदनुवर्तते तेनापि नियमे निर्व्यूढे पुनस्तत्सामर्थ्यात्तथा नियम इति तदर्थ इति भावः। नन्वेवमिदं भगवतो नाभिमतमित्येव समायातमत

सम्पूर्णसूत्रद्वयानुवृत्तिपरतया सम्पूर्णसूत्रद्वयावृत्तिसामर्थ्यपरत्वाद्वेति दिक्। एवं चेक इति योगविभाग एव पूर्वपक्षसिद्धान्ताभ्यां समर्थ्यते इतीह पर्यवसितोऽर्थः। ततश्चानेनैकेन योगविभागेन सकलेष्टसिद्धौ 'मृजेर्वृद्धिरचः' 'उरङि गुपः' इत्यादि बहुतरयोगविभागाद्याश्रयपेनान्यथासिद्धिवर्पनं नादर्त्तव्यमिति स्थितम्।

इयं च परिभाषाऽलोन्त्यपरिभाषायाः शेषो वा शेषिभूता वा तया सह समुचिता वा वैकल्पिकी वा पूर्वविप्रतिषेधात्तद्बाधिका वा पदोपस्थापिका वेति सप्तपक्षाः

आह। **ग्रहणेति। सूत्रद्वयेति।** गुणवृद्धिपदे च सूत्रैकदेशत्वात्सूत्रद्वयबोधक इति भावः। पुनरित्यन्तं शेषपूरणं तदाशयप्रदर्शकम्। वस्तुतस्तु सर्वमिदं चिन्त्यम्। चतुर्षु पदेषु स्वरितत्वप्रतिज्ञायास्तथायोजनायाश्च कल्पने गौरवात्। सम्बन्धानुवृत्त्यादिप्रदर्शकभाष्यविरोधापत्तेश्च। अक्षरमर्यादयोक्तार्थालाभेनैतद्भाष्यासङ्गतेश्च। पथीयतेः क्विप्यदादेशव्यावृत्त्यर्थमिदग्रहणस्य चारितार्थ्येन ज्ञापकत्वासम्भवाच्च। अत एव **मनोरमा**विरोधोऽपि न। स्वायत्ते शब्दप्रयोगे सति तथाप्रयोगे इच्छाया एव नियामकत्वेन तथोक्तेश्च। ग्रहणपदेनाधिकरणल्युडन्तेन षष्ठीतत्पुरुषस्यैवाङ्गीकारेण लाघवस्याविशिष्टत्वेनाक्षरमर्यादया चोक्तार्थलाभेन तदुक्तेरयुक्तत्वेऽपि अतीवशब्दस्वारस्यानुगुणत्वाच्च। किञ्च ततः तस्य लघुत्वेऽपि प्रागुक्तरीत्या नानुवृत्त्या सिद्धिरिति बहुव्रीहेरङ्गीकारात्। एवं च पृथक् योगविभागविषयक एव प्रश्नादिरिति बोध्यम्। तदाह। **दिगिति।** अत एव तथैवोपसंहरन्नाह। **एवं चेक इति।** अस्य परिभाषात्वावश्यकत्वे चेकोगुणवृद्धी सतीत्यर्थः। एतेनैवं मन्दोक्तमिति सामान्यापेक्षज्ञापके स्वरूपविधावस्यानुपस्थित्या द्यौरित्यादेरपि सिद्ध्या गुणवृद्धिग्रहणमात्रानुवृत्त्या इहत्यतत्पदत्याग एवेचित इति [१]**रत्नाकरा**द्युक्तं चापास्तम्। ज्ञापकस्य सामान्यापेक्षत्वस्याभावात्। सुपां सुलुगित्याद्यर्थमस्यावश्यकत्वात्। ऋभुक्षिन्शब्दे ऋकारादावतिप्रसङ्गाय तस्य साफल्यात्। पथीयावित्यादिव्यावृत्त्यर्थत्वाच्च। इक इत्यस्य सर्वनामस्थानविशेष्यत्वं तु न, अङ्गांशे प्रत्ययस्योत्थिताकाङ्क्षत्वात्। एतेनाद्विधिसामर्थ्यात्तथेत्यप्यपास्तम्। **तीह** प्रकृतसूत्रे भाष्ये। फलान्तरमाह। **ततश्चेति।** तथा पर्यवसितत्वे चेत्यर्थः। वर्णनं तदपि॥

३.३९ तच्छेष-तच्छेषिपक्षविचारः

वैकल्पिकीति। तया सहेत्यस्यानुषङ्गः। **सप्त पक्षा इति।** तत्र तृतीयचतुर्थौ कैयटोक्तौ, अन्ये भाष्योक्ताः। ननु कथं तेषां दुष्टत्वमत आह। **तथा हीति।** तत्रादौ दुष्टत्वं वक्तुमादौ

---

१. सि.कौ.रत्न. पृ.सं. १८।

सम्भाव्यन्ते यद्यपि, तथाप्याद्यानां षण्णां दुष्टत्वात्सप्तम एव सिद्धान्तितः। तथा हि, ''सार्वधातुकार्द्धधातुकयोः'' (पा०सू० ७-३-८४) इत्यत्र स्वस्वनिमित्तवशात्परिभाषाद्वयं सन्निहितम्। तत्राङ्गस्येति षष्ठी यदि पूर्वमेवान्त्यमलं नीता अङ्गान्त्यस्य गुप इति, पश्चादिकाऽन्त्यो विशेष्यते, तदेक्परिभाषा शेषभूता। यदि तु पूर्वमिकाऽङ्गस्य विशेषणात्तदन्तविधिरिगन्तस्याङ्गस्येति, ततः स च भवन्नलोन्त्यस्येति, तदा द्वितीयः पक्षः। तदिदं पक्षद्वयमपि षष्ठीतत्पुरुषं बहुव्रीहिं चाश्रित्य 'तच्छेषपक्ष' इति भाष्ये व्यवहृतम्। इह पक्षद्वयेऽपि ''मिदेर्गुणः'' (पा०सू० ७-३-७२) इत्यादौ दोषः। यो हि मिदेरन्त्यः नासाविक्, यश्चेक् नासावन्त्यः। तथा चावश्यम्परिभाषायां त्यक्तायां सत्यां विनिगमकाभावादुभयत्यागे सर्वादेशो गुणः स्यात्। तदुक्तं वार्त्तिककृता– ''वृद्धिगुणावलोन्त्यस्येति चेन्मिदिमृजिपुगन्तलघूपधर्च्छिदृशिक्षिप्रक्षुद्रेष्विग्ग्रहणं सर्वादेश-प्रसङ्गश्चानिगन्तस्य'' इति। चकारो हेत्वर्थः। ततश्च सर्वादेशप्रसङ्गो हीति फलितम्।

प्रथमादिपक्षस्वरूपमाह। **सार्वेति**। इदमुपलक्षणं वृद्धिविधेरपि। **स्वस्वेति।** गुणपदमङ्गस्येति स्थानषष्ठी च तत्। अत्र पक्षे अस्य सूत्रस्य ताभ्यां विधीयमानौ तावेकः स्थाने इत्यर्थे अवान्तरवाक्यार्थबोधोत्तरमेव प्रवृत्तेरुभयोरपि समकालप्रवृत्तीकता बोध्या। तत्राङ्गेऽपि तयोर्मध्य इत्यर्थः। षष्ठी स्थान इति प्रवृत्तेः। **पूर्वमिति।** बुद्धेः क्रमिकत्वात्, विशेषणविशेष्यभावे कामचाराच्चेति भावः। तत्र सामानाधिकरण्येनान्त्यालमङ्गस्येति व्याख्याने वैयर्थ्यादाह। **अङ्गान्त्येति। विशेष्यत इति।** इको अङ्गान्त्यस्येत्याद्यर्थम्। **शेषेति।** परिच्छेदकत्वात्। सम्भवतीति न्यायेनावैयर्थ्याच्चाह। **यदि त्विति। तत इति।** अत्रास्य विशेष्यत्वेऽपि परिच्छेदकत्वमस्त्येव। **विशेषणात्** विशेष्यीकरणात्। **व्रीहिं चेति।** तन्त्रेणेति भावः। एवञ्च नोद्ग्राष्यादित्वं दोष इति बोध्यम्। एवं स्वरूपमुक्त्वा दोषमाह। **इहेति।** अस्मिन्नित्यर्थः। **परेति।** अन्यतरस्यामित्यर्थः। **उभयेति।** गुणादिविधौ परिभाषयोर्मिथः सम्बन्धापरित्यागेनोपस्थानं तच्छेषत्वम्। तत्र इकस्या असम्भवेऽन्यापि सन्नियोगेति न्यायेन न प्रवर्त्तत इति भावः। **वलोन्त्यस्येतीति।** इक इति शेषः। यद्यपि वार्तिकाद्दोषद्वयं प्रतीयते, तथापि यातेत्यादावनिगन्ते सार्वधातुकेत्याद्यप्रवृत्त्या सर्वादेशगुणापादनं दूरापास्तमित्याशयेनाह। **चकार इति।** 'मिदादिष्विक्ग्रहणं कर्तव्य'मित्यत्रैवार्थे हेतुत्वेनेदमुपात्तमिति भावः।

अथ मिद इर्मिदिः तस्य मिदेरित्यादिपूर्वोक्तरीत्या कथंचिदिह सर्वत्रेक एव स्थानित्वं लभ्येत, तथापि 'भिन्नम्' इत्यादावनिग्लक्षपत्वाद् गुपनिषेधो न स्यात्। अथ क्नोः कित्त्वाज्ज्ञापकादनिग्लक्षपत्वेऽपि निषेधस्तर्हि 'लैगवायनः' 'पौरोहित्यम्' इत्यादावतिप्रसङ्गः। अथ लक्ष्यानुरोधाल्लघूपधगुपमात्रविषयकं ज्ञापकं तर्हि पदोपस्थितिपक्ष एव लक्ष्यसिद्धये समाश्रीयताम्। एवं हि ज्ञापकाश्रयपक्लेशोऽपि न भवति। कित्त्वेनापि पदोपस्थितिरेव ज्ञाप्यताम्। एवं हि ज्ञापकमूलकं वाक्यान्तरं न कल्प्यमिति लाघवम्।

अस्तु तर्हि तृतीयः पक्षः - मिदेरन्त्यस्येकश्च द्वयोरपि गुप इति। मैवम्, स्थानेयोगावयवसम्बन्धरूपस्यार्थद्वयस्य युगपदुच्चारितया षष्ठ्या दुर्लभत्वात्। स्थानेयोगं च विनाऽलोन्त्यविध्यलाभात्। स्थानषष्ठी हि तदुपस्थितौ लिङ्गमिति वक्ष्यते। इक इत्यनेन

३.४० तच्छेषपक्षे भाष्योक्तदोषोद्धारः

मृजेर्वृद्धिरित्यत्रानिर्वाहादाह। **कथञ्चिदिति। क्नोः कित्वादिति।** न चास्य ककारः श्रवणार्थ एवास्त्विति कथं ज्ञापकतेति वाच्यम्। लक्ष्यविरोधापत्तेः। तथापि मृडमृदेति त्तवः, रुदविदेति क्वसनोश्च कित्वस्य ज्ञापकत्वसम्भवाच्च। **तर्हीति।** ज्ञापकस्य सामान्यापेक्षत्वादिति भावः। विशेषापेक्षत्वमभिप्रेत्याह। **अथेति। लक्ष्येति।** लगवायनादिलक्ष्येत्यर्थः। एवमग्रेऽपि। एवसूचितलाघवमाह। **एवं हीति। क्लेशोऽपीति।** अपिना अमाङित्यस्या सिद्धिः समुच्चीयते। ननु न मम लक्ष्यानुरोधाश्रयणे तात्पर्यं किन्तु ज्ञापकस्य विशेषापेक्षत्वेऽत आह। **कित्वेनापीति। स्थितिरेवेति।** अत एवामार्डित्यस्य सिद्धिरिति प्रागुक्तम्। फलान्तरमाह। **एवं हीति।**

३.४१ समुच्चितपक्ष-वैकल्पिकीपक्षदूषणम्

स्थानेयोगेति। स्थानार्थनिरूपितनिवर्त्यनिवर्तकभावस्वरूपसम्बन्धावयवावय-विभावरूप-सम्बन्धरूपार्थद्वयलाभस्येत्यर्थः। प्रत्यर्थं शब्दनिवेशेनैकस्य नानेकाभिधायकत्वमिति भावः। ननु मिदेरुभयत्रावयवावयविभावसम्बन्धेनैवान्वयेनायं पक्ष इति नायं दोषोऽत आह। **स्थानेयोगमिति।** चो व्युत्क्रमे। तदलाभाच्चेत्यर्थः। तथा च तं विना तत्प्रवृत्तिरेव न स्यादिति भावः। क्वचिच्चशून्यः पाठः। अत एव तत्र हेतुमाह। **स्थानेति**। हि यतः। वक्ष्यते तत्रैव। नन्वेवं मिदः स्थानिकगुणस्त्वस्य तस्य चास्त्वित्येव, तथैव तत्पक्षसम्भव इत्येवमपि न प्रागुक्तदोषोऽत आह। **इक इति अवयवेति।** अवयवावयविभावार्थकषष्ठीमित्यर्थः। आदिना तन्त्रपरिग्रहः।

सहावयवषष्ठीं विनाऽन्वयायोगात् आवृत्त्यादौ प्रमाणाभावाच्च ।

एतेन मिदेरन्त्यस्य वेको वेति चतुर्थपक्षोपि प्रत्युक्तः, विकल्पस्याष्टदोषग्रस्तत्वाच्च ।

अस्तु तर्हि तदपवाद इति पञ्चमः पक्षः । तथा हि, गुणविधावङ्गस्येति न स्थानषष्ठी । किन्तु इगपेक्षयाऽवयवषष्ठी । ततश्च लिङ्गाभावादलोन्त्यपरिभाषाया अनुपस्थितिः । अयमेव च बाधपदार्थः । यदीक्प्परिभाषा न भवेत्तर्हि स्थानषष्ठीत्वं तन्मूलकालोन्त्यपरिभाषोपस्थितिश्च स्यात् । सत्यान्त्विक्परिभाषायां तदुभयं नेत्येतावतैवापवादत्वव्यवहारः । न हि वस्तुतो वचनेन प्रापितस्य बाधः सम्भवति शास्त्राप्रामाण्यप्रसङ्गात् । अत एव शास्त्रतात्पर्यसङ्केचो बाध इत्याहुः । एतेन द्वन्द्वापवाद एकशेष इत्यपि व्याख्यातम् ।

एतेन प्रागुक्तदोषेण । **विकल्पेति ।** आदावन्त्यपक्षादरे इक्शास्त्रस्याप्रामाण्यस्वीकारात्मा प्रतीतप्रामाण्यपरित्यागः, ततो लक्ष्यन्तरे इक्पक्षादरे तस्य स्वीकृताप्रामाण्यपरित्यागात्मकं परित्यक्तप्रामाण्योपादानं, अन्त्यशास्त्रे स्वीकृतप्रामाण्यपरित्यागरूपोऽप्रतीताप्रामाण्यस्वीकारः, पुनर्लक्ष्यान्तरेऽन्त्यशास्त्रादरे इक्शास्त्रस्य स्वीकृताप्रामाण्यपरित्यागात्मा त्यक्तप्रामाण्यस्वीकार इति यद्यपि चत्वार एव दोषा विकल्पे । तथापि यथाकथञ्चिद्भेदापेक्षेण पक्षान्तरेऽपि चत्वार इत्येवमष्टौ दोषा इति मीमांसकरीतिमनुरुद्ध्येदं बोध्यम् ।

३.४२ तदपवादपक्षनिरूपणं - तत्खण्डनञ्च

गुणविधावित्युपलक्षणं वृद्धिविधेरपि । समं प्राप्तावप्यनया तस्य येन नेति न्यायेन बाध इत्याह । **इगपेक्षयेति । अवयवेति ।** उक्तयुक्तेर्मिदादिदोषोद्धारणायैतत्पक्षादरस्य भाष्ये उक्तत्वाच्च । कुकुकन्कुक्त्वासनादित्वाल्लिङ्गाच्चेति भावः । नन्वेवमपि इक इति स्थानषष्ठीमादायैतत्प्रवृत्त्यनन्तरं तत्प्रवृत्तिः कुतो नात आह । **ततश्चेति ।** तत्प्रवृत्त्यनन्तरं चेत्यर्थः । तदेतद् ध्वनयितुं वक्ष्यति तस्माद्यदि सत्यपि सम्भव इत्यादिना । एतेन पूर्वापरविरोधः परिहृतः । **लिङ्गाभावादिति ।** इक इति स्थानषष्ठीसत्वेऽपि सनाऽलोन्त्यसूत्रप्रवृत्तौ निमित्तं असमुदायोत्तरस्थानषष्ट्या एव तत्वादिति भावः । नन्वेवमप्यादौ तदुपस्थितिवैयर्थ्यमत आह । **अयमेवेति ।** अप्राप्त्यनुपादानरूप एवेत्यर्थः । तत्त्वमेवोपपादयति । **यदीति । सत्यामिति ।** साम्येऽप्युक्तहेतुभिरिति भावः । न केवलमत्रैवेत्थं किन्तु अन्यत्रापीति ध्वनयन् एवव्यावर्त्त्यमाह । **न हीति ।** आहुः मीमांसकाः । पूर्वत्र बाधात्तदप्रसक्तिरत्र तु निमित्ताभावात्तदप्रवृत्तिरिति विशेषोऽन्यत्सर्वं समानमिति व्याख्या ।

नह्यनुत्पन्नायां विभक्तौ द्वन्द्वस्य प्रसङ्गः, किन्तु यद्येकशेषो न भवेत्तर्हि प्रत्येकं विभक्तिर्द्वन्द्वश्च स्यात्सति त्वेकशेषे तन्नेत्येव तत्त्वम्। अस्मिंश्च पक्षे जुसि गुणो 'अजुहवुः' इत्यत्रेव 'अनेनिजुः' 'पर्यवेविषुः' इत्यादावपि स्यात्। ''सार्वधातुकार्द्ध-धातुकयोः'' (पा०सू० ७-३-८४) इति गुणो 'भवति' इत्यादाविव 'ईहिता' इत्यत्रापि स्यात्। तथा च वार्त्तिकम् – ''इङ्मात्रस्येति चेज्जुसि सार्वधातुकार्धधातुकह्रस्वद्यो-र्गुणेष्वनन्त्यप्रतिषेधः'' (का०वा०) इति। अत्र ह्रस्वादीति ''ह्रस्वस्य गुणः'' (पा०सू० ७-३-१०८) ''जुसि च'' (पा०सू० ७-३-१०९) ''ऋतोऽङि सर्वनामस्थानयोः'' (पा०सू० ७-३-११०) ''घेर्ङिति'' (पा०सू० ७-३-१११) इति गुणचतुष्टयं गृह्यते। ततश्च 'हे अग्ने' 'अग्नयः' 'कर्त्तरि' 'अग्नये' 'बाभ्रव्यः' इत्यत्र यथा ओर्गुणान्तं गुणपञ्चकं भवति, एवं 'हे अग्निचित्' 'अग्निचितः सन्ति' 'सुकृति' 'अग्निचिते' 'सौश्रुतः' इत्यत्रापि स्यादिति वार्त्तिकार्थः। यद्यपीह निर्दिष्टस्थानिकत्वात्परिभाषा दुर्लभा। अग्निचिच्छब्दस्य घिसंज्ञाभावाच्च ''धेर्ङिति'' (पा०सू० ७-३-१११) इत्येतन्न प्राप्नोति, तथापि

तत्वमुपपादयति। **न ह्येति।** येन नाप्राप्तिर्भवेदिति भावः। **तत्** उभयम्। एवं तदपवाद-पक्षस्वरूपमुक्त्वा तत्र दोषमाह। **अस्मिंश्चेति।** दोषान्तरमाह। **सार्वेति।** लघूपधे इष्टत्वादाह। **ईहितेत्यत्रेति।** इत्यादावपीत्यर्थः। **मात्रस्येतीति।** मात्रपदेनालोन्त्यसूत्रव्यवच्छेदः। **ओर्गुणे-ष्विति।** जुसीत्याद्युशब्दान्तसमाहारद्वन्द्वाच्छष्ठी। छान्दसत्वान्न नुम्। मध्यमपदलोपिसमासेनो-कारान्तस्य पुंस्त्वं च। एतेन गुणेष्विति पृथक्पदं, ओकारान्तस्य इतरेतरयोगद्वन्द्वस्य गुणशब्देन षष्ठीतत्पुरुष इति [१]**रत्नो**क्तमपास्तम्। पूर्वनिपाते दोषापत्तेः। विभक्तिलुगापत्तेश्च। ओर्गुणान्तमित्य-ग्रिमोक्तिस्वारस्यात् सूत्रैकदेशानुकरणानामोर्गुणान्त इतरेतरयोगद्वन्द्वो वा। परन्तु भाष्य-व्याख्यानास्वारस्यमत्र पक्ष इति बोध्यम्। **अनन्त्येति।** अङ्गावयवस्येकोऽन्त्यस्यानन्त्यस्य च गुणः स्यादित्यनन्त्यस्य प्रतिषेधो वक्तव्य इत्यर्थः। आद्यद्वयस्योक्तत्वादाह। **अत्रेति।** वार्तिके इत्यर्थः। गृह्यत इत्यत्रान्वयः। **ह्रस्वादीतीति।** आदिनेति शेषः। इतिरनेनेत्याद्यर्थको वा। [२]..... शं स्पष्टयितुं **सन्तीति। सौश्रुत इति।** अपत्येऽण्। **पीह** पञ्चसु। **निर्दिष्टेति।** अनियमे नियमकारिणीत्वात्परिभाषाया इति भावः। दोषान्तरमाह। **अग्नीति।** चो व्युत्क्रमे। न प्राप्नोति चेत्यर्थः। तदन्तसंज्ञापक्ष इति भावः। एवञ्च ह्रस्वाद्युक्तिवार्तिकेऽप्युक्तं तात्पर्यम्।

---

१. र.प्र.पृ.सं. २६९ प्रथमभागः।

२. अत्र ग्रन्थपातः। उक्ताशयं स्पष्टयितुमिति भाव्यमिति भाति।

वार्त्तिकस्योक्तिसम्भवमित्थं वर्णयन्ति– ''ह्रस्वस्य गुणः'' (पा०सू० ७-३-१०८) ''जसि च'' (पा०सू० ७-६-१०९) इति सूत्रयोस्तावद्ध्रस्वेनेग्विशेष्यते। दीर्घव्या-वृत्तिश्च फलम्। अथानियमे नियमकारिणी परिभाषा कथमिहोपतिष्ठताम् ? न हि ह्रस्वस्य स्थानित्वेऽतिप्रसङ्गोऽस्ति, अकारस्य ह्यकार एव गुणो भविष्यतीति ब्रूयात्। तत्रेदं वक्तव्यम्। ह्रस्वान्तस्याङ्गस्येको गुण इति सूत्रार्थः स्यात्। ततश्च 'हे इन्द्र' 'हे उपगो' इत्यादावनन्त्यस्यापि स्यात्, 'अग्निचित्' इत्यादिकं तु विशेषणव्यवच्छेद्यं स्यात्। तथा च ह्रस्वस्येक इत्यनयोर्न परस्परं विशेषणविशेष्यभावः। किन्त्वनयोरेकमङ्गस्य विशेषण-मपरमङ्गस्य विशेष्यमिति। यद्वा, ह्रस्वस्येत्येतदङ्गस्य विशेषणं मा भूदित्यङ्गस्य स्थानषष्ठीत्वं बाधितुमनन्त्यस्यापि गुणं सम्पादयितुमिक्परिभाषोपतिष्ठेत। एवम् ''ऋतः'' (पा०सू० ७-३-११०) ''ओः'' (पा०सू० ६-४-१४६) इत्युभयत्राप्य-

---

वार्तिकेति। तत्रत्यह्रस्वादीत्यस्येत्यर्थः। वर्णयन्ति कैयटनारायणादयः। **ह्रस्वेनेगिति।** तथा च ह्रस्वस्येको गुणः स्यादिति सूत्रार्थः। नन्वेवं ह्रस्वग्रहणं व्यर्थमत आह। **दीर्घेति।** चस्त्वर्थे। एवं सम्भवेऽपि फलाभावात्तथेति शङ्कते। **अथेति।** ब्रूयादित्यत्रान्वेति। **मिहो** सूत्रद्वये। **न हीति।** ह्रस्वस्य श्रुतत्वेनान्तरङ्गत्वात् अङ्गावयवस्य ह्रस्वस्य गुण इति सूत्रार्थः। तत्र ह्यनिकां स्थानित्वप्रसक्ताविक्परिभाषोपस्थित्या इकः स्थानित्वं निर्णेयम्। तच्च न सम्भवति। ह्रस्वग्रहणेनैव तल्लाभेन तुल्यफलकत्वात्। तथा च **ङ्गोऽस्ती**त्यस्य येनेक विशेष्यतेति शेष इति भावः। ननु ह्रस्वस्य स्थानित्वेऽनिकोऽकारस्यापि गुणप्रसक्तिरिति कथं तुल्यफलकत्वमत आह। **अकारस्येति।** हि यतः। नारायणोक्तमाह। **तत्रेदमिति। अग्निचिदिति।** विशेषणव्यवच्छेद्यं त्वग्निचिदित्यादिकं स्यादित्यर्थः। **एकं** ह्रस्वस्येति। **अपरं** इक इति। वैपरीत्येऽपि हे उपगो इत्यत्र दोष एव। अत एव तस्योक्तिः। न च प्रकरणवैरूप्यायाङ्गविशेषणमेवेति वाच्यम्। सार्वधातुकादिभिः परत्वेन ष्वेरित्यादिभिश्च सामानाधिकरण्येन तस्य विशेष्यत्वस्य स्वीकारात्। इतिर्वक्तव्यसमाप्तौ। नन्विदमग्निचित् अग्निचितः इत्यत्रापि प्राप्नोतीति भाष्यविरुद्धमतः कैयटोक्तं सिद्धान्तमाह। **यद्वेति।** अयं भावः। न ह्यनियम इति श्रुतिः स्मृतिर्वा, किन्तु परिभाषा लिङ्गवती फलवती चेति नियमः। फलं चेतरव्यावृत्तिवदितरसङ्ग्रहोऽपि वक्तुं शक्य इति ह्रस्वस्येत्यस्याङ्गविशेषणत्वव्यावर्त्तनेन तत्रावयवषष्ठीत्वबोधनेनानन्त्यस्यापि गुणसम्पादनमेव फलं स्यात्। अकारे तु गुणागुणयोर्न विशेष इति। तदाह। **ह्रस्वेत्यादि।** इतिनोक्तस्योभयत्र हेतुत्वं प्रतिपाद्यते। अग्रे गामश्वमिति वत्समुच्चयो बोध्यः। अग्रेऽपि सिद्धान्तरीत्यैवाह। **एवमिति।** तत्रैवेत्यर्थः। अनन्त्यस्य अनन्त्यस्यापि।

नन्त्यस्य गुणविधानार्थं परिभाषा स्यादेव । घिसंज्ञा तु वर्णयोरेव न तु तदन्तस्येति पक्षं गृहीत्वा ''घेर्ङिति'' (पा०सू० ७-३-१११) इत्यस्य ''अग्निचितः'' इत्यादावतिप्रसङ्गो योज्यः । नह्यस्मिन्पक्षे ऋत ओरित्याभ्यां घेः किञ्चिद्वैलक्षण्यमस्तीति दिक् ।

नन्वस्मिन्पक्षे ''पुगन्त'' (पा०सू० ७-३-८६) इति सूत्रस्य नियमार्थत्वाद् 'ईहिता' इत्यादौ न दोष इति चेत् ? न, यदि हि सार्वधातुकार्द्धधातुकयोर्लघूपधस्यैवेति नियमस्तर्हि ह्रस्वाद्योर्गुणे दोषस्तदवस्थः । यदि तु लघूपधस्य सार्वधातुकार्द्धधातुकयोरेवेति नियमस्तथापि 'ईहिता' इत्यादौ दोष एव । अथावृत्त्या द्विविधोऽपि नियमस्तर्हि

द्वितीयदोषमुद्धरति । **घीति । अस्मिन्निति ।** वर्णसंज्ञापक्षेत्यर्थः । अङ्गस्य तद्वद्विशेषणत्वात् । एतेन नेदं घिसंज्ञं नापि घ्यन्तमित्याशङ्क्याऽत्रापि । यदि वर्णान्तं तच्च संज्ञमेव । न च तस्य तुका व्यवधानेन ङित्परत्वम् । ह्रस्वान्तभक्तस्य तुकः स्वाङ्गत्वेनाव्यवधायकत्वादिति **कृष्णो**क्तमपास्तम् । तुको ह्रस्वावयवत्वात् । व्योर्विशेष्यत्वाच्च । तस्यानङ्गत्वाच्च । तस्य विशेषणत्वाच्च । वस्तुतस्तु ह्रस्वाद्युक्तिर्वार्तिकेऽयुक्तैव । इतरसङ्ग्रहस्येष्टस्यैव फलत्वेनात्र तदभावात्तथाशयकल्पनस्यायुक्तत्वादिति बोध्यम् । तदाह । **दिगिति ।।**

ह्रस्वस्येत्यादिवत्सार्वधातुकेति सूत्रेपि न दोष इत्याशयेन शङ्कते । **नन्विति ।** तदपवादपक्षेत्यर्थः । ननु पुगन्तेत्यादौ बहुव्रीहिसमासे सामर्थ्यादिक्परिभाषानुपस्थितिरिति भेत्ता ह्रेपयतीत्यादौ दकारपकारादेर्विध्यर्थत्वमिति कथं नियमार्थत्वमिति चेन्न लाघवात्तत्पुरुषे निर्णीते, **निषादस्थपतिन्यायेन** गुरुभूतनियमार्थत्वस्यादोषावहत्वात् । न च पुगन्तग्रहणं दापयत्यादावनन्त्यस्यानिकोऽपि गुणार्थं स्यादिति कथं नियमार्थत्वमिति वाच्यम् । गुणे कृते उपधावृध्या विशेषाभावात् । तदाह । **नियमेति । यदि हीति ।** हि यतोऽनन्तरस्येति न्यायाश्रयणादित्यर्थः । सार्वधातुकेत्यनुवृत्तिं विना नियमत्वमेव दुर्वचमिति तदनुवृत्तिस्तथा चानुवृत्त्या प्रकृतनियम इति भ्रमो न कार्यः । गुणश्चेत्पुगन्तादेरेवेति नियमस्तु बहुसूत्रोच्छेदापत्त्या न युक्त इति भावः । पुगन्तग्रहणं तत्र सफलमित्यभ्युपेत्याह । **लघूपधेति ।** वस्तुतस्तस्यापीदमुपलक्षणं बोध्यम् । ह्रस्वेति समाहारद्वन्द्वः । **यदि त्विति ।** लक्ष्यानुसारात्तदनुवृत्तावपि तदनाश्रयणेनेत्यर्थः । नन्वेकेन वाक्येन नियमद्वयस्यालाभात्प्रकृतस्य सार्वधातुकेत्यस्यैव नियमः स्यादत आह । **अथावृत्त्येति । दोष इति ।** तदवस्थ एवेति शेषः । अपिरन्यनियमसमुच्चायकः । उक्तभाष्योक्तदोषस्योपलक्षणत्वात् कैयटाद्युक्तदोषानाह ।

'अनेनिजुः' इत्यत्र दोषः। न ह्येतन्नियमद्वयेनापि वारयितुं शक्यं, लघूपधत्वात्सार्वधातुकपरत्वाच्च। 'हे बुद्धे' 'बुद्धयः' 'पिचवे हितः पिचव्यः ''उगवादिभ्यो यत्'' (पा०सू० ५-१-२) 'बुद्धये' 'वृद्धये' इत्यादावनुपधाभूतेष्वतिप्रसङ्गस्तु दुर्वार एवेति तावद्वार्त्तिकहृदयम्।

वस्तुतस्त्वङ्गाक्षिप्तेन प्रत्ययेन श्रूयमापेन च जुसादिना इको विशेषणात्सकलदोषनिरासे सति तदपवादपक्षोऽपि समर्थयितुं शक्यते एव। अङ्गमेव प्रत्ययेन विशेष्यते इति गृहीत्वा परं भाष्यवार्त्तिकग्रन्थप्रवृत्तिरित्यवधेयम्।

हे बुद्धे इत्यादि। पिचव्य इति। इदं चोवर्णान्तस्याङ्गस्येको गुण इत्याद्यव्याख्यानाभिप्रायेण। वस्तुतस्तु **सौश्रुत इत्यत्रापि प्राप्नोती**ति भाष्यविरोधापत्त्या चिन्त्यमिदम्। तुश्चार्थे। **दुर्वार एवेतीति।** एषामलघूपधत्वादसार्वधातुकपरत्वाच्चानन्त्यगुणानां नियमद्वयेनाप्यनिवर्तनादिति भावः। [1]**विवरणकारनारायणा**नुरोधेनाह। **वस्तुतस्त्विति।** शक्यत एवेत्यत्रान्वयः। **क्षिप्तेनेति।** अङ्गाधिकारस्थत्वादिति भावः। वस्तुतः सर्वत्रोपात्तत्वान्नाक्षेप इत्याह। **श्रूयमापेन चेति। इक इति।** प्राधान्यात्। तथा च तस्मिन्निति परिभाषाया व्यवहितव्यावृत्तिस्तदाह। **सकलेति।** अपिस्तच्छेषपक्षसमुच्चायकस्तद्रीत्या। वस्तुतस्तु चिन्त्यमिदम्। मिदेर्गुण इत्यादौ शितीत्यादिभिः परत्वेन निर्दिष्टाङ्गोपेतायाः परिभाषाया अनुग्रहाय गुणप्रकरणवैरूप्याय चाङ्गस्यावश्यं विशेषणीयत्वात्। प्रत्ययस्याङ्गांशे उत्थिताकाङ्क्षत्वाच्चेति बोध्यम्। तदाह। **अङ्गमेवेति।** इति **परं** उष्कृष्टं सिद्धान्तं गृहीत्वेत्यर्थः।

३.४३ प्रभायां सूक्तिरत्नाकर-रत्नप्रकाशादिमतविमर्शः

यद्यपि भाष्ये तच्छेषतदपवादोपपत्तये 'यद्येकं वाक्यं तच्चेदं चालोन्त्यस्य। उभयो भवन्ती इको गुणवृद्धी अलोन्त्यस्य। ततोऽयं तच्छेषः। अथ नानावाक्ये। अलोन्त्यस्य विधयो भवन्ती इको गुणवृद्धी अन्त्यस्यानन्त्यस्य चेति। ततोऽयं तदपवाद' इति विध्यसंस्पर्शेनैवानयोरेकवाक्यत्वनानावाक्यत्वस्वरूप उक्तः। तथापि न तद्युक्तम्। गुणानां चेति न्यायेन एकयोगव्यवहितत्वेनाप्राकारणिकत्वेन मिथोऽनपेक्षत्वेन विध्युपकारकत्वेन च परिभाषान्यतरदेशे शेषशेषिभाव-

---

१. प्रदीपस्य व्याख्येयं शास्त्रिनारायणकृतादन्या इतोऽपि अमुद्रिता इति स्पष्टीकृतं 'सहाभाष्यप्रदीपस्य व्याख्यानानि' इति पुस्तकस्य उपोद्घाते नरसिंहाचार्यैः। पृ.सं. म्ब्म् प्रथमभागः।

तदपवादत्वयोरसम्भवात्। एतेन 'गुणः कृतेति' न्यायेन 'यस्य येनार्थसम्बन्धो दूरस्थस्यापि तस्य सः। अर्थहेतुसमर्थानामानन्तर्यमकारणं' इति न्यायेन चैकवाक्यतागुणादेशे इति **नारायणा-**द्युक्तमपास्तम्। अत एव कैयटादिभिर्विधिसंस्पर्शेनैव तयोरुपादानं कृतम्। तथा हि। विधेराद्यवाक्यार्थबोधपूर्वकालेऽनिर्णीतार्थकत्वेन षष्ठीस्थान इति प्रवृत्त्या सार्वधातुकादिपराङ्गस्य स्थाने गुणादिरिति वाक्यार्थे त्ववधृते स्वस्वनिमित्तवशात् परस्पराकाङ्क्षया च तयोर्जातवाक्यार्थ-बोधयोरुपस्थितिः। तत्र च प्रागुक्तरीत्या केवलयोस्तत्वासम्भवेन तयोरिदानीमङ्गाधिकारस्थत्वेन सम्बन्धिसापेक्षत्वेन चाङ्गपदमात्रसम्बन्धेन वाक्यैकवाक्यतया प्रागुक्तरीत्या क्रमेणान्वयः। आद्यपक्षे यथा चानयोः समकालप्रवृत्तिस्तथोक्तं प्राक्। स चेत्थम्। स च भवन् यत्र सम्भवति तत्रोक्तरीत्या सम्भवतीति न्यायेनेगन्तस्याङ्गस्य स्थाने गुणवृद्धी भवतः। तौ च तदन्त्यस्यालः स्थाने भवत इति, अङ्गान्त्यस्य स्थाने विधयो भवन्ति, ते च गुणवृद्धिरूपा इको भवन्ति इति वा, अन्त्यस्येको इग्रूपस्यान्तस्य वा भवति। अन्यत्र तु सामान्यवाक्येन भवति। अत एव यातेत्यादौ सर्वादेशापादनसङ्गतिः। एवञ्च तन्त्रेण तच्छेषशब्दे बहुव्रीहितत्पुरुषे। परिच्छेद्यपरिच्छेदकभावकृत एव च शेषशेषिव्यवहारो, न गुणगुणिभावकृतः। अत एव भगवता अलोन्त्यस्य विधयो भवन्ति इको गुणवृद्धी अलोन्त्यस्येत्येवमेकवाक्यता उक्ता। पदैकवाक्यतयाऽन्वये तु इकोऽन्त्यस्याल इत्याद्येव वदेत्। मध्ये इको गुणेत्युक्त्या मध्यमणिन्यायेन तस्योभयत्रान्वयसूचनद्वारा तच्छेषशब्दस्य प्रागुक्तमर्थद्वयं सूचितम्। तदपवादशब्दे तु तत्पुरुष एव, न तु बहुव्रीहिरपि। असम्भवात्। अलोन्त्यस्येत्यतोऽविशेषविहितत्वात्। येन नाप्राप्ताभावात्तत्प्रवृत्तौ एतत्प्रवृत्त्यप्रतिबन्धाच्च। अस्य तु वैपरीत्यात्तदपवादत्वम्। अत एव 'अथ नानावाक्ये' इति प्रतिज्ञाय 'अलोन्त्यस्य विधयो भवन्ती'त्येवोक्त्वा इकश्चानिकश्चेत्यनुक्त्वा 'इको गुणवृद्धी अन्त्यस्य चानन्त्यस्य चे'तीत्येवं भिन्नवाक्यतां प्रदर्श्य तदपवादत्वमुक्तं भगवता। अत एव चालोन्त्यस्येत्यस्य वाक्यार्थस्य पूर्वमुल्लेखः कृतः। अत्र पक्षे एवं वाक्यार्थः। अनयोः समप्राप्तावपि तदप्राप्तियोग्येऽचारितार्थ्यकृते चारितार्थ्यात्सत्यपीति भाष्योक्तत्वाद्येन नेति न्यायेन तद्बाधेनैतन्मात्रोपस्थितौ पर्यवसाने विशेषणविशेष्यभावे कामचारान्मिदादिदोषोद्धारणायैतत्पक्षोपन्यासस्य मध्ये कृतत्वात्तत्र तथैव योग्यत्वेन तत्साहचर्यात् क्रुत्त्वासनां कित्वाल्लिङ्गाच्च सम्भवतीति न्यायं बाधित्वा स च भवन्नङ्गावयवस्येको गुणवृद्धी भवत इतीको भवतीति। एतेन कैयटादितुल्यत्वान्नारायणोऽपि व्याख्यातः। एतेनादेशमात्रापेक्षस्यालोन्त्यस्येत्यस्यादेशविशेषापेक्षायामस्याश्च विध्यसंस्पर्शेन सहैव लक्ष्यसंस्कारकत्वसम्भवेनैकवाक्यत्वं तच्छेषशब्दार्थः। भाष्ये तच्चेदं चेत्यग्रे इको गुणवृद्धी

अलोन्त्यस्येत्येकवाक्यतास्वरूपप्रदर्शनम्। अलोन्त्यस्य विधयो भवन्तीति तु तत्फलप्रदर्शनम्। विधयो गुणवृद्धिरूपाः। नानावाक्ये इत्यग्रे 'इको गुणवृद्धी अन्त्यस्य चानन्त्यस्य चे'ति। अस्यास्ततो भिन्नवाक्यताप्रदर्शकतया च किं स्यादतोऽयमलोन्त्यस्य विधयो न भवन्तीति अन्त्यस्यैवेकोऽनिकोऽपि गुणादिरूपा विधयो न भवन्तीत्यर्थः। एतेन ''विध्येकवाक्यतयैव पक्षद्वयवर्णनं कैयटाद्युक्तमपास्तम्। अनयोरेवैकवाक्यत्वादेर्भाष्येऽनुक्तत्वात्। किञ्च विध्येकवाक्यत्वे सर्वादेशेत्यादिभाष्यवार्तिकाद्यसङ्गत्यापत्तेः। तदाङ्गस्येत्यवयवषष्ट्या एव न्याय्यत्वेनानिगन्तार्थं सार्वधातुकेत्याद्यप्रसक्तेः। किञ्च नैष दोषः यथैव हीत्यादिभाष्यासङ्गतेः। त्वन्मतेऽङ्गस्येत्यस्यावयव-षष्ठीत्वात्। एवं द्वितीयपक्षस्य तथोपपादने **इङ्मात्रस्येति चेदि**त्यादिभाष्यवार्तिकासङ्गतिः। जुसि चेत्यादाविकाऽङ्गाविशेषणेनैवानन्त्यस्याप्रसक्तेः। अङ्गेनेको विशेषणेऽपि जुसादिभिरपि तस्यैव विशेषणेन तत्राप्रसक्तेः। किञ्च पक्षद्वयेऽपि गुणवृद्धिपदानर्थक्यम्। विधौ सर्वत्र तयोः सत्वात्। विषयसमर्पणेन कथञ्चित्तत्सार्थक्येऽपि सप्तमपक्षात् पञ्चमपक्षस्य विशेषो न स्यात्। यदि पूर्वमिकेत्यादि कैयटाद्युक्तमपि न युक्तम्। तथात्वेऽलोन्त्यस्येत्यस्या भिन्नवाक्यत्वापत्तेः। न चेष्टापत्तिः। **यद्येकं वाक्य**मित्यादिभाष्यादिविरोधापत्तेः। तथा सति हि सार्वधातुकादिपरे-गन्ताङ्गान्त्यस्यालोऽङ्गान्त्यस्यालइको वा गुण इत्येकवाक्यतास्वरूपं वक्तुमुचितम्। एतेन यदा त्वङ्गस्येत्याद्यपि कैयटाद्युक्तं निरस्तम्। तत्राप्येकवाक्यतायाः स्पष्टमनुक्तेः। उभयत्रोभयोः शेषत्वस्य शेषित्वस्य च सम्भवेन त्वदुक्तव्यवस्थाया असम्भवाच्च। अथ त्वङ्गस्येत्याद्यपि तदुक्तमयुक्तम्। सामान्यवचनप्राप्तस्य विशेषवचनेन बाधाभ्युपगमात्। किञ्च तथात्वे यणादेरयादयो बाधका इत्यादिव्यवहारापत्तेः। यथाङ्गस्येतीत्याद्यपि पुनस्तदुक्तमयुक्तम्। इगपेक्षयाप्यङ्गस्येति स्थानषष्ट्या एवोक्तत्वात्। 'ह्रस्वस्य गुण' इत्यादौ पर्जन्यवदिति न्यायेनैतत्प्रवृत्तिः। एतेन स्थानिकत्वादित्यादित्यन्तं तदुक्तं निरस्तम्। इङ्मात्रस्येति चेदिति वार्तिकस्वरसभङ्गापत्तेः। अन्ये त्वाहुरित्याद्यपि न युक्तम्। तत्रैतदनुपस्थितावपि दीर्घस्येको गुणस्याप्रसक्तेः। अङ्गेनोकारस्य विशेषितुं शक्यत्वाच्च। सार्वधातुकार्धधातुकयोरित्यस्यानुवर्त्तनात्तयोः परतोऽनन्त्यस्य गुणश्चेत् पुगन्तलघूपधस्यैवेति व्याख्यानात् प्रकृतस्यैव नियमः। एतेनैकेन वाक्येनेत्यादि कैयटोक्तं चिन्त्यम्। ब्रह्मभ्रूणेत्यादावेकेनैवानेकनियमाङ्गीकारात्। यत्र सूत्रगतपदे यत्र कुत्रापीष्टे एवकारेण योजितानन्तरव्यवहितसाधारण्येन नियमप्राप्तिसूत्रे चानन्तरेति न्यायप्रवृत्त्या प्रकृतेऽप्रवृत्तेः। एतदाशयेनैव अथाप्येवमिति भाष्यप्रवृत्तेश्च। एतेनाथापीति प्रतीकेऽनन्तरस्येति तदुक्तिरप्यपास्ता। उभयतो नियमस्तु विनिगमकाभावेनेष्टसिद्ध्या वाऽश्रीयते। एतेनाभ्युपगमेत्यादि कैयटोक्तमपास्तम्।

अस्तु तर्हि पूर्वविप्रतिषेध इति क्रोष्ट्रीयसम्मतः षष्ठः पक्ष इति चेत् ? न, इक्परिभाषाया निरवकाशत्वात् । न हि परस्परपरिहारेणावकाशलाभेऽसति विप्रतिषेधः । तस्माद्यदि 'सत्यपि सम्भवे बाधनं भवति' इत्याश्रीयते तर्हि येन नाप्राप्तिन्यायादपवादत्वमस्त्येव । यदि तु ''असम्भवे बाध्यबाधकभावः'' अस्ति चेह सम्भवो यदुभयं स्यादित्याश्रीयते तर्हि तच्छेषादिष्वन्यतमपर्यवसानं न तु क्रोष्ट्रीयमतस्यावकाश इति स्थितम् ।

ब्रह्मभ्रूणेत्याद्युक्तदोषादिति'' [1]**स्वरस्वत्यु**क्तमपास्तम् । भाष्यकैयटादेराशयस्यान्यथा प्रतिपादितत्वात् । विध्येकवाक्यतां विनाऽनयोस्तत्वस्यामिथोऽनपेक्षत्वेन ब्रह्मणापि दुर्वचत्वात् । सर्वादेशेत्यादिभाष्यादिसङ्गतेरुक्तत्वात् । अत एवाग्रिमदोषस्याप्ययुक्तत्वात् । एवं तदपेत्यादिदोषस्याप्युक्तरीत्याऽभावात् । जुसितेरङ्गांशे उत्थिताकाङ्क्षात्वेन तथाऽन्वयासम्भवात् । तत्र पृथक् वाक्यार्थबोधस्योक्तत्वेन तयोरानर्थक्याभावात् । अत एव तदपवादपक्षे ततो भेदसम्भवात्, विशेषान्तरस्य वक्ष्यमाणत्वात् । कैयटाशयस्योक्तत्वेनाग्रिमदोषगणाभावात्, उक्तरीत्या व्यवस्थाया सम्भवात् । तत्र मानस्य प्रागुक्तत्वेन तथैव तत्पक्षवर्णनौचित्यात् । अप्राप्तेत्याद्याशयस्य **छायायामु**क्तत्वेन तच्छेषस्याप्युक्तत्वात् । अत एवातिप्रसङ्गाच्चेति दिक् । वस्तुतस्तु पदेकवाक्यतयैवानयोस्तत्रान्वयः । यथा चायं यथा चात्र भाष्यकैयटाद्युपपत्तिर्यथा चात्र **रत्ना**द्युक्तदोषाभावस्तथा प्रतिपादितं **छायायां** तत एव बोध्यमिति बोध्यम् ।।

३.४४ पूर्वविप्रतिषेधपक्षदूषणम्

यद्यपि भाष्येऽसम्बद्धपरिभाषापक्षोऽप्युक्तः, तथापि न सः स्वतन्त्रः । क्व सन्निपातः, क्वान्यतरत्याग, स च कस्येत्यत्र विनिगमकाभावेन सर्वेष्टासिद्धेः । किन्तु विप्रतिषेधोपजीव्यस्तदाह । **पूर्वेति ।** तत्र परशब्दस्येष्टवाचित्वादिति भावः । **निरवेति ।** कृते चारितार्थ्येऽपि तदप्राप्तियोग्येऽचारितार्थ्यादित्यर्थः । सिद्धान्तं वक्तुमुपसंहरति । **तस्मादिति ।** भाष्यमतेनाह । **यदीति ।** वार्तिकमतेनाह । **यदि त्विति ।** आश्रीयत इत्यत्रान्वयः । उक्तरीत्याऽन्यथागत्यभावादिति भावः । असम्भवे तत्रैव । **न त्विति ।** उभयथापीति शेषः ।

---

१. र.प्र.पृ.स. २६५ ।

तस्मात्पदोपस्थापनमिति सप्तमः पक्षः सिद्धान्तसम्मतः। तथा हि, इक इति षष्ठ्यन्तानुकरणम्, न तु संज्ञिपरम्, 'स्वं रूपम्'' (पा०सू० १-१-६८) इति वचनात्। न च ''अशब्दसंज्ञा'' (पा०सू०ए० १-१-६८) इति निषेधः, षष्ठ्यन्तस्यासंज्ञात्वात्। तदयमर्थः – यत्र ब्रूयाद् गुणो भवति वृद्धिर्भवतीति, तत्रेक इति षष्ठ्यन्तमुपतिष्ठते इति। तस्य च पदैकवाक्यतयाऽन्वयोऽन्तरङ्गोऽलोन्त्यपरिभाषा तु विधिवाक्येष्ववान्तरवाक्यार्थं बुध्वा तदेकवाक्यतया सम्बध्यते इति तदन्वयो बहिरङ्गः। ततश्च ''जुसि च'' (पा०सू० ७-३-८३) इत्यादाविकोऽङ्गस्येति सम्भवति सामानाधिकरण्ये वैयधिकरण्यस्यान्याय्यत्त्वादिकाऽङ्गे विशेषिते स्थानषष्ठी न विहितेति भवत्येवाऽलोन्त्यपरिभाषोपस्थितिः। ''मिदेर्गुणः'' (पा०सू० ७-३-८३) इत्यादौ तु सामानाधिकरण्यान्वयस्यासम्भवान्मिदेरिक इति वैयधिकरण्येनान्वये सति स्थानषष्ठीविरहादलोन्त्यपरिभाषा नोपतिष्ठते।

३.४५ पदोपस्थितिपक्षस्थापनम्

परमप्रकृतमुपसंहरति। **तस्मादिति।** उक्तपक्षाणामुक्तरीत्या सम्भवेनास्य स्वतन्त्रत्वादित्यर्थः। स्थापनं अनेन क्रियत इति शेषः। नन्विक इत्यस्यार्थपरत्वात्कथमिदमत आह। **तथा हीति। नुकरणमिति।** उक्तरीत्याऽन्यथागत्यभावादिति भावः। तस्य च नपुंसकत्वेन सोर्लुगित्यादि प्रागुक्तम्। नन्वेवम [१].... एवात आह। **न त्विति।** अनुकरणं तु न संज्ञिपरमित्यर्थः। **स्वं रूपमिति।** अनुकरणस्यानुकार्यवत्स्वरूपमप्यर्थ इति प्रागुक्तः। एतेनेको यणित्यादितुल्यत्वादिदमयुक्तमित्यपास्तम्। तत्रानुवृत्तस्य स्वरूपरत्वेन गुणशब्दो यत्र भवतीत्यर्थापत्याऽतो गुण इत्यादावप्यापत्तिरतः पुनरत्र गुणवृद्धिग्रहणम्। अत एव गुणपदं यत्र वर्तत इत्याद्यर्थ एवास्त्विति न। अनुवृत्तस्यार्थपरत्वं तु न, शब्दाधिकारापत्तेः। अत एव विधीयत इत्यस्य तदर्थकस्य भवतीत्यस्य वाध्याहारः। गुणादिपदं च तच्छब्दविहितगुणादिबोधकम्। एतन्मूलिकैवानुवादीति परिभाषेत्याद्यन्यत्र विस्तरस्तदाह। **यत्रेत्यादि। इतीति।** इतिशब्दो यत्रेत्यर्थः। अत एवात्र पक्षे विधेयसमर्पकत्वेन गृहीतगुणादिपदश्रुतिरस्या लिङ्गतत्वेन ग्रहश्च प्रथमाया विधेयविभक्तित्वेनासति बाधके तदन्तत्वेन पदज्ञानकाले एव गुणानामिति न्यायादिनोभयोः साक्षादसम्बन्धाप्रदर्शनेनैवान्वयः। तदाह। **तस्य चेति।** उपस्थितस्य तत्रेक इति पदस्येत्यर्थः। **बुद्धचेति।** स्थानषष्ठीलिङ्गकत्वादिति भावः। **तदेकेति।** तेन वाक्यैकेत्यर्थः। एवं सति क्रमेण सर्वत्रेष्टसिद्धिमाह। **ततश्चेति। नोपतिष्ठत इति।** एतेनैकस्या अप्रवृत्तावपरापि न प्रवर्तत इत्यपास्तम्। असन्नियोगाशिष्टत्वात्।

---

१. अत्र ग्रन्थपातः।

न च मिदेरङ्गस्येत्यनयोरवयवषष्ठीत्वेपीक इति स्थानषष्ठ्यस्त्येवेति वाच्यम्, न ह्येषाऽलोन्त्यपरिभाषोपस्थितावुपयुज्यते, अल्समुदायात्मकस्थानिनः परभूताया एव षष्ठ्यास्तदुपस्थापकत्वात्, इकश्चाल्रूपत्वात्। तथा चालोन्त्यपरिभाषा इक्फरिभाषा-नन्तरोपस्थितिका न तु तया सह युगपदुपतिष्ठते येनाविशेषादुभयोर्निवृत्तिः स्यादिति सकलेष्टसिद्धिः। तच्छेषतदपवादपक्षयोरपि दूषणमुद्धर्त्तुं शक्यमित्युक्तमेव।

तदिह सप्तपक्षीमध्ये पक्षत्रयं दुष्टमेव। पक्षचतुष्टयन्तु साध्विति स्थितम्।

नन्वेतत्सूत्रम् ''अङ्गस्य'' (पा०सू० ६-४-१) इत्यादिवदधिकारार्थमेव किं न स्यादिति चेत् ? एवं हि सतीको गुणवृद्धी नेति नञा संयुज्यैव पठेत्। ''सर्वस्य द्वे'' (पा०सू० ८-१-१) ''पूर्वत्रासिद्धम्'' (पा०सू० ८-२-१) इत्यादिवत्। न ह्युत्तरसूत्रोपस्थितिकत्वाविशेषे किञ्चित्संयुज्य किञ्चित्तु विभज्य पठितुमुचितम्, वैरूप्ये हेत्वभावात्। ''प्रत्ययः'' (पा०सू० ३-१-१) ''परश्च'' (पा०सू० ३-१-२) इत्यादौ तु पारार्थ्याविशेषेऽप्यसंयुज्य निर्देशो विधेयभेदान्न विरुध्यते। नापीदं विधिसूत्रम्,

---

प्रदेशे सति सम्भवे परिभाषाद्वयैकवाक्यतया वाक्यार्थः, अन्यथा त्विक्परिभाषागर्भ एव। अस्या अन्तरङ्गत्वादिति परमार्थः। हि यतः। **षष्ट्या इति।** स्थानेत्यादिः। तत्रैवानियमप्रसङ्गादित्यस्यालः सम्भवाच्चेति भावः। चस्त्वर्थे। तच्छेषपक्षोक्तदोषाभावमत्राह। **तथा चेति।** सिद्धावन्वयः। अन्तरङ्गत्वादौ चेत्यर्थः। अत एवाह। **न चेति।** न हीत्यर्थः। न त्विति प्रचुरः पाठः। इयमिति विशेषात् एकनिवृत्तावपरनिवृत्तेः। **नारायणा**द्यनुरोधेनाह। **तच्छेषेति। दूषणमिति।** जातावेकवचनम्। **स्थितं** नारायणादिग्रन्थे। तुनाऽरुचिः सूचिता। तद्बीजं तु चरमपक्ष एव युक्तोऽन्ये सर्वे दुष्टा एवेति तत्वमिति।

३.४६ भाष्ये न्यूनतापरिहारः

भाष्येऽधिकारपक्षोऽपि शङ्कितुं युक्त इति न्यूनतां तत्रत्यां परिहर्तुं शङ्कते। **नन्विति।** एवेन परिभाषात्वव्यवच्छेदः। हि यतः। **न विरुध्यत इति। एकाचो द्वे प्रथमस्याजादेर्द्वितीयस्ये**त्यादौ तूत्तरजैकदेशानुवृत्तिरुद्देश्यभेदादिकं च बीजमिति बोध्यम्। अस्वरितत्वादिलिङ्गस्पष्ट-त्वाच्चेत्यपि बोध्यम्। भाष्यीयमेवाह। **नापीदमिति।** विधिसूत्रं केवलविधिसूत्रम्।

पुनर्गुणवृद्धिग्रहणसामर्थ्यात्, तत्प्रत्याख्यानपक्षेऽपि विशिष्टानुवृत्तिसामर्थ्यादिति दिक् ।

।। इति श्रीशब्दकौस्तुभे प्रथमस्याध्यायस्य प्रथमे पादे तृतीयमाह्निकम् ।।

पुनरिति । प्रागुक्तरीत्याऽनुवृत्तयोरर्थपरत्वादिति भावः । नारायणानुरोधेनाह । **तदिति ।** गुणग्रहणेत्यर्थः । अपिः पूर्वसमुच्चायकः । ननु प्रत्याख्यानपक्षो न सिद्धान्त इति प्रागुक्तमत आह । **इति दिगिति ।** तदर्थस्तु तत्तद्विधीनां वैयर्थ्यापत्तेः पूर्वोत्तरसाहचर्येण परशास्त्रोपकारकत्वस्यैव निर्णयात् । इक इत्यस्य शब्दपरत्वेन शङ्कया एवाभावात् । आद्यदोषस्य दृढत्वाच्च । पपातेत्यादौ विधिसूत्रैरनिष्टापत्तेः । तेषां नियामकत्वस्यास्य केवलविधित्वे यातेत्यादौ विध्यर्थत्वसम्भवेन दुर्वचत्वात् । **सम्भवत्येकवाक्यत्व** इति न्यायेन स्वातन्त्र्यपारतन्त्र्याभ्यां विधित्वघटितपरिभाषात्वे वैरूप्यापत्तिरित्येकरूप्याय परिभाषात्वस्यैव युक्तत्वाच्चेति शिवम् ।।

इति श्रीमत्पायगुण्डोपाख्यवेपीगर्भजमहादेवसुतवैद्यनाथकृते कौस्तुभव्याख्याने प्रभाभिधे तृतीयमाह्निकम् ।।

श्रीशब्दकौस्तुभे चतुर्थाह्निकम्

न धातुलोप आर्द्धधातुके (पा०सू० १-१-४)। धात्वंशलोपनिमित्ते आर्द्धधातुके परे तन्निमित्तिके गुणवृद्धी इको न स्तः। 'लोलुवः' 'पोपुवः' 'मरीमृजः'। लोलूयादिभ्यो यङन्तेभ्यः पचाद्यचि कृते ''यङोऽचि च'' (पा०सू० २-४-७४) इति यङ्लुकि लुङ्निमित्तभूतमचमेवाश्रित्य प्राप्ते गुणवृद्धी निषिध्येते। यद्यपि कृत्स्नस्य धातोरपि क्वचिल्लोपोऽस्ति। तद्यथा, ''दुरीपो लोपश्च'' (पा०सू० १-२-१८७) दुःशब्दे उपपदे इणो धातो रक् प्रत्ययो भवति धातोश्च लोपः, दुःखेन ईयते प्राप्यते दूरमिति ; तथाप्येवंविधे विषये गुणवृद्ध्योः प्राप्तिविरहान्निषेधवैयर्थ्यम्। अतोऽत्र धातुशब्देन तदेकदेशो लक्ष्यते।

धातुलोप इति च यदि षष्ठीतत्पुरुषः स्यात्तदार्द्धधातुकग्रहणं लोपविशेषणं वा

---

४. चतुर्थमाह्निकम्

४.१ 'नधातुलोप' सूत्रे धातुपदस्य धात्वेकदेशलक्ष्यकत्वम्

वक्ष्यमाणं सिद्धान्तं मनसि निधाय स्पष्टार्थं तत्रार्थमाह। **धात्वंशेति।** पर इति वाच्यार्थः। अत एव प्रत्यासत्त्या लब्धमर्थमाह। **तन्निमित्तिक इति।** शैषिकः कप्। तन्निमित्तक इति पाठे संज्ञादौ कः। धात्वंशे व्याख्यानबीजमसम्भवं निरस्य बीजान्तरमाह। **यद्यपीति।** व्यतिसे इत्यादौ यद्यप्यवयवलोपद्वारा धातुलोपोऽस्ति, तथापि स न कृत्स्नस्य इष्टस्तु न धातुत्वावच्छिन्नलोप इत्यर्थात्। किञ्च तस्यानभिधानमत आह। **कृत्स्नस्येति। धातोश्चेति।** तत्सन्नियोगेनेत्यादिः। कर्त्तरि प्रत्ययेऽर्थासङ्गतेराह। **दुःखेनेति। अत इति।** इदं कैयटहरदत्ताद्यनुरोधेन। वस्तुतस्तु उणादीनामव्युत्पन्नत्वादसम्भवादेव लक्षणेति कैयटाद्युक्तवदिदमप्ययुक्तमिति बोध्यम्। **लक्ष्यत इति।** पटो दग्ध इति वदवयवधर्मस्य क्रियादेः समुदाये आरोपात् पूर्वपाञ्चाली इति वत्समुदायधर्मस्य प्रवृत्तिनिमित्तस्यावयवे आरोपाद्वेति भावः। चो वाक्यालङ्कारे।

४.२ आर्धधातुकग्रहणस्य लोपविशेषणत्वादिपक्षत्रयोपक्षेपः - व्याख्यायां रत्नप्रकाशविमर्शः

अत्र पक्षे धातुपदवैयर्थ्यस्य वक्ष्यमाणत्वादाह। **लोपेति।** सूत्रे श्रुतत्वात्।

गुणवृद्ध्योर्विशेषणं वा तन्त्रावृत्त्यादिभिरुभयविशेषणं वेति त्रयः कल्पाः। तत्राद्ये पक्षे आर्द्धधातुकनिमित्तके धातुलोपे सति यत्किञ्चिन्निमित्तिके गुणवृद्धी न भवत इति सूत्रार्थः

गुणेति। अश्रुतत्वेऽपि निषेध्यत्वेन गुणवृद्ध्योः शाब्दप्राधान्यात् लोपस्य तद्विशेषणत्वात्। न च लोपशब्दोऽधिकरणघञन्त इत्यार्धधातुकविशेषणमेवेति वाच्यम्। 'अदर्शनं लोप' इत्यादौ भावसाधनस्यैव प्रसिद्धत्वेन तत्त्यागानौचित्यादिति भावः। भाष्यानुक्तमपि सम्भावितत्वात् कृष्णाद्युक्तमुभयानुग्रहायाह। **तन्त्रावृत्त्यादिभिरिति।** बहुवचनमवयवभेदाभिप्रायम्। यद्यपि भाष्ये पक्षद्वयमेव कण्ठत उक्तं, तथाप्ययं पक्षो 'यदि परिगणनं न क्रियते भेद्यते छेद्यते इत्यत्रापि प्राप्नोति' इत्यग्रिमभाष्येण[1] ध्वनितः। अन्यथा क्नोपयतीत्यत्रातिप्रसङ्गवारणाय ज्ञापकाश्रयणे दौष्यं तदवस्थमेव स्यात्। कैयटस्य त्वेतत्पक्षानुपन्यासेन न्यूनतैवेति। वस्तुतस्तु नायं तेन भाष्येण ध्वनितः, नापि कैयटस्य न्यूनतेति **भाष्यप्रदीपोद्योतव्याख्याने**[2] स्पष्टमिति तदसंमतः उक्तरीत्या कृष्णाद्यनुरोधेनात्र उक्त इति बोध्यम्। यत्त्विदं चिन्त्यम्। तस्याद्यपक्षद्वयसाधारण्येनैव प्रवृत्तत्वात्। आवृत्तिपक्षेऽपि प्रत्यासत्त्या द्वयोरेकनिमित्तकत्वलाभेन 'नैवं विज्ञायत' इत्यादिभाष्योक्तबहुव्रीहि-पक्षादविशिष्टत्वेन तद्भाष्यस्य तत्पक्षाश्रयेण प्रवृत्त्यनौचित्यात्। बहुव्रीहिणैवोपपत्तौ आर्धधातुक-पदानुवृत्तौ मानाभावाच्चेति **[3]रत्नप्रकाशकृत्।** तन्न। उक्तहेतोः त्वदुक्ताद्यहेतोः तथैव लाभाच्च। एवकरणगर्भोक्तेरयुक्तत्वाच्च। बहुव्रीहावेकार्धधातुकनिमित्तकत्वमत्र पक्षे तु भिन्नार्धधातुकनिमित्त-कत्वमिति भेदेन त्वदुक्तदोषद्वयस्यासम्भवाच्चेति दिक्।

४.३ आर्धधातुकग्रहणस्य लोपविशेषणपक्षविचारः

आर्धधातुके परे पूर्वस्य धात्वंशस्य लोपे सतीति वाच्योऽर्थः। **इको गुण अचश्चे**त्यन्यपरि-भाषाणामनुवादेऽपि प्रवृत्तिस्वीकारात्। तत्फलितं भाष्यानुरोधेनाह। **आर्धधातुकनिमित्त इति।** एतेनार्धधातुके सति लोपो यस्तस्मिन्निति व्याख्यानाल्लोपस्यार्धधातुकनिमित्ततालाभः, आर्धधातुकपदस्य तन्निमित्तलक्षणयेति **[4]रत्नप्रकाशो**क्तमपास्तम्। परिभाषाबाधे मानाभावात्। उक्तरीत्योपपत्तौ लक्षणाश्रयणे मानाभावाच्च। यद्यप्यत्र पक्षे धातुपदवैयर्थ्यं वक्ष्यते। तथापि

---

१. इत्यग्रिमभाष्यग्रन्थेन इति ख। म.भा.पृ.सं. २०६ (प्र.भागः)

२. म.भा.प्र.उ.पृ.सं. २०१ (प्र.भागः)

३. र.प्र.पृ.सं. २९८।

४. र.प्र.पृ.सं. २९८।

स्यात्। ततश्च प्रपूर्वादिन्धेः क्तप्रत्यये तन्निमित्तके नलोपे च सति 'प्रेद्धः' इत्यत्र प्राप्तुवन्नादगुणोऽपि निषिध्येत। यो हि द्वयोः षष्ठीनिर्दिष्टयोः स्थाने भवति, लभतेऽसावन्यतरतो व्यपदेशमितीक्स्थानिकत्वस्यापि सत्त्वात्। न चैवमपीग्लक्षणत्वविरहान्न निषेधः लैगवायने ओर्गुपस्येवेति वाच्यम्, नह्यस्मिन्सूत्रे इक इत्यस्य स्वरूपपरतायां प्रमापमस्त्युत्तरसूत्रे तु चकार इतिशब्दार्थकः प्रमापमित्याहुः।

अस्तु वाऽर्थाधिकाराश्रयणबलेनेहापीक इति स्वरूपपरं तथापि 'भेद्यते' इत्यादौ गुणो न स्यादिति तृतीयपक्षे वक्ष्यमाणो दोष आद्यपक्षद्वयेऽप्यस्त्येवेति बोध्यम्। ननु 'उपेद्धः' 'प्रेद्धः' इत्युदाहरणस्येहोक्तिसम्भव एव नास्ति। तथा हि, ''पूर्वं धातुः साधनेन युज्यते'' इति मते 'इदम्' इत्यत्र नलोपोऽन्तरङ्गः प्रथमोपनतक्तप्रत्ययापेक्षत्वात्। ''पूर्वं धातुरुपसर्गेण'' इति दर्शने तु गुणोऽन्तरङ्गः, उभयथाऽपि गुणो भविष्यति बहिरङ्गस्य गुणस्यासिद्धतया निषेधायोगात् बहिरङ्गस्य निषेधस्यासिद्धौ गुणप्रवृत्तेर्निर्बाधत्वाच्च।

प्रश्नवेलायां तद्ग्रहणौचित्यादाह। **धातुलोपे सतीति।** लोपस्य परत्वात् सम्भवात् परिभाषानुपस्थितिरिति भावः। नन्वाद्गुणस्योभयस्थानिकत्वाभावादिक इत्यस्येकः स्थाने इत्यर्थात्कथं निषेधोऽत आदौ **हरदत्ता**द्युक्तिमाह। **यो हीति। चैवमपि** इक्स्थानिकत्वसत्वेऽपि। तस्यात्राविवक्षणात् तस्य स्वरूपपरत्वेन तथाऽविवक्षणात्। एतेन तावतैवोपलक्षणमिति **रत्नप्रकाशो**क्तमपास्तम्। हि यतः। **आहुरिति।** मिश्रादय इत्यर्थः। अनेन सूचितामरुचिमाह। **अस्तु वेति।** एवञ्च नायं दोष इति भावः। साधारणत्वादत्रैवाह। **द्वयेऽपीति। स्येहो** न धात्विति सूत्रे। **सम्भव इति।** अत्र पक्षेऽतिप्रसङ्गविषयत्वेनेति भावः। मते सिद्धान्तमते। **नलोपेऽन्तरङ्ग इति।** एवञ्च तन्निमित्तकनिषेधोऽपि अन्तरङ्ग इति भावः। **दर्शने तु** पूर्वपक्षमते तु। तुना सूचितारुचिरग्रे स्फुटीभविष्यति। तत्राद्ये आह। **बहिरङ्गेति।** अन्तरङ्गे निषेधे कर्तव्य इत्यादिः। द्वितीये आह। **बहिरङ्गेति।** बहिरङ्गस्य बहिरङ्गनिषेधनिमित्तभूतस्योपधालोपस्यात्वेनासिद्धत्वाद्विधिप्रवृत्तिकालेऽनिष्पन्नत्वान्निषेधस्याप्राप्तौ पूर्वमेव जातस्य निषेधायोगात्तत्प्रवृत्तेस्तत्वादित्यर्थः। एतेन जातस्य बहिरङ्गस्यान्तरङ्गे कर्तव्ये तेनासिद्धत्वप्रतिपादने जातेऽन्तरङ्गे पश्चात्प्राप्तबहिरङ्गस्य तेनापि सिद्धत्वप्रतिपादने मानाभावः फलाभावो ज्ञापकविरोधश्चेत्यपास्तम्।

सत्यम्, ''असिद्धं बहिरङ्गमन्तरङ्गे'' (प०भा० ५०) इति परिभाषा नेह प्रवर्त्तते ''नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः'' (प०भा० ५१) इति निषेधात्। यत्रान्तरङ्गे बहिरङ्गे वाऽचारोनन्तर्यमाश्रीयते तत्रैषा परिभाषा नेति व्याख्यानादिति हरदत्तानुयायिनः। किन्त्वस्मिन्पक्षे ''एत ऐ'' (पा०सू० ३-४-९३) इति सूत्रे 'पचावेदं' 'पचामेदम्' इत्यादौ एत ऐत्वं कुतो नेत्याशङ्क्य बहिरङ्गत्वेन गुणस्यासिद्धत्वादिति हरदत्तेन वक्ष्यमाणं विरुध्यते, तथा च बहिरङ्गस्यासिद्धताबलेन 'प्रेद्धम्' इत्यादिसिद्धिरिति प्रतिपादन-

४.४ नधातुलोपसूत्रे नाजानन्तर्यपरिभाषाविचारः

अन्तरङ्गेत्यस्याप्राप्तेरेवाह। **असिद्धमिति।** ननु निषेधे तदभावात्कथं तत्प्राप्तिरत आह। **यत्रान्तरिति।** व्याख्यानात्तदर्थात्। **हरेति।** हरदत्तस्तदनुयायिनः सीरदेवादयश्चेत्यर्थः। एतत्सूचितामरुचिमाह। **किन्त्वस्मिन्निति। इतीति।** समाधानमिति शेषः। **विरुध्यत इति।** गुणे आदावित्यचोरानन्तर्येणाश्रयणेन निषेधप्रसङ्गादिति भावः। ननु सैवैकदेश्युक्तिरास्तामत आह। **तथेति। बहिरङ्गस्येति।** गुणस्येत्यर्थः। उक्त एवाशयः। अपिना संयोगान्तस्येति सूत्रे 'यणः प्रतिषेध' इति वार्तिकखण्डनपरवार्तिकभाष्यादेस्तथा तत्र स्वोक्तेश्च समुच्चयः। एवमग्रेऽपि। यत्तु **सीरदेवादयः** - 'ओमाङोश्च' इत्याङ्ग्रहणेन नाजानन्तर्ये इत्यस्य अनित्यत्वज्ञापनेन नेदं विरोधं जातम्। अन्यथा निषेधेनातद्प्रवृत्त्या यरलवादौ सवर्णदीर्घे ततो गुणे शिवेहीत्यादिसिद्ध्या तद्वैयर्थ्यं स्पष्टमेवेति। तन्न। तस्यान्तरङ्गबहिरङ्गयोरन्तरङ्गं बलीय इत्यर्थज्ञापकतया धातूपसर्गकार्यान्तरङ्गता-ज्ञापकतायाश्च [१]**सम्प्रसारणाच्चे(पा०सू० ६-१-१०८)**ति सूत्रे भाष्ये उक्तत्वेन त्वदुक्तार्थे माना-भावात्। नाजानन्तर्य इति परिभाषाज्ञापकमसिद्धमित्यस्यानित्यत्वस्यैव ज्ञापकमिति नाजानन्तर्य इत्यस्या एवासत्वाच्च। अत एव भाष्ये विप्रतिषेधसूत्रतोऽन्यत्र न क्वापि निषेधोल्लेखः[२]। एतेन

---

१. 'सम्प्रसारणाच्च' इति सूत्रे 'आङि पररूपवचनं तु ज्ञापकमन्तरङ्गबलीयस्त्वस्य' इति वार्तिकव्याख्यावसरे भाष्यकारैरुक्तम्। -म.भा.पृ.सं. १२० पञ्चमो भागः।

२. स्पष्टीकृतमिदं परिभाषेन्दुशेखरेऽस्याः परिभाषाया व्याख्यावसरे। तत्र हि यदि एषा परिभाषा स्वीक्रियते, तर्हि 'ह्रस्वस्य पिति' (६-१-७१) इति सूत्रभाष्यविरोधमाशङ्क्य एवमेव समाहितम्। इमानि तत्रत्यानि वाक्यानि – ''न चैवं सति 'ह्रस्वस्य पिति' इति सूत्रस्थ भाष्यविरोधः। तत्र हि ग्रामणिपुत्र इत्यत्र 'इको ह्रस्वोऽङ्यो' (६-३-६१) इति ह्रस्वे कृते तुकमाशङ्क्य ह्रस्वस्य बहिरङ्गासिद्धत्वेन समाहितम्। नाजानन्तर्य इत्यस्य सत्वे तत्र तदप्राप्तेसङ्गतिः स्पष्टैवेति वाच्यम्। तेन भाष्येणास्या अनावश्यकत्वबोधनात्। एतज्ज्ञापकेनान्तरङ्गपरिभाषाया अनित्यत्वबोधनस्यैव न्याय्यत्वात्। अत एव 'अचः परस्मिन्' इति सूत्रे भाष्ये पटु ई आइत्यत्र परयणादेशस्य तयाऽसिद्धत्वात्पूर्वयणादेशः साधितः। अत एवैषा परिभाषा भाष्ये पुनः क्वापि नोल्लिखिता'' इति। (परि.शे.पृ.सं. १११ गदासहितपरिभाषेन्दुशेखरः, आनन्दाश्रमसंस्था)

परमिहत्यं भाष्यमपि विरुध्येत। तस्माद्यत्रोत्तरकालप्रवृत्तिके अच आनन्तर्यं तत्र बहिरङ्गपरिभाषा न स्यादिति कैयटसम्मत एव ''नाजानन्तर्ये'' (प०भा० ५१) इत्यस्यार्थः साधुः। 'पचावेदम्' इत्यादौ हि पूर्वं गुणप्रवृत्तिः। तत्र चाजानन्तर्याश्रयपेऽपि गुणोत्तरप्रवृत्तिके ''एत ऐ'' (पा०सू० ३-४-९३) इत्यत्र तदनाश्रयणाद्युक्त एव बहिरङ्गतयोद्धारः। 'उपेद्धः' 'प्रेद्धः' इत्यादौ तु गुणं प्रापय्य निषेधः कार्य इत्युत्तरकाल-प्रवृत्तिको निषेधः। तत्राजानन्तर्याश्रयणाभावाद्बहिरङ्गपरिभाषया सिद्धमेवैतत्। अतोऽत्रत्यं भाष्यमपि सङ्गच्छते।

ननु ''षत्वतुकोरसिद्धः'' (पा०सू० ६-१-८६) इति सूत्रे एषा परिभाषा ज्ञापयिष्यते। तत्र च 'कोऽसिचत्' 'कोऽस्य' इत्यादौप्रथमप्रवृत्तिके ''एङः पदान्ताद्'' (पा०सू० ६-१-१०९) इत्यस्मिन्नजानन्तर्यं न तूत्तरकालप्रवृत्ते षत्वेऽपीति कथं कैयटमतं समर्थनीयम्। तस्माद्यत्रान्तरङ्गे बहिरङ्गे वा अचोरानन्तर्यमिति हरदत्तोक्तरीतिरेव शरणीकर्त्तव्येति चेत् ? न, कैयटमते अचोरिति द्वित्वस्याविवक्षया सर्वसामञ्जस्यात्।

संहिताधिकारीयकार्ये नाजेति निषेधेनासिद्धमिति बाध्यते। ज्ञापकस्य तदधिकारस्थत्वात्। एत ऐ (पा०सू० ३-४-९३)इति तु प्रकरणान्तरविहितमिति न दोष इत्यपि तदुक्तमपास्तम्। तस्या एवासत्वात्। स्वोक्तद्वितीयपक्षे प्रकृतभाष्याविरोधायान्तरङ्ग इति विहायाह। **यत्रोत्तरेति। न स्यादिति।** उपस्थितिविषयो न भवेदित्यर्थः। साधुत्वे हेतुं सूचयन् तत्र प्रागुक्तदोषाभावाय सर्वेष्टसिद्धिमाह। **पचेति।** हि यतः। पूर्वत्र गुणोत्तरप्रवृत्तिकत्वेनैवैतस्योत्तरकालप्रवृत्तिकत्वम्, अन्यथा असम्भव एव तस्य। अत्र त्वसम्भवाभावेऽपि प्राप्तिपूर्वकत्वान्निषेधस्येति तथात्वमिति वैलक्षण्यसूचकस्तुशब्दः। अप्यर्थकः स इति केचित्। **वैतत्** उपेद्ध इत्यादिकम्। अच इत्युक्तिं व्याख्यातुं शङ्कते। **नन्विति। ज्ञापेति।** तेनैव सूत्रेणेति भावः। तत्र षत्वग्रहणं ज्ञापकमिति कैयटानुरोधेनाह। **तत्र चेति।** तद्विषय इत्यर्थः। **प्रवृत्ते षत्वेऽपीतीति।** प्रवृत्तेऽपि षत्वे इत्यर्थः। **अचोरिति।** तत्र द्विवचनान्तेन समासः, द्वयमस्तीत्यध्याहारः। अचोरानन्तर्ये सति यत्र द्वयमस्ति बहिरङ्गं प्रवृत्तमन्तरङ्गं प्राप्नोति, अन्तरङ्गं प्रवृत्तं बहिरङ्गं वा तत्र बहिरङ्गपरिभाषा नेति तदर्थ इति तदाकूतम्[1]। **स्याविवक्षेति।** धर्मिग्राहकमानविरोधादिति भावः। **अदसो मादि(पा०सू० १-१-१२)** त्यत्र कैयटेन ध्वनितमिदम्।

---

१. तथा चान्तरङ्गे बहिरङ्गे उभयत्र वाऽचोऽजानन्तर्ये बहिरङ्गपरिभाषाप्रवृत्तिर्नेति फलितमिति भावः।

अस्ति ह्युत्तरकालप्रवृत्तिके षत्वे अच आनन्तर्याश्रयणम्, इणः परस्य सस्येत्युक्तेः । एवञ्च प्रथमपक्षे 'प्रेद्धः' इत्यादौ दोषाभावेऽपि 'भेद्यते' इत्याद्यसिद्धिरेव दूषणमिति दिक् ।

एतेन हरदत्ताद्युक्तावयमपि दोषो बोध्य इति सूचितम् । इत्थं हि तदाकूतम् । एकवचनान्तेन तत्र समासः । उक्तयुक्तेः । उत्तरकालप्रवृत्तिकत्वमात्रनिवेशे चात्रत्यं भाष्यं मानम् । एवञ्चोत्तरकाल-प्रवृत्तिके अच आनन्तर्ये तत्प्रतियोगिकानन्तर्ये निमित्तत्वेनाश्रिते सति तदप्रवृत्तिरित्यर्थ इति । तदाह । **अस्ति हीति ।** हिनाऽस्य तत्र हेतुत्वं बोधितम् । **अच इति ।** फलिताच्प्रतियोगिकानन्तर्ये इत्यर्थः । **इणः परस्येति ।** यद्यपीणो हलोऽपि, तथापि अचोऽपि तत्रान्तर्भूताः सन्त्येव । एवञ्च तन्मात्रनिवेशो नेति भावः । केचित्तु अच इति षष्ट्यर्थो निष्ठत्वं, तेनाव्निष्ठमानन्तर्यं यत्र तत्वेनाश्रीयते तत्रैवायं निषेधः । तस्मादित्युत्तरस्येत्यस्य पञ्चम्यन्तार्थादव्यवहितस्येत्यर्थान्न धर्मिग्राहकमानविरोधः । अत एव ग्रामणि कुलमित्यादौ ह्रस्वस्येति गुणः असिद्धपरिभाषया वारितः 'कृन्मेजन्त' इति सूत्रे भाष्य इत्याहुः । प्रकृतमुपसंहरति । **एवञ्चेति ।** निषेधाऽप्रवृत्त्याऽसिद्ध-मित्यनया निर्वाहे चेत्यर्थः । **असिद्धिरेव दूषणमिति ।** इत्याद्यसिद्धिदूषणमेवेत्यर्थः । तथा च भाष्यादिकमयुक्तमिति भावः । वस्तुतस्तु भेद्यत इत्यादौ 'न धात्विति' निषेधे कार्ये 'अचः परे'ति णिलोपस्य स्थानिवत्त्वेन तत्राभावातिदेशेऽस्य सत्वेन स्थानिनि णिचि सत्यभवतो निषेधस्य लोपेऽप्यभावातिदेशात्तृतीये इवाज्पक्षेऽपि न दोष इति भाष्यादिकं सम्यगेवेत्ययमपि पक्षः साधुरेव । किञ्च कैयटोक्तार्थोऽप्ययुक्तः । पचावेदमित्याद्यसिद्धेर्धर्मिग्राहकमानविरोधाच्च । किञ्च षत्वग्रहणं न ज्ञापकम् । पदद्वयसम्बन्धिवर्णद्वयापेक्षत्वमेकादेशस्येव इणः पूर्वपदसम्बन्धित्वेन षत्वस्यापि पदद्वयसम्बन्धिवर्णद्वयापेक्षत्वेनोभयोः समत्वात् । न ह्यसमत्वेऽपि मास्तु षत्वग्रहणम् । सिचदित्यस्यैकदेशविकृतन्यायेन पदत्वेन **सात्पदाद्यो**रिति निषेधेनेष्टसिद्धेरिति वाच्यम् । एकादेशस्य परादिवत्वेनौसिचदित्यस्य पदत्वेन सस्यापदादित्वेन च तदप्रवृत्तेः । न चाशास्त्रीये निषेध-प्रतिबन्धे कथमतिदेशः । अथ तत्प्रतिबन्धोऽपि शास्त्रीयं कार्यं तूक्तरीत्या औसिचदित्यस्य पदत्वेनेणः पूर्वपदासम्बन्धित्वेन द्वयोरसमत्वात् ज्ञापकत्वं युक्तमेव । किञ्च न पदद्वय-सम्बन्धिवर्णद्वयापेक्षत्वेन तत्वम्, किन्त्वल्पनिमित्तत्वादिनेति षत्वस्यैव तत्वाद्युक्तमेव तदिति वाच्यम् । त्रैपादिकेऽन्तरङ्गे कार्यकालयथोद्देशपक्षयोरसिद्धमित्यस्याप्रवृत्तेरन्यत्र[1] स्पष्टत्वात् । तस्मात्

---

१. परिभाषेन्दुशेखरे इत्यर्थः । इत्थं हि तत्र प्रतिपादितम् । ''इयं च त्रिपाद्यां न प्रवर्त्तते, त्रिपाद्या असिद्धत्वात् । अस्यां च वाह ऊठ्सूत्रस्थमूठ्ग्रहणं ज्ञापकमित्येषा सपादसप्ताध्यायीस्था । अन्यथा सम्प्रसारणमात्रविधानेन लघूपधगुणे 'वृद्धिरेचि' (६-१-८८) इति वृद्धौ विश्वौह इत्यादिसिद्धेस्तद्वैयर्थ्यं स्पष्टमेव । सत्यां ह्येतस्यां

द्वितीयपक्षे तु यत्किञ्चिन्निमित्तके धातुलोपे सत्यार्द्धधातुकनिमित्ते गुणवृद्धी न स्त इति सूत्रार्थः स्यात्। ततश्च ''क्नूयी शब्दे'' इत्यस्माण्णिचि पुकि यलोपे कृते पुगन्त-लक्षणो गुणो निषिध्येत। तथा च 'क्नोपयति' इति न सिध्येत्। यदि तु ''चेले क्नोपेः''

---

[1]तुग्ग्रहणमेव ज्ञापकमित्यन्यत्र स्पष्टम्। परिभाषार्थस्तु अचोऽन्यानन्तर्यनिमित्तकेऽन्तरङ्गे कर्तव्ये जातस्य बहिरङ्गस्य बहिष्ठप्रक्लृप्तिर्न, बहिष्पदेन बहिरङ्गम्, तस्य भावो बहिरङ्गत्वं, तेन तत्प्रयुक्तासिद्धित्वं तस्य न प्राप्तिरिति। असिद्धमित्यतः पदद्वयानुवृत्त्या चोक्तार्थलाभः। किञ्च ज्ञापकेन परिभाषाया अनित्यत्वमेव ज्ञाप्यते न निषेधः, लाघवात्। अत एव **ह्रस्वस्ये**ति **अचः परे**ति च सूत्रस्थभाष्यं सङ्गच्छते। अत एव च निषेधस्य विप्रतिषेधसूत्रभिन्ने नोल्लेख इत्याद्यन्यत्र स्पष्टम्। किञ्च पूर्वं धातुरुपसर्गेणेति पक्षः 'सुट्कात्पूर्व' इत्यादिषु सूत्रेषु भाष्येषु दूषित इति भाष्यरीतिरेव युक्तेति बोध्यम्। तदाह। **दिगिति ।।**

४.५ आर्धधातुकपदस्य गुणवृद्धिविशेषणपक्षविचारः

द्वितीयपक्षे धातुपदस्यावश्यकत्वादाह। **धात्विति।** उक्तहेतोरेवाह। **सतीति।** आर्धधातुके परे प्रत्यासत्त्या पूर्वस्य धातोर्ये गुणवृद्धी इति वाच्योऽर्थः। तत्फलितमाह। **आर्धधातुकनिमित्ते गुपेति। यलोप इति।** 'लोपोव्यो'रितीत्यादिः। **निषिध्येतेति।** पुगन्तप्रयुक्तगुणस्तु ह्वेपयतीत्यादौ

बहिरङ्गसम्प्रसारणस्यासिद्धत्वाल्लघूपधगुणो न स्यात्। न च 'पुगन्त' इति सूत्रे निमित्तमि को विशेषण मस एव भिनत्तीत्यादौ न गुणः, एवञ्च 'नाजानन्तर्ये' इति निषेधात्कथं परिभाषाप्रवृत्तिरिति वाच्यम्। प्रत्ययस्याङ्गांशे उत्थिताकाङ्क्षात्वेन तत्रैवान्वयात्। पुगन्तेत्यादौ कर्मधारयाश्रयणेन प्रत्ययपराङ्गावयवलघूपधारूपेको गुण इति 'इको गुणवृद्धी' इति सूत्रभाष्यसम्मतेऽर्थे भिनत्तीत्यादावदोषाच्च। अकारान्तोपसर्गेऽनकारान्ते चोपपदे वहेर्वाहिर्वा ण्विविचावनभिधानान्न स्त एव। वार्यूह इत्यादि तूहतेः किपि बोध्यम्। धातूनामनेकार्थत्वान्नार्थासङ्गतिः। प्रौह इत्याद्यसाध्वेव वृद्धेरप्राप्तेः। अस्योहस्याऽऽनर्थक्यान्न 'प्रादूहोढो' इत्यस्यापि प्रवृत्तिः। न च कार्यकालपक्षे त्रिपाद्यामेतत्प्रवृत्तिर्दुर्वारिति वाच्यम्। पूर्वं प्रति परस्यासिद्धत्वादन्तरङ्गाभावेन पूर्वस्य तन्निरूपितबहिरङ्गत्वाभा-वात्तया तस्यासिद्धत्वप्रतिपादनासम्भवात्। न चानया पूर्वस्यासिद्धत्वात्तदभावेन तं प्रति परासिद्धत्वं 'पूर्वत्र' (८-२-१) इत्यनेन वक्तुमशक्यमिति वाच्यम्। एवं हि विनिगमनाविरहादुभयोरप्यप्रवृत्त्यापत्तेः। किञ्च पूर्वत्रेत्यस्य प्रत्यक्षत्वेन तेनाऽनुमानिक्या अस्या बाध एवोचितः। अतः कार्यकालपक्षेऽपि त्रिपाद्यामस्या अनुपस्थितिरेव। इति। (परि.शे.पृ.सं. ९०)

१. 'षत्वतुकोरसिद्धः' (६-१-८६) इति सूत्रस्थं तुग्ग्रहणमित्यर्थः। निरूपितं चैतत् शेखरे। परि.शे. पृ.सं. १०७।

(पा०सू० ३-४-३३) इति निर्देशाद् गुणस्तर्हीहापि 'भेद्यते' इत्यस्यासिद्धिरेव दोषः ।

तृतीयपक्षे त्वार्द्धधातुकनिमित्तके धातुलोपे सत्यार्द्धधातुकनिमित्ते गुणवृद्धी न स्त इति सूत्रार्थः स्यात् । तत्र तन्त्रावृत्त्याद्याश्रयणप्रयुक्तं गौरवं तावत्स्पष्टमेव लोपेन सह गुणवृद्ध्योरैकनिमित्तकत्वं च न लभ्येत । ततश्च 'भेद्यते' इत्यत्र भिदेर्ण्यन्तात्कर्मणि यकि भिद् इ य इति स्थिते नित्यत्वाण्णिलोपे कृते प्रत्ययलक्षणेन णिचमाश्रित्य क्रियमाणोऽपि गुणो निषिध्येत । न च णिलोपात्प्रागेवान्तरङ्गत्वाद् गुणोऽस्त्विति वाच्यम्, विभज्यान्वाख्यानपक्षे तदसम्भवात् ''उपसंजनिष्यमाणनिमित्तोप्यपवाद उपसंजातनिमित्तमप्युत्सर्गं

सावकाश इति भावः । **निर्देशात्** निपातनात् । इदं च यलोपार्थमावश्यकम् । अन्यथा वर्णमात्राश्रयत्वेनान्तरङ्गे यलोपे कार्ये बहिरङ्गस्य पुकोऽसिद्धत्वात् स न स्यात् । **सिद्धिरेवेति** प्राग्वत् । **इहापि** द्वितीयपक्षेऽपि । पूर्वं च तेन गुणसिद्धिरिति भावः । तुनारुचिः सूचिता प्रागुक्तरीत्यात्र न दोष इति अयमपि पक्षो निर्दुष्ट एवेति ।

४.६ उभयविशेषणपक्षविचारः - सिद्धान्तभूतबहुव्रीहिपक्षनिर्णयः

तृतीयपक्षेऽपि वाच्यार्थः प्राग्वत् बोध्यः । फलितमाह । **आर्धेति ।** अत्र पक्षे स्पष्टार्थमाह । **धात्विति । तत्र** तृतीयपक्षे । तावत् आदौ । प्रसिद्धत्वात् । अत एव दोषान्तरमाह । **लोपेनेति । न लभ्येतेति ।** चो व्युत्क्रमे । न लभ्येत चेत्यर्थः । प्रत्यासत्याश्रयणे तु बहुव्रीहिणैवेष्टसिद्धौ गुरुभूततन्त्राद्याश्रित्योभयविशेषणत्वस्वीकारोऽनर्थकः स्यादिति भावः । यत्तु सर्वविधिभ्यो लोपविधिर्बलवानिति णिलोप इति **नारायणः ।** तन्न । तस्यासत्वात् । अत एव प्यलोपाविति वार्तिकभाष्यादिसङ्गतिः । अपिर्लक्ष्यस्य गुणस्यापि समुच्चायकः । क्रमेणान्वाख्याने शङ्कते । **न चेति ।** णिलोपात् तज्जनकयणादेः अन्तरङ्गत्वात् तस्यैव तदा प्राप्तेः । **विभज्येति ।** पदस्येत्यादिः । **पक्ष इति ।** तदोभयोः समकालप्राप्तपरनिमित्तकत्वस्य तुल्यत्वेन तदसम्भव इति भावः । ननु क्रमेणान्वाख्यानपक्षे तत्सम्भव एव, [1]किञ्च विभज्यान्वाख्यानपक्षेऽपि पूर्वोपस्थितनिमित्तकत्वरूपान्तरङ्गत्वसम्भव एव यव्ये ? त्यादाविवात आह । **उपेति ।** प्रकल्प्येति न्यायमूलकादित्यर्थः । एतेनोपजनिष्येति न्यायस्य भाष्येऽसत्वाच्चिन्त्यमिदमित्यपास्तम् । अस्य तन्मूलकत्वेन तदभिन्नत्वात् । तद्बीजं त्वचारितार्थ्यं मानान्तरबोधितप्राबल्यं च । आद्यं 'अदभ्यस्ता'दित्यत्र,

---

१. 'किञ्च' इत्यारभ्य 'अन्तरङ्गत्वसम्भव एव' इति पर्यन्तं कपाठे नास्ति ।

बाधते'' (प०भा० ६५) इति न्यायाच्च। अन्यथा 'दधति' इत्यादावन्तरङ्गत्वात् ''झोन्तः'' (पा०सू० ७-१-३) इत्यन्तादेशः प्रवर्त्तेत। न च श्लौ द्वित्वे चैवंकृते अन्तादेशस्य स्थानिवद्भावेन ''अदभ्यस्तात्'' (पा०सू० ४-१-८२) इति सूत्रे 'अकृतव्यूहाः पाणिनीयाः' (प०भा० ५६) 'कृतमपि शास्त्रं निवर्त्तयन्ति' इति ज्ञापयितुं समर्थग्रहणमिति वक्ष्यते। द्वे एते परिभाषे समानफले इति च तत्रैव स्फुटीकरिष्यते। तथा चेहापि पूर्वं गुणो न क्रियेत, कृतोऽपि वा निवर्त्तेत 'जग्मुषः' इत्यादाविडादिवत्। तस्माद्धातोर्लोपो

द्वितीयं प्रकृतसूत्रे। अस्य हि 'निषेधाश्च बलीयांस' इति न्यायेन प्राबल्यं बोधितम्। तस्यापि बीजं तु विध्युन्मूलकत्वम्। एतेन गुणप्रतिषेधो यत्र लोलुव इत्यादौ स्थूलविलक्षणसमानकालौ तत्र चरितार्थो निषेधो नान्तरङ्गं गुणमत्र बाधितुं क्षमते। 'अपवादोऽपि यद्यन्यत्र चरितार्थस्तर्ह्यन्तरङ्गेण बाध्यत एव' इति न्यायविरोधादेव चेदं चिन्त्यमिति **विवरणकृन्नारायणो**क्तमपास्तम्। तेन आद्यबीजाभावेऽपि द्वितीयबीजसत्वात्। गुणप्राप्तिविषये चारितार्थ्याभावेन द्वितीयबीजस्यापि सत्वाच्च। उक्तवचनेऽपिभ्यांसमाननेति न्यायसिद्धस्य समुच्चयाच्च। निषेधाश्चेति न्यायेनास्य बाधाच्च। एतेन विभज्यान्वाख्याने प्रागुक्तरीत्यान्तरङ्गत्वसत्वे न्यायस्यास्याविषयतया तत्रानेन कथं निर्वाह इत्यपास्तम्। न्यायावश्यकतामाह। **अन्यथेति।** एतेनादादेशस्यानवकाशत्वादेव सिद्धौ चिन्त्यमेतदित्यपास्तम्। तेन लघुभूतप्रकारान्तरासम्भवेनेत्थमेव कल्पनात्। न्यायं विनापि तत्सिद्धेस्तदसत्वमेवेत्याशङ्कते। **न चेति। श्लाविति।** अन्तरङ्गत्वादन्तादेशे कृतेऽपीत्यादिः। **अल्विधाविति।** लस्य स्थानितावदेकत्वादिति भावः। तत्र तृतीयसमाधिं नारायणाद्यनुरोधेनाह। **किञ्चेति। यन्तीतीति।** यन्तीत्येतदन्यतरदित्यर्थः। अत एवाह। **द्वे इति।** एतदुपलक्षणं विनिवायेति परिभाषाया अपि। **इहापि** भेद्यत इत्यादावपि। **आदिवदिति।** वस्तुतस्तु एते परिभाषे न स्तः। भाष्येऽनुल्लेखात्। समर्थग्रहणं तु तत्र न्यायसिद्धार्थानुवाद एवेत्यन्यत्र[1] स्पष्टमिति मध्यमसमाधिरेव युक्तः। एतेनान्तरङ्गानपि विधीन् तन्निमित्तविघातको बहिरङ्गो विधिर्बाधत इति न्यायेन निर्वाहः, कैयटकौस्तुभाद्युक्तं तु न युक्तम्। निषेधस्यापवादत्वाव्यवहारादिति [2]**रत्नप्रकाशो**क्तमपास्तम्। तत्रापवादशब्दस्य बाधकमात्रपरत्वात्। तन्न्यायस्यासत्वाच्चेति बोध्यम्। तुनाऽत्रापि पक्षे अरुचिः सूचिता। प्रागुक्तरीत्या सा न दोष इत्ययमपि पक्षो निर्दुष्ट एवेति। तदेतद् ध्वनयन्नुपसंहरति। **तस्मादिति।** एवोऽप्यर्थे। तेन **निषाधस्थपति**न्यायेन लघुभूत-

---

१. अन्यत्र = परिभाषेन्दुशेखरे अकृतव्यूहपरिभाषायाम्। २. र.प्र.पृ.सं. ३०५।

यस्मिन्निति बहुव्रीहिरेव साधुः। एवं हि सति लोपस्य गुणवृद्ध्योश्चैकनिमित्तकत्वं लभ्यते इति न कश्चित्पूर्वोक्तदोषः।

स्यादेतत्, आरभ्यमाणेऽप्यस्मिन्सूत्रे 'लोलुवः' इत्यादौ गुणो दुर्वारः। तथाहि, इह सूत्रे ''क्ङिति च'' (पा०सू० १-१-५) इति सूत्रे च निषेध्यं किमित्याकाङ्क्षायां पूर्वत्र निर्पीता इक्पदोपस्थितिरेव सम्बध्येतधात्वंशलोपनिमित्ते आर्द्धधातुके इक्पदं नोपतिष्ठते। ततश्च 'बेभिदः' 'मरीमृजः' 'भिन्नः' 'मृष्टः' इत्यादौ व्यञ्जनस्य गुणवृद्धिप्राप्तिः परमेतस्य प्रघट्टकस्य फलं स्यात्। लोलुवादौ तु स्यादेव गुणः। न च परिभाषां प्रति शेषिभूतताऽर्थतः प्रधानयोर्गुणवृद्ध्योरेव निषेधोऽस्त्विति वाच्यम्, शाब्दबोधे शाब्दप्राधान्यस्यैवान्वयनियामकताया उचितत्वात्। नहि 'राजपुरुषमानय' इत्यादावर्थतः प्रधानभूतोऽपि राजा आनयनेनाऽन्वेति, अपि तु पुरुष एव। प्रकृते च शाब्दं प्राधान्यं वाक्यार्थभूतायाः पदोपस्थितेरेव, कारकविशिष्टा क्रिया वाक्यार्थ इति सिद्धान्तात्। आह च –

तत्पुरुषसमुच्चयद्वारा तस्यैव युक्तत्वं सूचितम्। व्यधिकरणबहुव्रीहेर्गुरुभूतत्वादनन्यगतिकत्वाच्च। स्थानिवद्भावानाश्रयणेनाप्येवं प्रकारेण तत्सिद्धिरिति सूचनाय परं तदुल्लेखः। यद्वा तदाश्रयणे सूत्रप्रत्याख्यानमेवेति तदनाश्रयणेनैव सूत्रस्य सत्वेन बहुव्रीहिं विना भेद्यत इत्यादावनिर्वाह एवेति एवो यथाश्रुत एव सूत्रमते। एतेन पूर्वस्यात्रशब्देनानाश्रयण**ादचः परेति** न प्रवर्तत इति **नारायणो**क्तमपास्तम्। तदेतद् ध्वनयन्नाह। **एवं हीति।**

४.७ सूत्रवैयर्थ्याशङ्क

उक्तहेतोरेवाह। **आरभ्येति।** तदनाश्रयणेन भेद्यत इत्यादौ निषेधार्थमित्यादिः। **स्थितिरेवेति।** अनन्तरस्येति न्यायात्प्राधान्याच्चेति भावः। तथा सति वाक्यार्थमाह। **धात्वंशेति। इक्पदमिति** षष्ठीतत्पुरुषः। तद्बोधकं षष्ट्यन्तं इक इति पदमित्यर्थः। क्वचित्तथैव पाठः। नन्वेवं व्यर्थमेतदत आह। **ततश्चेति।** तथा च धात्वंशलोपनिमित्तार्थधातुके परे प्राप्तगुणवृद्धिविधायकसूत्रे तत्पदं नोपतिष्ठत इति सूत्रार्थो बोध्यः। बेभिदेत्यादि पचाद्यजन्तम्। उत्तरसूत्रेऽप्येवमित्याशयेनाह। **भिन्न इति। व्यञ्जनस्येति।** तद्व्यावृत्तये इक्परिभाषा, तद्व्यावृत्त्या तदावृत्तिर्युक्तेति भावः। परं केवलम्। उक्तहेतोरेवाह। **प्रघट्टकेति। शेषीति।** अङ्गीत्यर्थः। विधिपरिभाषयोरुपकार्योपकारकभावेन शेषशेषिभावादिति भावः। तया तयोरेव संस्कारादाह। **अर्थत इति। वर्थत इति।** तस्य तदधीनत्वात्। **आह चेति।** हरिरिति शेषः।

साकाङ्क्षावयवं भेदे परानाकाङ्क्षशब्दकम् ।
कर्मप्रधानं गुणवदेकार्थं वाक्यमुच्यते ।। इति । (वा.प. २-४)

किञ्च सिद्धान्ते प्रसज्यप्रतिषेधे सर्वत्र क्रिययैव सह नञोऽन्वयो न तु नामार्थेन । तदुक्तम् –

प्रसज्यप्रतिषेधोऽयं क्रियया सह यत्र नञ् । इति ।

अत एव पुरुषवचनयोरसङ्गः । अन्यथा हि 'घटो नास्ति' 'त्वं नासि' 'अहं नास्मि' इति पुरुषव्यवस्था न स्यात् । घटाभावस्त्वदभावो मदभावश्चास्तीतिवत्सर्वत्र प्रथमपुरुषापत्तेः । न हि परमते 'त्वं नासि' 'त्वदभावोऽस्ति' इत्यनयोरर्थे कश्चिद्विशेषः, नञर्थं प्रति प्रथमान्तपदोपस्थापितस्यान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वेन संसर्गेण

भेदे वियोगे । विच्छिद्य पाठ इति यावत् । **कर्मेति ।** क्रियेत्यर्थः । क्वचित्तथैव पाठः । **गुणवत्** साक्षात् परम्परया वा यद्विशेषणं तद्वत् । **एकार्थं** एकोद्देश्यकैकविधेयकं । **वाक्यं** एकं वाक्यम् । 'अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्' (जै.सू. २-१-४६)इति जैमिनिसूत्रात् ।।

असम्भवादपि गुणवृद्ध्योर्न निषेध इत्याह । **किञ्चेति । प्रसज्येति ।** विधाय विहितस्य प्रतिषेध इत्यर्थः । क्रियाग्रहणमत्राग्रे च गुणस्याप्युपलक्षणम्, नञ्सूत्रभाष्यात् । अत एव व्यवच्छेद्यमाह । **न त्विति ।** [1]असमस्तनञर्थात्यन्ताभावविशेष्यकबोधे प्रकारतासम्बन्धेन तिङसमभिव्याहृतधातुजन्योपस्थितेर्हेतुत्वादिति भावः । नामार्थश्च प्रकृते गुणवृद्धिपदार्थः । धोऽसाविति प्रचुरः पाठः । **यत्र नञिति ।** अन्वेतीति शेषः । **अत एव** तस्य क्रियान्वयादेव । **असङ्ग इति ।** युष्मदादेस्तिङ्समानाधिकरणत्वादिति[2] भावः । **अन्यथेति ।** तस्य नामार्थान्वयाङ्गीकारे इत्यर्थः । हि यतस्तदनङ्गीकारात् प्रकारतासम्बन्धेन तादृशनञर्थविशेष्यकबोधे नामजन्योपस्थितिर्हि हेतुरिति भावः । तदेतद् ध्वनयन् आद्ये युष्मत्वावच्छिन्नप्रतियोगिताकाभावधीरन्त्ये युष्म [3]..... प्रतियोगिताकाभावधीरिति विशेषणस्य सत्वान्न कश्चिद्विशेष इत्ययुक्तमिति शङ्कां निरस्यति । **नञर्थमिति ।** नामशब्देन सुबन्तमित्याह । **प्रथमेति । अन्वयीति ।** इदं चाभावे

---

१. असमर्थ इति मातृकायाम् । परन्तु असमस्त इति भाव्यम् । मञ्जूषायां तथैव दर्शनात् । असमस्तत्वं च समाससंज्ञक शब्दघटकभिन्नत्वम् । स्पष्टं च कलायाम् । (ल.म.क.पृ.सं. ६५७)

२. तिङ्सामानाधिकरण्यादिति ख ।

३. अत्र अक्षरलोपः मातृकायाम् । युष्मद्यतिरिक्तेति पाठेन भाव्यमिति भाति ।

प्रकारताभ्युपगमेऽपि यष्मत्सामानाधिकरण्यविरहस्याविशिष्टत्वात्। एवं वायौ रूपणामभावोऽस्तीतिवद्रूपापि न सन्तीत्यत्राप्यस्तीत्येकवचनं स्यादित्यन्यत्र विस्तरः।

एवं कारकविभक्तेरपि क्रियायोगे सत्येव साधुत्वं न त्वन्यथाऽपीति ''कारके'' (पा०सू० १-४-२३) इति सूत्रे वक्ष्यमाणत्वाद् 'भूतले घटो नास्ति' इत्यादावधिकरपत्वं क्रियान्वय्येव न तु नञर्थान्वयि। तथाच सकलकारकविशिष्टक्रियायां नञर्थान्वयः। नञो

व्युत्पत्तिबललभ्यम्। नीलघटवति 'अत्र घटो नास्ती'त्यव्यवहारात्, पीतघटो नास्तीति व्यवहाराच्च। ध्वनितं चेदं 'विरामोऽवसान'(पा०सू० १-४-११०)मित्यत्र भाष्ये[१]। अत एव वायौ रूपं नास्तीति प्रतीत्त्या सामान्याभावसिद्धिः। विशेषाभावकूटस्य ततो बोधासम्भवात्। अत्रान्वयितावच्छेदकशब्दे नञर्थान्वयि विशेषणमुच्यते। यथा पीतघट इत्यत्र पीतरूपं। प्रतियोगितावच्छेदकं च तत्रापि घटत्वमेव, विशिष्टबोधेविशेष्यवृत्तिधर्मस्यैव प्रतियोगित्वादाववच्छेदकत्वात्। तदवच्छिन्ना प्रतियोगिता च पीतेत्यादिविशेषणबलात्पीतघटव्यक्तिनिष्ठैव। विशिष्टं च प्रधानान्नात्यन्तमतिरिक्तम्। सर्वथाऽतिरिक्तत्वे तु वैशेषिकाणां पदार्थविभागन्यूनतापत्तिः। अत एवाभियुक्तै**रन्वयितावच्छेदके**त्युक्तम्, न तु प्रतियोगितावच्छेदकेति। यथा घटपटादीनां घटत्वादिना शक्तावपि प्रकरणादिना कासांचिदेव व्यक्तीनां बोधस्तथा प्रकृते विशेषणबलात्। पुरुषस्थले ठक्त्वावचनस्थले आह। **एवमिति।** प्रथमपुरुषवदित्यर्थः। **एकवचनमिति।** एवं घटौन स्तः घटा न सन्तीत्यादावपि बोध्यम्। आख्यातार्थसंख्यान्वयित्वस्य तु न, सामानाधिकरण्यपदार्थत्वात्। किञ्च तिबादिविधिना **द्व्येकयो**रित्यस्यैकवाक्यतया एकत्वे तिबित्यादिवाक्यार्थे कस्यैकत्वे इत्याद्याकाङ्क्षायां प्रत्यासत्त्या तिबाद्यर्थान्वयिन इत्यस्य लाभेनाभावप्रतियोगिन्यनन्वयात्। घटसत्ताभावबोधे समनैयत्यादेवनियमेन घटाभावबोधोऽपीति न तद्विषयसन्देहादीति बोध्यम्। तदाह। **अन्यत्रेति।** एवं तस्य क्रियान्वये सिद्धेऽपि कारकविशिष्टक्रियायामन्वये किं मानमतो युक्त्यन्तरमाह। **एवमिति।** असमस्तनञिवेत्यर्थः। **योगे सत्येवेति।** योगे एव सतीत्यर्थः। अपि [२]..... समुच्चयः। **वक्षेति।** संबन्धेनान्तमित्यादिनेति भावः। **क्रियान्वय्येवेति।** विशेष्यतासम्बन्धेन कारकप्रकारकशाब्दबुद्धिं प्रति धातुजन्योपस्थितेर्हेतुत्वादिति भावः। **विशिष्टेति।** तत्सम्बन्धस्यान्तरङ्गत्वादिति भावः। एवं भाष्यसिद्धान्तमुक्त्वा प्राचामपीदं सम्मतमिति बोधयितुं तत्सिद्धान्तमाह। **नञ इति।** सर्वत्रेति

---

१. ध्वननप्रकारश्च कलायामित्थं निरूपितः - तत्र हि लक्षणयोर्दोषो 'भावाविरामभावित्त्वाच्छब्दप्यावसानलक्षणं न' इति दत्तः। वर्णानामभाव इत्युक्तेर्वर्णत्ववच्छिन्नप्रतियोगिताकाभाव इत्यर्थः। स च न वर्णसत्व इति तदर्थः इति। ल.म.कला. पृ.सं. ६९४।

२. अत्र ग्रन्थपातः।

द्योतकतेति निष्कृष्टपक्षे तु क्रियापदस्यैव तद्विरहपरतेति सिद्धान्तः। उभयथाऽपीह गुणवृद्ध्योः प्रतिषेधो दुर्लभ एवेति।

अत्राहुः – क्रिययैव सह विधेरिव निषेधस्यान्वयः शाब्द इति सत्यमेव, किन्तु क्रियैव केति संशये त्वदुक्तरीत्या सन्निहितापीकृपदोपस्थितिरिह न सम्बध्यते। तथाहि सति ''दीधीवेवीटाम्'' (पा०सू० १-१-६) इति सूत्रस्य व्यर्थतापत्तेः। न हि तत्रेक्परिभाषाऽलोन्त्यपरिभाषयोः फले विशेषोऽस्ति। एवं स्थिते ''अस्तिर्भवन्तीपरोऽप्रयुज्यमानोऽप्यस्ति'' इति प्रातिपदिकार्थसूत्रे वक्ष्यमाणरीत्या 'भवतः' इत्यस्योपस्थितस्य गुणवृद्धी इत्यादिभिरन्वितस्य निषेधान्वये सति गुणवृद्ध्योरभावः फलितो भवतीत्येतावता गुणवृद्ध्योर्निषेध इत्युच्यते। यथाऽऽघाराग्निहोत्राधिकरणे (जै०न्या० २-२-५) प्रतीतितः सर्वोऽपि विशिष्टविधिरेव, तात्पर्यतस्तु कश्चिद् गुणविधिरिति सिद्धान्तितं, तद्वन्निषेधेऽपि बोध्यं न्यायसाम्यात्। अत एव हि विधिनिषेधयोर्वाक्यार्थगोचरतेत्यभियुक्ताः। तस्मात्

शेषः। तत्पक्षस्य सत्वेऽपि तस्य गुरुभूतत्वादाह। **निष्कृष्टेति।** तुनारुचिः सूचिता। तद्बीजं तु समस्ते द्योतकत्वेऽपि असमस्तेऽसति बाधके तदर्थस्य विशेष्यतया बोधाद्वाचकत्वमेवेति। तद् ध्वनयन्नाह। **उभयथापीहेति।** प्रकृतसूत्रादौ इत्यर्थः। प्रघट्टक इति यावत्। एवमपि अत्र कथने तात्पर्यं नेतुं तत्रेति भावः॥

४.८ सूत्रसार्थक्योपपादनम्

विधेः विधेयस्य। **निषेधेति।** तस्यापीत्यर्थः। **ध्यत इति।** प्रतियोगित्वेनेति भावः। हि यत उक्तहेतोस्तथाङ्गीकारे सति। [१]..... प्राप्ते येन तत्र तदनुपस्थितिरित्यन्वयसम्भवादाह। **व्यर्थतेति।** हि यतः व्यञ्जनगुणप्राप्तेरभावात्। **एवं स्थिते** उत्तरसूत्रानुरोधेन निषेधेन तदसम्बन्धे। द्वितीयक्रियानुपादानादाह। **अस्तिरिति।** भवन्ती लटःसंज्ञा। **रीत्येति।** उपस्थितावन्वयः। पूर्वसूत्र इति शेषः। **भवत इति।** विधीयत इत्यर्थः। धातूनामनेकार्थत्वात्। वाक्यार्थत्वायाह। **गुणेति।** आदिना गुणवृद्धिशब्दाभ्यामित्यादिपरिग्रहः। **निषेधेति।** निषेधेऽन्वय इत्यर्थः। **फलतः** अर्थतः। फलित इति पाठान्तरम्। प्रतीतितः शब्दात्, तात्पर्यतः प्राप्ताप्राप्तविवेकन्यायेन। **न्यायेति।** शब्दात्तथाप्रतीतिरूपेत्यर्थः। अत एव शब्दाद्विशिष्टविधेरेव। उपसंहरति। **तस्मादिति।** फलतो

---

१. अत्र ग्रन्थः त्रुटितः।

'लोलुवः' 'पोपुवः' 'मरीमृजः' इत्युदाहरणं सिद्धम्। प्रत्युदाहरणं तूच्यते – धातुलोप इति किम् ? आर्द्धधातुके विधिनिषेधाभ्यां षोडशिग्रहणाग्रहणयोरिव गुणवृद्ध्योर्विकल्पो मा भूत्। आर्द्धधातुक इति किम् ? ''तुर्वी थुर्वी दुर्वी धुर्वी हिंसायां'' (धा.सू. ५७१। ५७२।५७३।५७४) ''मुर्छा मोहसमुच्छ्राययोः'' (धा.सू. २१२) एभ्यो यङ्लुगन्ते-भ्यस्तिबादौ सार्वधातुके पिति परे 'तोतोर्त्ति' 'मोमोर्त्ति' इत्यादौ निषेधो मा भूत् ''राल्लोपः'' (पा०सू० ६-४-२१) इति च्छ्वोर्लोपस्य गुणस्य चैकनिमित्तकत्वात्। इदं च राल्लोपे कृङिद्ग्रहणाननुवृत्तिपक्षमाश्रित्योक्तम्। तदनुवृत्तिपक्षे तु 'तोतीर्मि' इत्याद्युत्तम-पुरुषैकवचन उदाहरणं बोध्यम्, अनुनासिकादिप्रत्ययत्वेन तत्र राल्लोपप्रवृत्तेः। ननु 'तोतोर्ति' इत्यादि प्रागुक्तमप्युदाहरणमस्तु। राल्लोपस्याप्रवृत्तावपि ''लोपो व्योः'' (पा०सू० ५-१-६६) इति लोपादिति चेत् ? न, तस्य वर्णमात्रनिमित्तकतया गुणेन सहैकनिमित्तकत्वाभावात्। न हि तत्र प्रत्ययग्रहणं तदाक्षेपकं वा किञ्चिदस्ति। अत एव

गुणवृद्धिनिषेधसिद्धेरित्यर्थः। **उदाहरणमिति।** जातावेकवचनम्। एवमग्रेऽपि। आर्धधातुके आर्धधातुकतावच्छिन्ने। धातुग्रहणं तु बहुव्रीहिपक्षे तन्त्रादिनोभयविशेषणत्वपक्षे आर्धधातुकग्रहणस्य गुणवृद्धिविशेषणत्वपक्षे च लावितेत्यादिव्यावृत्त्यर्थम्। तस्य लोपविशेषणत्वे तु न लोपार्धधातुक इति न्यासे एव व्यर्थमिति बोध्यम्। **इति किमिति।** 'एकाचो द्वे' इत्यादाविव तद्धिनापि बहुव्रीहिः सुकर इति भावः। यद्यपि भाष्ये आर्धधातुकग्रहणस्य रोरवीतीति प्रत्युदाहरणं दत्तम्। तथापि तन्न युक्तम्। यङः पूर्वं तल्लुकि वा धातुलोपियङ्वस्थायां फलाभावादार्धधातुकाभावेन धात्ववयवलोपा-भावेनातिप्रसङ्गस्य तत्राभावात्। तदेतद् ध्वनयन्नाह। **तुर्वीत्यादि।** इदानीं तत्पुरुषपक्षे सुतरामत्र दोष इति सूचयितुमाह। **चैकेति। तदनुवृत्तीति।** तथा च सत्यादिक्ङितोऽसम्भवात्तस्य तत्र प्रवृत्तिवचनमुदेति। तत एवाह। **अनुनासीति।** परत्वेनेति भावः। तत्र तोतोर्मीत्यादौ। **तस्येति।** लोपो व्योरिति लोपस्येत्यर्थः। तथा च बहुव्रीहिपक्षे नायं दोष इति भावः। ननु सोऽपि वलादौ प्रत्यये इति तत्वमक्षतमेवात आह। **न हीति।** यत इत्यर्थः। **तत्र** लोपो व्योरिति सूत्रे। किञ्च आर्धधातुकग्रहणाभावेऽन्तरङ्गत्वात्तत्पुरुष एव स्यादिति तोतोर्मीत्यादावपि दोष एव। वस्तुतस्तु यङ्लुकः छान्दसत्वात् 'किति च' इति सूत्रस्थभाष्यादिदोषात् यङ्लुङन्तानामभावलाभाच्च नेदं फलम्। अत एव प्रथममपि बोभवीतीति विहाय छान्दसं तदुक्तं तदर्थमप्युपायाश्रयणं बहुशो दृष्टमिति तद्भावः। न चैवमपि प्रागुक्तरीत्या तदसङ्गतिरेव। यथोद्देशे तदवस्थायां यङन्ते जातसंज्ञायां एकदेशेति न्यायेन तत्र सत्वमिति तदाश्रया। एवञ्च धातुग्रहणं स्पष्टतया

गौधेरादिषु प्रत्ययपरतां विनाऽपि यलोप इति दिक् ।

इक इति किम् ? 'अभाजि' 'रागः' । ''भञ्जेश्च चिपि'' (पा०सू० ७-४-३३) ''घञि च भावकरणयोः'' (पा०सू० ६-४-२७) इत्युपधालोपे कृते वृद्धिर्यथा स्यात् । कथं तर्हि 'पापचकः' इत्यत्र वृद्धिप्रतिषेध इति चेत् ? शृणु, पापच्यतेर्ण्वुलि ''यस्य हलः'' (पा०सू० ६-४-४९) इत्यत्र 'अहर्यीत्' 'अमव्यीत्' इत्यादिवारणाय यस्येति संघातग्रहणेऽपि ''आदेः परस्य'' (पा०सू० १-१-५४) इति हल्मात्रलोपे कृते ''अतो लोपः'' (पा०सू० ६-४-४८) इति पृथगल्लोपे तस्य स्थानिवद्भावेन पापचकादौ न वृद्धिः । न त्विह ''न धातुलोपे'' (पा०सू० १-१-४) इति सूत्रस्य कश्चिदपि व्यापारः । यङ्लुगन्ताण्ण्वुलि 'पापाचकः' इति भवत्येव वृद्धिः 'नोनाव' इतिवत् । एतेन ''न धातुलोप'' (पा०सू० १-१-४) इत्यत्रेक इत्यनुवृत्तेः 'पापाचकः' इतिवन्नधातुसूत्रे 'बेभिदिता' 'मरीमार्जिता' इति यथा । यदि तु ''यस्य हलः'' (पा०सू० ६-४-४९) इत्यवयवलोपस्तर्हि स्थानिवद्भावादेव गुणाद्यप्रसङ्ग इत्युभयथापि नैतत्सूत्रोदाहरणत्व-मित्यवधेयम् । भाष्यकारस्तु ''यस्य'' (पा०सू० ६-४-१४८) इति लोप इवाचि

बहुव्रीहिलाभार्थं व्यर्थं वा न धातुलुक्यचीति न्यासे इवेति बोध्यम् । एतेन उदेति प्रतीत्यादिः लोपादिति क्ङिति राल्लोप इति वलोपविधानं तूहो बाधनार्थमिति भावः । न तोतोर्त्तीत्यादि प्रत्युदाहरन्तो हरदत्तादयोऽपि परास्ताः । तदाह । **दिगिति ।**

४.९ भाष्योक्तसूत्रप्रत्याख्याननिरूपणम्

घञि चेति । रञ्जेश्चेत्यनुवर्तते । **कथं तर्हीति ।** अस्येग्लक्षणगुणवृद्धिनिषेधकत्वे चेत्यर्थः । यथा चैतल्लाभस्तथोक्तं प्राक् । **पापच्यते**र्यङन्तात् । **स्थानीति ।** अचः परेतीति भावः । वैलक्षण्यादाह । **न त्विहेति ।** पापच्यत इत्युक्तेः फलमाह । **यङ्लुगन्तादिति ।** अनैमित्तिकयङ्लु-गन्तादित्यर्थः । तथा च धात्वंशलोपेति पेति योग्यत्वाय । यङ्लुगन्तं तु प्रागुक्तरीत्या नेतीति तमार्धधातुकं नेति भावः । तस्या भाष्येष्टत्वायाह । **नोनावेतीति ।** लोप इत्यत्रेति पाठः । **वदन्निति ।** प्रत्युदाहरणमित्यादिः । एतेनेत्यस्यार्थमाह । **पृथगिति । अत एव** तत्र तदसम्भवेन **प्रक्रियाकौमुदी**कारोक्तोदाहरणानामसम्भवादेव । अपिना भाष्यादिसमुच्चयः । किञ्च बेभिदितेत्यादि किं यङ्लुगन्तं यङन्तं वा उदाहृतम् । नाद्य इत्याह । **भिदीति ।** तुरप्यर्थे । नान्त इत्याह । **यदि त्विति । इत्यवयवेति ।** पूर्वोक्तरीत्येति भावः । एवं सूत्रमतमुक्त्वा भाष्यमतमाह । **भाष्येति ।**

लुक्यपि पृथगल्लोपमाश्रित्यैतत्सूत्रं प्रत्याचख्यौ । न च येन नाप्राप्तिन्यायेनाचि यङो लुगतो लोपं बाधेतेति वाच्यम्, ''यस्य हलः'' (पा०सू० ६-४-४९) इत्यत्र यस्येति योगं विभज्यातो लोप इति चानुवर्त्त्य यञ्शब्दस्यातो लोपविधानेन लुग्बाधनात् । अवशिष्टं व्यञ्जनमात्रं लुकोऽवकाशः । ततश्चाल्लोपस्य स्थानिवत्त्वादेव 'बेभिदिता' 'मरीमृजिता' 'पापचकः' इत्यादिवल्लोलुवादयोऽपि सिध्यन्तीति किं सूत्रेण ? न चैवं 'नोनाव' इत्यादावपि पृथगल्लोपापत्तिः, चकारानुकृष्टबहुलग्रहणाज्जायमानस्यानैमित्तिकस्य लुकोऽन्तरङ्गतया लकारोत्पत्तेः प्रागेव समुदाये प्रवृत्तेः । नन्वेवं 'चेक्रियः' 'लोलुवः' 'तोष्टुवः' इत्यादावल्लोपस्य स्थानिवत्त्वाद्यथा गुणो न, एवमियङुवङावपि न स्यातामिति चेत् ? सत्यम् अचमाश्रित्य न भवत एव, उक्तयुक्तेः, किन्तु स्थानिवद्भावलब्धमकारमाश्रित्य भविष्यतः । स हि यकारे लुप्ते प्रत्ययसंज्ञकः ।

स्यादेतत्, लोलुवादिष्वकारे लुप्ते यलुगिति क्रमः । तत्र यकारावस्थानकाले अकारेण प्रत्ययत्वं न लब्धमेव । लुप्तेऽपि तस्मिन्नकारो नास्त्येव ततः प्रागेव लोपात् । सोयमसत्कथं प्रत्ययतां लभेत ? तल्लोपस्य स्थानिवद्भावेन प्रत्ययत्वमिति चेत् ? स्थानिनि दृष्टं हि कार्यं तद्वदतिदेशेन लभ्यते, न तु तत्रादृष्टमपि ।

अनैमित्तिकनिरासाय आह । **अचीति ।** प्रत्याख्यानमेवोपपादयति । **न चेत्यादिना ।** यद्यपि भाष्ये परत्वमप्युक्तम्, तथापि तस्यायुक्तत्वं तत्रैवोक्तं हृदि निधायाह । **येनेति ।** यद्यपि योगविभागे अलोन्त्यपरिभाषयेष्टसिद्धिस्तथापि स्पष्टत्वायाह । **चानुवर्त्त्येति ।** इत्यनुवर्त्त्य चेत्यर्थः । लुको वैयर्थ्यं नेत्याह । **अवेति । चैवं** उक्तरीत्याऽल्लोपस्य लुग्बाधकत्वे । तथा च तत्रापि वृद्धिर्न स्यादिति भावः । **अन्तरङ्गेति ।** तस्यैव प्राक्प्रवर्तकत्वमन्तरङ्गत्वम् । न हि तदाऽपवादप्रवृत्तिरिति भावः । एवं अनैमित्तिकलुकः समुदाये प्रवृत्तावप्यजूनिमित्तके पृथगल्लोपनिश्चये । **गुण इति ।** सार्वधातुकेतीति भावः । **अचं** प्रत्ययम् । ननु अजादौ प्रत्यये तथाविधानं, अयं तु तथालब्धोऽपि न प्रत्ययोऽत आह । **स हीति ।** यत इत्यर्थः । वक्ष्यमाणोऽभिप्रायः । लुप्ते इति लुकेति भाष्यमेव शङ्कापूर्वकं प्रतिपादयति । **स्यादेतदित्यादिना । लुप्त इति ।** लोपेनेति भावः । **क्रम इति ।** बाधस्य पूर्वप्रवृत्तेरिति भावः । ननु अस्त्वेवं तथापि किं यावस्थितो तस्य तत्वं तल्लुकि वा । नाद्य इत्याह । **तत्रेति ।** लुप्तक्रमे सतीत्यर्थः । **न लब्धमिति ।** समुदाये तत्प्रवृत्तेरिति भावः । नान्त इत्याह । **लुप्तेऽपीति ।** लोपो यदितदेति शेषः । शङ्कते । **तल्लोपस्येति ।** अल्लोपस्येत्यर्थः । तल्लोपे इति पाठान्तरम् । तथा च नौपदेशिकं प्रत्ययत्वं, किन्त्वातिदेशिकमिति भावः । **चेदिति ।** नेति शेषः । हि यतः । **तद्वदिति ।**

अत्राहुः – तत्र सम्भावितमात्रमतिदिश्यते । यदि हि लोपस्य स्थानिभूतोऽकार इह लुप्तेऽपि यकारे तिष्ठेत्तर्हि प्रत्ययतां लभेतोवङादिकं च प्रवर्त्तयेदिति कथं नातिदेशः । वरेनिषेधश्चेह लिङ्गम् । स हि यातेर्यङन्ताद्धरच्यल्लोपयलोपयोः कृतयोः स्थानिवद्भावेन ''आतो लोप इटि च'' (पा०सू० ६-४-६४) इत्यालोपो मा भूदित्येतदर्थं क्रियते । स्थानिनि दृष्टस्यैवातिदेशे तु किन्तेन ? न हि 'या-या-य' इत्यस्यामवस्थायामातो लोपस्य प्राप्तिः अनजादित्वादिति दिक् ।

नन्वेवं 'चेक्षियः' 'तोष्टुवः' इत्यत्र ''अन्तरङ्गानपि'' (प०भा० ६२) इति न्याये-नाकृते एव ''अकृत्सार्वधातुकयोः'' (पा०सू० ७-४-२५) इति दीर्घे यङो लुक् । ततोऽल्लोपस्य स्थानिवद्भावे सत्यपि चेक्षि अ अ तोष्टु अ अ इति स्थान्यकारेप सह लघूपधमङ्गमच्प्रत्ययपरं जातमिति लघूपधगुपः स्यादेव । सत्यम्, अन्तरङ्गाविषयङुवङौ भविष्यतः । यथाह वार्त्तिककारः – ''श्नचङन्तस्यान्तरङ्गलक्षपत्वात्'' (का०वा०) इति । तथाच ''रिपि गतौ'' (धा०सू० १२४।१२५) ''धि धारणे'' (धा०सू० १२६) इत्येषां तुदादित्वाच्छे कृते 'रियति' 'पियति' 'धियति' इति भवति । 'अशिश्रियत्' 'प्रादुद्रुवत्'

स्थानिवद्रूपातिदेशेनेत्यर्थः । **तत्र** स्थानिनि । मात्रपदेन विद्यमानत्वव्यावृत्तिः । सम्भावनामेवाह । **यदि हीति । लभेतेति ।** एकदेशेति शास्त्रोपन्यासेनेति भावः । अत्र मानमाह । **वरे इति ।** चस्त्वर्थे । **स्थानिवदिति ।** अचः परेत्यल्लोपस्येति भावः । ननु तेन प्रत्ययस्योक्तरीत्या अलाभेऽपि तत्र दृष्टस्य लोपरूपकार्यस्यैवातिदेशोऽस्त्वत आह । **न हीति ।** अकारसत्वे यस्यानिवृत्तेराह । **यायायेति ।** तस्याप्रत्ययत्वाद्धरच्यवहितत्वाच्चाह । **अनजादीति ।** निषेधेन वरे । वस्तुतस्तु वरे निषेधान्न पदान्तेति सूत्रविषये कथञ्चित्तथाङ्गीकारेऽपि लोलुवादौ न तथा, प्रकारान्तरेण निर्वाहादिति प्रपञ्चितं [१]**भाष्यप्रदीपोद्योत**व्याख्यायामिति बोध्यम् । तदाह । **दिगिति ।**

४.१० प्रक्रियाप्रकाश-रत्नप्रकाशाद्युक्तसूत्रारम्भतावादनिरूपणम्

एवं दोषाभावात् अजनिमित्तके लुकि पृथगल्लोपे । **यङो लुगिति ।** अतो लोपोत्तरमिति भावः । अत एवाह । **ततोऽल्लोपेति । स्थान्यकारेपेति ।** तद्बुद्ध्या सहेत्यर्थः । एवमन्यत्रापि दृष्टमित्याह । **यथाऽहेति । एषामिति ।** अग्रेऽन्वयः । **भवतीति ।** न तु लघूपधगुण इति भावः ।

---

१. छाया पृ.सं. २०९ प्रथमभागः ।

इति च ''पिश्रि'' (पा०सू० ३-१-४८) इति चङीयङुवङौ भवतः। तस्मात्पृथगल्लोपेनैव सकलनिर्वाहात् ''न धातुलोपे'' (पा०सू० १-१-४) इति सूत्रन्नारम्भणीयम्। न चैवं 'मरीमृजः' इत्यत्र ''मृजेरजादौ संक्रमः'' (का०वा०) इति पाक्षिकवृद्धिप्रसङ्गः, हरदत्तादिमते मुख्याजादावेव तत्प्रवृत्तेः, निष्कर्षे तु ''यथोत्तरं मुनीनाम्प्रामाण्यात्'' इष्टापत्तेः। व्यवस्थितविभाषा वाऽस्तु। अत्र वदन्ति गुणोपधालोपयुटां न लोपाल्लोपयोरपि प्रसङ्गात्पृथगल्लोपो लुकि वक्तुं न शक्यते। तथा हि, सर्वत्र दीर्घान्तेषु ह्रस्वान्तेषु चेयङुवङोः कृतयोर्लघूपधलक्षणो गुणः प्राप्नोति। न चेह स्थानिवद्भावः आदिष्टादचः पूर्वत्वात्। किञ्च 'जङ्गमः' इत्यत्र ''गमहन'' (पा०सू० ६-४-९८) इत्यपधालोपः स्यात्। अथात्रानङीति प्रतिषेधस्तर्हि 'दरीदृशः' इत्यत्र ''ऋदृशोऽङि'' (पा०सू० ७-४-१६) इति गुणः स्यात्। अपि च 'देद्यः' इत्यत्र 'दीङो युडचि'' (पा०सू० ६-४-६३)

दिति चेति। दित्यत्र चेत्यर्थः। **पिश्रीति चङीति।** अत्र कश्चित्। श्वादिभ्यो लुङि तिङि सार्वधातुकेति गुणात्पूर्वं नित्यत्वाच्चङि द्विर्वचनेऽचीति निषेधादियङाद्यभावे द्वित्वात्परत्वाल्लघूपधगुणो दुर्वारः। तस्य द्वित्वनिमित्ताज्जनिमित्तकत्वाभावादिति। तन्न। अन्तरङ्गत्वात् द्वित्वस्यैव प्रवृत्तेः। अऋदिति करणेऽस्य विशेषापेक्षज्ञापकत्वात्। सामान्यापेक्षतया तेनोपधाकार्यमात्रस्य द्वित्वात्प्राबल्यबोधनेऽपि न दोषः। ज्ञापकस्य सजातीयापेक्षत्वेनोपधाकार्यस्य यत्र द्वित्वसमाननिमित्ता द्वित्वानिमित्ता वा ङिभिन्नता वा तत्रैव तत्प्राबल्यबोधनादिति बोध्यम्। भाष्यमतमुपसंहरति। **तस्मादिति।** क्वापि दोषाभावादित्यर्थः। **हरदत्ता**द्यनुरोधेन शङ्कते। **न चैवमिति।** उक्तार्थे। **सङ्क्रम इति।** सङ्क्रमतः अपसरतः गुणवृद्धी यस्मादिति संक्रमः गुणवृद्धिप्रतिषेधविषयङ्कितः प्राचां संज्ञेयम्। अत एव यक्षानुरूपो बलिरिति न्यायेनाह। **हरेति।** आदिग्रहणसामर्थ्यादिति भावः। **निष्कर्षे त्विति।** आदिग्रहणाभावात्तदादिविधिलब्धत्वाच्च सर्वत्र प्रवृत्तिरिति भाष्यसिद्धान्ते त्वित्यर्थः। ननु किं तत्र इष्टा वा नेष्टा। तत्राद्ये आह। **यथोत्तरमिति।** अन्ते आह। **व्यवेति।** वस्तुतस्तु नात्र विकल्पप्रसङ्गः। सम्भवनामात्रातिदेशेऽत्र मानाभावादिति स्फुटीभविष्यतीत्याशङ्क्य न, समाधित्रयं च चिन्त्यमेवेति बोध्यम्। [१]**प्रकाशकृन्नारायणपरत्न-प्रकाशा**दिमतं खण्डयितुमनुवदति। **अत्र वदन्तीति।** प्रकाशकृदादय इत्यर्थः। **प्रकाशकृत्कृतप्रकाशचिन्तामणिस्थं** पद्यमाह। **गुणोपधेति।** अभ्यर्हितत्वाद्गुणस्य पूर्वनिपातः। प्रसङ्गादित्यत्रान्वयः। सर्वत्रेत्यस्य व्याख्या। **दीर्घान्तेष्वित्यादि।** इ उवर्णान्तेष्विति भावः।

---

१. प्रकाशकृत् प्रक्रियाकौमुदीप्रकाशकारः शेषकृष्णः। प्र.कौ.प्र.पृ.सं. ३२८ तृतीयभागः। र.प्र.पृ.सं. ३०९।

इति युट् स्यात्। किञ्च 'सनीस्रसः' 'दनीध्वंसः' ''अनिदिताम्'' (पा०सू० ६-४-२४) इत्युपधालोपः स्यात्। अपि च 'यायाः' 'वावाः' इत्यादिष्वाकारलोपः स्यात्। तस्मात्समुदायलुगेवैष्टव्यो लोलुवादिसिद्धये च सूत्रमारम्भणीयमिति।

अत्रोच्यते, लोलुवादिषु गुपस्तावन्न भवति, स्यानिद्धारकस्यानादिष्टादचः पूर्वत्वस्य सत्त्वेन स्थानिवद्भावात्। अत एव हि ''न पदान्त'' (पा०सू० १-१-५८) इति सूत्रे सवर्णग्रहणं कृतम्। 'शिण्ढि' इत्यादावनुस्वारस्य स्थानिद्धारकमनादिष्टादचः पूर्वत्वमाश्रित्य तस्य सवर्णे कर्त्तव्ये श्नसोरल्लोपस्य स्थानिवद्भावो मा भूदिति। नन्वनादिष्टादचः पूर्वत्वस्य शास्त्रीयकार्यत्वाभावात्कथमतिदेश इति चेत् ? अनादिष्टादचः पूर्वत्वापेक्षे ''अचः परस्मिन्'' (पा०सू० १-१-५७) इत्यतिदेशे कर्त्तव्ये 'स्थानिवदादेश' (पा०सू० १-१-५६) इत्यस्य प्रवृत्तिसम्भवात् सवर्णग्रहणव्याख्यावसरे सर्वैरित्थमेवोपपादितत्वाच्च। ननु योऽत्रादेश उवङ् सोऽनादिष्टादचः पूर्वतां स्थानिद्वारा कथञ्चिल्लभतां न तु

ध्वंस इति। इत्यत्रेति शेषः। **त्युपधेति।** तद्रूपतकारेत्यर्थः। तथोक्त्या नलोपपदं कारिकायामधिकमिति सूचितम्। उपधालोपेनैव संग्रहात्। याया इत्याद्यन्तं तस्यैव रूपाणि। **आकारेति।** अनेन पद्ये आल्लोपेति पदच्छेदः सूचितः। **तस्मात्** उक्तदोषगणापत्तेः। कथं तर्हि लोलुवादिसिद्धिरत आह। **लोलुवेति।**

४.११ प्रक्रियाप्रकाशादिमतनिरासः

यक्षानुरूपो बलिरिति न्यायेन तेषामनुरोधेन तावत् समाधत्ते। **लोलुवेति। गुप** उपधागुणः। **तावत्** आदौ। अत्र मानमाह। **अत एवेति।** तद्द्वारकस्य तस्याश्रयणादेवेत्यर्थः। हिश्चार्थे। तत्वमुपपादयति। **शिण्ढीति। तस्य** अनुस्वारस्य। इदं च स्पष्टार्थम्। [1]अल्लोपस्य प्रत्यल्लोपस्य कथनम् ?। निमित्ति ? स्थानिवदादेश इत्यनेनेति भावः। नन्वीदृशकार्यातिदेशो न सम्मतः, निमित्तरूपकार्यस्यैव तत्र ग्रहणात्। अत एव स्थानिवत्सूत्रस्थं भाष्यं सङ्गच्छते। किञ्च तया रीत्या नासौ नित्यानिट्त्वपक्षेण् निषेधेऽप्यतिदेशापत्तिरत आह। **सवर्णेति।** सवर्णग्रहणात् ज्ञापकादनादिष्टादचः पूर्वत्वमात्रस्याशास्त्रीयत्वेऽपि तत्वातिदेशेन लाभः स्वीक्रियत इति नातिप्रसङ्ग इति भावः। तदाह। **इत्थमिति।** कथञ्चित् सवर्णग्रहणस्य प्रत्याख्यानात्तस्य निर्मूलत्वमेव क्लेशः। चस्त्वर्थे। अपिः स्वतस्सिद्धसमुच्चयः।

---

१. अत्र पङ्क्तयः अस्पष्टाः।

तस्येह किञ्चित्कार्यं विधीयते येनाल्लोपः स्थानिवत्स्यात्। यस्य च कार्यं विधीयते उकारस्य नासावादेशः येन स्थानिद्वाराऽपि पूर्वतां लभेत। सत्यम्, 'सर्वे सर्वपदादेशाः' इत्याश्रयणात्स्थान्यादेशिभावस्तावदर्थवति विश्राम्यति। अत एव ''एरुः'' (पा०सू० ३-४-८६) इत्यस्य तेस्तुरिति पर्यवसितार्थमाश्रित्य स्थानिवत्सूत्रेणैव सिद्धत्वादेकदेश-विकृतस्योपसङ्ख्यानं नारब्धव्यमिति वक्ष्यते। एवञ्चेहापि लोलू इत्यस्य लोलुव् इत्यादेशः, स चानादिष्टादचः पूर्वः स्थानिवद्भावात्। तस्य च लोलुवं् इत्यादेशः, स चानादिष्टादचः पूर्वः स्थानिवद्भावात्। तस्य च लोलोव इत्यादेश कार्येऽल्लोपः स्थानिवदिति युक्तमेव। किञ्च, ''ज्ञाजनोर्जा'' (पा०सू० ७-३-७९) इति ''रीङ् ऋतः'' (पा०सू० ७-४-२७) इति च सूत्रे दीर्घोच्चारणेन ''अङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्य'' (प०भा० ९३) इति परिभाषा ज्ञापयिष्यते। तेनोवङि कृते गुणो न भविष्यति। 'दरीदृशः' इत्यत्र गुणो न भवति प्रतिपदोक्तस्याङो ग्रहणात्। 'अदर्शत्' इति यथा। यङस्त्वकार उपदेशवेलायां न प्रत्ययः किन्तु तदवयवः, यकारे लुप्ते तु नासौ ङकारविशिष्टो न वा श्रूयते। किन्तु

स्थान्यादेश इति पाठः। अत्र मानमाह। **अत एवेति।** अर्थवति तद्विश्रामादेवेत्यर्थः। **संख्यानं** शास्त्रीयम्। अन्यथा तस्य तत्वं इत्याश्रित्य वक्तव्ये तथोक्त्यसङ्गतिः स्पष्टैव। नन्वेवमपि न तेन सिद्धिस्तत्र श्रौतस्यैव स्थान्यादेशभावस्योपस्थितत्वेन ग्रहणादेव चेति तदयुक्तमेवात आह। **अत एवेति।** उक्तोऽर्थः चोऽन्तेति योज्यः। **एवञ्च** तस्य तत्र विश्रामे च। **स्थानीति।** पूर्वसूत्रेणेति भावः। ननु सवर्णग्रहणप्रत्याख्याने ज्ञापकाभावादुक्तार्थसिद्धेरतस्तदनुरोधेनैवाह। **किञ्चेति। ज्ञापयिष्यत इति।** भाष्य इति शेषः। तत्र हि अकृत्सार्वेति दीर्घे जानातीत्यादिसिद्ध्या दीर्घोच्चारणं व्यर्थं सत् परिभाषाज्ञापकम्। तत्फलं पिबेत्यादौ गुणाभावाय वार्तिककृदुक्तप्रतिषेधो न कर्तव्यो भवतीत्युक्तम्। अङ्गे अङ्गाधिकारे वृत्तं निष्पन्नं यत्कार्यं तस्मिन् सति अन्यस्याङ्गकार्यस्य वृत्तौ प्रवृत्तावविधानं भवतीति तदर्थः। द्वयोरिति निर्देशलब्धार्थ उक्तः निष्ठितस्येतीति। अत्र रिङिति ज्ञापकं प्राचामनुरोधेन। भाष्यानुक्तत्वात्। किञ्च तत्र ह्रस्वं पठताऽग्रे रिङ्ग्रहणं कार्यं न वा। नाद्यः। श्रियादित्वादीर्घापत्तेः। एतेनान्त्योऽपि निरस्तः। न चाद्ये पुनः करणसामर्थ्यादीर्घाभावः, तस्याविकृतरूपश्रवणार्थतया विकारमात्रबाधापत्या शे यङभावापत्तेश्चेति बोध्यम्। **तेन** परिभाषाङ्गीकारेण। उवङीत्युपलक्षणमियङोपि। यत्तु संज्ञापूर्वक इति न गुण इति। तन्न। तस्या असत्वात्। अत्र तत्वं त्वन्यत्र स्पष्टम्। एवमाद्यदोषमुद्धृत्य द्वितीयमुद्धरति। **दरीति।** तुश्चार्थे। **श्रूयत इति।** एवञ्चौपदेशिकवत् प्रायोगिकमपि न तत्स्वरूपमस्तीति तस्य कल्पत्वमेवेति भावः।

तर्कैकगोचरत्वाल्लाक्षपिकवद्विलम्बितोपस्थितिकः। नन्वेवमनङीति पर्युदासेऽप्यस्याग्रहणात् 'जङ्गमः' इत्यत्राल्लोपः स्यादिति चेत् ? न, अनङीति पर्युदासेनाङ्सदृशे औपदेशिके अजादौ श्रूयमाणाजादौ वोपधालोपविधानात्। अर्थवानेवाङनुपविधौ गृह्यते इति तु न सम्यक् विकरणानामनर्थकत्वात्। यत्तु 'देद्यः' इत्यत्र युट् स्यादिति। तन्न, अनुबन्धनिर्देशात्। तदुक्तम् —

श्तिपा शपानुबन्धेन निर्दिष्टं यद् गणेन च।
यत्रैकाज्ग्रहणं चैव पञ्चैतानि न यङ्लुकि ।। (प०भा० १३१) इति।

"दीङो युडचि" (पा०सू० ६-४-६३) इति सूत्रे दीङ इत्यनुबन्धनिर्देशो यङ्लुङ्निवृत्त्यर्थ इति त्वयैवोक्तत्वाच्च। अत्र च ज्ञापकम् "एकाच उपदेशे" (पा०सू० १-३-२) इति सूत्रे यङ्लुङ्निवृत्तिमुद्दिश्य क्रियमाणमेकाज्ग्रहणम्। न हि तस्मिन्कृतेऽप्युक्तपरिभाषां विना 'वेभेदिता' इत्यादि सिद्ध्यति। 'विभेत्सति' इत्यादिसिद्धये तन्त्रावृत्त्याद्याश्रयणेनोपदेशग्रहणस्योभयविशेषणतायाः सिद्धान्तयिष्यमाणत्वात्। न चैवमपि श्तितपाशपेत्याद्यंशान्तरे कथं ज्ञापकमिति वाच्यम्, एकदेशानुमतिद्वारा पूर्वाचार्यपठितपरिभाषाज्ञापनस्य "गतिकारकोपपदानाम्" (प०भा० ७६) इत्यादौ बहुशो दृष्टत्वात्।

लाक्षणीति। लक्षणानुसन्धानेन बोध्यस्वरूपवदित्यर्थः। **एवं** लक्षणप्रतिपदोक्तपरिभाषया तत्र गुणवारणे च। **अल्लोप इति।** उपधाकारलोप इत्यर्थः। **सदृश इति।** प्रतिपदोक्तपरिभाषाबललब्धश्रूयमाणेऽङ्सदृशे श्रूयमाणाजादावित्यर्थः। प्रकृते च श्रूयमाणत्वाभावान्नोपधालोप इति भावः। प्राचोक्तं खण्डयति। **अर्थेति।** तृतीयमुद्धरति। **यत्त्विति। उक्तं चेति।** परिभाषापाठे प्राचीनैरिति शेषः। तदुक्तमिति पाठान्तरम्। अनुबन्धनिर्देशो द्विधा। स्वरूपेण ङित इत्यादि पदेन च। हन्ति याति वाति सनीवंतेत्यत्र 'भरति' 'दीङो युडचि' 'अनुदात्त ङित' 'दिवादिभ्यः श्यन्' 'एकाच उपदेश' इत्युदाहरणानि। नन्वनुबन्धनिर्देशोऽन्त्य एव गृह्यत इति न वारणमत आह। **दीङ इति।** एवञ्च स्वग्रन्थविरोधोऽपीति दिक्। **अत्र च** उक्तपरिभाषायां च। **यङ्लुगिति।** तत्र प्रवृत्तिरित्यर्थः। तादृशस्यानेकाचः तत्रैव सम्भवादिति भावः। **ग्रहणमिति।** अन्यथोपदेशेऽनेकाचामुदात्तत्वस्यैव सत्वेन तद्वैयर्थ्यं स्पष्टमेवेति भावः। तदेवोपपादयति। **न हीति। तस्मिन्** एकाज्ग्रहणे। **इत्यादीति।** इट्घटितमिति भावः। ननु तत्र कृते तं विनापि सिद्धिरूपदेशेऽनुदात्तात्सम्प्रत्येकाच इत्यादि तदर्थादत आह। **बिभेत्सतीति। उभयेति।** एकाजनुदात्तयोरित्यर्थः। **चैवमपि** तस्यैकांशज्ञापकत्वसम्भवेऽपि। **ज्ञापकमिति।** एकाज्ग्रहणमिति भावः। **दृष्टत्वादिति।**

न चैवमेकाच इति विधीयमानं द्वित्वमपि यङ्लुकि न स्यादिति वाच्यम्, ''गुणो यङ्लुकोः'' (पा०सू० ७-४-८२) इति ज्ञापकेन तत्प्रवृत्तेः। यङ्लुकि 'बेभेदिता' इत्यादाविडागमे तूदाहृतपरिभाषैव शरणम्। ''द्विःप्रयोगो द्विर्वचनं षाष्ठम्'' (भा०इ०) इति वक्ष्यमापतया धात्वन्तरत्वस्य वक्तुमशक्यत्वात् 'बेभेदिता' इति यङन्ते तु पृथगल्लोपाभ्युपगमात्तस्य च स्थानिवद्भावान्नेण्निषेधः पूर्वस्मादपि विधौ स्थानिवद्भावस्य वक्ष्यमाणत्वात्। किञ्च, ''यस्य'' (पा०सू० ६-४-१४८) इति लोपस्य त्वयाऽप्यवयव-लोपत्वं स्वीकृतम्। तत्र यद्यपि 'देद्यकः' इत्यत्र युट् स्यादिति नापादनार्हम्, हलः परत्वाभावेनेह यलोपाप्रवृत्त्या 'देदीयकः' इति रूपाभ्युपगमात्। 'सनीस्रसकः' इत्यादौन-लोपोपि सर्वसम्मतत्वादेव नापाद्यः, 'ययायकः' 'वावायकः' इत्यादावाल्लोपोऽप्यनापाद्यः, यलोपविरहेपाजादिक्ङिदार्द्धधातुकपरत्वाभावात् ; तथापि गमेर्यङन्ताण्ण्वुलि 'जङ्गमकः'

एवञ्चात्रापि तथेति भावः। **चैवं** उक्तपरिभाषाङ्गीकारे। **तत्प्रवृत्तेरिति।** निषेधानित्यत्वकल्पन-द्वारेत्यादिलाघवात्। अत एव भष्भावोऽप्यजर्घा इत्यादौ यङ्लुकि भवत्येव। यत्राजित्येकत्व-विवक्षयैव तद्वतो ग्रहणेनैकाच्त्वे लब्धे एकग्रहणस्य प्रयोजनं दृश्यते, तथै**काच उपदेशे** (पा०सू० ७-२-१०) इत्यत्र वधादेशव्यावृत्त्यादि तत्रैकाच्त्वनिषेधप्रवृत्तिरिति विज्ञापनद्वारेत्यर्थः इति कश्चित्। ननूक्तपरिभाषैवास्तु येन द्वित्वे दोषः स्यात्। बेभेदितेत्यादौ तु एकाच्ग्रहणे कृतेऽपि द्वित्वोत्तरं विशिष्टस्य धात्वन्तरत्वेनोपदेशे यो धातुरेकाजनुदात्तश्च तत्वाभावान्निषेधाप्राप्त्या न दोषोऽत आह। **यङ्लुकीति।** एवव्यवच्छेद्यमाह। **द्विरिति।** 'प्रकृतिग्रहणे यङ्लुङन्तस्यापी'ति परिभाषा तु नास्त्येव, भाष्यानुक्तत्वात्। प्राचां मतेऽपि प्रकृतेर्विशिष्यात्राग्रहणेन तदप्रसङ्गाच्चेति भावः। यङ्लुकीत्युक्तेः फलमाह। **बेभीति।** ननु किमेतावताऽत आह। **तस्येति।** चः पञ्चम्यन्ताग्रे योज्यः। ननु षष्ठीसमासे तदप्राप्तिरेवात आह। **पूर्वस्मादपीति।** अपिः पूर्वस्येत्यस्य समुच्चायकः। एतदर्थमेव तत्स्वीकार इति भावः ।।

एवं दोषत्रयमुद्धृत्याग्रिमं दोषं तन्मुखेनोद्धर्तुं सूत्रारम्भवादिमते दोषमाह। **किञ्चेति। यस्येतीति।** 'यस्य हल' (६-४-१४८) इतीत्यर्थः। **त्वया** सूत्रारम्भवादिनापि। **तत्र** तन्मते तस्मिन् सति वा। देद्यक इत्यत्र तत्वेनाभिमते रूपे। एवमग्रेऽपि। एतत्प्रभृति यङन्तस्य रूपाणि। **यलोपेति।** हलाः परत्वान्नेति भावः। **जङ्गमक इत्यत्र** तत्वेनाभिमते रूपे। **उपधालोप इति।** गमहनेतीति भावः। **गुणः स्यादिति।** तस्मदुक्तरीत्या वारणे तु निषेधाप्रवृत्त्योपधाल्लोपः सर्वसम्मतत्वादिष्ट एवेति जग्मक इत्येव रूपमिति भाष्यरीत्या प्रत्याख्यानेऽपि न दोष इति भावः।

इत्यत्राल्लोपस्य स्थानिवद्भावाद् वृद्ध्यभाव इवोपधालोपः स्यात्। अथात्रानङीति प्रतिषेधस्तर्हि 'दरीदृशकः' इत्यत्र ''ऋदृशोऽङि'' (पा०सू० ७-४-१६) इति गुपः स्यात्। अथ यदीहाङ्गवृत्तपरिभाषया ''संज्ञापूर्वको विधिरनित्यः'' (प०भा० ९४) इति वा समाधीयते तर्हि यङ्लुक्यपि 'सनीस्रंसः' इत्यत्र नलोपो 'यायाः' 'वावाः' इत्यालोपश्च न शङ्क्यः, समाधानस्य तुल्यत्वादिति दिक्।

क्ङिति च (पा०सू० १-१-५)। इक इति शब्दमुच्चार्य विहिते गुपवृद्धी गितं कितं ङितश्च निमित्ततयाऽऽश्रित्य ये प्राप्नुतस्ते न स्तः। गित् जिष्णुः, 'ग्लाजिस्थश्च ग्स्नु'' (पा०सू० ३-२-१६९)। न चायं किदेवास्त्विति वाच्यम्, 'स्थास्नुः' इत्यत्र 'घुमास्था'' (पा०सू० ६-४-६३) इतीत्वप्रसङ्गात्। न चैवं 'भूष्णुः' इत्यत्रेट्प्रसङ्गः ''श्रयुकः किति''

समेति। त्वयेति शेषः। **इत्यालोपश्चेति।** इत्यत्रालोपश्चेत्यर्थः। **समाधानेति।** उक्तद्वयान्यतर-रूपस्येत्यर्थः। वस्तुतस्तु इदं सर्वं चिन्त्यम्। संज्ञापूर्वक इत्यस्याः स्तिपाशपेत्यस्याश्वासत्वात्। अङ्गवृत्तेत्यस्या लक्ष्यासाधकत्वाच्च। अत एव तां ज्ञापयित्वा किं प्रयोजनमिति प्रश्नेऽपि पिबेर्गुण-प्रतिषेध उक्तः, स न वक्तव्यः इत्येव प्रयोजनमुक्तम्। न तु लक्ष्यसिद्धिरूपम्। पञ्चमीसमासस्य मूलमते असत्वाच्च। सत्यपि तस्य लक्ष्यविशेषपरत्वाच्च। तस्मादित्थं समाधितत्वं बोध्यम्। लुकि पृथगल्लोपेऽपि क्वाचित्को न सार्वत्रिक इति प्रयोगसत्वे समुदायालुगेवेति न तत्र दोषः। याया वावा इत्यादीनां त्वनभिधानमेव। किञ्च संभावितद्वयातिदेशो न सार्वत्रिकः, ज्ञापकसिद्धस्यासार्वत्रिक-त्वात्। किञ्च स न पदान्तसूत्रविषयक एव, लोलुवादावुवङ्सिद्धिस्तत्र लघूपधगुणाभावसिद्धिश्च प्रकारान्तरेणैवेति [1]**छायायां** स्पष्टं तत एव बोध्यम्। उपदेशेऽनुदात्तादेकाचो धातोर्विहितस्येति व्याख्यानेन तदप्राप्त्या बेभिदितेत्यादिरित्याद्यन्यत्र स्पष्टमिति। तदाह। **दिगिति ॥**

४.१२ 'क्ङिति च' सूत्रे चर्त्वेन गकारप्रश्लेषविचारः

क्ङिति च ॥ अत्र गकारश्चर्त्वेन प्रश्लिष्यते। इको गुणेति सम्पूर्णसूत्रमनन्तरसूत्रान्नेति चानुवर्तते। तयोश्चार्थपरत्वमिक इत्यस्य शब्दपरत्वमेव। क्ङितीति निमित्तसप्तमी वार्तिकरीत्येत्याशयेन प्राग्वदाह। **इक इति।** यथोचितशेषपूरणेन वाक्ययोजना। 'तन्निमित्तग्रहणं कर्तव्य'मिति वार्तिकरीत्याऽह। **निमित्तेति।** प्राग्वत्। उद्देशक्रमेणोदाहरणान्याह। **गिदिति।** प्रश्लेषं समर्थयते। **न चायमित्यादिना। चैवं** गित्वाङ्गीकारे। **भूष्णुरिति।** भुवस्तत्रानुवृत्तेः, श्रयुक

---

१. छाया. पृ.सं. २०९ म.भा. प्रथमभागः।

(पा०सू० ७-४-११) इत्यत्रापि चर्त्वेन गकारप्रश्लेषमाश्रित्य तन्निषेधात्। न चैवं चर्त्वस्यासिद्धतया विसर्जनीयो न स्याद्रोरुत्वश्च प्रवर्त्तेतेति वाच्यम्, ''न मुने'' (पा०सू० ८-२-३) इत्यत्र नेति योगविभागात्सौत्रत्वाद्वा। तथा च ''ग्लाजिस्थ'' (पा०सू० ३-२-१३९) इति सूत्रे श्लोकवार्त्तिकम् –

क्स्नोर्गित्त्वान्न स्थ ईकारः किन्ङितोरीत्वशासनात्। (म.भा.पृ.सं. २०८ तृ.भागः)

गुणाभावास्त्रिषु स्मार्यः श्रुचकोऽनिट्त्वं कगोरितोः।। इति। जयादित्योऽप्येवम्। वामनस्तु ''ग्लाजिस्थश्च'' (पा०सू० ३-२-१३९) इत्यत्र स्था आ इत्याकारं प्रश्लिष्य क्स्नुप्रत्ययान्तस्य तिष्ठतेराकार एव न त्वीत्वमिति व्याख्यानादेव स्थास्नोः सिद्धौ न कापि गकारप्रश्लेषः कार्य इत्याह। नन्वेतेन तन्मते ''दंशेच्छन्दस्युपसंख्यानम्'' (का० वा०) इति क्स्नौ 'दंक्ष्णवः पञ्चवः' इत्यत्र ''अनिदिताम्'' (पा०सू० ६-४-२४) इति नलोपः स्यात्। सत्यम्, छान्दसत्वात्समाधेयः। कित्-'चितं' 'स्तुतं' 'मृष्टम्'। ङित् – 'चिनुतः' 'सुनुतः' 'मृष्टात्'। निमित्तसप्तम्याश्रयपं किम् ? व्यवहितेऽपि यथा स्यात् –

इत्यस्याप्रवृत्तेः। अपिः सूत्रापरामर्शकः। **निषेधात्** तेनेण्निषेधकरणात्। **चैवं** तत्र तथा प्रश्लेषे। जिह्वामूलीयस्यानिमित्तश्रवणादाह। **विसेति। रुत्वं चेति।** हशि चेति भावः। **विभागादिति।** तथा चानसिद्धत्वमिति भावः। योगविभागस्य भाष्यानारूढत्वादाह। **सौत्रेति।** तथा च तत्रैवायं प्रयोगो नान्यत्रेति भावः। अत्र मानमाह। **तथा न ग्लाजीति।** विसर्गपूर्वभागानुकरणम्। केति अकार उच्चारणार्थः। एवमग्रेऽपि। स्था आ ग्ला आ इत्युचितम्। सर्वत्र सन्नियोगशिष्टन्यायेन मिथः समभिव्याहारेण चाह। **क्स्नुप्रेति।** अन्तशब्दः समीपवाची। अत एवातद्गुणसंविज्ञानो बहुव्रीहिः। अत एवाह। **तिष्ठतेरिति।** विशेषविधेर्बाधकबाधनार्थत्वादाह। **एव नत्विति।** एवेन प्रश्लेषव्यावृत्तिः। **स्थास्नोः** तच्छब्दस्य। अत्रारुचिबीजमुक्तभाष्यवार्तिकविरोधरूपं स्पष्टमेव। गौरवरूपदोषान्तरं सूचयन्नाह। **नन्वेतेनेति।** किञ्च तत्र प्रश्लेषस्य न स्वारिसिकत्वम् अन्यत्र स्वीकारेऽतिप्रसङ्गापत्तिरपि इत्यपि बोध्यम्।।

४.१३ सूत्रे सप्तम्या निमित्तार्थकत्वविचारः

निमित्तसप्तम्यभावे तस्मिन्निति प्रवृत्त्या पौर्वापर्यस्यासिद्धाभ्यां गुणवृद्धिभ्याम-सम्भवादिक एव विशेषणमित्यव्यवहिते एव तत्र स्यान्न व्यवहिते इत्याशयेनाह। **व्यवेति।**

'छिन्नं' 'भिन्नम्' । इक इति किम् ? कामयते । शब्दव्यापाराश्रयपं किम् ? लैगवायनः । ओर्गुणो हीक एव प्रवर्त्तते न तत्रेक्पदोपस्थितिः ओरिति निर्द्दिष्टस्थानिकत्वात् । तदुक्तम् – ''तद्धितकाम्योरिक्प्रकरणात्'' इति । ननु क्ङितीति सप्तमीनिर्देशात् ''तस्मिन्निति निर्द्दिष्टे पूर्वस्य'' (पा०सू० १-१-६६) इति परिभाषोपतिष्ठेत, तत्र निःशब्दस्य नैरन्तर्यपरत्वाद्विशेशेश्चोच्चारपक्रियत्वादव्यवहितोच्चारितस्य निषेधः स्यान्न तु 'छिन्नं' 'भिन्नम्' इत्यादेरपीति चेत् ? भवेदेवं, यदि क्ङितीत्येतन्निषेध्यया क्रियया साक्षात्सम्बध्येत । इह तु गुणवृद्धिभ्यां सम्बध्यते । ''यस्य च भावेन'' (पा०सू० २-३-३७) इति सप्तमी, क्रियान्तराश्रयणादौत्सर्गिकसत्ताक्षेपः । ततश्च क्ङिति सति प्राप्ते ये

इक इति किमिति । तत्पदानुवृत्तिरेव किमर्थमित्यर्थः । न तु कामयते इत्यर्थः । इकः स्थाने इत्येवार्थोऽस्तु, तावतैव तत्र वारणसम्भवादित्याह । **शब्देति ।** अनुवृत्त्यावश्यकत्वेऽपि तथा व्याख्यानं किमर्थमित्यर्थः । हि यतः । तेनोभयवारणे [1]सम्मानमाह । **तदुक्तमिति ।** वार्तिककृतेति भावः । ननु निमित्तसप्तम्येवायुक्तम्, तस्मिन्निति बाधे मानाभावादिति प्रागुक्तमयुक्तमेवेत्याशयेन सिंहावलोकनन्यायेन न ह्येकस्या इति रीत्योदाहरणादीनि सूचीकटाहन्यायेन स्वल्पानि समाप्य बहुवक्तव्यकं **तन्निमित्तग्रहणं कर्तव्य**मिति [2]वार्तिकार्थं प्रतिपादयितुमाह । **ननु क्ङितीति । तत्रेति ।** परिभाषायामित्यर्थः । तथा सतीत्यादिः । चो व्युत्क्रमे हेतुसमुच्चायकः । इदानीं प्रागुक्तरीत्या तद्विशेषणत्वासम्भवादाह । **अव्यवहितोच्चारितस्येति ।** इक इत्यर्थः । **इत्यादेरिति ।** तद्घटकस्यापीक इत्यर्थः । निषेधस्य विधेयत्वेन प्राधान्यं यद्यप्यस्ति तथापि विधानदशायां तेन साक्षात् पौर्वापर्यासम्भवादाह । **निषेधेति ।** साक्षान्निषेध्यया क्रियया सम्बद्ध्यत इत्यर्थः । साक्षान्निषेधान्वयिन्या भवतिक्रिययेत्यर्थः । साक्षादित्यनेन प्रसज्यप्रतिषेधार्थकनञः क्रियाद्यन्वयनियमः सूचितः । एतेन तत्स्थानिभूतेकूद्वारैव तस्य क्रियाविशेषणत्वादधिकरणकारकस्य साक्षात्क्रियान्वयाभावाच्च साक्षादित्ययुक्तमित्यपास्तम् । यद्यपि प्रधानेतरसन्निधौ प्रधानविशेषणतैवोचिता, तथापि लक्ष्यानुरोधात्तस्मिन्नित्यस्याप्रवृत्तये आह । **इह त्विति ।** गुणभूतप्राप्तिक्रियया द्वाराभूताभ्यामिति शेषः । अत एव सप्तम्युपपत्तिः । एवञ्च परसप्तम्या अप्रसङ्ग एवेत्याह । **यस्य चेति ।** ननु समानाधिकरणक्रियावाचकपदाश्रवणात्कथमिदमत आह । **क्रियान्तरेति ।** प्राप्तिलक्षणोऽस्तिर्भवन्तीपर इति भाष्योक्तेः । तथा च क्ङितः सत्तारूपेण निमित्तलक्षणेन भावेन गुणवृद्ध्योः प्राप्तिलक्षणो भावो लक्ष्यते । निमित्तस्य च सत्तया निमित्तिनः प्राप्तिर्लक्ष्यत इति यावत् । तदाह ।

---

१. सम्मतिमाह इति ख । २. म.भा.पृ.सं. २११ (प्रथमो भागः)

गुणवृद्धी इति सम्बन्धे कृते सिद्धसाध्यसमभिव्याहारन्यायेनोपलक्षपीभूतसत्ताश्रयणस्य निमित्तत्वमुत्सर्गतः फलति न त्विह विशिष्य निमित्ततायां सप्तमीविधानमस्ति। न चात्र निर्दिष्टपरिभाषा सम्भवति, विध्यङ्गभूतानां परिभाषापां साक्षाद्विधेयनिषेध्यक्रियान्वयिन्येव प्रवृत्तेः। इदन्तु क्रियान्वयिनो विशेषपं न तु क्रियायाः। अतोऽत्र न परिभाषाप्रवृत्तिः। अन्यथा ''वृद्धिर्यस्याचामादिः'' (पा०सू० १-१-७३) इत्यत्रेक्परिभाषोपस्थाने शालीयादिर्न सिध्येत्। न ह्यत्रेकः स्थाने वृद्धिः। अत एव 'उदीचामातः स्थाने' (पा०सू० ७-३-४६) इति सूत्रे स्थानेग्रहपं कृतम्। आतः स्थाने योऽकार इत्यनृद्यमानस्य विशेषपे आत इत्यस्मिन् ''षष्ठी स्थानेयोगा'' (पा०सू० १-१-४९) इति परिभाषाया अप्रवृत्तेः। 'गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात्स्यात्' (जौ०सू० ३।१।२२) इति न्यायोप्यत्रानुसन्धेयः। ननु तर्ह्यनेनैव न्यायेन कृङितीत्येतत्प्रधानभूतक्रियया सम्बध्यतां न तु तच्छेष-

---

ततश्चेति। नोपलक्षेति। ज्ञापकीभूतेत्यर्थः। गोषु दुह्यमानास्वित्यादौ तदभावादाह। **उत्सर्गत इति। न त्विहेति।** व्याकरणे पाणिनीय इत्यर्थः। कारकविभक्तीनां वैवक्षिकत्वेन करणस्याप्यधिकरणत्वविवक्षया सप्तमीसम्भवादाह। **विशिष्येति। निमित्ततायां** करणतायामवच्छेदकभूतायाम्। 'निमित्तात्कर्मयोग' इत्यत्र तु निमित्तं फलमिति न दोषः। नन्वेवमपि परिभाषाप्रवृत्तिः कुतो नात आह। **न चात्रेति।** न ह्युक्तसम्बन्धे सतीत्यर्थः। हेतौ हेतुगर्भविशेषणमाह। **विध्यङ्गेति।** साक्षात्त्वमन्वयेऽन्वेति, विधेयत्वं निषेधे क्रियायां वाऽन्वेति। साक्षादेवाभ्यां घटकीभूतक्रियान्तरव्यवच्छेदस्तदाह। **इदन्त्विति।** क्ङितीति सप्तम्यन्तमित्यर्थः। **क्रियान्वेति।** प्रधानक्रियान्वयिगौणप्राप्तिक्रियाया इत्यर्थः। **न तु क्रियाया इति।** न तु प्रधाननिषेध्यक्रियाया इत्यर्थः। विशेषं वक्तुमुपसंहरति। **अतोऽत्रेति।** प्रधानक्रियान्वयिनि 'इको यणचि' 'नेट्यलिटी'(पा०सू० ७-१-३६)त्यादौ चरितार्थत्वादनुवादे इत्यर्थः। **अन्यथा** अनुवादेऽपि तदङ्गीकारे। अत्र ज्ञापकमप्याह। **अत एवोदीचामिति।** अत एवेत्यस्यार्थमाह। **आत इति।** इति इत्यत्र। नन्वेवमिको यणचीत्यादौ दोष इति चेन्न तत्र तस्य प्रधानक्रियायामेवान्वयेनादोषात्। यद्यपि तस्यासिद्धत्वेनाच्परत्वासम्भवस्तथापि स्थानिद्वारकं तद् ग्राह्यम्। न च यस्य जातस्याच्परत्वं भवति तत्वम्, एतेध्येत्यादावसम्भवात्। एतेन यद्यपि क्रियान्वयी यण्, तथापि तस्यासिद्धत्वेनाच्परत्वासम्भवेन सामर्थ्यात्तदन्वयीक् गृह्यते। न चोक्तरीत्या भाविक्ङित्याश्रयणेन साक्षात्क्रियान्वयिविशेषणत्वमेवास्त्विति वाच्यम्। एस्वेधेत्यादावसम्भवादिति प्राचोक्तमपास्तम्। उक्तयुक्तेः। विशेषं वक्तुमत्र युक्त्यन्तरमप्याह। **गुणानां चेति। क्रियया** निषेध्यभवतिक्रियया। **तच्छेषेति।** प्रागुक्तरीत्येति

भूताभ्यां गुणवृद्धिभ्यां, प्रधानान्वयस्य सम्भवतस्त्यागायोगादिति चेत् ? न, यत्र हि गुणः कृतात्मसंस्कारः प्रधानोपकाराय महते प्रभवति तत्रात्मनोऽपि संस्कारमनुभूय प्रधानेन सम्बध्यते । यथा पानीयमेलादिसंस्कृतं पुरुषेप । उक्तञ्च –

गुणः कृतात्मसस्कारः प्रधानं प्रतिपद्यते ।
प्रधानस्योपकारे हि तथा भूयसि वर्तते ।। इति ।।

इह गुणवृद्ध्योः कृङिद्भ्रहपेन विशेषितयोः प्रधानस्य महानुपकारो भवति, व्यवहितस्यापि प्रतिषेधसिद्धेः । क्रोः कित्करणञ्चात्र ज्ञापकम् । अन्यथा प्रधानेनैवान्वये

भावः । सम्भवत इत्यनेनासम्भवे तदौचित्यं ध्वनितम् । हि यतः । आदावन्वयः । न चैवं प्रधानान्वयाकार्थ एवोच्छिद्येतेति वाच्यम् । यत्र प्रधानान्वये यत्फलं तदपेक्षयाऽधिकं विजातीयं वा गुणान्वये फलं तस्य चेष्टं चेद् दृढतरं प्रमाणं तत्रैव न्यायाङ्गीकारात् । तदेतदाह । **महत इति ।** तदेव ध्वनयन्नाह । **आत्मनोऽपीति ।** अपिरनुभूयेत्यग्रे योज्यः । स च तदभावे । न तु भवसमुच्चायकः । एवार्थो वा । **उक्तं चेति ।** हरिणेति शेषः । **गुण इति ।** यदेत्यादिः । तथा हि सति भूयसि प्रधानस्योपकारे वर्त्तत इत्युत्तरार्द्धार्थः । तस्य तत्वेन विवक्षायां सप्तमी । प्रकृते तादृशत्वमस्तीत्याह । **इहेति । विशेषितयोरिति ।** सतोरिति शेषः । **उपकार इति ।** सकलेष्टलक्ष्यसाधनरूपेत्यर्थः । तदाह । **व्यवेति ।** अपिनाऽव्यवहितसमुच्चयः । वस्तुतस्तु सिद्धसाध्येत्यारभ्य यदुक्तं तत् प्राचामनुरोधेन । तथा हि । सिद्धंसाध्येत्यस्यात्राविषये प्रवर्तनारूपविधिविषयत्वं क्रियाया एव, न दध्यादेरिति 'दध्ना जुहोती'त्यादौ दध्नः कथं विधेयत्वमित्याशङ्क्य तेन न्यायेन हि विधेयत्वमुक्तं न्यायविद्भिः । सिद्धंसाध्यायोपदिश्यते इत्यस्याज्ञातं ज्ञाप्यत इत्यर्थश्च व्याख्यातः । एवञ्च तेन न्यायेन द्रव्यस्याज्ञातज्ञाप्यत्वरूपविधेयत्वं स्वक्रियोपरागेण च प्रवृत्तेनाविषयत्वं स्पष्टमेवोक्तमिति प्रकृते तदभावात् निषेध्यक्रियाया मानान्तरादप्राप्तेस्तत्सूत्राप्राप्तेस्तत्सत्ताया निर्ज्ञातकालत्वाभावाच्च । एतेन यस्य चेति सप्तमी, सा च ज्ञापकत्वार्थिका । तत्त्वं च सम्बन्धं विनाऽनुपपन्नं सद्विधि-शास्त्रकृप्तनिमित्तत्वमादाय पर्यवस्यति । एवञ्च निमित्ततया क्ङित् ज्ञाप्येते गुणवृद्धी नेत्यर्थ इति कैयटाद्युक्तमप्यपास्तम् । किञ्चानुवाद इत्यस्याः सूत्रद्वयविषयकत्वेन न सार्वत्रिकत्वम् । अत एव वृद्धिर्यस्येत्यादौ न दोषः । तत्र स्थानेग्रहणं तु स्पष्टार्थमेव । अत एवा**ल्लोपोऽन** इत्यत्र यजादिस्वादिपर इत्यस्यानविशेषणत्वेऽप्यव्यवधानलाभ इत्यन्यत्र स्फुटम् । **तस्मादित्थमत्र तत्वं बोध्यम् ।** क्ङितीत्येतद्गुणवृद्धिविशेषणमेव । भवनक्रियातदभावयोरमूर्तत्वेन तत्परत्वासम्भवात् ।

निर्दिष्टपरिभाषायाश्चोपस्थितौ सत्यां व्यवहिते निषेधस्याप्रवृत्तौ व्यर्थमेव क्रोः कित्त्वं स्यात्। तस्माद्यथाव्याख्यानमेव साधु।

ननु न यदीयं परसप्तमी तर्हि शचडन्ते दोषः लघूपधलक्षणगुणप्राप्तेरिति चेत् ? न, अन्तरङ्गत्वादियङुवङ्प्रवृत्तेः। ''धि धारणे'' (धा०सू० १२६) 'रि पि गतौ'' (धा०सू० २२४।१२५) तुदादयः, धियति रियति पियति। ''पिश्रिद्रुस्रुभ्यः कर्त्तरि चङ्'' (पा०सू० ६-१-४८) अशिश्रियत्, अदुद्रुवत् असुस्रुवत् इति तिपमाश्रित्य प्राप्तो गुणो बहिरङ्गः शचडाश्रयावियङुवङावन्तरङ्गौ। तदुक्तम् ''शचडन्तस्यान्तरङ्गलक्षणत्वात्'' इति। (का०वा०) ''मृजेरजादौ संक्रमे वृद्धिर्वेष्यते'' इति काशिकायाम्। इदञ्च ''इको गुण-वृद्धी'' (पा०सू० १-१-३) इति सूत्रप्रसङ्गाद्वैयाकरणान्तरमतत्वेनोक्तं भाष्ये। अस्यार्थः - संक्रामतो गुणवृद्धी अस्मादिति व्युत्पत्या गुणवृद्धिप्रतिषेधनिमित्तभूतः कृङित्प्रत्ययोऽत्र

अनुवृत्तस्यापीक इत्यस्य शब्दपरत्वात्। यद्यप्येवं सति क्ङितीति सप्तम्या 'निर्दिष्टे पूर्वस्ये'त्युपस्थित्या क्ङित्यव्यवहिते पूर्वस्य ये गुणवृद्धी प्राप्नुतस्ते नेत्यर्थः। अत एव भाष्ये 'क्ङित्यनन्तरो गुणभाव्यस्ती'त्युक्तमिति प्रागुक्तदोषस्तदवस्थ एव, तथापि अपूर्वतन्निमित्तग्रहणेन परिभाषानुपस्थित्या समाधेयम्। तत्प्रत्याख्याने तु लिङ्गादिना तदनुपस्थानम्। यथा उपपदविभक्तेरिति न्यायेन सम्भवन्त्यां परसप्तम्यां 'यस्ये'(पा०सू० २-३-३७)ति सप्तम्या असम्भवाच्च। सिद्धेति न्यायस्यापि अनया परिभाषया बाध एव। तस्मात्प्रत्याख्यानपक्षेऽव्यवधानविकल्पपरिभाषाप्रवृत्तिरिति बोध्यम्। तदेतत् ध्वनयन्नाह। **क्रोरिति।** ननूक्तरीत्या प्रधानान्वयो नात आह। **निर्दिष्टेति।** पूर्वांशस्योपस्थितिरुक्तरीत्याऽस्तीति ध्वनयन्नाह। **व्यवेति।** उक्तहेतोरेवाह। **यथेति।** योग्येत्यर्थः। अन्यथोक्तेत्येव ब्रूयात्। तस्मात्तादृशपरसप्तमीति तत्त्वम्।

४.१४ 'शचडन्तस्यान्तरङ्गलक्षणत्वा' दिति भाष्यवार्तिकार्थविचारः

प्राचामनुरोधेनैवाह। **नन्वित्यादिना।** अत एवाह। **अन्तरङ्गेति।** उक्तमेव सलक्ष्यं सोपपत्तिकमाह। **धीति।** इह एतेषु यद्यपि तन्निमित्तग्रहणपक्षे दोषमाशङ्क्य भाष्ये समाहितम्, तथापि एकदेशी अन्तरङ्गत्वादावविवादात्तदङ्गसम्मतित्वेनाह। **तदुक्तमिति।** वार्तिककृतेति भावः। **लक्षणत्वादिति।** तयोः कृतयोर्गुणो नेति शेषः। अथास्यापवादमाह। **मृजेरिति।** इदं समूलयति। **इदञ्चेक इति। प्रसङ्गादिति।** वृद्धिग्रहणविचारप्रसङ्गादित्यर्थः। **अस्मादिति।** अस्य प्राचां तत्संज्ञात्वेन क्रमेरपादाने घञ्, मित्वाद्ह्रस्वत्वम्। ननु तादृशस्यान्यस्यापि सत्वात् क्ङित एव

संक्रमशब्देनोच्यते, योगरूढेः। तेन 'मरीमृजः' इत्यत्र धात्वंशलोपनिमित्ततया वृद्धिप्रतिषेधहेतावप्यच्प्रत्यये नासौ विकल्पः प्रवर्त्तत इत्यवधेयम्। अत एव ''कृङित्यचि वा'' इति वचनं तत्र भाष्ये कृतम्। मृजन्ति, मार्जन्ति। अत्र हरदत्तः - अचीत्युच्यमानेऽपि ''यस्मिन्विधिस्तदादावल्ग्रहणे'' (प०भा० ३३) इति सिद्धे आदिग्रहणं मुख्याजादिग्रहणार्थम्। व्यपदेशिवद्भावेनाजादौ 'यूयं ममृज' 'त्वया ममृजे' इत्यादौ न भवतीति। तच्चिन्त्यम्, मुख्याजादिपरिग्रहे प्रमाणाभावात्। न हि भाष्ये आदिग्रहणं कृतं येन त्वदुक्तार्थो लभ्येत, किन्तु ''कृङित्यचि वा'' इति वचनं पठितम्। यत्तु ततः प्रागुक्तं भाष्ये ''इहान्ये वैयाकरणा मृजेरजादौ संक्रमे विभाषा वृद्धिमारभन्ते'' इति, तत्तु तदादिपरिभाषाबललब्धवाक्यार्थानुवादमात्रं न तु परकीयविधिवाक्यशरीरमिदं, येन त्वदुक्तमर्थं ज्ञापयेत्। अत एवात्रेयो 'मृजा' इति भिदादिपाठादङ् गणपाठादेव वृध्यभाव इत्याह। अत एव रक्षितेनापि धातुप्रदीपे 'तुन्दपरिमृजः' तुन्दपरिमार्जः' इत्युभयं दर्शितम्। दुर्घटवृत्तौ तु 'तुन्दपरिमृजः' इत्यत्र व्यवस्थितविभाषया वृद्धिर्नेत्युक्तम्। अत एव धातुवृत्तिषु 'यूयं ममृज, ममार्ज' इति रूपद्वयमुदाहृतम्। यत्तु मुख्याजादिग्रहणवादिनोऽपि मतेऽत्र वृद्धिविकल्पो दुर्वार एव। तथाहि, मध्यमपुरुषबहुवचनस्य थस्य ''परस्मैपदानाम्'' (पा०सू० ३-४-८२) इति सूत्रेण विधीयमानोऽकारादेशोऽलोन्त्यस्य प्राप्नोति। न चैवं विधिवैयर्थ्यम्, पलादीनां यथासंख्यसम्पादनेन चरितार्थत्वादित्याशङ्क्य

ग्रहणं कुतोऽत आह। **योगरूढेरिति।** तत्फलमाह। **तेनेति।** क्ङित एव तया ग्रहणेनेत्यर्थः। अत्र मानमाह। **अत एवेति।** अन्यथा तदसङ्गतिः स्पष्टैव। **तत्र** इको गुणेति सूत्रे। **कृतमिति।** इहापि तस्येष्टत्वादिति भावः। **अत्र** काशिकावाक्ये। **न हीति।** द्वितीयवाक्य इति भावः। तदेव स्पष्टार्थमाह। **किन्त्विति। न त्विति।** सम्भवतीति न्यायात्। अन्यथा वाक्यद्वयस्यैकवाक्यता-नापत्तेरिति भावः। अत्रत्यं सर्वमपि सर्वथा तदज्ञानप्रकटनाय प्रमाणयति। **अत एवेति।** एवमग्रेऽपि। **पाठादेवेति।** विकल्पस्यान्यथा निवारणसम्भवेन रूपद्वयप्रसङ्गेन पाक्षिकानिष्टरूपनिवारणाय हि तथोक्तिः। त्वद्रीत्या तु विकल्पस्यैवाप्रसङ्गेन तथोक्त्यसङ्गतिः स्पष्टैव। तुर्वैलक्षण्ये। विकल्पतः प्राप्तिमभ्युपेत्य हि तथोक्तम्। अन्यथा तदसङ्गतिः स्पष्टैव। वस्तुत इदं चिन्त्यम्, तासां परिगणनात्। एतत्सूचक एव तुरिति बोध्यम्। **उदाहृतमिति। माधवा**दिभिरिति भावः। हरदत्तोपरि दूषणमुद्धर्त्तुमनुवदति। **यत्त्विति। तत्र** मध्यमपुरुषबहुवचनविषये। **अलोऽन्त्यस्येति।** अन्त्याल इत्यर्थः।

भाष्य एव द्वेधा समाधास्यतिअकारद्वयात्मकोऽयमनेकाल्त्वात्सर्वादेशः। यद्वा, ''धातोः'' (पा०सू० ३-१-९१) इत्यधिकाराद् ''आदेः परस्य'' (पा०सू० १-१-५४) इति थकारमात्रस्याकार इति। तत्र पक्षद्वयेपि ''अतो गुणे'' (पा०सू० ६-१-९७) इति पररूपस्य ''अचः परस्मिन्'' (पा०सू० १-१-५७) इति स्थानिवद्भावान्मुख्याजादित्वमप्यस्त्येवेति कैश्चिद्धरदत्तमिश्रमते दूषणमुक्तम्। तन्न, ''आद्यन्तवद्'' (पा०सू० १-१-२१) इत्यतिदेश इव स्थानिवद्भावेऽपि मुख्यत्वाभावस्य सुवचत्वादिति दिक्।

स्यादेतत्, 'अचिनोत्' 'अमार्ट्' इत्यादौ स्थानिवद्भावेन तिपो ङित्त्वात् ''कृङिति च'' (पा०सू० १-१-५) इति गुणवृद्धिनिषेधः स्यात्। न चाल्विधित्वात्स्थानिवद्भावासम्भवः अनुबन्धकार्येष्वनल्विधाविति निषेधस्याप्रवृत्तेः। अन्यथा 'अचिनवम्' 'अमार्जम्' इत्यादावपित्त्वेन ''सार्वधातुकमपित्'' (पा०सू० १-२-४) इति ङित्त्वापत्तेः। इह च ज्ञापकं ''न ल्यपि'' (पा०सू० ६-४-६९) इति सूत्रम्। अन्यथा ल्यपः कित्त्वाभावादेवेत्वाप्राप्तौ किन्तन्निषेधार्थेन सूत्रेण?। यत्तु 'सेर्ह्यपिच्च' (पा०सू० ३-४-२७) इत्यपिद्वचनं ज्ञापकमिति। तन्न, ''शृणीहि विश्वतः प्रति'' इत्यादौ स्थानेन्तरतमपरिभाषया पित्त्वादनुदात्तस्य सिपः स्थानेऽनुदात्तस्यैव हेः प्राप्तावुदात्तसम्पादनेन

भाष्य एवेति। 'धातोः' [1]''परस्मैपदानां णलिति' (पा०सू० ३-४-८२) सूत्रयोरित्यर्थः। **अकारद्वयेति।** प्रश्लेषसामर्थ्यादादेशोत्तरमेकादेश इति भावः। **तत्र** उक्तप्रयोगे तस्मिन् सति वा तस्मिन् पक्षद्वयेऽपीति वा। अपिना शुद्धतत्परिग्रहः। एवेनासत्ताव्यवच्छेदः। **मुख्यत्वाभावेति।** किञ्च तस्याशास्त्रीयत्वान्नातिदेशः। अत एव न विशिष्टस्यापि। किञ्च स्थानितायाः प्रत्येकपर्याप्तत्वेन विशिष्टस्योभयपर्याप्तत्वेन तदधर्मत्वेन कथमतिदेशस्तदाह। **दिगिति॥**

४.१५ 'लकारस्य ङित्त्वादादेशेषु' इत्यादिवार्तिकार्थविचारः।

अथ लकारस्येत्यादिभाष्यवार्तिकार्थमाह। **स्यादेतदित्यादिना। वृद्धीति।** हल्ङ्यादिलोपात्परत्वादिना प्राप्तयोरिति भावः। विपक्षे बाधकमाह। **अन्यथेति।** तत्र तत्प्रवृत्त्यङ्गीकार इत्यर्थः। तथा चेष्टगुणादि न स्यादिति भावः। एवं फले उक्ते मूलमप्याह। **इह चेति।** उक्तार्थे तत्सूत्रज्ञापकं चेत्यर्थः। **अन्यथा** उक्तार्थानङ्गीकारे। उक्तार्थे प्राचोक्तं ज्ञापकं खण्डयति। **यत्त्विति। सेर्ह्यपिच्चेति।** इत्यत्र। अन्यथा निषेधेनैव पित्वाप्रसक्त्या तदानर्थक्यं स्पष्टमेवेति भावः। तृतीयान्तस्य प्राप्तावन्वयः। ननु कृतेऽपि तस्मिन्नौपदेशिकातद्भावेऽपि तया स कुतो नातोऽत्र

---

१. इत्थं हि तत्र भाष्यम् - 'प्रश्लिष्टनिर्देशोऽयम्। अअ इति। सोऽसौ अनेकाल्। अनेकाल्शित्सर्वस्येति सर्वादेशो भविष्यति' इति। म.भा.पू.सं. २८२ (तृतीयो भागः)

चरितार्थत्वात्। अपित्त्वसामर्थ्याद्धि तत्रान्तरतमपरिभाषा बाध्यते। प्रतिपत्तिलाघवार्थ-मुदात्त इति वक्तव्येऽपिद्वचनं ज्ञापकमिति वाऽस्तु। न्यायसिद्धोऽप्ययमर्थः, अनुबन्धा-नामनेकान्तत्वेन स्थानिकोटावप्रविष्टतया स्थान्यलाश्रयविधिविषयकस्य ''अनल्विधौ'' (पा०सू०ए० १-१-५६) इति निषेधस्याप्रवृत्तेः, ''अनुबन्धा एकान्ताः'' (पा०भा० ५) इति मतेऽपि स्थानिवत्वप्रतीतेः प्रागेवान्तरङ्गेण लोपेन तेषामपहारात्। तस्माल्लडाद्या-देशानां तिबादीनां स्थानिवद्भावेन ङित्त्वं दुर्वारमिति।

हेतुमाह। **अपित्वेति।** तद्विधिसामर्थ्यादित्यर्थः। हि यतः। **भाषेति।** सापीत्यर्थः। एतेन सेर्हि ङिच्चेत्येवास्त्विति सेर्हि ङ्वेति सुवचमिति च परास्तम्। अत एव तातङ् उदात्त इति सिद्धान्तः। अत एव तुह्योस्तादाशीषीति न्यासान्तरं भाष्ये सङ्गच्छते इत्याहुः। मात्रापदलाघवाभावादन्यथा प्राचोक्तं समर्थयन्नेकदेशी आह। **प्रतीति।** अत्र वाशब्दोऽनास्थायाम्। तथा च तावता उदात्तत्वसिद्धावपि ङित्वासिद्ध्या दोषापत्तिरिति तथा दुर्वचम्। किञ्च **हलःश्न**(पा०सू० ३-१-८३) इति सूत्रे शानचः शित्वस्य क्वचिदनुबन्धकार्येऽप्यनल्विधाविति प्रतिषेधे सार्वधातुकादेशेऽनु-बन्धा न स्थानिवद्भवन्तीत्यत्र ज्ञापकतामुक्त्वा तत्फलत्वेनापिद्वचनं न कर्तव्यं भवतीति लाघवस्य [१]भगवतोक्तत्वात् एवञ्च पूर्वोक्तमपि पक्षान्तराभिप्रायकमितीदं चिन्त्यमिति बोध्यम्। अपिरुक्तज्ञापकसमुच्चायकः। **अयं** तत्र तदप्रवर्त्तनरूपः। तत्रादावेकदेश्युक्तिमत्र निर्वाहसत्वादाह। **अनुबन्धेति। कोटौ** तच्छरीरे। प्रकृतमाह। **स्थाल्यलेति।** तदवयवालाश्रयेत्यर्थः। सिद्धान्तमाह। **अनुबन्धा इति। प्रागेवान्तेति।** पदार्थोपस्थितिप्राक्काल एवेति भावः। अपहारादित्यग्रे स्थानिकोऽयमित्याद्यनुषङ्गः। पूर्वपक्षमुपसंहरति। **तस्मादिति।**

---

१. इत्थं हि तत्र भाष्यम् - 'किमर्थः शकारः ?। 'शित्सार्वधातुक' मिति सार्वधातुकसंज्ञा 'सार्वधातुकमपि' दिति ङित्वं, ङितीति प्रतिषेधो 'यथा स्यात् कुषाण पुषाणेति। अत उत्तरं पठति। श्नाविकारस्य शित्करणानर्थक्यं स्थानिवत्वात्। श्नाविकारस्य शित्करणमनर्थकम्। किं कारणम् ? स्थानिवत्वात्। शितोऽयमादेशः स्थानिवद्भावाच्छिद्भवति। अर्थवत्तु ज्ञापकं सार्वधातुकादेशोऽनुबन्धाऽस्थानिवत्वस्य। अर्थवत्तु श्नाविकारस्य शित्करणम्। कोऽर्थः ?। ज्ञापकार्थम्। किं ज्ञाप्यम् ?। एतञ्ज्ञापयत्याचार्यः सार्वधातुकादेशेऽनुबन्धा न स्थानिवद्भवन्ती'ति। किमेतस्य ज्ञापने प्रयोजनम्। प्रयोजनं हितातङोरपित्त्वम्। हेः पित्त्वं न प्रतिषेध्यम्, पितोऽयमादेशः स्थानिवद्भावात्पित्स्यात्। सार्वधातुकादेशेऽनुबन्धा न स्थआनिवद्भवन्तीति नायं पिद्भविष्यति' इति। म.भा.पृ.सं. १२३ तृतीयो भागः।

अत्राहुः – ''यासुट् परस्मैपदेषु'' (पा०सू० ३-४-१०३) इति सूत्रे ङिद्वचनं ज्ञापकं-लादेशानां स्थानिवद्भावेन ङित्त्वन्न भवतीति। तथाच वार्त्तिकम् - ''लकारस्य ङित्त्वादादेशेषु स्थानिवद्भावप्रसङ्ग इति चेद्यासुटो ङिद्वचनात्सिद्धम्'' इति। ननु 'स्तुयात्' इत्यादावनिग्लक्षणवृद्धिप्रतिषेधार्थं 'चिनुयुः' इत्यादौ ''जुसि च'' (पा०सू० ७-२-८३) इत्यस्य प्रतिषेधार्थश्च यासुटो ङित्त्वमस्तु। ''उतो वृद्धिर्लुकि हलि'' (पा०सू० ७-३-८९) इत्यत्र उत इति निर्दिष्टस्थानिकतयेक्परिभाषा नोपतिष्ठते। ''जुसि च'' (पा०सू० ७-२-८३) इति तु ''क्ङिति च'' (पा०सू० १-१-५) इत्यस्यापवाद एव। तथाच स्थानिवद्भावलब्धं ङित्वं 'स्तुयात्' 'चिनुयुः' इत्यत्र वृद्धिगुणौ निषेद्धुं नालम्। पुनर्ङित्त्वसामर्थ्यात्तु तदुभयनिषेधो भविष्यति। तथाच वृद्धिगुणनिषेधे चरितार्थं यासुटो ङित्त्वङ्क्यं लादेशेषु लाश्रयङित्त्वस्य विरहं ज्ञापयेदिति चेत् ? उच्यते, ''उत औत्'' इति वक्तव्ये वृद्धिग्रहणं संज्ञापूर्वको विधिरनित्यो यथा स्यादित्येवमर्थम्। तेन 'स्तुयात्' इत्यत्र न वृद्धिः, तथा 'चिनुयुः' इत्यत्र न गुणः ''क्ससस्याचि'' (पा०सू० ७-३-८२) इत्यतोऽचीत्यनुवर्त्याजादौ जुसि गुणविधानात्। ''मिदेर्गुणोऽजुसि च'' इत्यकारं प्रश्लिष्याचासावुस् चेति कर्मधारयाश्रयपेनाजादावुसि गुणविधानाश्रयपे तु 'चक्रुः' 'जह्रुः' इत्यादावतिप्रसङ्गः।

४.१६ भाष्यस्थपूर्वपक्षसिद्धान्तयोरेकदेश्युक्तित्वसमर्थनम्

एवमत्रत्यभाष्यस्थपूर्वपक्षसिद्धान्तयोः प्रतिपादनेऽपि तयोरेकदेश्युक्तित्वं प्रतिपादयितुं शङ्कते। **नन्वित्यादिना। अस्त्विति।** तथा च चारितार्थ्येन न ज्ञापकतेति भावः। तदेवोपपादयन्नादौ अनिग्लक्षणवृद्धिमेवाह। **अत इत।** हि यतः। **अपवाद एवेति।** अस्मिन्नप्राप्ते तस्यारम्भात्। तथा च तस्यानिग्लक्षणत्वे तस्यैतदपवादत्वे च। इत्यत्र इत्यादौ। तु वैलक्षण्ये। पूर्वपक्षमुपसंहरति। **तथा चेति।** तत्सामर्थ्यान्निमित्ताभावापवादत्वयोरपि तद्बाधाङ्गीकारे चेत्यर्थः। निषेधे सतीति शेषः। तत्रादौ भाष्याद्युक्तिसम्भवप्रदर्शनायैकदेश्युक्तिमाह। **उत औदिति। त्येवमर्थमिति।** इत्येतदर्थं ज्ञापनार्थमित्यर्थः। **क्ससस्येति।** 'जुसि च' इत्यत्रेत्यादिः। अन्त्ये प्राचोक्तं[1] प्रकारं खण्डयति। **मिदेरिति।** संहितापाठे इति भावः। इतिरित्यत्रेत्यर्थे। समासोत्तरविभक्तेः प्रत्येकं सम्बन्धादाह। **अजादाविति।** तत्रैव लाघवादनतिप्रसक्तं संभावितं प्राचोक्तं प्रकारमाह।

---

१. प्राचोक्तमेव इति एवकारः अधिकं खपाठे।

गुपेति लुप्तविभक्तिकमुजुसीति च च्छेदः । उकारादौ जुसीति चार्थः । ''जुसि गुपे यासुट्प्रतिषेधः'' (का०वा०) इति वार्त्तिकमप्युक्तरीत्या सिद्धार्थकथनपरमिति तावद्वार्तिककारस्य हृदयम् ।

भाष्यकारमते तु ''सार्वधातुकमपित्'' (पा०सू० १-२-४) इति सूत्रेऽपिदिति योगं विभज्य ङिदिति चानुवर्त्यावृत्तिञ्चाश्रित्य ङिच्च पिन्न पिच्च ङिन्न भवतीति वाक्यार्थद्वयं वर्ण्यते । इदञ्च ''हलः श्नः'' (पा०सू० ३-१-८३) इति सूत्रे भाष्ये स्पष्टम् । तेन 'ब्रूतात्' इत्यत्र ब्रुव ईप्न तातङ औपदेशिकङित्वेनान्तरङ्गेणातिदेशिकस्य बहिरङ्गस्य पित्वस्य

गुपेतीति । सौत्रत्वादिति भावः । उ इत्यपि तत एव लुप्तसप्तम्यन्तं पृथक् पदमित्याह । **उकारादाविति ।** नन्वेवं वार्तिकविरोधोऽत आह । **जुसीति ।** अपिरत्रत्यभाष्यसमुच्चायकः । वार्तिककारस्येति सूचितारुचिस्त्वित्थम् । 'संज्ञापूर्वको विधिरनित्य' इत्यस्य भाष्यास्पृष्टत्वेन निर्मूलत्वम् । **ज्ञाजनोजे(पा०सू० ७-३-७९)**त्यत्र दीर्घोच्चारणस्याङ्गवृत्तपरिभाषाज्ञापकत्व-परभाष्या[1]सङ्गत्यापत्तेश्च । तयैवान्यथासिद्धेरिति । इदमेव ध्वनयन् सिद्धान्तमाह । **भाष्येति । विभज्य** प्रसज्यप्रतिषेधमाश्रित्येत्यपि बोध्यम् । **चानुवर्त्त्य** अनुवर्त्त्य च । एवमग्रेऽपि । अत एव तत्र योगविभागसामर्थ्यात् स्थानिवत्वप्राप्ता अन्या वा ङित्वप्राप्तिः सा सर्वाऽपि निषिध्यत इति भावः । यद्यपि भाष्ये **हलः श्न** इति सूत्रे **सार्वधातुकमिति** सूत्रे योगविभागं कृत्वाऽऽद्ये ङिदित्यनुवर्त्त्य सार्वधातुकं ङिन्द्भवति, ततोऽपित्, प्रसज्यप्रतिषेधः ङिदित्यस्यसम्बन्धः पित् ङिन्न भवतीत्येवं पिति ङित्वं प्रतिषिध्या**संयोगादिति(पा०सू० १-२-५)** सूत्रे ङिदपिदित्यनुवर्त्त्य सूत्रार्थमुक्त्वा ङिच्च पिन्न भवतीत्येवं ङितः पित्वं प्रतिषिद्धमिति व्याख्यातम् ।[2] तथापि लाघवादाह । **आवृत्तिञ्चाश्रित्येति ।** अत एवाह । **इदञ्चेति ।** प्रथमव्याख्यायाः फलमाह । **तेनेति । ईप्नेति ।** ब्रुव ईडितीप्नेत्यर्थः । ननु एवमपि विनिगमनाविरहात्पाक्षिको दोष एवात आह । **तातङ इति ।** तथा च न्यायसिद्ध एव बाध्यबाधकभावस्तेन वर्ण्यत इति भावः । **औपदेशिकेति** हेतुगर्भं विशेषणम् । एवमग्रेऽपि ।

---

१. इत्थं हि तत्र भाष्यम् - 'दीर्घोच्चारणं किमर्थं न 'ज्ञाजनोर्जे' इत्येवोच्येत ? । कारूपसिद्धिः - जानाति जायते ? । अतो दीर्घो यञीति दीर्घत्वं भविष्यति । एवं तर्हि सिद्धे सति यद्दीर्घोच्चारणं करोति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषा - 'अङ्गवृत्ते पुनर्वृत्तावविधि'रिति । किमेतस्य ज्ञापने प्रयोजनम् - पिबतेर्गुणप्रतिषेधश्चोदितः स न वक्तव्यो भवति' । इति म.भा.पृ.सं. २१७ षष्ठो भागः ।

२. इत्थं हि तत्र भाष्यम् - 'सार्वधातुकं ङिन्द्भवति पिन्न' एवं तावत्पितो ङित्वं प्रतिषिद्धम् । ततः - ''असंयोगाल्लिट् किन्द्भवति ङिच्च पिन्न भवती'ति । एवं ङितः पित्वं प्रतिषिद्धम् । इति । म.भा.पृ.सं. ११४ तृतीयो भागः ।

बाधात्, 'अतिदिष्टादुपदिष्टं बलीयः' इति न्यायात्। 'अचिनोत्' इत्यादौ त्वौपदेशिकेन तिबादीनां पित्त्वेन लाश्रयमातिदेशिकं ङित्वम्बाध्यते। तेन गुणादिसिद्धिः। अस्मिंश्च पक्षे यासुटो ङित्ववचनं न ज्ञापकं किन्तु 'मृज्यात्' इत्यादावप्राप्तङित्वविधायकम्। तेन च पित्त्वस्य 'चिनोति' इत्यादौ सावकाशस्य वाधः। अतः 'स्तुयात्' इत्यादौ पिति हलीति विधीयमाना वृद्धिर्न प्रवर्त्तते। 'चिनुयुः' इति तु प्राग्वदेव समर्थनीयम्। पूर्वोदाहृत-वार्त्तिकमते तु 'ब्रूतात्' इत्यत्रेट् प्राप्नोति। ''आगमशासनमनित्यम्'' इति तु कथंचित्समादेयः। वस्तुतस्तु ''हलः श्नः शानज्झौ'' (पा०सू० ३-१-८३) इति शानचः शित्करणेन ''क्वचिदनुबन्धकार्येप्यनल्विधाविति निषेधः प्रवर्त्तते'' इति ज्ञाप्यते। तेन 'ब्रूतात्' इत्यादौ न कश्चिद्दोष इति। अत एव भाष्यमते 'भविषीष्ट' इत्यत्र ङित्वन्न 'करिष्यमाणा' इत्यत्रोगिल्लक्षणटिल्लक्षणश्च ङीष्नेति दिक्।

नन्वेतच्छास्त्रस्यान्तरङ्गत्वादेः शास्त्रेऽनाश्रयणेन कथमिदमत आह। **अतिदिष्टादिति।** तथा चान्यतन्त्रसिद्धस्य शीघ्रोपस्थितित्वादिमूलस्येहाप्याश्रयेणान्यत्रान्तर्भावासम्भवात्तत्रैवान्तर्भाव इति तादृशमपि तदत्राश्रीयत इति भावः। द्वितीयव्याख्याफलमाह। **अचीति।** तु वैलक्षण्ये। आदिनाऽमार्डित्यादिपरिग्रहः। अग्रे आदिना वृद्धिपरिग्रहः। पूर्वपूर्वपक्षस्यैकदेश्युक्तित्वं प्रतिपाद्य सिद्धान्तस्य तत्वं प्रतिपादयति। **अस्मिंश्चेति।** चः किञ्चेत्यर्थे व्युत्क्रमे। यद्वाऽत इत्युक्तिं सफलयन् ततो वैलक्षण्ये सः। च यतः निरवकाशत्वात्। तुरप्यर्थे। अपिदर्थं ङित्वमिति भाष्योक्तेः। पूर्वसमाधानस्य वार्तिकाभिमतस्योक्तं तत्वं दृढयन्नाह। **पूर्वोदाहृतेति।** अत्र तु कथञ्चि-दित्याभ्यामरुचिः सूचिता तस्या असत्वरूपा। एवञ्च भाष्यमतमेवावश्यकम्। अत एव तत्साधकतयाऽभिमतं प्राचां सिद्धान्तमाह। **वस्तुतस्त्विति।** इति इत्यत्र। **प्रवर्त्तत इति।** तेन स्थानिवत्वेनानुबन्धकार्याभावस्तदाह। **तेनेति।** इतिस्तन्मतसमाप्तौ। एकदेश्येतदावश्यकतामाह। **अत एवेति।** उक्तार्थस्य ज्ञाप्यत्वादेवेत्यर्थः। भाष्यमत इत्युपलक्षणं पूर्वोक्तवार्तिकमतस्यापि। तत्राप्येतद्दूषणद्वयसत्वात्। एवञ्च यासुटो ङित्करणमप्येवमेव ज्ञापकं बोध्यम्। एवञ्च भाष्योक्तं ङिच्च पिन्नेत्यादि न कार्यमिति तेषामाकूतम्। चेन टिल्लक्षणसमुच्चयः। तथा पाठ एव तु प्रचुरः। वस्तुतस्तु चिन्त्यमिदम्। तत्रैव सूत्रे शानचः शित्वस्य सर्वधातुकादेशेऽनुबन्धाः नस्थानिवद्भवन्तीत्यत्र ज्ञापकतामुक्त्वा फलानि दोषांश्च प्रदर्श्य 'ज्ञापनस्य सन्ति प्रयोजनानि दोषाश्च। तत्र दोषा समा भूयांसो वा। तस्मान्नार्थोऽनेन ज्ञापकेन। कथं यानि प्रयोजनानि। तानि क्रियन्ते न्यास एवेति' तस्य प्रत्याख्यानात् ज्ञापकत्वम्। हेरपित्वस्य तातङ ङित्वस्य च वैयर्थ्यापत्तेर्दूषणस्याप्युक्तत्वाच्च।

दीधीवेवीटाम् (पा०सू० १-१-६)। दीधीवेव्योरिटश्च गुणवृद्धी न स्तः। आदीध्यनम्, आदीध्यकः। आवेव्यनम् मावेष्यकः। अकर्षिषम्। अरर्षिषम्। कर्षिता श्वो रर्षिता श्वः। इहामं प्रति सिजन्तमङ्गम्। तिपो डादेशं प्रति तु 'कर्षित्' 'रर्षित्' इति तान्तमङ्गं, तस्यामं डादेशं च सार्वधातुकं निमित्तीकृत्य लघूपधगुणः प्राप्तोऽनेन निषिध्यते। वृद्धिस्त्विटो न सम्भवत्येव। लुङन्ततां स्फोटयितुं श्व इत्यस्य प्रयोगः। न हि तृजन्ते तृच्नन्ते वेटो गुणप्राप्तिः, प्रत्ययावयवत्वात्तस्य। अथ ''दीङ्क्षये'' (धा०सू० २८) ''धीङ् अनादरे'' (धा०सू० ३०) ''वेञ् तन्तुसन्ताने'' (धा०सू० १०३१) ''वी गत्यादिषु'' (धा०सू० ३८) तेषामिह ग्रहणं कुतो नेति चेत् ? न, अवयवप्रसिद्ध्यपेक्षया

हेरपित्वमनुदात्तसेः स्थाने आन्तरतम्यात्प्राप्तानुदात्तहेर्वारणार्थमावश्यकमिति तातङोऽपि ङित्व-मन्त्यादेशत्वार्थमावश्यकमिति तदाशयः। पिदर्थं यासुटो ङित्वमप्युक्तरीत्या सफलम्। एतेनेदं शित्वं स्थानिवत्वेनानुबन्धकार्याभावस्य ज्ञापकमित्यपास्तम्। तत्रापि पुनः सत्यभिधानेऽजादिपाठा-दित्वाङ्गीकारात्। भविषीष्टेत्यादौ गतिस्तु ज्ञापकसिद्धं न सर्वत्रे (परि. १२५)ति बोध्या। किञ्चात्रपक्षेऽपि चिनुद्युरित्यादौ प्रागुक्तरीत्या वारणेऽपि स्नूयादित्यादौ दोष एव, प्रागुक्तरीतेः खण्डितत्वात्। एवञ्च भाष्यमतमेव युक्तम्। यत्तु गाङ्लिटीत्यत्र गाङो ङित्वस्य सानुबन्धकादेशेऽनुबन्धस्थानिवत्व-ज्ञापकता वार्तिककृदुक्ता, सापि फलाभावादित्यादिना भाष्ये एव दूषितेति बोध्यम्। तदाह। **दिगिति ।।**

४.१७ 'दीधीवेवीटाम्' सूत्रे सीरदेव-न्यासकार-पुरुषोत्तमदेवमतनिरासः

दीधीवेवीटाम्। चतुर्णामग्रहणमिति सूचनायाह। **दीधीति।** इडागमो न प्रत्यय इति सूचनाय भेदेनाह। **इटश्चेति।** आद्यद्वितीयलक्ष्ययोः स्पष्टत्वाच्चरमलक्ष्यमुपपादयति। इहेति। उक्तेष्वकर्षिषमित्यादिष्वित्यर्थः। **डादेशं** तद्रूपादेशं। इति इत्यादि। नन्वाद्यद्वितीयद्वयवदत्र वृद्धि-रपि कुतो नोदाहृताऽत आह। **वृद्धिस्त्विति।** तस्यैव किं फलमत आह। **न हीति। तस्येति।** इटः प्रत्ययावयवत्वादित्यर्थः। उक्तार्थं स्पष्टयितुं[1] शङ्कते। **अथेति।** तत्रादौ [2]**पुरुषोत्तमदेव-सीरदेवा**द्यनुरोधेनाह। **अवयवेति।** समुदायस्य सर्वानुग्राहित्वेन प्राधान्यात्प्रधानन्यायलब्धोऽयमर्थ इति हि तैरुक्तम्। वस्तुतस्तु चिन्त्यमिदम्। रूढ्यर्थतावच्छेदकानाक्रान्तयोगजबोधे

---

१. दृढयितुं ख।

२. लघुपरिभाषावृत्तिकारः पुरुषोत्तमदेवः ल.वृ.पृं. सं. १५४। बृ.परि.पृं.सं. २५९।

समुदायप्रसिद्धेर्बलवत्त्वात्। किञ्च चतुर्णां ग्रहणेऽभिप्रेतेऽसन्देहार्थं ''दीवेधीवीटाम्'' इत्येव ब्रूयात्। इट् चात्रागम एव गृह्यते न ''इट् गतौ'' (धा०सू० ३१९) इति धातुः। ननु धातुसाहचर्याद्धातुरेव गृह्यताम्। मैवम्, साहचर्यस्य सर्वत्रानियामकत्वात्। अन्यथा ''द्विस्त्रिश्चतुरिति कृत्वोर्थे'' (पा०सू० ८।३।४३) इति सूत्रे कृत्वोर्थग्रहणं न कुर्यात्, द्विस्त्रिरिति सुजन्ताभ्यां साहचर्येण चतुरित्यस्यापि सुजन्तस्य ग्रहणसम्भवात्। अत एवागमापेक्षया प्रकृतेरभ्यर्हितत्वाद्दीधीङः पूर्वनिपातः सूत्रे कृतः। इटोऽपि धातुत्वे तु प्रकृतित्वाविशेषेऽप्यल्पाच्तरत्वात्तस्यैव पूर्वनिपातः स्यात्।

अत्रेदमवधेयम्, 'दीध्यकः' 'वेव्यकः' इति यदुदाहृतं तद्दीधीवेवीभ्यां शुद्धाभ्यामेव ण्वुलि रूपं न तु ण्यन्ताभ्यामपि। यत्तु 'यीवर्णयोः' (पा०सू० ७-४-५३) इति सूत्रे हरदत्तेनोक्तम् - वर्णशब्दो 'वर्ण विस्तारे' (धा०सू० ४०६) इति धातोः पचाद्यजन्तः, श्रूयमाण एव वर्णे यथा स्याल्लुप्ते मा भूदित्येवमर्थः। तेन ण्यन्ताभ्यां ण्वुलि णिलोपस्य पूर्वविधौ स्थानिवत्त्वेपि श्रूयमाणत्वाभावाल्लोपाभावे यपि कृते 'दीध्यकः' 'वेव्यकः' इत्येव शुद्धेन

योगमिश्रितशुद्धरूढिजोपस्थितिः प्रतिबन्धकेति व्युत्पत्तेरेतद्बीजत्वात्। तथा च यौगिकरूढस्थलेऽयं प्रतिबध्यप्रतिबन्धकभावो न योगरूढस्थल इति बोध्यम्। तत्र मानं तु **रथकाराधिकरणं** इत्यन्यत्र स्पष्टमिति बोध्यम्। इत एवारुचेराह। **किञ्चेति।** यत इति शेषः। यत्तु वीवेदीधीटामिति वदेदिति [१]**न्यासकृत्सीरदेवा**दयः। तन्न। तथापि दीधीत्यंशे दोषतादवस्थ्यात्। तदेतद् ध्वनयन्नाह। **दीवेधीति।** चो व्युत्क्रमे किञ्चेत्यर्थे। **एवेति।** प्रसिद्धतरत्वात्, न त्वितिसाहचर्यस्य, प्रसिद्ध-बाधकत्वस्य गुरुभार्गवादिशब्दे इष्टत्वात्। **सुजन्तस्य** सुजन्तस्यैव। युक्त्यन्तरमपि सूचयन्नाह। **अत एवेति।** तस्यागमस्यैव ग्रहणादेवेत्यर्थः। **प्रकृतेरिति।** तज्जन्यत्वात्सर्वशब्दानामिति भावः। धातुपाठीयक्रमानुरोधेनाह। **दीधीङ इति।** ननु तस्य तत्वेऽपि दीधीङस्तत्वमवगतमत आह। **इटोऽपीति।**

४.१८ हरदत्तमतविमर्शः

एवव्यवच्छेद्यमाह। **न त्विति।** हेतुगर्भं विशेषणमाह। **वर्णेति।** ण्यन्ताभ्यां ताभ्याम्। **श्रूयेति।** णेरित्यादिः। **यणीति।** एरनेकाच इतीति भावः। **शुद्धेन** शुद्धप्रकृतिकतदन्तरूपेण।

---

१. का.न्या.पृ.सं. ८८।

समानाकारं रूपं भवतीति , तदेतत् ''नाग्लोपिशास्वृदिताम्'' (पा०सू० ७-४-२) इत्येतस्मिन्सूत्रे भाष्यकारैरेव ण्यन्तस्य 'दीधकः' इति रूपं शुद्धस्य तु 'दीध्यकः' इति व्युत्पादितत्वात्सिद्धान्तविरोधादुपेक्ष्यम्। तत्र हि वर्णग्रहणं लुप्तेऽपि वर्णे यथा स्यादित्येवमर्थमित्याशङ्क्य स्थानिवद्भावेन सिद्धेरन्तरङ्गत्वाण्णिलोपात्प्राग् ''यीवर्णयोः'' (पा०सू० ७-४-५३) इति लोपसिद्धेश्च वर्णग्रहणं प्रत्याख्यातम्। ननु वर्णग्रहणं कुर्वतः सूत्रकारस्याशयं भाष्यकारोक्तादन्यमेवानुसृत्य ब्रूम इति चेत् ? सत्यम्, तथापि ''यथोत्तरं मुनीनां प्रामाण्याद्रूपाशुद्धिस्तदवस्थैवेति दिक्।

स्यादेतत्, दीधीवेव्योर्ङित्वात् 'ङिति च'' (पा०सू० १-१-५) इति सूत्रेणैव

तदेतदिति। सिद्धान्तविरोधात् उपेक्षमित्यत्रान्वयः। विरोधे हेतुमाह। **नाग्लोपीति।** ननु कथं व्युत्पादितमत आह। **तत्र हीति।** यत उक्तसूत्रे इत्यर्थः। प्रत्याख्यातमित्यत्रान्वयः। यद्यपि तत्राज्झलोरादेशेऽप्यचः परेति स्थानिवत्वं प्रौढ्याङ्गीकृत्य चङ्पदनिहासे स्थानिवत्वनिषेधं मालाशब्दण्णिचि अममालदित्येतदर्थमावश्यकमनङ्गीकृत्य च तेनैव ह्रस्वाभावसिद्धेरग्लोपिग्रहणं व्यर्थमित्याशङ्क्याग्लोपिग्रहणमित ऊर्ध्वं स्थानिवत्वाभावस्य ज्ञापकमित्युक्त्वा एवं तर्हि आदीधयते आदीधक आवेवयते आवेवकः 'यीवर्णयोः' (पा०सू० ७-४-५३) इति लोपो न प्राप्नोतीत्याशङ्क्य वर्णग्रहणसामर्थ्याद्भविष्यतीत्युक्तं भाष्ये[1]। वर्णग्रहणसामर्थ्याद्भूतपूर्वगतिराश्रीयत इति **[2]कैयट**-स्तथापि तत्र भूतपूर्वगत्याश्रयणेऽचः परेति सूत्रस्थस्य आदीध्य इति भाष्यप्रयोगस्यानुपपत्तिः। अङ्गत्वेन णिलोपात्पूर्वं **यी वर्णयो**रित्यस्य दुर्वारत्वेन फलाभावश्च। न चाकृतेति परिभाषया नेति वाच्यम्। तस्यासत्वात्, सत्वेऽप्यनित्यत्वात् स्थानिवत्वस्य दुर्वारत्वेन निमित्तविनाशभावाच्च। न चाग्लो-पिग्रहणसामर्थ्यादीदृशे विषये न स्थानिवत्वमिति वाच्यम्। अगनग्लोपेपि अज्झलादेशोऽजादेशो नेत्यस्याचः परेत्यत्र भाष्यकृता निर्णीतत्वात्। तस्मादन्तरङ्गत्वमनालोच्यैव भाष्यमिति वर्णग्रहणं न्यायप्राप्तार्थानुवादकमित्याशय एव भाष्यस्य। अत एवान्तरङ्गत्वात्तु लोपे सिद्धे वर्णग्रहणं शक्यमकर्तुमिति **[2]कैयटः**। तदेतदभिप्रेत्याह। **प्रत्याख्यातमिति।** तत्प्रायमित्यर्थः। वस्तुतस्तु वर्णग्रहणमन्तरङ्गपरिभाषायाऽनित्यत्वे ज्ञापकम्, **हरदत्तस्तु** सर्वथाऽयुक्त एवेति बोध्यम्। अयमेव च सर्वो दिगर्थः। तदेतद् ध्वनयन्नाशङ्कते। **नन्विति॥**

४.१९ 'कार्यी निमित्ततया नाश्रीयत' इति परिभाषाविचारः सीरदेवविमर्शश्च

प्रसङ्गाद्विशेषे श्रोतुमेकदेशी शङ्कते। **स्यादेतदिति।** सर्वथोक्तरीत्या परसप्तमी नेति तद्भावः।

---

१. म.भा.पृ.सं. २३९ (षष्ठो भागः) २. म.भा.प्र.पृ.सं. २३९ (षष्ठो भागः)

निषेधोऽस्तु किमिह दीधीवेवीग्रहणेन ? मैवम्, इग्लक्षणयोर्हि स निषेध इत्युक्तम् । न च ''अचो ञ्णिति'' (पा०सू० ७-२-११५) इति वृद्धिरिग्लक्षणा । किञ्च कार्यिणो निमित्तत्वे पूर्वेण सिद्धिः सम्भवेदपि । न च कार्यी निमित्ततयाऽऽश्रीयते 'च्यवते' 'प्लवते' इत्यादावपि गुणनिषेधापत्तेः । अत्र च लिङ्गं कुटादिमध्ये ''कूङ् शब्दे'' (धा०सू० १२१) इत्यस्य पाठः ''स्थण्डिलाच्छयितरि'' (पा०सू० ४-२-१५) इति निर्देशश्च । यत्तु प्रकृतसूत्रे दीधीवेव्योर्ग्रहणमेवैतत्परिभाषाज्ञापकमिति । तन्न, अनिग्लक्षणवृद्धि-निषेधेन चरितार्थत्वात् भाष्यमते एतत्सूत्रस्य प्रत्याख्यास्यमानतयोक्तपरिभाषायां लिङ्गान्तरस्यैवानुसर्त्तव्यत्वाच्च ।

यद्यपि तादृशपरसप्तम्या वारणं सम्भवति तथापि प्रकारान्तरस्यापि सम्भवादाह । **इगिति ।** हि यतः । **न च** न हि । निर्दिष्टस्थानिकत्वात् यदर्थं शङ्क तदेव प्रतिपादयति । **किञ्चेत्यादिना ।** निमित्तत्वे स्वीक्रियमाणे सतीति शेषः । न च न हीत्यर्थमेवाह । **च्यवत इति ।** ननु तदाश्रय-णेऽनिष्टापत्तावपि तत्रैव न मानमत आह । **अत्र च लिङ्गमिति ।** न हि कार्यनिमित्ततया नाश्रीयत इति परिभाषायां ज्ञापकं चेत्यर्थः । चेन लोकसिद्धत्वसमुच्चयः । तथा हि । समवायकारणनिमित्त-कारणयोर्भेदस्य सकललोकतन्त्रप्रसिद्धतया तस्य तत्वेनाश्रयणमेव न । अत एव तत्र हिः प्रयुक्तः । स हि तत्वेनानाश्रयणे हेतोः प्रसिद्धत्वं द्योतयतीति न तु पाठस्याशोकवनिकान्यायेन साफल्यमिति **सीरदेवो**क्तिरयुक्तेति आह । स्थण्डिलादिति । अन्यथा शिङो ङित्वाद्गुणनिषेधापत्तौ निर्देशासङ्गतिः स्पष्टैव । न च निर्देशः सौत्रस्तथा सत्यन्यत्र प्रयोगो[1] न स्यादिति भावः । चेन 'निष्ठा शीङिति' निषेधस्य दीधीवेव्योरन्यथा प्रत्याख्यानपरभाष्यस्य समुच्चयः । अन्यथाऽनयोर्ङित्वात्क्ङितीत्यनेनैव सिद्धे प्रकारान्तरानुसरणं व्यर्थमेवेति बोध्यम् । [2]**सीरदेवो**क्तिं खण्डयति । **यत्त्विति ।** एवोऽप्यर्थे । यद्वा पुरःसहर्त्तिकत्वसूचकः सः । सूत्रमतेनाह । **अनिग्लक्षणेति ।** अचामिगितीतीत्यर्थः । अत एव सिद्धान्तमाह । **भाष्येति ।** एवोऽप्यर्थे, स च प्रसिद्धहेतुसमुच्चायकः । यद्वा ज्ञापकपक्षेणेदम् । प्रत्याख्यानस्थले दृष्टफलाभावेन तदसम्भवादिति भावः ।

---

१. योगो न स्यादित्येव मातृकायामस्ति । परन्तु गदाव्याख्यानुसारेण प्रयोगो न स्यादिति पाठः परिवर्तितः । परि.शे.ग.पृ.सं. १६ ।

२. बृ.परि.पृ.सं. १६४ ।

स्यादेतत्, यदि कार्यी निमित्तत्वेन नाश्रीयते कथं तर्हि 'ऊर्णुनविषति' इत्यत्र ''द्विर्वचनेऽचि'' (पा०सू० १-१-५९) इति नुशब्दस्य द्वित्वम्, इष इत्यस्य अजादित्वेऽपि द्वित्वं प्रति कार्यिमध्ये प्रविष्टतया निमित्तत्वासम्भवात् ''सन्यङोः'' (पा०सू० ६-१-९) इति षष्ठीमाश्रित्य सन्नन्तस्य द्वित्वविधानात्। अन्यथा ''प्रतीषिषति' इति सनो द्वित्वं न स्यात्। यत्तु ''सन्यङोः'' (पा०सू० ६-१-९) इति सप्तम्याश्रयपेऽपि सन्यङोरकारोच्चारणसामर्थ्याद् द्वित्वं भविष्यतीति, तन्न, दित्सधित्सादिभ्यो यङुत्पत्तिप्रतिबन्धेन ''अचो यत्'' (पा०सू० ३-१-९७) इति यत्प्रत्ययोत्पादनेन चाकारोच्चारणस्य चरितार्थत्वात्। अन्यथा 'अरिरिषति' इत्याद्यसिद्धेश्च। यदि हि तत्रापि स्थानिवत्स्यादिसो द्विर्वचने कृते 'अरीषति' इति स्यात्।

अत्रोच्यते – कार्यमनुभवन्नेव कार्यी निमित्ततया नाश्रीयत इति परिभाषार्थः। 'अरिरिषति' इत्यत्र हि ''अजादेर्द्वितीयस्य'' (पा०सू० ६-१-२) इति रिसुशब्दे

४.२० 'कार्यमनुभवन्नेव' इति विशेषणप्रयोजनम्

न्यूनां परिभाषां श्रुत्वा तच्छेषमपि श्रोतुं प्रसङ्गात् शङ्कते। **स्यादेतदिति।** तत्र सूत्रे तद्भावभावितामात्रेणाचो निमित्तत्वात्। किञ्च लक्ष्यानुरोधेन साक्षात्समुदायघटकतया वा द्वित्वप्रयोजकत्वं तन्निमित्तत्वम्। एवं द्वित्वेऽजादिप्रत्ययस्य निमित्तत्वेऽचोऽपि निमित्तत्वं, चक्रतुरित्यादौ यणि अचो निमित्तत्वेऽजादिप्रत्ययस्यापि, तदेतदभिप्रेत्याह। **स्याजादित्वेऽपीति। सन्नन्तस्येति।** तस्य तत्वेऽपि सनो द्वित्वप्रयोजकत्वसत्वादिति भावः। **अन्यथेति।** 'सन्यङो'रिति सप्तम्याश्रयण इत्यर्थः। **तीतीति।** इत्यत्रेत्यर्थः। एवमग्रेऽपि। **सन्यङोः** प्रत्ययोः। **द्वित्वमिति।** प्रतीषिषतीत्यादौ सन इति भावः। नन्वेकाजुग्रहणस्य तत्र प्रत्याख्यानेन सः स्यादेवात आह। **नाचो यदितीति।** यद्यपि ण्यत्यपि रूपसिद्धिस्तथापि **यतोऽनावः**(पा०सू० ६-१-२१३) इति स्वरो न स्यादिति भावः। एवं सप्तमीपक्षे दोषं निश्चित्य तत्साधारणं दोषान्तरं तत्रैवाह। **अन्यथेति।** कार्यिणो निमित्तत्वेनाश्रयणे, सन्यङोरिति सप्तम्याश्रयणे चेत्यर्थः। आदिनाऽर्धिषतीत्यादिपरिग्रहः। तत्र हि गुणनिषेधे धिसुशब्दस्य द्वित्वे ऋकारानुपधत्वाद्गुणो न स्यादिति बोध्यम्। आद्ये तामेवाह। **यदीति।** हि यतः। **इस इति।** तर्हीत्यादिः। सप्तमीपक्षे तु ऋशब्दस्यैव द्वित्वं स्यान्नैव स्याद्वा। एवञ्चोभयथापि प्रकृतरूपासिद्धिः स्पष्टैवेत्यपि बोध्यम्॥

शेषेण समाधत्ते। **कार्यमिति।** एवहातिपाठः। एवं सति सर्वसिद्धिमाह क्रमेण। **अरीत्या-**

द्वित्वप्रवृत्तिः। तदन्तर्गतश्चेस्सन्नन्त इति नासौ द्वित्वं प्रति निमित्तं कार्यभाक्त्वात्। 'ऊर्पुनविषति' इत्यत्र तु नव्नन्त्रब्दस्य द्वित्वं प्राप्तं तदनन्तर्गतश्चेस्सन्नन्त इति भवत्येव निमित्तं तद्भावभावितामात्रेपेह निमित्ततेति ''सन्यङोः'' (पा०सू० ६-१-९) इति सूत्रे भाष्यकारैरेव स्फुटीकृतत्वात्। तथा च ''द्विर्वचनेऽचि'' (पा०सू० १-१-५९) इति स्थानिवद्भावान्नुनन्त्रब्दस्य द्वित्त्वमुचितमेव। यत्तु ''द्विर्वचनेऽचि'' (पा०सू० १-१-५९) इति सूत्रे 'अचि किं?' जेघ्रीयते 'देध्मीयते' इति प्राचां प्रत्युदाहरणं, तदापाततः, घ्रीयू ध्मीयू इत्यस्य द्वित्त्वभाक्तया ''ई घ्राध्मोः'' (पा०सू० ७-४-३१) इतीत्वं प्रति निमित्तभूतस्य यङो द्वित्त्वम्प्रत्यनिमित्तत्वात्। तस्मात्तत्राचीत्यस्य 'अधिजगे' इत्येतदेव व्यावर्त्त्यं बोध्यम्, ''गाङ्लिटि'' (पा०सू० २-४-४९) इति द्विलकारकनिर्देशमाश्रित्य लावस्थायामेव गाङादेशविधानात्। अज्ग्रहणन्तु ज्ञापकं रूपस्थानिवद्भावस्येति तत्रत्यवार्त्तिकमपि 'अधिजगे' इत्येतस्मिन्नुदाहरणे कार्यातिदेशाश्रयणेऽज्ग्रहणवैयर्थ्यं

दिना। हि यतः। प्रवृत्तौ तदन्तर्गतत्वे वान्वयः। अत एव समुच्चायकश्च इति। अतः तदर्थमेवाह। **कार्येति।** वैलक्षण्ये तुः। चः प्राग्वत्। ननु षष्टच्यन्तपक्षे कथं तस्य निमित्तत्वमत आह। **तद्भावेति।** भाष्यानुवादोऽयम्। अत एवेहेत्युक्तिसङ्गतिः। तस्य प्रक्रान्तविषयेत्यर्थः। **निमित्ततेतीति।** इत्यस्येत्यर्थः। षष्टच्यन्तपक्षे निमित्तत्वाभावेन स्थानिवत्वाप्रसक्तौ हीदमुक्तं भगवता। उक्तशेषाभावे तु इदमसङ्गतं स्यादितीदमेव भाष्यं तत्सत्वे प्रमाणमिति भावः। उपसंहरति। **तथा चेति।** उक्तशेषसत्वे चेत्यर्थः। प्रसङ्गात्सर्वथा प्राप्तसङ्गतिकं [1]प्रक्रियादिग्रन्थं खण्डयति। **यत्त्विति।** भाक्तयेति पाठः। षाष्टभाष्यरीतिमनुसृत्याह। **तस्मादिति। लिटीति।** इत्यत्र लिटि आर्धधातुक इत्यादीनां विषयसप्तमीत्वेऽपि तद्भावभावित्वेनेव तद्बुद्धिभावभावितामात्रेणापि निमित्तत्वस्य वक्तुं शक्यत्वात्, अत्र सूत्रोपात्तलिट्वृद्धिभाव एव निमित्तमित्यज्निमित्तत्वाभावः सर्वत्रैव च, अतः शास्त्रे बुद्धिकृतमेव निमित्तत्वादीति तत्राचीत्येव तादृशे निमित्तत्वाश्रयणे लिङ्गमिति भावः। नन्वेवं भाष्यविरोधस्तत्र हि कार्यातिदेशपक्षे चक्रतुरित्यादावभ्यासरूपासिद्धिमाशङ्क्याज्ग्रहणस्य रूपातिदेशे ज्ञापकतामुक्त्वा तदुपपादनावसरे जेघ्रीयत इत्यादि तद्व्यावर्त्यत्वेन प्रदर्शितमत आह। **अज्ग्रहणमिति।** अपिः भाष्यसमुच्चायकः। तदव्यवहितं गाङः प्रतिषेध अधिजगे इवर्णाभ्यासता

---

१. प्रक्रियाकौमुदीप्रकाश। इत्थं हि तत्र वाक्यम् ''तद्धि जेघ्रीयते 'ई घ्राध्मोः' इति हलादौ विहितस्येत्वस्य स्थानिवत्वं मा भूदिति। यद्यत्र रूपं स्थानिवत्ततोऽसत्यज् ग्रहणे घ्रायू इति द्वित्वं स्यादिति तन्निवृत्त्यर्थमज्ग्रहणमुपयुज्यते'' इति। प्र.कौ.प्र.पृ.सं. ६१ तृतीयभागः।

स्यादित्येव योज्यमिति दिक् ।

यत्त्वसिद्धवत्सूत्रे वक्ष्यते- 'अत्र ग्रहणं समानाश्रयप्रतिपत्त्यर्थम्' तन्न, आश्रयत्वं स्थानितया निमित्ततया वा कथञ्चिदाश्रयणमात्रेण न तु निमित्ततयैवेत्याग्रहः । तेन ''ज्ञा हौ'' (पा०सू० ६-४-३५) इति ज्ञाभावो हेर्धित्वे कर्त्तव्येऽसिद्धो भवति । अन्यथा धित्वे हेः कार्यितया निमित्तत्वाभावादसिद्धत्वं न स्यात् । अत एव समानाश्रयमाभीय-माभीयेऽसिद्धमित्येवाहुर्न तु समाननिमित्तमिति ।

इदञ्च सूत्रं भाष्यवार्तिकयोः प्रत्याख्यातम् । तथाहि, दीधीवेव्यौ छान्दसौ धातू न तु

प्राप्नोत्युक्त्या षाष्टभाष्यरीत्या च तदुपलक्षणमित्याशयेनाह । **अधीति ।** एवेन यथाश्रुतस्य देधीयत इत्यादेर्व्यावृत्तिः । अत एवाह । **योज्यमितीति ।** किञ्च द्वितीयहल्पर्यन्तस्यैव द्वित्वं, न तु नटभार्यावद्व्यञ्जनमिति षाष्टभाष्यरीत्या द्वितीयाज्विधिकस्य ध्रीज् इत्यादेरिति मतेन तदुक्तिः । अत एव **स्वरान्तरे व्यञ्जनान्युत्तरस्ये**ति **प्रातिशाख्ये**[1] उक्तम् । अत्र पक्षेऽरिरिषतीत्यादौ रि इत्यस्य द्वित्वेऽपीकारस्य सनवयवतया सनो द्वित्वानुभवेन तन्निमित्तत्वाभावान्न दोषः । एवं तु प्राचां प्रत्युदाहरणमपि सङ्गतमेव । एतेन परिभाषाद्वयमिदमिति, एकपरिभाषापक्षेऽपि प्रायिकमेतल्लक्ष्य-वशात्कचिदाश्रीयते क्वचिन्नेति च **सीरदेवा**द्युक्तं, सुध्युपास्य इत्यादावनया प्राप्तदोषस्य ज्ञापकाद्वारणमिति भ्रान्तोक्तज्ञापकसिद्धपरिभाषान्तरमित्यन्योक्तं चापास्तम् । उक्तयुक्तेर्भाष्ये तस्यानुक्तेश्च । व्याकरणेऽपि कार्यिणोपश्लिष्टस्यैव निमित्तत्वव्यवहाराच्च । न चारिरिषतीत्यादा-विसस्तथा । उपश्लेषस्य समीपसम्बन्धरूपस्य भेदनिबन्धनत्वादिति दिक् । तदाह । **दिगिति ।** तुल्ययुक्त्या प्राप्तातिप्रसङ्गभ्रमं निराचष्टे । **यत्त्विति । तया वेति ।** प्रयोगभेदेन विकल्प इतीति शेषः । एवञ्च कथञ्चिदित्यस्यैव विवरणमिदम् । परन्तु न्यूनाधिकभावो नापेक्षित इति यत्किञ्चिदाश्रित्य समानाश्रयत्वं नेति 'चिण्णमुलो' (६-४-९३) रिति सूत्रे भाष्ये[2] स्पष्टम् । तत्र हि 'अशमी'त्यादौ णिलोपस्य सिद्धत्वं 'णौ णिलोपः चिण्णमुल्परे णौ दीर्घ' इत्येवं व्याश्रयत्वेन वारितम् । **तेनेति ।** शाधीत्यत्रेति भावः । **अत एव** उभयोःसंग्राह्यत्वादेव ।।

४.२१ 'दीधीवेवीटाम्' सूत्रप्रत्याख्यानविचारः

चो वाक्यालङ्कारे । **छान्दसौ** छान्दसावेव । अत एव हिः । **न त्विति ।** तथा च तत्वादेव

---

१. ऋग्प्रातिशाख्ये (ऋ.प्र.पृ.सं. ९) १।२३।९. २. म.भा.पृ.सं. ३३६ (पञ्चमो भागः)

लोके प्रयोगार्हौ। छन्दसि छानयोर्गुणो दृश्यते - 'होत्राय वृतः कृपयन्नदीधेत्' 'अदीधयुर्दाशराज्ञे वृतासः' इत्यादौ। न चायम्बाहुलकेन समाधेयः, तथा सति निषेधसूत्रानारम्भस्यैव लाघवेनोचितत्वात्। तथेटोऽपि ग्रहणं व्यर्थम् ''आर्द्धधातुकस्येट्'' (पा०सू० ७-२-३५) इत्यत्र हि ''नेड् वशि कृति'' (पा०सू० ७-२-८) इति सूत्रादिड्ग्रहणमनुवर्त्तते। तच्चेटो विकाराभावार्थम् इट् इडेव न तु विकृत इति व्याख्यानात्। ततो लघूपधगुणाभावात्सिद्धं 'कपिता श्वः' 'रपिता श्वः' इत्यादि। न चैवं 'पिपठीः' इत्यत्र दीर्घो न स्यादिति वाच्यम्, तस्य नियमं प्रत्यसिद्धत्वात्। 'अपाठीत्' इत्यत्र सवर्णदीर्घस्तु न वार्यते ''सिज्लोप एकादेशे सिद्धो वक्तव्यः'' (का०वा०) इति ज्ञापकात्। यद्वा, अङ्गाधिकारे क्रियमाणो नियम आङ्गमेव विकारं

तदभावः सिद्ध इति नेदं कार्यमिति भावः। छान्दसार्थमपि बहुशो यत्नस्य दर्शनादाह। **छन्दसि चेति।** चो व्युत्क्रमे किञ्चेत्यर्थे। कुत्रेत्याशङ्क्यायामाह। **होत्रायेति। न चायमिति।** तत्र क्वचिद् दृश्यमान इत्यर्थः। **बाहुलकेनेति।** तत्र योगविभागलब्धार्थेनेत्यर्थः। **तथेति।** क्वचिच्छ्रूयमाणगुणाभावस्यैव तत उपपत्तौ निषेधसूत्रे तदनारम्भकृतं लाघवमिति तस्यैवौचित्यादित्यर्थः। हि यतः। **इडिति।** न च तस्य निषेधसंबद्धत्वान्नेत्यस्याप्यनुवृत्तिः स्यादिति तन्निवृत्यर्थमिड्ग्रहणं, स्पष्टं चेदं नेड्वशीत्यत्र भाष्य इति वाच्यम्। 'क्वचिदेकदेशोऽप्यनुवर्तत' इति न्यायेन तत्रत्यनञो निवृत्तिसिद्धेरिति भावः। **इडेवेति।** यथा स्यादिति शेषः। **विकृत इति।** अभूदिति शेषः। ततः तस्य विकाराभावार्थत्वात्। **नियममिति।** इडिडेवेति नियममित्यर्थः। तथा च न तेन तस्या व्यावृत्तिरिति दीर्घसिद्धिरिति भावः। नन्वेवमपि अपाठीदित्यत्र सवर्णदीर्घो न स्यात्, तस्य सिद्धत्वेन नियमेन वारणादत आह। **अपाठीदिति।** अलावीदित्यादावपीयं शङ्का बोध्या। **ज्ञापकादिति।** न च समार्त्तेत्यत्र **ह्रस्वादङ्गा**दिति लोपाय सिद्धत्ववचनं चरितार्थम्। सिद्धत्वे हि 'उश्चे'ति कित्वाद्गुणाप्राप्तावाटश्चेति बाधित्वा परत्वात् सिज्लोपे जाते ततो वृद्धिरिति रूपसिद्धिः। सिद्धकाण्डपठितेनोक्तवार्तिकेन वृद्धिं प्रति सिज्लोपस्य स्थानसिद्धत्वात्। अन्यथा पूर्वं सिद्धौ स न स्यादिति तदसिद्धिः स्पष्टैव। यत तावन्मात्रार्थत्वे तत्र वृद्धावित्येव वदेत्। न चैवं सिचि वृद्धिरिति वृद्धावपि तत्वाद्यापत्तिः। प्रत्ययलक्षणेन पुनर्वृद्धौ निमित्तविनाशसम्भवनायां प्रवृत्तयाऽकृतव्यूहपरिभाषयाऽक्षैषामित्यादिसिद्ध्या क्षत्यभावात्। वस्तुतो ह्रस्वादङ्गा (पा०सू० ८-२-२७) दित्यत्राङ्गग्रहणेन तस्याङ्गत्वेन वार्णादाङ्गमित्यनया वृद्धेः पूर्वं सिज्लोप इति समार्त्तेत्यस्य सिद्धिरिति न तदर्थं तद्वचनमिति भाव इति कश्चित्। तन्न। पदलाघवाभावात् तस्याऽसत्वात्। तस्या

व्यावर्त्तयति । तेन ''र्वोः'' (पा०सू० ८-२-७६) इति 'अकः सवर्णे' (पा०सू० ६-१-१०१) इति च दीर्घो भवत्येव । 'ग्रहीता' इत्यत्र तु ''ग्रहोऽलिटि'' (पा०सू० ७-२-३७) इत्यारम्भसामर्थ्यादीर्घो भवत्येव ।

इदं त्ववशिष्यते - 'पिपर्ठीषिं ब्राह्मपकुलानि' इत्यत्र 'सान्तमहतः संयोगस्य' (पा० सू० ६-४-१०) इति दीर्घत्वं न स्यात् । सिद्धत्वादाङ्गत्वात् 'तेजांसि' इत्यादौ चरितार्थत्वाच्च 'पिपठीः' 'अपाठीत्' 'प्रहीता' इत्यादिपूर्वोदाहृतेभ्योऽस्य वैलक्षण्यादिति । आत्राहुः – 'पिपर्ठीषि' इति प्रयोगोऽसाधुरेव । न ह्यत्र नुमागमो लभ्यते अल्लोपस्य स्थानिवद्भावेनाझलन्तत्वात् । न चैवमजन्तत्वप्रयुक्तो नुम् स्यादेवेति वाच्यम्, तस्य सकारादुत्तरत्र

वार्णाङ्गयोः[1] धर्मिग्राहकमानेनैकस्थानिकत्वे एवप्रवृत्तेः । तज्ज्ञापकस्य सजातीयापेक्षत्वेनाङ्गाधिकारस्थस्यैवाङ्गस्य तत्र ग्रहणाच्च । ह्रस्वादङ्गादित्यङ्गपदप्रयोजनं तु तत्रैव स्पष्टमन्यत्र । अध्येष्येति तु गुणदृष्ट्या तत्पक्षे सिज्लोपो दुर्लभ इति तदेकवाक्यतया पक्षान्तरेऽपि सिज्लोपस्यैवौचित्येन सत्यभिधाने समार्ष्टेति रूपस्यैवौचित्यात् । किञ्च सिज्लोप इति सिद्धत्वस्यापि प्रत्यासत्त्या सिज्लोपोत्तरप्राप्तासिज्लोपाभावाभावकसवर्णदीर्घरूपैकादेशविषयत्वस्यैवौचित्येन तद्विषयत्वाभावात् । न चैकदेशपदसामर्थ्यात्तथा, सवर्णदीर्घपदापेक्षया मात्रातो लघुत्वात् । अत्र पक्षे ज्ञापकाश्रयणाद् गौरवादाह । **यद्वेति ।** एतदर्थमेव भाष्यस्थक्रमत्यागः । इति च दीर्घ इति पाठः । इति दीर्घ इति पाठे गामश्वमिति वत्समुच्चयो बोध्यः । एवमुभयथा भगवताऽनुद्धृतं दोषं [2]कैयटोक्तिमनुसृत्योद्धरति । **ग्रहीतेत्यत्रेति ।** अत एव तुः ।

४.२२ 'पिपर्ठीषि ब्राह्मपकुलानि' इति प्रयोगस्यासाधुत्वनिरूपणम्

कैयटोक्तिमेवाह । **इदन्त्विति ।** प्रकारत्रयेऽप्यनुद्धारादिति भावः । तदेव क्रमेण कथयन्नत्र हेतुमाह । **सिद्धेत्यादि वैलक्षण्यादित्यन्तेन । वरीति ।** सान्तेत्यस्येति भावः । आदिना तत्सजातीयपरिग्रहः । **नुमेति ।** झलन्तत्वप्रयुक्त इत्यादिः । **चैवं** तस्य स्थानिवत्वे अभावस्येव भावस्यापि तेनातिदेशात् । न हि रजतभ्रमेति[3] न्यायेनाह । **तस्य सकारादिति ।** इदं

---

१. 'वर्णाधायि' इति मातृकायामस्ति । वार्णाङ्गयोरिति पाठेन भाव्यमिति ऊह्यते । शेखरे तथैव सत्वात् । आत्मनेपदप्रकरणे (ल.शे.पृ.सं. ६७८) । २. म.भा.प्र.पृ.सं. २२३ (प्रथमो भागः)

३. सम्पूर्णन्यायशरीरं तु - ''न हि रजतभ्रमप्रयुक्ता प्रवृत्तिः शुक्तिं न गोचरयति'' इति ।

प्रसक्त्या दीर्घस्य तथाप्यप्रवृत्तेः, सान्तसंयोगाभावात्। वस्तुतस्त्वजन्तत्वप्रयुक्तो नुमत्र न भवत्येव स्थानिवद्भावासंभवात्। अनादिष्टादचः पूर्वस्य विधौ हि सः। न चाजन्तमनादिष्टादचः पूर्वं, येन तस्य नुमि कर्त्तव्येऽल्लोपः स्थानिवत्स्यात्। ननु झलन्तत्वप्रयुक्तो नुम् दुर्वारः। न च तस्मिन्कर्त्तव्ये स्थानिवद्भावः शङ्क्यः, ''कौ लुप्तं न स्थानिवत्'' (का०वा०) इति निषेधात्। अन्यथा सखीयतेः क्विपि सखीः, सुतीयतेः सुतीरित्यादि न स्यात्, अल्लोपस्य स्थानिवद्भावेन यपादेशप्रसङ्गात्।

अत्रोच्यते, ''क्विलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषूपसंख्यानम्'' (का०वा०) इति तावद्वार्त्तिकशरीरम्। तत्र क्वीत्यंशो यद्यपिद्वेधा व्याख्यास्यते कौ लुप्तं न स्थानिवदिति, 'कौ विधिम्प्रति न स्थानिवदिति च। देवयतेः क्विपि 'दयूः' इत्यादेरन्यतरव्याख्या-नाश्रयपेन सिद्धावपि सखीयतेः सखीरित्यस्याद्यव्याख्यानं विना असिद्धेः, लवमाचक्षापो

चाभ्युपेत्यवादेति सूचयन्नाह। **वस्तुतस्त्विति।** **प्रयुक्तः** सोऽपि। असम्भवे हेतुमाह। **अनादिष्टादिति।** हि यतः। तदेवोपपादयति। **न चाजन्तमिति।** चस्त्वर्थे। ततो वैलक्षण्ये स्थानिभूतादचः पूर्वमजन्तत्वाभावात् स्वविधौ स्थानिवत्वाभावादिति भावः। **नन्विति।** एवमपीति शेषः। अजन्तत्वप्रयुक्तनुमोऽप्रसङ्गेऽपीति तदर्थः। दुर्वार एव तत्वमेव। न चेत्यादिः। इदं क्विबन्तस्य रूपं, न चाजन्तस्य तत्रापि पिपठिषीत्यस्यैवेष्टत्वादिति ध्वनयन्नाह। **काविति।** भावे क्तः लोप इत्यर्थः। **अन्यथा** कौ लुप्तमित्यस्यानङ्गीकारे। **यणीति।** 'एरनेकाच' इतीति भावः॥

वार्तिकेति। न पदान्तेति सूत्रे[1] इति भावः। **तत्र** कावित्यत्र, विधावित्यध्याह्रियते। तेन क्वनिमित्तविधावित्यर्थः। आवृत्त्या काविन्यादेशेनापि सम्बध्यते। क्विनिमित्तादेश इत्यर्थस्तदाह। **तत्रेति।** ननु लाघवादन्यतरव्याख्यानेनैव निर्वाहे किमिति द्वेधा व्याख्यानमतो दयूरिति कौ लुप्तमित्यस्यासाधारणमुदाहरणमिति 'न पदान्त' सूत्रस्थकैयटाद्यसङ्गतिं ध्वनयन्नाह। **देवेति।** दयूरित्यादेरिति पाठः। ऊठि णिलोपस्य स्थानिवत्वाभावेनोठ उभयथापि सिद्धेरित्याह। **अन्यतरेति।** न च णेः स्थानिवत्वादुकारस्य वृद्धिः स्यादिति वाच्यम्। ऊठ आदिष्टादचः पूर्वत्वेन तदप्राप्तेरिति भावः। **सखीति।** अल्लोपस्य णिनिमित्तत्वात्। 'ख्यत्यात्परस्ये'(पा०सू० ६-१-११२)ति सूत्रे भाष्ये[2] स्पष्टमिदम्। इदमुपलक्षणमन्यस्यापि गोमत्यते गोमानि**त्युगिदचा(पा०सू० ७-१-७०)**मिति [3]सूत्रभाष्योक्तस्य, ण्यन्तपादेः पात् पद इति **येन विधि**रिति [4]सूत्रभाष्योक्तस्य,

---

१. म.भा.पृ.सं. ४९३ (प्रथमो भागः)
२. म.भा.पृ.सं. १२२ (पञ्चमो भागः)
३. म.भा.पृ.सं. ६२ (षष्ठो भागः)
४. म.भा.पृ.सं. ५७७ (प्रथमो भागः)

'लौः' इत्यस्य द्वितीयव्याख्यानं विनाऽसिद्धेश्च, तथापि 'कौ विधिं प्रति' इति द्वितीयव्याख्यानमेव सार्वत्रिकम्। ''कौ लुप्तम्'' इति तु काचित्कं ''ख्यत्यात्'' (पा०सू० ६-१-११२) इत्यत्र ''मपर्यन्तस्य'' (पा०सू० ७-२-९१) इत्यत्र च भाष्यदावाश्रितं न तु सार्वत्रिकम्। अत्र चेड्ग्रहणप्रत्याख्यानपरमत्रत्यभाष्यमेव प्रमाणम्। कथमन्यथा 'पिपर्ठीषि' इत्यादौ दीर्घस्येष्टत्वे सूत्ररीत्या च तल्लाभे इड्ग्रहणं प्रत्याचक्षीत। तस्मात् 'पिपठिषि ब्राह्मणकुलानि' इत्येव रूपं भवतीति स्थितम्।

पिपठीरिति [1]प्रकृत**नपदान्तोभ**यभाष्योक्तस्य, कन्दूरित्यस्य **न पदान्त**सूत्रस्थस्य[1] च। अन्यथा यणापत्तिनुम्पदरुत्वासिद्धश्चेति बोध्यम्। **द्वितीयेति।** अन्यथा णिलोपस्यास्थानिवत्वेऽप्यल्लोपस्य स्थानिवत्वादूठ् न स्यादेवेति भावः। चेनोक्तसकलभाष्यसमुच्चयः। आदिना कैयटादिपरिग्रहः। तच्च पदाश्रितं तत्काचित्कत्वेन न तु सार्वत्रिकत्वेनेत्यर्थः। एतेन [2]तस्य सार्वत्रिकत्वं भाष्यसम्मतमिति तथैव रूपमिति [3]**रत्नोक्त**मपास्तम्। एवोऽप्यर्थे **तेनोद्योतो**[4]क्तमानान्तरसमुच्चयः। **त्यादाविति।** पराभिमत इति भावः। **सूत्रेति।** तद्रीत्यैवेत्यर्थः। **च तदिति।** तल्लाभे चेत्यर्थः। उपसंहरति। **तस्मादिति।** 'अपरविधाविति तु वक्तव्य'मिति 'अचः परे'त्यत्रत्यवार्तिकमेकदेश्युक्तिर्न सिद्धान्त इति भावः। [5]वस्तुतस्तु भाष्यप्रामाण्याच्छान्दसत्वे तयोः प्रत्याख्यानमेकदेश्युक्तिः। 'आर्धधातुकस्येड्वलादे'रिति सूत्रस्येड्ग्रहणस्योक्तरीत्या नेड्वशीति सूत्रभाष्ये प्रत्याख्यानात्। तत्करणेन नियमरूपगुरुतरयत्नमाश्रित्यैतत्प्रत्याख्यानस्यायुक्तत्वात्। तदविकारत्वेन अङ्गस्येत्यनुवृत्तावपि अङ्गाधिकारविहित-विकारस्यैव व्यावृत्तेः शब्दमर्यादयाऽलाभात्। सिद्धत्ववचनस्य ज्ञापकत्वाश्रयणे गौरवस्य स्पष्टमुक्तत्वाच्च। एतत्सूचनार्थमेव भाष्यवार्तिकयोरिति प्रागुक्तम्। अन्यथा भाष्ये इत्येव ब्रूयात्। एवञ्चेदं त्ववशिष्यत इत्यादिविचारो विफल एव, स तु प्रागुक्तमेव। एवं भाष्येऽपि बोध्यम्। एतेन तथा **कैयटदण्डिकृष्णा**द्युक्तं तथात्वं लिख्य वस्तुत इदृशक्लिष्टकल्पनापेक्षया सूत्रमेव वरम्। अन्यथा सर्वशास्त्रमाकुलं स्यादिति [6]**रत्नोक्तम**पास्तम्। उक्तयुक्तेः ।।

---

१. म.भा.पृ.सं. ४९२ (प्रथमो भागः)

२. तस्य = कौ लुप्तमित्यस्य। ३. र.प्र.पृ.सं. ३३६ प्रथमभागः।

४. गोमत्यतेः गोमानिति उगिदचामिति सूत्रभाष्यमित्यर्थः। म.भा.प्र.उ.पृ.सं. ४९३।

५. उद्योतस्थसिद्धान्तमाह - 'वस्तुतस्त्वित्यादिना'। म.भा.प्र.उ. पृ.सं. २२२।

६. र.प्र.पृ.सं. ३३६ प्रथमभागः।

हलोनन्तराः संयोगः (पा०सू० १-१-७)। अञ्भिरव्यवहिता हलः संयोगसंज्ञा स्युः। संज्ञाप्रदेशाः ''संयोगान्तस्य'' (पा०सू० ८-२-२३) इत्येवमादयः। इहान्तरशब्देन छिद्रवाचिना बहुव्रीहौ निश्छिद्रा इत्यर्थलाभादवग्रहे संज्ञया न भाव्यम्। आधेयप्रधाने-नान्तरेत्यव्ययेन सह बहुव्रीहौ त्वाधेयनिषेधप्रतीतेरवग्रहेऽपि भाव्यमेव संज्ञया। न हि तत्रान्तरा मध्ये किञ्चिदस्ति किन्तु मध्यमात्रं वर्त्तते ''मात्रा ह्रस्वस्तावदवग्रहान्तरम्'' (ऋ० प्रा - १-६) इति प्रातिशाख्यबलेन तत्र मात्राकालावसानाभ्युपगमात्। यत्तु प्रातिशाख्यान्तरम् – ''अर्द्धमात्रोऽवग्रह'' इति, तत्तु सर्वत्र संहितायामर्द्धमात्राकालस्य

४.२३ संयोगसंज्ञासूत्रे आनन्तर्यविचारः

हलोऽनन्तराःसंयोगः। आनन्तर्यं व्यवधानाभावः, व्यवधानं तु विजातीयेनैवेत्याशयेनाह। **अञ्भिरिति।** अत्र कुत्वं न्याय्यम्। अत एव **हयवरट्सूत्रे अचो अञ्भिति** भाष्यप्रयोगे कुत्वं दृश्यते। स्वरैरव्यवहिता इति तूचिता वृत्तिः। द्वयोरेव सम्भवात्तथैव शङ्कते। **इहेत्यादिना। अन्तरेति।** नपुंसकलिङ्गेतरेति भावः। **छिद्रेति।** 'अन्तरमवकाशावधिपरिधानान्तर्द्भिदतादर्थ्ये। छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि च' इति [1]कोशादनेकार्थकत्वेऽपि प्रकृतेऽन्यार्थासम्भ-वादिति भावः। छिद्रं च नात्र मूर्तद्रव्याभावः, हलमध्ये तदप्रसङ्गात्। किन्तु सामर्थ्याद्धलत्वा-द्याक्रान्तवर्णशून्यः कालः। अवग्रहे सिद्धान्ते फलाभावादिति बोध्यम्। तथा चात्र पक्षेऽऽधार-कालनिषेध इति तात्पयम्। एतेन नपुंसकलिङ्गेन क्रियारूपवाचिना नञो बहुव्रीहिः, उत वर्णरूपव्यवधायकवाचिना पुँल्लिङ्गेनेति प्रश्नतात्पर्यं भाष्य इति [2]**रत्नो**क्तमपास्तम्। कोशा-नुक्तत्वेनाप्रामाणिकत्वात्। प्रसिद्धत्वादाह। **आधेयेति।** आधेयप्रधानमध्यवाच्यन्तराशब्द इति **दण्डिकृष्णा**दिभिरुक्तत्वात्तदनुरोधेनेदम्। तस्य मध्ये इत्यर्थकत्वेनाधिकरणशक्तिप्रधानत्वा-दधिकरणशक्तिप्रधानेनेत्युचितम्। अत एवान्यनिषेधप्रतीतेरार्थिकं तमाह। **आधेयेति।** हि यतः। अत एवाह। **मध्य इति।** ज्ञापकाद्व्यधिकरणबहुव्रीहेरङ्गीकारान्न दोष इति भावः। यद्वा तादृश-स्यापि तस्य वृत्तौ तत्परत्वमिति न समासानुपपत्तिरिति तात्पर्यम्। तथा चात्र पक्षेऽऽधेयवर्णनिषेध इति तात्पर्यम्। **मात्रा ह्रस्व इति।** ह्रस्वसंज्ञकवर्णसम्बन्धिमात्रात्मककाल इत्यर्थः। राजदन्तादि। **अवेति।** तद्रूपं तत्र वा व्यवधानमित्यर्थः। **अर्द्धेति।** तदात्मककालपरिच्छिन्न इत्यर्थः।

---

१. (अ.को.श्लो.सं. १८७) तृतीयकाण्डे नानार्थवर्गे।

२. र.प्र.पृ.सं. ३४१ प्रथमभागः।

सत्त्वात्ततोऽतिरिक्तोऽर्द्धभावाकालोऽवग्रहेऽस्तीत्येवंपरम्। अतः प्रतिज्ञाख्ययोरविरोधः। तदिह कतरः पक्षो ग्राह्य इति चेत् ? उभयथाऽप्यदोष इति भाष्यकाराः। ननु 'अप्सु' इत्यादौ सत्यां संयोगसंज्ञायां ''संयोगे गुरु'' (पा०सू० १-४-१०) इति गुरुत्वाद् ''गुरोरनृतः'' (पा०सू० ८-२-८६) इति प्लुतेन भाव्यं न त्वन्यथेति महान्फले विशेषः। तत्कथं पक्षद्वयाभ्युपगम इति चेत् ? न, 'अप्सु' इत्यस्याधिकरणवृत्तेर्दूराद्धूतसम्बन्धाभावात्। ''विचार्यमाणानाम्'' (पा०सू० ८-२-९७) इत्यादौ तु ''वाक्यस्य टेः'' (पा०सू० ८-२-८२) इत्यनुवर्त्तते न तु ''गुरोरनृतः'' (पा०सू० ८-२-८६) इति। ननु 'अप्सु भवोऽप्सव्यः', दिगादिषु पाठाद्यत् ''अपो योनियन्मतुषु च'' (क०वा०) इति सप्तम्या अलुक्। ततः सम्बुद्धौ 'हे अप्सव्य' इत्यत्र स्यादेव फलभेद इति चेत् ?

अत्राहुः – नैवं विधे विषयेऽवग्रहं पदकाराः कुर्वन्तीति। अत्र च सम्प्रदाय एव शरणमिति बोध्यम्। उक्तञ्चैतत् - 'गोभ्यो गातुं' 'गोभिर्मदाय' 'चित्रइद्राजा राजका इदन्यके' इत्यादौ गोभ्यो गोभिः राजका इत्यादीनां सत्यपि पदत्वेऽवग्रहाकरणात्। ''ईयिवांसमतिस्रिधः'' इत्यादावीयिवांसमिति विनापि पदसंज्ञां कसोः पूर्वमिडागमान्तेऽवग्र हकरणाच्च। एतेन 'सिसासन्' 'उक्थशसः' 'रिरिषः इत्यादौ पदकाले

पूर्वपक्षमुपसंहरति। **तदिहेति।** अदोषत्वमेव दृढयति। **नन्वित्यादिना। सत्यामिति।** द्वितीयपक्षेऽवग्रहे इति भावः। नन्वेवमपि विचार्येत्यनेन स्यादत आह। **विचार्येति।** तथा चागुरुत्वेऽपि वाक्यस्य टेः प्लुतस्त्वेनेति प्रकृतेऽवाक्यत्वात् तदप्रवृत्तिरेवेति भावः। अथ सूत्रमादायैव शङ्कते। **नन्विति। अलुगिति।** 'ओर्गुण' (पा०सू० ६-४-१४६) इति गुणो 'वान्तो यी' (पा०सू० ६-१-७९)त्यायादेशश्चेत्यपि बोध्यम्। अस्य दूराद्धूतसम्बन्धसम्भवमाह। **तत इति।** तथा चासत्यां गुरुसंज्ञायां प्लुतो न स्यादिति भावः। **नैवं विध इति।** तद्धितप्रकृत्यवयवान्तरपदविषय इत्यर्थः। नन्वेवान्तरपदत्वे सत्यवग्रह इति विरोधापत्तिरत आह। **अत्र चेति।** वैदिकेति शेषः। अन्वयव्यभिचारं व्यतिरेकव्यभिचारमपि दर्शयन् कैयटाद्युक्तं समर्थयते। **युक्तमिति।** तत्रादावन्वय-व्यभिचारमाह। **गोभ्य इति। इत्यादीनामिति।** अधिकरणस्य सम्बन्धत्वेन विवक्षायां षष्ठी, अवग्रहेऽन्वयो वा। **पदत्वे**ऽवान्तरपदत्वे। व्यतिरेकव्यभिचारमाह। **ईयीति।** इति इत्यत्र। **एतेनेति।** तत्सम्प्रदायेनैवेत्यर्थः। पदकालिकस्वरूपमेवाह। **सि सेति।** एवं सति

सत्त्वह्रस्वत्वादयोपि व्याख्याताः। यत्तु ''मानो महान्तम्'' (ऋ०सं०) इति मन्त्रे वेदभाष्यकारैरुक्तम् - ''छान्दसः पदकालीनो ह्रस्वः'' इति, तदपि संप्रदायमात्रपरतया कथंचिन्नेयम्। ''न लक्षपेन पदकाराः'' इति भाष्ये, ''पदविभागः पौरुषेयः'' इति कैयटादिभिरुक्तत्वादिति दिक्।

कथं तर्हि तत्रत्रावग्रहे विशेष इत्युच्यते इति चेत् ? अवान्तरपदत्वे सत्यवग्रहः क्रियते इत्युत्सर्गमभिप्रेत्येति गृहाण। ''अप्सुयोनिर्वा अश्वः'' इत्यादावपि सुशब्दात्पूर्वं नास्त्यवग्रहः, अवान्तरपदसंज्ञानेकत्वे उत्तरकालप्रवृत्तिकयाऽवग्रह इति वैदिकसम्प्रदायात्। अत एव 'मयूररोमभिः' इत्यत्र भिसः पूर्वमवग्रहः। 'नमउक्तिभिः' इत्यत्राप्येवम्। ''इन्द्रप्रापः पुरएतेव'' इत्यत्र चेवशब्दात्प्रागिति दिक्।

महासंज्ञाकरणमन्वर्थसंज्ञाविज्ञानार्थम्। संयुज्यन्तेऽस्मिन्समुदाये वर्णा इति। तेनात्र

प्राप्तवेदभाष्यविरोधं परिहरति। **यत्त्विति। पदकालीनेति।** पदकालिक इत्युचितम्, रिरिष इत्यत्रेति भावः। अपिः प्रागुक्ततदन्यसमुच्चायकः। **सम्प्रेति।** वैदिकेत्यादिः। मात्रपदेन स्वार्थनिरासः। अन्यार्थं तथोक्तेरावश्यकत्वात्, तदानीं तत्राछान्दसत्वाच्चेति भावः। शब्दमर्यादया ततस्तदलाभादाह। **कथञ्चिदिति।** तत्रान्त्ये हेतुमाह। **न लक्षेति।** अत एव पदप्रकृतिः संहितेत्यत्र षष्ठीतत्पुरुष एव आश्रितो न बहुव्रीहिः। अत एव च **रावण**कृतो पदविभाग इत्युद्घोष इति दिक्। तदाह। **दिगिति।** तत्र तत्रेत्यस्योक्तावन्वयः। तत्स्वरूपमाह। **अवग्रह इति।** उक्तहेतोरेवाह। **उत्सर्गमिति।** विशेषान्तरं कथयन्नन्यत्रापि तत्कृतफलभेदाभावं बुद्ध्याह। **अप्सु योनिरिति।** अपिः पूर्वसमुच्चये। कपा पदसंज्ञायां समासे समस्यमानपदान्ते एवावग्रह इत्यर्थः। इति इत्यपि। अत एवेत्यस्य सर्वत्रान्वयः। अत एव समुच्चायकश्चः। तस्याव्ययत्वेन तत्र तदसम्भवादाह। **चेवेति।** एवमन्यत्रापि बोध्यमित्याह। **दिगिति॥**

४.२४ समुदायसंज्ञाप्रतिपादनविचारः

कैयटदण्डिकृष्णाद्यनुरोधेनाह। **महेति।** तथा चान्वर्थसंज्ञाविरोधात्प्रत्येकं वाक्यपरिसमाप्तिन्यायो नात्राश्रयितुं शक्य इति वार्तिकोक्तं[1] सहेतीति व्यर्थमिति भावः। तदाह। **तेनेति।** आदिना प्रगृह्यसंज्ञादिपरिग्रहः। वस्तुतश्चिन्त्यमिदम्। तदाश्रयणे घटपटौ संयुज्येते यत्रेत्यादौ संयोगानुयोगिप्रतियोग्यतिरिक्तस्यैवान्यपदार्थतया प्रतीतेर्व्युत्पन्नत्वेन तदतिरिक्ततद्घटितपद-

---

१. संयोगसंज्ञायां सहवचनं यथान्यत्र 'इति वार्तिकम्। म.भा.पू.सं. २२५ (प्रथमो भागः)

समुदाये वाक्यपरिसमाप्तिर्न तु गुणवृद्ध्यादिसंज्ञावत्प्रत्येकम्। तथा हि सति 'निर्यायात्' इत्यादौ यकारः संयोग इति ''वाऽन्यस्य संयोगादेः'' (पा०सू० ६-४-६८) इत्येत्वं स्यात्। सिद्धान्ते तु ''अचो रहाभ्याम्'' (पा०सू० ८-४-४६) इति द्वित्वे सत्यपि तस्यासिद्धतया 'निर्यायात्' इत्यादावेत्वं न भवति। किञ्च, प्रत्येकं संज्ञेति पक्षे 'संह्रषीष्ट' इत्यत्र ''ऋतश्च संयोगादेः'' (पा०सू० ७-२-४३) इतीट् स्यात्। 'संह्रियते' इत्यत्र ''गुणोर्त्तिसंयोगाद्योः'' (पा०सू० ७-४-२९) इति गुणः स्यात्। 'दृषत्करोति' इत्यत्र ककारसन्निधौ दकारस्य संयोगत्वात्संयोगान्तलोपः स्यात्। 'शक्ता' 'वस्ता' इत्यत्र झलि तकारे परतः ''स्कोः'' (पा०सू० ८-२-२९) इति लोपः स्यात्। 'निर्यातः' इत्यादौ ''संयोगादेरातो धातोर्यण्वतः'' (पा०सू० ८-२-४३) इति निष्ठानत्वं स्यात्।

जातौ चेदं बहुवचनं हल इति ''जात्याख्यायामेकस्मिन्'' (पा०सू० १-२-५८)

वाक्यरूपसमुदायस्य संज्ञापत्तावनिष्टापत्तेः। तस्मान्महासंज्ञाकरणं प्राचामनुरोधेन। अत एव भगवता गर्गदण्डनन्यायमाश्रित्य सह्यग्रहणं प्रत्याख्यातं, न तु महासंज्ञाया। एवञ्चात्र तेनैव समुदाये संज्ञा न प्रत्येकम्। किञ्च प्रत्येकसंज्ञावादिना श्रुतमानन्तर्यमुपलक्षणत्वेनाश्रयणीयम्। तच्च न सम्भवति। विशेषणत्वे उपलक्षणत्वस्यान्याय्यत्वात्। एवञ्चानन्तरा इत्युक्तेरपि तत्रैव सा, न तत्रेति बोध्यम्। तत्रेष्टपत्तिं परिहरति। **तथा हि सतीत्यादिना।** न चादिग्रहणसामर्थ्यात् द्विवचनान्तेन समासे नायं दोषः सुपरिहर इति वाच्यम्। बहुवचनान्तेनापि सम्भवेन द्विवचनान्तेनैव विग्रहस्य नियमेनालाभात्। एवमग्रे सर्वत्र बोध्यम्। ननु सिद्धान्ते समुदायस्य संज्ञित्वेऽपि 'अचोरे'ति यस्य द्वित्वे बहूनां सन्निधानेऽविशेषेण द्वयोर्बहूनां च संज्ञायाः सिद्धान्तयिष्यमाणत्वेनात्र दोष एवात आह। **सिद्धान्ते त्विति।** यस्येति शेषः। **तस्यासिद्धेति।** पूर्वत्रासिद्धमितीति शेषः। 'पूर्वत्रासिद्धीयमद्विर्वचन' इति तु द्विर्वचने कार्येऽन्यस्यासिद्धत्वं नेत्यर्थप्रतिपादकं, न तु द्विर्वचनस्य तदभावप्रतिपादकमिति भावः। दोषान्तरमाह। **किञ्चेति।** दोषान्तरमाह। **संह्रियत इति।** एवमग्रेऽपि सर्वत्र बोध्यम्। नन्वेवमपि सिद्धान्ते द्वयोः संयोगसंज्ञा न स्याद्, बहुवचनोक्तेरतः कैयटाद्यनुरोधेनैवाह। **जातौ चेदमिति।** अपिना बहुसमुच्चयः। **सिद्ध्यतीति।** अत एव 'इन्धिभवतिभ्यां च' (पा०सू० १-२-६) इति इन्धिविषये कित्वविधानं सार्थकम्। अन्यथा संयोगादित्येव सिद्धे किं तेनेति भावः। वस्तुतस्तु इदमपि चिन्त्यम्। जात्याख्याया [१].....

---

१. अत्र ग्रन्थः त्रुटितः।

इति वचनात्। तेन द्वयोरपि संयोगसंज्ञा भवति। अतः 'शिक्षा' इत्यादौ ''गुरोश्च हलः'' (पा०सू० ३-३-१०३) इत्यप्रत्ययः सिध्यति। यत्र तु बहवो हलः संश्लिष्टास्तत्र द्वयोर्बहूनां वा विशेषेण संज्ञा। न चैकाज्द्विर्वचनन्यायेन समुदायस्यैव स्यादिति वाच्यम्, वैषम्यात्। तथाहि, द्विर्वचनं समुदायावयवैकाचोर्युगपत्कर्त्तुमशक्यम्। संज्ञा तु शक्या। तथा समुदाये द्विरुक्तेऽवयवा अपि द्विरुक्ता भवन्ति ''वृक्षः प्रचलन्सहावयवैः प्रचलति'' इति न्यायात्। इह तु समुदाये प्रवृत्तया संयोगसंज्ञया नावयवानां तत्कार्यसिद्धिः। अतोऽविशेषेण द्वयोर्बहूनां च संज्ञेति स्थितम्। यदि तु बहूनामेव स्यात्तर्हि 'संस्वर्यते' इत्यत्र ''गुणोर्ति'' (पा०सू० ७-४-२९) इति गुणो न स्यात्। 'गोमान्करोति' इत्यत्र संयोगान्तलोपो न स्यात्। 'निर्ग्लानः' इत्यादौ निष्ठानत्वं न स्यादिति दिक्।

भवतीत्यस्य च प्रत्याख्यानात्। हल इति सौत्रं बहुवचनम्। यद्वा हलौ च हलश्चेत्येकशेषः। 'स्वरितात्संहिताया'(पा०सू० १-२-३९)मिति सूत्रेऽनुदात्तानामिति पदे तथैकशेषस्य भाष्ये कृतत्वात्। यद्यपि तत्रैकवचनान्तमप्युक्तं, तथाप्यत्रानन्तरा इत्युक्तबलेनैवम्। यत्तु हलौ च हलश्चेति सहविवक्षायामेकशेषविधानेन साहित्यप्रतीतेरेव समुदाये संज्ञासिद्धिरिति। तन्न। एकधाऽन्वय-मात्रेण साहित्योपपत्तेस्त्वदुक्तार्थे मानाभावात्। बहूनामेकत्र सत्वे एवापत्तेश्चेत्याहुरिति बोध्यम्। तदनुरोधेनैवाह। **यत्र त्विति।** वैलक्षण्ये तुः। **समुदेति।** द्वन्द्वेत्तरमग्रे कर्मधारयः। एकस्याचो बह्ववयवत्वस्य युगपद्विरुद्धत्वादिति भावः। किञ्च द्विर्वचनं श्रवणार्थमेव न शास्त्रीयकार्यार्थम्। किञ्च तत्रैकेन द्वित्वेन सर्वानुग्रहो, नैवं प्रकृते। तदाह। **तथेति।** विपक्षे बाधकमप्याह। **यदि त्विति।** किञ्च झलि परे संयोगादिलोपविधानानर्थक्यापत्तिः। तत्र पक्षे न हि तत्र परे तत्सम्भवः, तत्सहित-स्यैवैतत्प्रवृत्तेरित्यपि बोध्यम्। वस्तुतस्तु इदमपि चिन्त्यम्। बहूनां करणे फलाभावात्। न च पदान्तसंयोगमादाय तत्रैव फलम्, झलित्येव सिद्धेस्तदानर्थक्यस्योक्तत्वात्। अत एव झलन्यत्र तदावश्यकत्वमित्यपि न। किञ्च तत्र संयोगादिरित्यादावाद्यन्तशब्दयोरवयववाचितया बहुव्रीहि-णाङ्गपदधात्ववयवसंयोगस्यैवाश्रयणेनाङ्गादेरादावन्ते वा व्यञ्जनत्रयाभावात्तादृशस्य त्रयाणां संयोगस्याभावात्त्रयाणां फलाभावात्संज्ञाया अप्रवृत्तावपि कार्यार्थत्वात्संज्ञाया अवयवानां सकार्यारम्भाद्द्वयोः कथं नेति भाष्यादावेव स्पष्टम्। तस्मात्तत्र द्वयोर्द्वयोरेव संज्ञेति तत्वम्। क्लिष्टकल्पनया तादृशसंयोगानयनं तु न, अनभिधानादिति भाष्याशयः। अदादिषु शास्तेरप्रा-माणिकः पाठोऽत्रत्यभाष्यप्रामाण्या**ज्जक्षित्यो**(पा०सू० ६-१-६) तिसूत्रभाष्यप्रामाण्याच्चेति बोध्यम्। तदाह। **दिगिति ।।**

ननु यदि द्वयोरपि संज्ञा तर्हीन्द्रीयतेः सनि'इन्दिद्रियिषति' इति न स्यात्। इह हि संयोगौ द्वौ नदौ दरौ च। तत्र नकारस्येव दकारस्यापि ''नन्द्राः'' (पा०सू० ६-१-२) इति द्वित्वनिषेधः प्राप्नोति। नैष दोषः। तत्र ह्यजादेरित्यनुवर्त्तते। सा च कर्म्मधारयात्पञ्चमी। तेनादेरचः परे नदराः संयोगादयो न द्विरुच्यन्ते इति सूत्रार्थः। एवञ्च पूर्वसूत्रे द्वितीयस्येति न कर्त्तव्यमेवेति वक्ष्यते। हलः किम् ? तितउभ्याम्। अत्र ''तनोतेर्डउः सन्वच्च'' (उ०सु०) इति उडप्रत्ययः, सन्वद्भावाद् द्वित्वं, ''सन्यतः'' (पा०सू० ७-४-८९) इतीत्वं च व्यस्तोच्चारणसामर्थ्याद् गुणाभावः। यदि ह्यचोरप्यनन्तरयोः संयोगसंज्ञा स्यात्तर्हीह ''संयोगान्तस्य'' (पा०सू० ८-३-२३) इत्युकारलोपः स्यात्। अनन्तरा इति

सिद्धन्ते शङ्कते। **नन्विति।** अपिरेवार्थे, द्वयोर्द्वयोरेवेत्यर्थः। तत्र हेतुमाह। **इह हीति।** तत्र हेतुमाह। **तत्र हीति।** बहुव्रीहावफलत्वादाह। **सा चेति।** पूर्वसूत्रे एवेति भावः। **परे इति।** अनन्तरा इत्यपि बोध्यम्। 'तस्मादित्युत्तरस्ये'त्यस्योपस्थितेरविशेषादेव च दकारस्य नकारेण व्यवहितत्वात्तदप्रवृत्तिः। एतेन परत्वस्य व्यवहितेऽपि सत्वात्तथाव्याख्यानेऽपि दोष एवेत्यपास्तम्। **पूर्वेति।** तत इत्यादिः। एवञ्च लाघवमूलमिष्टसाधकं चैवं व्याख्यानमिति बोध्यम्। चन्द्रीयतेः सनोऽभिधाने 'यथेष्ट'मिति[1] द्वितीयैकाचो द्वित्वं नकारसहितस्यैव। आद्यवयवाचः परत्वाभावेनैतन्निषेधाप्रवृत्तेः। न चैवमपि लावस्थायामडिति पक्षेऽदिद्रवदित्यादावादेरचः परत्वमस्त्येवेति दोष एव। किञ्च पक्षान्तरैरपि **चडीति** द्वित्वात्परत्वादपि प्रथममट् न्याय्य इति वाच्यम्। **नान्द्रा** इत्यधिकारसूत्रत्वेन तत्सूत्रे उपस्थितौ तत्र धातोरिति सत्वेन प्रत्यासत्त्या व्याख्यानेन च धातुसंज्ञाकालिकादादेरचोऽनन्तराः परे संयोगादयो नदरा इत्याद्यर्थान्न दोष इत्याहुः। ईदृशानामभिधाने दृढं मानं चिन्त्यमिति कश्चित्। **वक्ष्यत इति।** बौद्धे तत्सूत्रे इति भावः। **सन्वदिति।** अस्योभयत्रान्वयः। अत एव चः। लोपतद्विधानं तु यत्र भत्वं तत्र सफलमिति भावः। ननु **झलो झली**त्यतो झल इत्यस्याद्येऽपकर्षोऽन्त्येऽनुवृत्तिरिति पक्षे तदन्तस्य झलो झलः परयोस्तयोर्लोपविधाने न तितउभ्यां पनसमित्यादौ दोष इति चेन्न एवमपि 'तितउदेव' 'द्रप्स'मित्यादौ दोषात्। वस्तुतोऽपकर्षस्य भाष्यसम्मतत्वेऽपि नानुवृत्तेस्तत्वमिति तदपि प्रत्युदाहरणम्। यथा चैतत्तथा स्पष्टं **चिदस्थिमालायाम्**[2]**।** इदमपि यथाश्रुते बोध्यम्। यदि तु हलिति जातावेकवचनं तेनैकस्य संज्ञायामुक्तरीत्या संज्ञाविधानस्य तत्र तत्र हलित्येव वाच्ये

---

१. 'यथेष्टं नामधातुष्विति' इति खपाठः। २. संयोगसंज्ञासूत्रे ल.शे.चि.पृ.सं. १७४ प्रथमोभागः।

किम् ? पनसम्। यदीह सकारमकारयोः संयोगसंज्ञा स्यात्तर्हि ''स्कोः'' (पा०सू० ८-२-२९) इति सूत्रेण सकारलोप स्यादिति दिक्।

मुखनासिकावचनोऽनुनासिकः (पा०सू० १-१-८)। मुखसहिता नासिका मुखनासिका तयोच्चार्य्यमापोऽनुनासिकसंज्ञः स्यात्। संज्ञाप्रदेशा ''आङोऽनुनासिकश्छन्दसि'' (पा०सू० ६-१-१२६) इत्यादयः। अभ्रआँ अपो वृणाना, गभीरआँ उग्रपुत्रे।

इहोच्यत इति वचनः, ''कृत्यल्युटो बहुलम् (पा०सू० ३-३-११३) इति बाहुलकात्कर्मणि ल्युट्। 'राजभोजनाः शालयः' इतिवदिति वृत्त्यनुसारिणः।

भाष्यकैयटयोस्तु उच्यतेऽनेनेति वचनम्। करणे ल्युट्, सामान्ये नपुंसकम् 'शक्यं च क्षुदपहन्तुम्'इतिवत्, ''तेन तुल्यं क्रिया चेत्'' (पा०सू० ५-१-११५) ''संस्कृतं भक्षाः'' (पा०सू० ४-२-१६) इतिवच्च। इदञ्च ''विशेषणानाञ्चाजातेः'' (पा०सू० १-२-५२) इत्यत्र वक्ष्यमाणेन पदसंस्कारपक्षे गुणवचनानामित्यादि वाचनिकमित्यनेन सह यथा न विरुध्यते, तथा तत्रैव वक्ष्यामः। ततो मुखनासिका वचनं यस्येति बहुव्रीहिः।

संयोगग्रहणस्य वैयर्थ्यापत्त्या च दोषाभावेन बहुवचनेनैवोक्तार्थलाभस्तदा समूहसंज्ञार्थमेव तत्। वस्तुतस्तु एकशेषेण बहुत्वस्य प्रागुक्तत्वेन ततः शब्दतस्तदलाभेन चैतद्व्यावृत्त्यर्थमेव तत्। तस्य विशेषणत्वं तस्य समूहसंज्ञासाधकं न तदिति न पूर्वविरोध इति बोध्यम्। तदाह। **दिगिति।**

४.२५ मुखनासिकावचनशब्दार्थनिरूपणम्

मुखनासिकावचनोऽनुनासिकः। प्राण्यङ्गत्वात्समाहारद्वन्द्वे मुखनासिकवचन इति स्यादत आह। **मुखसहितेति।** वृत्त्यनुरोधेनाह। **तयोच्चार्येति।** उक्तव्याख्योपपत्तये आह। **इहेति।** सूत्रे इत्यर्थः। **बाहुलकात्** बहुलग्रहणात्। अत्र तल्लभ्यत्वमेवारुचिः। अत एव सिद्धान्तमाह। **भाष्येति।** अस्याग्रे शेषपूरणेऽन्वयः। **करणे इति।** प्रासादवासिन्यायोपन्यासादधिकरणे ल्युडिति भाष्यस्वरस इति कश्चित्। **नपुंसकमिति।** पदसंस्कारपक्षे इदम्। अन्यथा मुखेति पदान्तरसामानाधिकरण्येन स्त्रीत्वे हि बहुव्रीहौ वचनीक इति स्यादिति भावः। तत्र लौकिकं दृष्टान्तमाह। **शक्यं चेति।** शास्त्रीयं तमाह। **तेनेति।** नन्वेवमपि गुणवचनानामित्यादिवचनात्स्त्रीत्वं कुतो नात आह। **इदञ्चेति।** उक्तनिर्देशादेव लिङ्गात्तस्यानित्यत्वं लक्ष्यानुरोधाद् व्यवस्थेति भावः। **बहुव्रीहिरिति।** इति

मुखेति किम् ? यमानुस्वाराणामेव मा भूदिति भाष्यम्। तत्र वर्गेष्वादितश्चतुर्णां पञ्चमे परे तन्मध्ये पूर्ववर्णसमानाकारं वर्णान्तरं प्रातिशाख्येष्वागमत्वेन विहितं तद्यम-संज्ञम्। यम इव यमः, यमौ हि लोके प्रायेण समानाकारौ भवतः। यथा 'पलिक्क्नीः' 'चख्खतुः' 'अग्ग्निः' 'अघ्घ्नन्' इत्यत्र कखगघ इत्येभ्यः परभागे तत्तत्सदृशो यमागमः। यत्तूक्तं विवरपे ''वर्गपञ्चमयुक्ताः प्रथमादयो यमाः'' इति। तच्चिन्त्यम्, अयोगवाहत्व-प्रतिपादकेन हयवरट्सूत्रस्थभाष्येण सह विरोधात्, 'केवलनासिक्यत्वपरेण यमानुस्वारा-णामेवेति भाष्येण सह विरोधाच्च। अथेदं भाष्यं न केवलनासिक्यत्वपरं किन्तु आँ इत्यादीनां भागमात्रं नासिक्यं, यमानुस्वाराणां तु मुखनासिक्यत्वेऽपि प्रासादवासिन्यायेन नासिक्यत्वमप्यस्ति, न तु तदीयं भागमात्रं तथेत्येवं परं, तथाप्यादितश्चतुर्णां तदसम्भव एव। किञ्चैवं ''नैव दोषो नैव प्रयोजनम्'' इति त दुत्तरभाष्यग्रन्थविरोधः 'यद् घ्नन्ति'

स्थितमिति शेषः। मुखेत्यत्र तु मध्यमपदलोपी समास उक्त एव। वृक्षासनयोरिति सूत्रभाष्यप्रामाण्येनैकवद्भावस्यानित्यत्वेन द्वन्द्वोऽपि साधुरिति **प्रकाशकृदु**क्तिस्तु न युक्तेति प्रतिपादितं **छायायाम्।**

४.२६ यमस्वरूपनिरूपणम्

यमेति। प्रासादवासिन्यायानवतारपक्षे सर्वं वाक्यमिति न्यायेनेति भावः। ननु कोऽसौ यमोऽत आह। **तत्रेति।** तयोर्मध्ये इत्यर्थः। **चतुर्णामिति।** अन्यतमादिति शेषः। वर्गेषु विद्यमानानां चतुर्णां मध्येऽन्यतमादित्यर्थः। **तन्मध्ये** तयोर्मध्ये। विहितं यदित्यादिः। तत्र योगमप्याह। **यम इति।** यमल इवेत्यर्थः। हि यतः। क्वचिद्व्यभिचारादाह। **प्रायेणेति।** तानुदाहरति। **यथेति। ने इति।** नकारे परत इत्यर्थः। क्वचिदस्यापाठः। यद्यपि यमा नाम पञ्चमेषु परत आदितश्चत्वारो वर्णा इति तत्रोक्तम्, तथाप्यर्थद्वयसम्भवात्तस्यार्थत आह। **वर्गेति। अयोगेति।** तेषामित्यादिः। आक्षरसमाम्नायिकत्वार्थं हि तत्वं, यदि त्वेवं तदा तस्य सत्वेन तदानर्थक्यं स्पष्टमेव। ननु तत्र तथोक्तावपि तद्विशेषणमिति विशिष्टस्य तत्वार्थं तत्वमत आह। **केवलेति।** त्वन्मते विशिष्टस्य तत्वस्यार्थसम्भवादिति भावः। द्वितीयदोषमुद्धरति। **अथेदमिति। भागमात्रमिति।** तथा च केवलनासिकापदेन तद्ग्रहणासम्भवं चेति भावः। मात्रपदेन विशिष्ट-व्यावृत्तिः। **मुखेति।** विशिष्टस्येति भावः। अस्य प्रयोगस्योपपत्तिस्त्वनुपदमेव स्फुटीभविष्यति। **तदिति।** केवलनासिक्यत्वेत्यर्थः। अभ्युपेत्य दोषान्तरं तत्रैवाह। **किञ्चैवमिति।** तथाङ्गीकारे

इत्यादौ ''यरोनुनासिके'' (पा०सू० ८-४-४५) इत्यस्य प्रवृत्त्यापत्त्या त्वत्पक्षे दोषस्योद्भटत्वात्। अत एव प्रातिशाख्ये ''स्पर्शा यमाननुनासिकाः स्वान्परेषु स्पर्शेष्वनुनासिकेषु'' (ऋ०प्रा० ६-२९) इत्युपक्रम्य 'प्रदोधुवच्छ्मश्रुषु' इत्यत्र यमं निषेद्धुमारब्धे ''न स्पर्शस्योष्मप्रकृतेः परस्ताद्यमापत्तिम्'' (ऋ०प्रा० ६-३०) इति सूत्रे परस्ताच्छब्दः प्रयुक्तः। 'यमः प्रकृत्यैव सदृक्'' ''श्रुतिर्वा यमेव मुख्यास्ति समानकाले' (ऋ०प्रा० ६-३३) इत्यादिसूत्रान्तरेष्वपि स्पष्टमेव यमस्य वर्णान्तरत्वम्। तथा नारदीयशिक्षायामपि –

अनन्त्यश्च भवेत्पूर्वो ह्यन्तश्च परतो यदि।
तत्र मध्ये यमस्तिष्ठेत्सवर्णः पूर्ववर्णयोः ।। इति।

सवर्णः सदृन्नेः। अत्र पूर्ववर्णयोरिति द्वित्त्वमविवक्षितम्। 'यज्ञः' इत्यादौ जकारद्वयसत्त्वेपि 'ज्मया अत्र वसवोरन्तदेवाः' इत्यादौ जकारद्वयाभावादिति तद्व्याख्यातारः। तथा ऋक्तन्त्रव्याकरणाख्यस्य छान्दोग्यलक्षणस्य प्रणेता औदव्रजिरप्यसूत्रयत् ''अनन्त्यान्त्यसंयोगे मध्ये यमः पूर्वस्य गुणः'' इति। पूर्वस्य गुण इत्यस्य पूर्वभक्त इत्यर्थः। एतेनागमत्वं स्फुटीकरोति। तथा संयोगशृङ्खलाख्यायां गौतमशिक्षायामपि

इत्यर्थः। **यदिति।** विशिष्टस्य तत्वाभ्युपगमादिति भावः। **अत एव** तथाऽङ्गीकारेण तस्य वर्णान्तरत्वादेव, प्रयुक्त इत्यत्रान्वयः। **स्पर्शा इति।** अनुनासिकाः स्पर्शाः स्वान् आत्मतुल्यान् यमानापद्यन्तेऽनुनासिकेषु स्पर्शेषु परेषु इत्यर्थः। अस्य साधारणत्वादाह। **न स्पर्शेति।** न खलु स्पर्शस्योष्मप्रकृतेः परस्ताद्ग्रे यमापत्तिं जानीयादित्यर्थः। **प्रयुक्त इति।** किञ्चैवं निषेधो व्यर्थः, ञकारयुक्तवर्गद्वितीयस्य सत्वेन निषेध्याभावात्। एतेन न स्पर्शस्थोष्मप्रकृतेः प्रतीयाद्यमापत्तिमिति पाठस्य सत्वान्नेदं साधकमित्यपास्तम्। भाष्ये तथापाठेऽपि वृत्तौ तथैव पाठाच्च। तत्रैवाह। **यम इति। सदृगिति** भिन्नं पदम्, यमः प्रकृत्यैव सदृक् भवति यस्य यमापत्तिरुच्यते तत्स्वरूपो भवतीत्यर्थः। वा अथवा, यमेन यमोच्चारणेन समानकला मुख्या मुखे भवा श्रुतिरस्ति यया समस्तद्रूपो लक्ष्यते तस्मादिदमुच्यत इत्यर्थः। **तत्र** तयोः। इतः स्पष्टं तथाऽलाभात्तद्व्याख्याग्रन्थमाह। **सवर्ण इति।** पूर्वैकवाक्यताया सादृश्यं च यत्नकृतं इति। तदर्थमेवाह। **अत्रेति। जकारद्वयेति। अनचि चे**ति द्वित्वेनेति भावः। एवमग्रेऽपि। न च यमानामकारोपरि पाठादचित्वेनाचि नेति निषेधः स्यादिति वाच्यम्। उक्तशिक्षावचनसामर्थ्येनैव तदप्रवृत्तेश्छान्दसत्वाच्चेत्याह। **छन्दोज्ञेति।** छान्दोग्येति पाठान्तरम्। प्रयोगीयक्रमादाह। **अनन्त्येति। करोतीति।** अन्यथा तदानर्थक्यं

''अथ चतुरक्षराणामुदाहरणं 'सयमायमाभ्याम्'। सयमान्तावद्यथा 'अग्निः' इति द्वौ गकारौ यमनकारौ, 'यज्ञः' इति द्वौ जकारौ यमञकारौ'' इत्यादि। तथाऽत्रैव ग्रन्थारम्भे - ''अयस्पिण्डो दारुपिण्ड ऊर्णापिण्डश्चेति त्रेधा संयोगं विभज्य यमसंहितमयस्पिण्डम्'' इत्युक्त्वा,

''अन्तस्थ यमसंयोगे विशेषो नोपलभ्यते।
अशरीरं यमं प्राहुरन्तस्थः पिण्डनायकः॥''

इत्युक्तम्। अन्तस्थोऽत्र वर्गपञ्चमः। अशरीरमिति स्वरभक्त्यादिवद्व्यञ्जकलिपिविशेषशून्यमित्यर्थः। लक्षणवशेनैव तदीयस्थलविशेषनिश्चयसंभवाल्लिपिसंप्रदायप्रवर्त्तकाचार्य्यैः स्वरभक्तेरिव यमस्यापि व्यञ्जकीभूता लिपिर्न कल्पितेत्यर्थः। 'रलयोरूष्मणि परे मध्ये स्वरभक्तिः' इति हि प्रसिद्धं शिक्षादौ। यत्र तु नैवंविधेन लक्षणेन स्थलावधारणं कर्तुं शक्यते, तत्रागत्या लिप्यन्तरं प्रवर्त्तितम्। यथा विसर्गादौ।

पाणिनीयशिक्षायामपि।

त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः सम्भवतो मताः।
प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवा॥
स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः।
यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः॥
अनुस्वारो विसर्गश्चऽ्कऽ्पौ चापि पराश्रयौ।
दुःस्पृष्टश्चेति विज्ञेया लृकारः प्लुत एव च॥ (पा०शि० ३।४।५) इति।

स्पष्टमेव। **ग्निरिति।** अग्निरित्येकदेशानुकरणम्। एवमग्रेऽपि। **अत्रैव** गौतमशिक्षायामेव। **अयस्पिण्डमिति।** जानीयादिति शेषः। **अन्तस्थयमेति।** 'सुप्सुपेति' तृतीयासमासोत्तरपदकषष्ठीतत्पुरुषः। रेफला अटा घटिताकारान्तस्य यण्वाचकत्वेऽप्यत्र तदभावादाह। **अन्तस्थ इति।** अन्ते चरमे तिष्ठन्तीति व्युत्पत्तेर्योगरूढोऽयं। **सुपिस्थ** इति कः इति भावः। पिण्डनायकत्वं च तत्प्रधानत्वं, आगमत्वेन शरीरस्य सत्वात्। तदाह। **स्वेति।** साधर्म्ये दृष्टान्तः। तदेव सहेतुमाह। **लक्षणेति।** स्वरभक्तेर्लक्षणमाह। **रलयोरिति।** तयोर्मध्येऽन्यतरादित्यर्थः। हि यतः। सम्भक्तिसम्भवादित्यर्थः। विंशत्याद्याः सदैकत्वे इत्याद्यमरः। ननु स्वरमध्ये प्लुतलृकारस्यापि

अत्र हि यमानां पृथग्गपनात्स्पष्टमेव वर्णान्तरत्वम्। गपना त्वित्थम् - अइउऋ इति चतुर्णां ह्रस्वदीर्घप्लुतभेदात्त्रैविध्ये द्वादश, लृकार एकः, एचां दीर्घप्लुतभेदादष्टौ, इत्थं स्वरा एकविंशतिः। स्पर्शाः पञ्चविंशतिः। यरलवशषसहेत्यष्टौ। यमाश्चत्वारः प्रथम-यमद्वितीययमादिभेदेन विभजनात्। अत एव कुं खुं गुं घुं इति यमचतुष्टयं न्यासादा-वुदाहृतम्। 'कचटतपाः कुः' 'खछठथफाः खुः' इत्यादिपरिभाषामाश्रित्य तत्तदुत्तरस्या-शरीरस्यापि कथञ्चित्प्रदर्शनतात्पर्यकं चेदमिति ध्येयम्। अनुस्वारविसर्गऽकऽ-पाश्चत्वारः, दुस्पृष्टश्च बह्वृचानां प्रसिद्धः ईळे वोळ्हेति। इत्थं त्रिषष्टिः। लृकारस्य प्लुतसम्भवात्तेन सह चतुःषष्टिः। तदेतदुक्तं 'सम्भवतः' इति।

हयवरट्सूत्रे क्षीरोदकारोऽप्याह – ''वर्गान्त्येनन्त्यात्परे तयोर्मध्यवर्त्ती नासिका-स्थानो यमः'' इति। यत्तु कश्चिदाह - यमा आदेशाः। न च तेषामानुनासिक्यपक्षे 'तज्ञः' 'तद् घ्नन्ति' इत्यादौ ''यरोऽनुनासिके'' (पा०सू० ८-४-४५) इत्यनुनासिका-देशापत्त्या ''नैव दोषो नैव प्रयोजनम्'' इति भाष्यं विरुध्येतेति वाच्यम्, व्यवस्थित-विभाषाश्रयणादिति। तत्तुच्छम्, प्रागुक्तप्रातिशाख्यनारदीयशिक्षादिसकल-ग्रन्थविरोधेन आदेशपक्षस्य गर्भस्रावेणैव गतत्वात्, व्यवस्थितविभाषाकल्पनस्य निर्मूलत्वाच्च। एतेन एतदीयलेखनप्रामाण्यभ्रमेण ''अनुपसर्गात् ज्ञः'' (पा०सू० १-३-७६) इत्यादौ चवर्गा-भावं दृढीकृत्य श्चुत्वाभावं साधयन्तस्तदनुगामिनोऽपि परास्ताः, नारदेन 'यज्ञः' इत्यत्र जकारद्वयस्य स्फुटमभिधानात् ''तस्यैतस्य त्रयस्यास्थ्नामज्ञां पर्वणामिति''

ग्रहणात् पृथगुक्तिरयुक्ता, किञ्च संख्याधिका स्यात्। किञ्च वर्णसमाम्नायोक्तग्रहणे नवत्वौचित्यं, लोकप्रसिद्धग्रहणे षोडशत्वौचित्यमत आह। **गपनेति।** इति एषां। **एक इति।** द्वितीयस्याग्रे वक्ष्यमामत्वात्। ननु यमानां विंशतित्वेन कथं चतुष्त्वमत आह। **प्रथमयमेति।** इदमेव तेषामनुगमकं रूपमिति नाधिक्यमिति भावः। इदं दृढयति। **अत एवेति।** तेषां चतुष्टयादेवेत्यर्थः। नन्वेवमपि कु चुमित्याद्युचितमत आह। **कटचेति।** गौतमशिक्षाविरोधं परिहरति। **तदिति।** लिपिविशेष-शून्यस्यापीत्यर्थः। अत एवाह। **कथञ्चिदिति।** लोहितः स्फटिक इत्यादिवदिति भावः। **पक्षे इति।** पाणिनीयशिक्षाऋक्प्रातिशाख्यमते मुखग्रहणप्रत्याख्याने इति भावः। **विरोधेनेति।** तैरागमत्वस्यैव प्रतिपादनात्। **निर्मूलेति।** भाष्योक्तातिरिक्तानामप्रामाणिकत्वात्। उक्तरीत्याऽह। **भ्रमेणेति।** सुप्सुपेति सप्तमीसमासः। दृढीकरणे हेतुरयं, तच्च तत्साधने। एतेनेत्यस्यार्थमाह। **नारदेनेति।** ननु स्फुष्टमभिधानेऽपि स्कुटमभेदानुपलम्भोऽत आह। **तस्यैतस्येति।** भेद इत्यत्रान्वयः। अनति-

इत्यारण्यकप्रयोग इव सजातीयसमभिव्याहारान्न स्पष्टो भेद इति तु प्रसिद्धं शास्त्रं । अत एव ''न व्यञ्जनपरस्यैकस्यानेकस्य वा विशेषोस्ति'' इति भाष्यम् । व्यञ्जनात्परस्य व्यञ्जनं परं यस्येत्येवम्भूतस्य च दुर्लक्षो भेदाभेदविभाग इत्येवम्परतया तत्रतत्र कैयटेन व्याख्यातम् । अत एव च बहुषु पुस्तकेषु ''तज्ज्ञापयत्याचार्यः'' इति भाष्यग्रन्थः । ''अनुपसर्गात्'' (पा०सू० १-३-७६) इति सूत्रेऽपि केषाञ्चित् श्चुत्वपाठः सम्मत एव । पाठान्तरं तु ''अल्पाच्तरम्'' (पा०सू० २-२-३४) 'आलुच्' 'तदसहने' इतिवत्सौत्र-त्वादसंहितया वा समाधेयमिति दिक् । तदेतत्सकलमभिधाय प्रक्रियाप्रकाशे गुरुचरपै-रुक्तम् - ''तज्ज्ञानमित्यादौ तु श्चुत्वं भवत्येव'' ।

यमश्च मुखनासिक्यः केवलनासिकास्थानो वेति मतद्वयम् ''नासिक्या

प्रसङ्गायाह । **सजातीयेति ।** अत एव वैलक्षण्यसूचकस्तुः । अत्र भाष्यादिसम्मतिमप्याह । **अत एवेति ।** व्याख्यातमित्यत्रान्वयः । **कस्वरेति ।** उच्चारणे इति शेषः । ननु तत्रोच्चारणे विशेषाभावकल्पने 'शरःखयः' 'हलो यमा'मित्यादि शास्त्रानर्थक्यापत्तिरत आह । **व्यञ्जनादिति ।** प्रत्येकं भेदोपलम्भात् तन्त्रेण विषयभेदेन समुच्चय इत्याह । **भूतस्य चेति ।** नास्तीत्यस्य व्याख्या **दुर्लक्ष्य इति ।** विशेषपदव्याख्या **भेद इति ।** तद्व्याख्या **विभाग इति ।** भेदाभेदविभाग इति पाठस्तूचित एव । अत एवाह । **तत्र तत्रेति ।** सर्वथा विशेषासत्वे त्वेवं व्याख्यानासङ्गतिः स्पष्टैव । अत एव भाष्येऽपि विशेषादिपदोक्तिः । गमकान्तरमाह । **अत एव चेति ।** नन्वेवं तत्र सूत्रे का गतिरत आह । **अनुपेति ।** केषञ्चिदित्युक्तेरन्येषां दोष एवात आह । **पाठान्तरं त्विति ।** द्वितीये पक्षान्तरमाह । **असंहितेति ।** यत्त्वखण्डपदसमासयोः सत्वेऽप्यत्राद्येऽसत्वात्तत्रापि तदविवक्षासम्भव इति । तन्न । पदत्ववाक्यत्ववदुत्तरखण्डत्वरूपाखण्डत्वस्यैव तत्र ग्रहणात् । अन्यथा [१]..... त्यादौ पक्षे शब [१]..... देशस्याप्यनापत्तेः । एतेनापि निर्देशेन वृत्तिघरकाचपदे । पदान्तकार्याद्यभावो ज्ञाप्यते, अत एवाच्सन्धिरित्यादौ न कुत्वदीत्यपास्तम् । उक्तयुक्तेः, द्वितीये दोषस्य तदवस्थत्वात् । तदर्थमन्योपायाश्रयणे तेनैव निर्वाहात्, तथा ज्ञापने भाष्याभिमतफलाभावाच्चेति दिक् । तदाह । **दिगिति । चरपैः** कृष्णपण्डितैः ।।

एवं प्रसक्तानुप्रसक्तं सर्वमुक्त्वा यमानुस्वाराणामेवेति भाष्यं पाक्षिकमिति सूचयन्नाह । **यमश्चेति ।** चेनानुस्वारादेः संग्रहः । मुखनासिका इति पाठो, न तु मुखा नासिक्य इति ।

---

१. अत्र ग्रन्थः त्रुटितः ।

नासिकास्थानाः मुखनासिक्या वाः'' इति तैत्तिरीयप्रातिशाख्यात्। अनुनासिकविषये तु दर्शनत्रयम् - कृत्स्नो वर्णो मुखेन नासिकया चोच्चार्यत इत्येकम्, पूर्वो भागो मुखेन परो नासिकयेति द्वितीयं, तद्वैपरीत्यात्तृतीयम्। द्वितीयतृतीययोर्भागमात्रस्य नासिक्यत्वेऽपि तदुपरागाद्भागान्तरमपि तद्भदवभासते। तथा च नासिकान्वयस्य भागमात्रविषयतया नासिकावचनग्रहपेन मुखनासिक्योवर्णो न गृह्येत। किन्तु मतविशेषे केवल-नासिकास्थानतया यमादय एव गृह्येरन्। ततश्च विधिप्रदेशे ''आङोऽनुनासिकः'' (पा०सू० ६-१-१२६) इत्यादौ यमानुस्वारा एव विधीयेरन्। ''विड्वनोर-नुनासिकस्यात्'' (पा०सू० ६-४-४१) इत्यादौ त्वनुवादे अप्रतिपत्तिरेव

स्वाङ्गसमुदायस्य स्वाङ्गत्वाभाववच्छरीरावयवसमुदायस्य शरीरावयवत्वाभावात्। अत एव **दन्त्यो-ष्ठ्यकण्ठतालव्या**वित्यादिशिक्षाप्रयोगसङ्गतिः। एतेन समुदितं तद्ग्रहणमतिरिक्तं वा स्थानमित्य-पास्तम्। उक्तरीत्या तत्र तत्र भवत्यधिकारविहित यतः प्रत्येकमनुत्पत्यापत्तेरयोगस्थानीति ? प्रतिज्ञाविरोधाच्चेति दिक्। मुखनासिक्ये तु इति पाठे तु मुखशब्देऽर्श आदित्वादच्। अत एव तैत्तरीयप्रातिशाख्यप्रयोगसङ्गतिः। यद्वा नासिकाया आस्यान्तर्गतत्वपक्षे व्याप्यव्यापक-भावसत्वेनाविरोधात्तद्रूपेण भेदेऽपि स्वाङ्गेत्यादिदृष्टान्तवैलक्षण्येन तैत्तरीयविरोधानुरोधेन चैतत्समुदायस्य तत्वेन ग्रहणेप्यदोषात्। तत्रार्षत्वकल्पनापेक्षयैतद्युक्तिद्वयस्यैवोचित्यात्। **नन्वनुस्वारयमानां चेति** शिक्षोक्ते**र्नासिक्यान्नासिक्ययमानुस्वारानिति** ऋक्प्रातिशाख्योक्तेश्च कथमिदमत आह। **नासिक्या इति।** नासिकायां भवा ञम्यमानुस्वारा इत्यर्थः। उद्देश्यसमर्पकमिदं मुखग्रहणपक्षे सफलमिति प्रतिपादयितुं भाष्यीयानेकविग्रहप्रदर्शनसिद्धमर्थमाह। **अनुनेति।** अच्ञम्रूपेत्यादिः। विनिगमनाविरहादाह। **तद्वैपेति।** भागस्य मुखेनोच्चारणाननुभवादाह। **द्वितीयेति।** तत्रेत्यादिः, पक्षयोरित्यर्थः। 'तस्यादित' इति सूत्रस्वरसाद्वर्णानां सखण्डत्व-मित्याशयः। तयोरेवाह। **तथा चेति। मतेति।** प्रागुक्तशिक्षादिमतभिन्ने तैत्तिरीयप्राति-शाख्योक्तप्रथममते इत्यर्थः। आदिनाऽनुस्वारपरिग्रहः। आदि**नाऽपोऽप्रगृह्ये**त्यादि परिग्रहः। ननु बिड्वनोर्यम इति सुवचमत आह। **इत्यादौ त्विति।** अनेन 'यरोऽनुनासिके'त्यादिपरिग्रहः, तत्राप्रतिपत्तेः सत्वात्। तत्र ञमि ञम्वेत्युक्त्या सकलेष्टासिद्धेः। एतेनाप्रतिपत्तिरापाततः, वक्ष्यमाणान्वर्थत्वेनानुनासिकनकारादिप्रतिपत्तेरिति **दण्ड**युक्तमपास्तम्। तस्य दूषयिष्यमाणत्वात्। न चैवमपि सिद्धान्तेऽन्यादृशान्यर्थत्वावश्यकत्वेनोभयगतिरिति न्यायेन निर्वाह इति वाच्यम्। अतिशदन्तीया इति वदत्र गमकाभावेन तदनादरेण प्रकरणस्याभिधानियामकत्वसिद्धकृत्रिमा-

स्यादित्युदाहृतभाष्याशयः। तस्माद्दर्शनद्वये मुखपदोपादानं सार्थकमिति स्थितम्।

प्रथमदर्शने तु प्रासादवासिन्यायाश्रयपेनोभयवचनानामपि सिद्धा संज्ञा। आन्तरतम्याच्च विधिप्रदेशेषु यमानुस्वारापामप्रवृत्तिः। तथाच मुखशब्दोपादानं न कर्त्तव्यमिति भाष्ये स्थितम्। मुखवचन इत्येवोक्ते तु कचटतपादीनामपि स्यात्। ततश्च 'शक्तः' इत्यत्र कलोपः स्यात्। 'पक्व' इत्यत्र चकारलोपः स्यात्। 'तप्तम्' इत्यत्र पलोपः स्यात्। 'ओदनपग्' इत्यादौ ''अनुनासिकस्य किझलोः'' (पा०सू० ६-४-१५) इति दीर्घः स्यात्। अनु पश्चान्नासिका व्याप्रियते यस्मिन्नासिकायाः पश्चान्मुखं व्याप्रियते यस्मिन्निति वाऽन्वर्थसंज्ञेयम्। तेन नासिकाव्यापारस्य भागविषयकत्वसूचनात्प्रासाद-वासिन्यायस्याविषयोऽयमिति ध्वनितम्। एतच्च सूत्रं प्रत्याख्यातुं शक्यम्। प्रदेश-वाक्येष्वेव प्रागुक्तस्य नासिकामनुगत इत्यस्य वा योगस्याश्रयपेन सकलेष्टसिद्धिरिति दिक्।

कृत्रिमेति न्यायेन तस्याः सत्वात्। अत एव विधावपि दोषः, एतत्सूचक एवकारः। अत एव भाष्यसङ्गतिस्तथा तदसङ्गतिः स्पष्टैव। तदाह। **उदाहृतेति।** तदेवोपसंहरति। **तस्मादिति।।**

४.२७ मुखग्रहणप्रत्याख्यानविचारः

'मुखग्रहणं शक्यमकर्त्तु'मित्याद्यग्रिमभाष्याशयमाह। **प्रथमेति।** चस्त्वर्थे। उक्तरीत्योभय-वचनसंग्रहायाह। **अपीति।** भाष्यस्थ एवकारोऽप्यर्थे। नासिका आस्यान्तर्गतेति भावः। क्रमेण यथासम्भवं दोषानाह। **ततश्चेति। कलोप इति। अनुदात्तोपदेशे**त्यनेनेति भावः। एवमग्रेऽपि। **वकारेति।** निष्ठावत्वकुत्वयोरसिद्धत्वात् झलि्परत्वात्पचेरिति भावः। **दीर्घः स्यादिति।** गामश्वमितिवत् समुच्चयो बोध्यः। अत एव ततश्चेत्यस्य सर्वत्रान्वयः। प्राचामनुरोधेन मुखग्रहणं कुर्वतः सूत्रकृत आशयमाह। **अनु पश्चादिति।** विनिगमनाविरहादाह। **नासिकाया इति। तेनेति।** अन्वर्थसंज्ञारूपशब्दोपादानेनेत्यर्थः। **ध्वनितमिति।** सूत्रकृतेति भावः। अत एवाह। **एतच्चेति।** भाष्ये प्रत्याख्यातत्वादाह। **शक्यमिति।** एवेन संज्ञासूत्रव्यवच्छेदः। **प्रागुक्तेति।** प्रागुक्तान्यतर-स्येत्यर्थः। शब्दात्तथा प्रतीत्यभावात्पक्षान्तरं लघुभूतमाह। **नासिकमिति।** सकलेष्टसिद्धेरिति पाठः। प्रदेशेत्यस्यादौ यत इति शेषो बोध्यः। वस्तुतस्तु योगत्रयमिदं चिन्त्यम्। तस्य ञमङणनेषु दुर्निरूपत्वात्। तत्रातद्गुणस्वरूपानुपलब्ध्योभयावच्छेदेन वायुसंयोगोत्तरमेव तादृशस्वरूपा-भिव्यक्त्याऽविनिगमकेनोभयोः स्थानत्वेन युगपदेवोभयसम्बन्धात्। एवं यमानुस्वारेष्वपि बोध्यम्।

तुल्यास्यप्रयत्नं सवर्णम् (पा०सू० १-१-९)। ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्चेत्युभयं यस्य वर्णस्य येन वर्णेन सह समानं स तस्य सवर्णो बोध्यः। संज्ञाप्रदेशाः ''अकः सवर्णे दीर्घः'' (पा०सू० ६-१-१०१) इत्यादयः। यद्यपि तुलया सम्मितं तुल्यमित्यवयवार्थः ''नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसम्मितेषु'' (पा०सू० ४-४-७) इति सूत्रेण तुलाशब्दात्सम्मिते यद्विधानात्, तथाप्ययं सदृशमात्रे रूढः शब्दः। अस्यन्ति उच्चारयन्ति अनेन वर्णानित्यास्यम्। ''असु

नन्वेवं लोकशिक्षाप्रातिशाख्येषु कथं तद्व्यवहारः, किञ्च भवेदित्यादिभाष्यस्य सूत्रमतेऽसङ्गतिः। तत्र हि सनि तद्व्यवहारे दोषाभावोक्तिर्युक्ता, न त्वन्यथेति सूत्रमते तदाश्रयणमावश्यकमिति चेन्न **अनोरभिहत्येति गत** इत्यस्याभिव्यञ्जित इत्यर्थेन तृतीययोगस्य नासिकशब्देन तद्व्यापारस्तमनु पश्चाद्गतो जात इत्यर्थेन तद्योगस्य च सर्वत्र सम्भवात्। किञ्च यमानुस्वाराणां तैत्तिरीयप्रातिशाख्योक्तमुखनासिक्यत्वपक्षाश्रयेण सूत्रमते निर्वाहोऽतो भाष्यासङ्गतेरभावात्। एवञ्च तन्न्यायविषयतया मुखग्रहणं न कार्यमिति भाष्योक्तमेव युक्तमिति ध्वनितं पाणिनिना एवंरीत्या। सूत्रप्रत्याख्यानं तु न उक्तरीत्या, तस्य यौगिकत्वेऽपि क्रियाशब्दत्वाभावेन क्रियाप्रवृत्तिनिमित्तकत्वेन प्रसिद्धशब्दघटितत्वस्यैवात्र तत्वेन दृष्टान्ते तथैव प्रवृत्तिर्न तु यथा कथञ्चिद्यौगिक इति भाष्याशयात्। प्रतिपादितमिदं सविशदं **हरिकैयटा**द्यभिमतं [१]**छायायां** तत एवावगन्तव्यम्। तस्मात् सूत्रप्रत्याख्यानमपि चिन्त्यमेवेति दिगिति बोध्यम्। तदाह। **दिगिति**।।

४.२८ 'तुल्यास्यप्रयत्नं सवर्णं' इति सूत्रार्थवर्णनम्

तुल्यास्यप्रयत्नं सवर्णम्। ताल्वादीति। कण्ठादीत्युचितम्। एवमग्रेऽपि। **सहेति।** यद्वर्णसहितस्य यस्य वर्णस्योभयं मिथः तुल्यमित्यर्थः। उक्तवाक्यार्थस्य सूत्रतो यथालाभस्तथा प्रतिपादयति क्रमेण। **यद्यपीत्यादिना दिगित्यन्तेन।** मात्रशब्दः कार्त्स्न्ये, स्थानादेस्तुलापरिच्छेद्यत्वाभावात्। तथा च प्रवीणादिवदयमिति तात्पर्यम्। **वर्णानिति** वर्णपदं बोधकपरम्। **एकैव व्यक्तिर्वाचिका कत्वादिकं तु ध्वनिनिष्ठं ध्वनिविशेषव्यङ्ग्यं वा, सा च नित्येति** व्यक्तिस्फोटपक्षेऽसनमभिव्यक्तिः। बहुवचनं तु एकस्यैव बहुरूपत्वादारोपितबहुत्वमादाय नेयम्। **व्यक्तयोऽनन्ता जन्याश्च तत्र जातिरेव शक्तेति** जातिस्फोटेऽसनमुत्पत्तिः। एतेनैतद्विरुद्धं **कृष्णा**द्युक्तमपास्तम्। [२]कैयटेऽप्येवमेव पाठः। अत्र बाहुलकाश्रयणात् गौरवादाह।

---

१. छाया.पृ.सं. २३८ प्रथमो भागः।

२. असनमत्र व्यक्तिस्फोटपक्षेऽभिव्यक्तिः, जातिस्फोटपक्षे तूत्पत्तिः इति कैयटः। म.भा.प्र.पृ.सं. २४० । प्र. भागः।

क्षेपपे'' (दि० प० १२१०) बाहुलकात्करणं ण्यत्। यद्वा, आस्यन्दते अन्नं प्राप्य द्रवीभवतीत्यास्यम्। ''अन्येष्वपि'' (पा०सू० ३-२-१०१) इति डप्रत्ययः। अथवा 'अन्नेन द्रवीक्रियते इत्यास्यम्' अन्तर्भावितण्यर्थात्कर्मणि डः 'परितः खाता परिखा' इतिवत्। तत्र भवमास्यं ताल्वादिस्थानम्। ''शरीरावयवाद्यत्'' (पा०सु० ५-१-६)। ''यस्य'' (पा०सू० ६-४-१४८) इति लोपे ''हलो यमाम्'' (पा०सू० ८-४-६) इति यलोपः। न चाल्लोपस्य स्थानिवद्भावः शङ्क्यः, यलोपे कर्त्तव्ये तन्निषेधात्। प्रकृष्टो यत्नः प्रयत्नः। प्रकर्षश्चाभ्यन्तरत्वम्। प्रारम्भे यत्नो वा प्रयत्नः। आभ्यन्तरप्रयत्ना हि वर्णप्रारम्भकाल एव व्याप्रियन्ते। तथाच तुल्यौ स्थनप्रयत्नौ यस्येति द्वन्द्वगर्भो बहुव्रीहिः। यद्वा, तुल्यः आस्ये प्रयत्नो येषामिति त्रिपदो बहुव्रीहिः। आस्ये इति विशेषपाद्बाह्यप्रयत्नव्युदासः। आस्य इत्येकत्वं विवक्षितं, तद्धितान्तास्यशब्दोपादानसामर्थ्यात्। तेन भिन्नस्थानानामर्थाद् व्युदासः। यद्वा, तुल्यः आस्ये तुल्यास्यः, मयूरव्यंसकादित्वा-

---

यद्वेति। धातोरकर्मकत्वात् 'अन्नमेतदास्यन्दत' इति भाष्यं[1] प्राप्येति शेषाभिप्रायमित्याह। **प्राप्येति। डेति।** कर्तरीति भावः। विनिगमनाविरहात् कैयटानुरोधाच्चाह। **अथ वेति।** आस्यते इत्यस्यार्थमाह। **अन्नेनेति।** [2](अत्र प्रक्षेपेण मुखस्य द्रवत्वोत्पादनात्। **अन्तरिति।)** एतेनोपसर्गवशेनैव सकर्मकत्वसिद्धावन्तर्भावितण्यर्थत्वकल्पने [3](प्रमाणाभाव इति कृष्णोक्तमपास्तम्। तेनार्थान्तरप्राप्तित्वेन) तत्वस्योपसर्गेणेत्यादिना प्रतिपादितत्वात्। अन्यथा प्रथमार्थासङ्गत्यापत्तेश्च। अपिशब्दात्कारकान्तरेऽपीत्याशयेनाह। **कर्मणीति।** दृशिग्रहणाद्धात्वन्तरादपीति सूचयन्नाह। **परित इति। तत्रेति।** वर्णोपयोगित्वात्स्थानमेव, प्रयत्नस्य पृथगुपादानात्। तदाह। **ताल्वादीति। यदिति।** यदिति शेषः। **यस्येतीति।** सूत्रानुकरणं, इति अलोपे इत्यर्थः। **आभ्यन्तरत्वमिति।** वर्णोत्पत्त्यव्यवहितप्राक्कालिकत्वरूपप्रकर्षस्य तत्रैव सम्भवादिति भावः। एवमवान्तरपदार्थमुक्त्वा विशिष्टपदार्थमाह। **तथा चेति।** अर्थत आह। **स्थानेति।** एतत्साम्यमौपाधिकभेदमादाय भेदघटिततुल्यपक्षे बोध्यम्। प्रशब्देन बाह्यनिरासः। जनकत्वं षष्ट्यर्थः। लोके यत्नप्रयत्नशब्दयोः पर्यायत्वात्तेन निरासासम्भवादाह। **यद्वेति।** यस्येतीति पाठः। येषामितीत्यपाठः। ज्ञापकाद्व्यधिकरणबहुव्रीहेरप्यङ्गीकारात्। उक्तहेतोरेवाह। **आस्ये इति।** नन्वेवं भिन्नस्थानानामपि स्यादत आह। **आस्ये इति।** ननु ग्रहैकत्ववदविवक्षोचिताऽत आह। **तद्धितान्तेति।** अन्यथा मुख्यवाच्येवोपादेयम्। **तेन** एकत्वविवक्षणेन। लाघवादाह। **यद्वेति। मयूरेति।** अत एव

---

१. म.भा.पृ.सं. २४०, प्रथमो भागः। २. ( )'अत्र' इत्यारभ्य 'अन्तरिति' प्रतीकग्रहणान्तं कपाठे नास्ति।
३. ( ) 'प्रमाणाभाव' इत्यारभ्य 'तेनार्थान्तरप्राप्तित्वेन' इत्यन्तं कपाठे नास्ति।

त्साधुः । तुल्यास्यः प्रयत्नो यस्येति विग्रहः । यद्वा, आस्ये प्रयत्नः आस्यप्रयत्नः, स तुल्यो यस्येति । एकत्वविवक्षादिकं प्राग्वत् । तदेवं समासचतुष्टयमपि भाष्ये स्थितम् - ''द्वन्द्वगर्भो बहुव्रीहिः, त्रिपदो वा, पूर्वभागे तत्पुरुषगर्भः, तदुत्तरभागे वा'' इति ।

तुल्यशब्दस्य सम्बन्धिशब्दत्वाच्च येन सह तुल्यस्थानप्रयत्नं तेन सह सवर्णमिति लभ्यते । नहि माता पूज्येत्युक्ते स्वसुतमाता भार्या पूज्यते किन्तु पूजकस्यैव मातेति दिक् ।

तुल्यस्थानमिति किम् ? तुल्यप्रयत्नानामपि कचटतपानां मा भूत् । तेन 'तर्ष्टा' इत्यत्र ''झरो झरि'' (पा०सू० ८-४-६५) इति पकारलोपो न भवति । यत्नग्रहणं किम्? चकारशकारयोर्मा भूत् । सति हि सावर्ण्ये 'वाक् श्योतति' इत्यत्र शकारलोपः स्यात् । अभ्यन्तरत्वविशेषणमप्येतदर्थमेव । अस्ति हि श्वासाघोषविवाराख्यबाह्यप्रयत्नसाम्यं चशयोरपि । ननु अल्पप्रपत्वमहाप्राप्तत्वकृतो भेदोऽस्तीति चेत् ? किं ततः । नहि सर्वप्रयत्नसाम्यं विवक्षितुं शक्यम् 'अङ्क्तः' इत्याद्यसिद्धिप्रसङ्गात्, कङयोरपि बाह्यप्रयत्नभेदात् । सर्वप्रयत्नसाम्यं हि स्वस्य स्वेनैवायाति न तु परेण । तथा व सवर्णसंज्ञा-प्रणयनमपि व्यर्थं स्यात्, 'अणुदित्तुल्यास्यप्रयत्नस्य' इत्युक्तौ सर्वसामञ्जस्यात् । ''झरो झरि''

पदार्थप्रधान इति बोध्यम् । विनिगमनाविरहादाह । **यद्वेति ।** साधनं कृतेत्यनेन समासः । **स तुल्य इति ।** तुल्यः स इत्यर्थः । पक्षद्वये आह । **एकत्वेति ।** आदिनेतरव्यावृत्तिपरिग्रहः । उक्तं समूलयन्नुपसंहरति । **तदिति ।** तस्येत्यादिभाष्यार्थं शाब्दन्यायेन तत्रत्यद्वितीयपक्षमाश्रित्याह । **तुल्येति ।** चस्त्वर्थे । अत्र दृष्टान्तं प्रतिपादयन्नाह । **न हीति । भार्येति ।** स्वेत्यादिः । किञ्च तुल्याय कन्या देयेत्युक्ते न शूद्रेण तुल्याय ब्राह्मणास्तां ददति, अपि त्वात्मना, तथेहापि । सवर्णसंज्ञावचनसामर्थ्यादपीदं लभ्यमिति स्पष्टं भाष्यादौ । तदाह । **दिगिति ।।**

४.२९ सवर्णसंज्ञासूत्रे पदकृत्यविचारः

अर्थत एवाह । **तुल्यस्थानमिति ।** अपिरिष्टसमुच्चायकः । यद्यपि तदभावे तदानर्थक्यमेव, तथापि प्रशब्दफलस्य पृथग् वक्ष्यमाणत्वादाह । **यत्नेति । लोप इति ।** पूर्वेणैवेति भावः । प्रशब्दफलमाह । **आभ्यन्तरेति ।** अपिः पूर्वसमुच्चये । ज्ञापकं तत्र सूचयन् तद्विवक्षायां दोषान्तरमाह । **सर्वेत्यादिना ।** तद्विवक्षायां अन्यज्ञापकमपि सूचयन्नाह । **झरो झरीत्यादिना ।**

(पा०सू० ८-४-६५) इत्युक्तं ''हलो यमां यमि'' (पा०सू० ८-४-६४) इत्यत्रेव यथासंख्यप्रवृत्त्या 'माहात्म्यम्' इत्यादौ मकारस्येव 'श्ण्ढि' इत्यादौ डकारस्यापि लोपो न स्यादिति हि सिद्धान्ते सवर्णग्रहणं कृतम्। स चाव्याप्तिदोषो यावत्प्रयत्नसाम्यविवक्षायां तदवस्थः स्यात्। अथ यावद्बाह्यसाम्यं यावदाभ्यन्तरसाम्यं वा विवक्ष्येत एवमपि 'मधुलिट्स्थानम्' इत्यत्र ''झरोझरि'' (पा०सू० ८-४-६५) इति सलोपः स्यात्, सकारथकारयोः श्वासाघोषविवारमहाप्रापत्वरूपबाह्यप्रयत्नचतुष्टयेनापि साम्यात्।

अथ स्थानप्रयत्नविवेकः – अकुहविजर्सनीयाः कण्ठ्याः। इचुयशास्तालव्याः। ऋटुरषा मूर्द्धन्याः। लृतुलसा दन्त्याः। उपूपध्मानीया ओष्ठ्याः। एऐ कण्ठ्यतालव्यौ।

तदवस्थ एवेति। सवर्णग्रहणे कृतेऽपीति शेषः, आदौ डढयोरपि बाह्यप्रयत्नभेदात्। तथा च सवर्णग्रहणरूपज्ञापकेनापि तदविवक्षेति भावः। सवर्णग्रहणादिसार्थक्यमेवमपि सुवचमित्याशयेनाह। **अथेति।** प्रयोगभेदेन विकल्पः। इष्टानुरोधेन व्यवस्था। **एवमपि** प्रागुक्तदोषत्रयाभावेन प्रशब्दाभावे वाक्श्चोततीत्यादावदोषेऽपि। अपिः स्थानसमुच्चयः। स्थानांशे तु यावत्स्थानसाम्यमेव विवक्षितमित्यन्यत्र[1] स्पष्टम्॥

४.३० स्थानप्रयत्नभेदनिरूपणम्

ननु स्थानादेः कति भेदा अत आह। **अथेति।** ननु कस्य किं स्थानमत आह। **अकुहेति।** यद्यपि सर्ववर्णोच्चारणे कण्ठव्यापार आवश्यकस्तथापि चकाराद्युच्चारणे ताल्वादिव्यापारोऽपि, तथाऽकारादीनामुच्चारणे तु नेति भावः। कवयोस्तु न सावर्ण्यम्, यावत्स्थानसाम्याभावात्, भिन्नस्थानकथनवैयर्थ्यापत्तेश्च। अत्र कण्ठपदं कण्ठस्थानतत्समानजिह्वामूलीयस्थानोभयपरम्। तेन 'कण्ठवहौ' 'जिह्वामूले तु कुः प्रोक्त' इति शिक्षया न विरोधः। जिह्वामूलीयस्य पदस्य च वर्णविशेषे रूढिरिति न व्यवहारातिप्रसङ्गः। अत एवायोगवाहेषु सामान्यतो जिह्वामूलीयवर्णनं भाष्ये। तत्तद्वर्णोत्पत्तेः प्राक् तत्तत्स्थानादौ जिह्वामूलीयस्पर्शाद्यनुभवेन तत्तवर्णानां तत्तत्स्थानत्वनिर्णयेऽप्यकुहेत्यादिकथनं साधारणधर्मबोधनायानुवादकम्, न त्वेददेव कण्ठादिस्थानविधायकमिति भ्रमितव्यम्। विसर्जनीयपदेनात्र साहचर्यादकाराश्रयस्य तस्य ग्रहणम्। अत एव 'अयोगवाहा विज्ञेया आश्रयस्थानभागिन' इति शिक्षया न विरोधः। **दन्त्या इति।** दन्तसंयुक्तादेशस्था इत्यर्थः। अतो भग्नदन्तस्याप्युच्चारणं भवत्येव। 'उश्च पश्च ध्मायेतेऽनेन तत्र भव' इति योगेनोपध्मानीयस्यौष्ठ्यत्वमित्याह। **उपूपेति।** रूढत्वात्तु न व्यवहारातिप्रसङ्गः। कण्ठ्यतालव्यौ कण्टोष्ठ्यौ

---

१. अन्यत्र = शेखरे। ल.शे. पृ.सं. ९२।

ओऔ कण्ठ्योष्ठ्यौ । वकारो दन्त्योष्ठ्यः । जिह्वामूलीयो जिह्वामूलस्थानः । अनुस्वारो नासिक्यः ।

यत्नो द्विधा — आभ्यन्तरो बाह्यश्च । तत्राभ्यन्तरश्चतुर्द्धा – स्पृष्टता ईषत्स्पृष्टता विवृतता संवृतता चेति । तत्र स्पृष्टता स्पर्शानाम् । ईषत्स्पृष्टता अन्तस्थानाम् । ह्रस्वस्यावर्णस्य प्रयोगे संवृतता । शास्त्रीये कार्ये तु विवृतता प्रतिज्ञायते इति अइउण्सूत्रे प्रतिपादितम् । ''ऌतः संवृताः'' इति तु प्रातिशाख्योक्तत्वान्न सर्वसाधारणम् । ऊष्मणां स्वरापाञ्च विवृतता । एषां चतुर्णामप्याभ्यन्तरत्वं वर्णोत्पतिप्राग्भावित्वात् । तथा हि नाभिप्रदेशात्प्रयत्नप्रेरितो वायुः प्राणो नाम उर्ध्वमाक्रामन्नुरः प्रभृतीनि स्थानान्याहन्ति । ततो वर्णस्य तदभिव्यञ्जकध्वनेर्वा उत्पत्तिः । तत्रोत्पत्तेः प्राग्यदा जिह्वाग्रोपाग्रमध्यमूलानि तत्तद्वर्णोत्पत्तिस्थानं ताल्वादि सम्यक् स्पृशन्ति तदा स्पृष्टता । ईषद्यदा स्पृशन्ति तदा ईषत्स्पृष्टता । समीपावस्थानमात्रे संवृतता । दूरत्वे विवृतता । अत एव इचुयशानां तालव्यत्वाविशेषेऽपि तालुस्थानेन सह जिह्वाग्रादीनां चवर्गोच्चारणे कर्त्तव्ये सम्यक् स्पर्शः, यकारे ईषत् स्पर्शः, शकारेकारयोस्तु दूरेवस्थितिरित्याद्यनुभवं शिक्षाकारोक्तिं चानुसृत्य विवेचनीयम् ।

दन्त्योष्ठ्य इति पाठः । शिक्षायां तथैव सत्वात् यथा चैतत्तथा प्रतिपादितम् । [१]**स्पर्शानां** कादिमान्तानां । **अन्तस्थानां** यरलवानां, अयमादन्तः । स्पर्शोष्मणोरन्तर्मध्ये तिष्ठन्तीति तदर्थः । ननु संवृतत्वस्यान्यत्रापि सत्वान्न्यूनताऽत आह । **ऌत इति ।** इउऋत इत्यर्थः । **ऊष्मणां** ऊष्मा वायुस्तदधीनानाम् । यद्यपि **स्थानेन्तरेति** सूत्रभाष्याद्वर्गद्वितीयतुरीययोरप्यूष्मत्वं, तथाप्यत्र शषसहा एव गृह्यन्ते । अन्यथा कण्ठादीनां सावर्ण्यानापत्तौ नाज्झलावित्यादिनिर्देशासङ्गत्यापत्तेः । **स्वरापां** अचां, उदात्तादिभिः स्वयमेव राजन्त इति व्युत्पत्तेः । तद्धर्मत्वादुदात्तादयोऽपि स्वर इत्युच्यन्ते । **प्रागिति ।** अव्यवहितेत्यादिः । **प्रयत्नेति ।** शब्दप्रयोगेच्छयोत्पन्नयत्नाभिहताग्निना प्रेरित इत्यर्थः । **अक्रामनिति ।** वेगान्मूर्द्धपर्यन्तं गत्वा प्रतिनिवृत्तो वक्त्रं प्राप्योक्तयत्नसहायेन तत्तत्स्थानेषु जिह्वाग्रादिस्पर्शपूर्वकमिति शेषः । तस्य नित्यत्वादाह । **तदभीति ।** नन्वेवमपि तेषां स्पष्टत्वादिकं कुतोऽत आह । **तत्रोत्पत्तेरिति ।** चतुर्णां तेषां मध्ये इत्यर्थः । **अत एव** कृततत्स्पर्शादिसत्वादेव, इत्यादि विवेचनीयमित्यत्रान्वयः । **षेऽपीति ।** बहूनामेकस्थानकत्वेऽपीत्यर्थः । **यकारे** तदुच्चारणे

---

१. इदं सर्वं व्याख्यानं शेखरस्थपङ्क्तिसदृशमेव ।

भाष्यकारास्तु ''नाज्झलौ'' (पा०सू० १-१-२०) इत्यस्य प्रत्याख्यानावसरे ऊष्मणां स्वराणां च ईषद्विवृतत्वं विवृतत्वं चेति वैलक्षण्यं वक्ष्यन्ति। तदप्यनुभवानुसार्येवेति सहृदयैराकलनीयम्।

बाह्याः प्रयत्नाः पुनरेकादश – विवारः संवारः श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति। एते च वर्णोत्पत्तेः पश्चान्मूर्ध्नि प्रतिहते निवृत्ते प्राणाख्ये वायौ उत्पद्यन्ते। अत एवबाह्या इत्युच्यन्ते। गलबिलस्य सङ्कोचात्संवारः। तस्यैव विकासाद्विवारः। एतौ च संवृतविवृतत्त्वरूपाभ्यामाभ्यन्ताराभ्यां भिन्नावेव। तयोः

कार्ये। एवमग्रेऽपि। यथाक्रममाह। **ईषदिति। वैलेति।** अनयोर्मिथ इति भावः। तत्र शिक्षोक्तेरभावादाह। **तदप्यनुभवेति।** न चैवं चतुर्द्धात्वं भज्येत। किञ्च स्वराणामूष्मणामिति शिक्षोक्तरीत्या विवृततरविवृततमयोरपि प्रतीतेरिति वाच्यम्। सूत्रमते नाज्झलाविति सूत्रेण विवृतत्वव्याप्यानामेषां सवर्णसंज्ञानुपयुक्तत्वबोधनमित्याशयात्। भाष्यमते तु सन्तु सप्त प्रयत्नाः। एवञ्चैदैतोरोदौतोश्च न सावर्ण्यप्रसक्तिः। प्रयत्नभेदात् नाज्झलाविति सूत्रमपि प्रयत्नभेदप्राप्तसावर्ण्याभावानुवादकं सत् तस्यैव बोधकम्। अत एव भाष्ये तन्न वक्तव्यमिति नोक्तमिति तत्वं बोध्यम्। पुनस्त्वर्थे।

४.३१ बाह्यप्रयत्नविचारः

प्रतिहते इति। तत इति शेषः। इदं चिन्त्यम्। 'आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया। मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्। सोदीर्णो मूर्ध्नाभिहतो वक्त्रमापद्य मारुतः। वर्णान् जनयते' इति शिक्षाविरोधात्। आत्मात्रान्तःकरणं, स संस्काररूपेण स्वागतान् अर्थान् बुद्ध्या स्ववृत्त्या समेत्यैकबुद्धिविषयान् कृत्त्वा तद्बोधेच्छया मनः युङ्क्ते युक्तं करोति। तदिच्छावन्मनः कायाग्निं जाठरमग्निमभिहन्ति। स कार्याग्निः स मारुतः उदीर्णः ऊर्ध्वं प्रेरित इत्याद्यपद्यार्थः। वर्णपदं चात्र तदभिव्यञ्जकध्वनिपरम्। अत एव तत्र पक्षेऽरुचिं मनसि निधाय पूर्वं तदभिव्यञ्जकेत्युक्तम्। यद्वा मूर्ध्नि प्रतिहते ततो निवृत्ते प्राणाख्ये वायौ वर्णोत्पत्तेः पश्चादुत्पद्यन्त इत्यन्वयः। एवञ्च प्रागुक्तसशेषपूरणरीत्या वर्णाभिव्यक्तिरिति तत्तत्स्थानाभिघातका ये यत्नास्ते आस्यान्तर्गततत्कार्यकारित्वादाभ्यन्तरा इत्युच्यन्ते। ततो यत्नविशेषणतत्प्रयत्नका इत्यर्थः। वक्ष्यमाणयुक्तेः। काकलकाधस्तद्गलविवरविकासादीन् स वायुः करोतीति तत्कारकाणां तेषां यत्नानामास्यबहिर्भूतदेशे कार्यकरत्वाद्बाह्यत्वमिति तत्वम्। नन्वेवमपि विवारत्वादिकं कुतोऽत आह। **गलेत्यादि।** काकलकाधस्तादित्यादिः। **विवार इति।** श्वासोत्पत्ति-वक्ष्यमाणध्वनिविशेषरूपनादत-

समीपदूरावस्थानात्मकत्वादित्त्यवधेयम्। तत्र ''वर्गाणां प्रथमद्वितीयाः शषसविसर्जनीय-जिह्वामूलीयोपध्मानीया यमौ च प्रथमद्वितीयौ विवृतकण्ठाः श्वासानुप्रदाना अघोषाः, वर्गयमानां प्रथमे अल्पप्राणाः, इतरे सर्वे महाप्राणाः, वर्गाणां तृतीयचतुर्था अन्तस्था इकारानुस्वारौ यमौ च तृतीयचतुर्थौ संवृतकण्ठा नादानुप्रदाना घोषवन्तो वर्गाणां तृतीया अन्तस्थाश्चाल्पप्राणाः, यथा तृतीयास्तथा पञ्चमा अनुनासिक्यमेषामपरो गुणः'' इति शिक्षिसु स्थितम्। संग्रहश्च — खयां यमाः खय१क१पौ विसर्गः शर एव च।

एते श्वासानुप्रदाना अघोषाश्च विवृण्वते॥

द्विशेषरूपघोषाल्पघोष - प्राणाल्पत्व - महत्वरूपकार्यकरत्वात्तत्तद्रूपत्वमपि बोध्यम्। मात्राकालि-कत्वादिरूपह्रस्वत्वादिकं तु वायोरल्पत्वमहत्वकृतमिति परम्परया नाभिप्रदेशात्प्रेरकयत्न एव कश्चिद्विलक्षणोऽल्पं वायुं प्रेरयति कश्चिदधिकमिति तस्य वायुप्रेरणारूपं कार्यमास्यबाह्यदेशमिति तदपि बाह्यमेव। अत एव 'अइउण्' सूत्रे भाष्ये - 'ह्रस्वत्वादिजनकयत्नस्यास्यविशेषणेन सवर्ण-संज्ञासूत्रेऽग्रहण'मित्युक्तम्। यद्यपि - 'एक एव यत्नः सर्वकार्यजनको वर्णनाशकश्चेति' संहिता-संज्ञासूत्रे भाष्ये उक्तं, तथापि तत्तत्कार्येणोपाधिना एकस्मिन्नपि भेदमारोप्य तथा व्यवहारः। उदात्तादिजनकयत्नस्याभ्यन्तरकार्यकरत्वेऽपि उदात्तादिशब्दैर्विना बोधितानां तेषां - 'अनुदात्त' इत्यनेनाविवक्षाबोधनात्सवर्णसंज्ञानुपयुक्तत्वात्स्वान्तरतम्यपरीक्षोपयुक्तत्वरूपसादृश्येन बाह्येषु गणनम्। एवञ्चोक्तरीत्या तत्तद्ह्रस्वत्वादेरानुनासिक्यस्य चोपलक्षणमिति बोध्यम्। तत्र एकादशानां मध्ये। **विवृतेति।** विवृतः कण्ठो यैरित्यर्थः। **प्रथमे** वर्णाः। **सर्वे इति।** वर्गयमानां द्वितीयचतुर्था शषसहा अयोगवाहाश्चेत्यर्थः। जिह्वामूलीययमादीनां स्थानबाह्यप्रयत्नकथनं तु स्वरूपनिर्णयाय, न तु सावर्ण्यान्तरतम्यपरीक्षादावुपयोगीति बोध्यम्। चेनाचां संग्रहः। एवमग्रेपि। 'सुपां सुलुगि'ति सूत्रे 'इकारस्यान्तर्यतो दकार' इति भाष्यात् घोषसंवारनादाल्पप्राणत्वमचाम्। घोषादित्रयानङ्गीकारे तदौ पर्यायेण स्याताम्, अल्पप्राणत्वानङ्गीकारे दधौ पर्यायेण स्याताम्। अचां घोषत्वं संहितासंज्ञासूत्रे भाष्येऽपि स्पष्टम्। नादो वर्णोत्पत्त्यनन्तरभावी अनुकरणरूपः शब्दः परावृत्तिसमये एव पर्येति। अनेन तेषामल्पप्राणत्वं बोधितम्। शरः शषसाः। अनुप्रदानं बाह्यप्रयत्नः। विवृते एव तस्मिन् पदोपरि वर्तमानाः श्वासा भवन्तीति तदनुप्रदानमित्याचक्षते, श्वासोऽनुप्रदीयते यैरित्यर्थसम्भवात् इति केचित्। **विवृण्वते कण्ठमिति।** तदभिव्यक्त्युत्तरं जायमाने

---

१. इयं न भाष्यपङ्क्तिः, किन्तु 'आस्ये येषां तुल्यो देशः प्रयत्नश्च, ते सवर्णसंज्ञा भवन्ति' इति भाष्यतात्पर्यविवरणपरकैयटार्थानुवादरूपा। म.भा.पृ.सं. ८७ प्र. भागः।

२. इदमपि 'येनैव प्रयत्नेनैको वर्ण उच्चार्यते विच्छिन्ने वर्णे उपसंहृत्य तमन्यगुपादाय द्वितीयः प्रयुज्यते' इति संहितासंज्ञासूत्रस्थभाष्यतात्पर्यरूपम्। म.भा.पृ.सं. ३०७। द्वितीयो भागः।

कण्ठमन्ये तु घोषाः स्युः संवृता नादभागिनः ।
अयुग्मा वर्गयमगा यणश्चाल्पासवःस्मृताः ।।

यद्यप्येते बाह्याः प्रयत्नाः सवर्णसंज्ञायामनुपयुक्तास्तथाप्यन्तरतमत्वपरीक्षायामुपयोक्ष्यन्ते इतीह आभ्यन्तरत्वविशेषपव्यावर्त्त्यतया व्युत्पादिताः ।

नन्विह सूत्रे प्रयत्नग्रहणं व्यर्थं, तद्धितान्तास्यशब्दबलादेव ताल्वादिस्थानस्य प्रयत्नस्य च लाभादिति चेत् ? न, प्रत्येकं व्यापारनिरासार्थमुभयोरुपादानात् । तेन स्थानप्रयत्नोभयसाम्ये सत्येव संज्ञा न त्वन्यतरसाम्येऽपि । एवं स्थिते यत्फलितं तत्स्पष्टत्वार्थमुपन्यस्यते । अष्टादश अवर्णाः परस्परं सवर्णाः, एवमिवर्णोवर्णौ । ऋकारा अष्टादश, लृवर्णास्तु द्वादशेति त्रिंशन्मिथः सवर्णाः, लृवर्णस्य दीर्घा न सन्तीत्युक्तत्वात्

कण्ठविवरविकासे तेषां कर्तृत्वविवक्षा बोध्या । विवार एषां प्रयत्न इति भावः । **अन्ये त्विति ।** वर्गतृतीयचतुर्थपञ्चमाः, तद्यमा, हकारानुस्वरौ, यरलवाश्चेत्यर्थः । यद्यपि खयादिषु घोषाघोषान्यतरप्रयत्नमात्रेणापि प्रक्रियांशानिर्वाहस्तथापि शिक्षानुरोधेनान्येषामुक्तिः । एतद्ध्वननार्थमेव शिक्षासु स्थितमिति प्रागुक्तम् । **वर्गेति ।** वर्गगा यमगाश्चेत्यर्थः । **अल्पेति ।** अल्पप्राणा इत्यर्थः, यत एतदुच्चारणे प्राणानामल्पत्वमिव भवति । **अनुपेति ।** तुल्यस्यसूत्रे प्रशब्देनाग्रहणात् । उपयुक्तत्वे हि शछयोरपि सावर्ण्यं स्यादिति भावः । तत्परीक्षा च घोषवत इत्यादिना तत्र तत्र स्फुटीभविष्यति ।।

बलादेवेति । प्रागुक्तरीत्या यावदास्यभवतुल्यत्वविवक्षणेन तस्याप्यास्यभवत्वेन लाघवमूलकाद्विनिगमनाविरहादिति भावः । **प्रत्येकेति ।** प्रत्येकनिरूपितसादृश्याग्रहणनिरासार्थमित्यर्थः । **साम्येऽपीति ।** किञ्च ह्रस्वदीर्घयोः सावर्ण्यानापत्तेस्तयोर्जनकानामास्यभवानां वायुसंयोगानामपि तुल्यत्वात् । तस्मादास्यभवानां कण्ठादीनामेव ग्रहणमिति बोधनाय तत्सार्थक्यात् इत्यपि बोध्यम् । एतेन ज्ञापकेनापि प्रत्येकव्यापारनिरासादिदं चिन्त्यमित्यपास्तम् ।

४.३२ अकारादिभेदनिरूपणम् - कङादीनां सावर्ण्यविचारः

एवं स्थिते विशेषणद्वयघटिते सूत्रे स्थिते । **अष्टादशेति ।** यद्यपीदं न व्यक्तिपक्षे, तासामानन्त्यात् । नापि जातिपक्षे, तस्या एकत्वात् । तथापि ह्रस्वत्वादीनां तत्तत्समानाधिकरणोदात्तत्वानुनासिकत्वादीनां च भेदमाश्रित्याष्टदशधर्मवन्तोऽकारजातीया इत्यर्थ इति बोध्यम् । एवमग्रेऽपि । द्वादशत्वे हेतुमाह । **लृवर्णेति ।** विवृतस्येत्यर्थः । तेन लृति लृ वेति

ऋलृवर्णयोर्मिथः सावर्ण्यस्योपसंख्यानाच्च। एचस्तु द्वादश मिथः सवर्णाः, न तु एकारैकारौ ओकारौकारौ वा मिथःसवर्णौ। यथा चैतत्तथा ''अइउण्'' (मा०सू० १) इत्यत्रैव प्रतिपादितम्। अकारेपाप्येचां न सावर्ण्यं प्रयत्नभेदादिति इहैव सूत्रे भाष्ये स्पष्टम्। अतएव एदैतोरपि शकारेप न सावर्ण्यमिति तेषां ''नाज्झलौ'' (पा०सू० १-१-११०) इति सूत्रे उदाहरपत्वं नास्ति। न चात्र स्थानभेदेन निर्वाहः एचामकारेप सह कण्ठस्थानसाम्यात्, एदैतोः शकारेप सह तालुस्थानसाम्यात्। नहि यावत्स्थानसाम्यं विवक्षितम्, ञमङणनानां स्ववर्ग्यैः सह असावर्ण्यापत्तेः यवलानां सानुनासिक-निरनुनासिकानामसावर्ण्यापत्तेश्च। नहि निरनुनासिकानामपि नासिकास्थानम्, येन सर्वसाम्यं स्यात्। ननु तद्धितान्तास्यशब्दबलात्तालवादिसाम्यमात्रं लभ्यते। ओष्ठात्प्रभृति प्राक्काकलकाद्धि आस्यम्। काकलकं च ग्रीवाया उन्नतप्रदेशः यं कण्ठमणिरित्याचक्षते।

विधेयस्येषत्स्पृष्टस्य दीर्घत्वेऽपि न क्षतिः। **इत्युक्तत्वादिति।** वृद्धेरिति भावः। अत एव तुल्यास्येति सूत्रे भाष्ये लृति सवर्णे इत्यनेन पक्षे द्विलकारकाभावेऽ**कः सवर्णे** इति दीर्घत्वे होतृकार इति ऋकारघटितप्रयोगः सङ्गच्छते। त्रिंशतो ग्रहणं सूत्रतो न लब्धमत आह। **ऋलृवर्णेति। द्वादश द्वादशेति।** त एव प्रत्येकं मिथ इत्यर्थः। अत एव तद्भावर्त्यमाह। **न त्विति।** वा समुच्चये। क्वचित् द्वादशेत्येव पाठस्तत्राप्युक्त एवार्थः। तेन चतुर्विंशतिर्न मिथः सवर्ण इति तात्पर्यम्। तेषां द्वादशत्वं च ह्रस्वाभावकृतम्। इदं च **एओङ्सूत्रे** भाष्ये स्पष्टम्। गानरोदनादौ चतुर्मात्राधर्ममात्रा-दीनामुपलम्भेऽपि शास्त्रीयकार्ये उपयोगाभावाल्लोके प्रयोगेषु अत्र योगाच्च नोक्ता ते। अत एवानुदात्ततरस्याप्यनुक्तिः। एकश्रुतेः स्वरान्तरत्वे इदमुपलक्षणम्। तस्या लोकेऽपि सत्वात्। ननु स्थानप्रयत्नैक्यसत्वात्सूत्रमते कुतो न तयोः सावर्ण्यं मिथोऽत आह। **यथेति।** गुणवृद्धिसंज्ञाविध्योः प्रत्याहारद्वयग्रहणवैयर्थ्यात् 'प्लुतावैचः' 'एचो प्रगृह्ये'त्यत्र तद्ग्रहणवैयर्थ्याच्चेत्यर्थः। प्रयत्नभेदादिति तु तत्वम्, तदेव ध्वनयन्नाह। **अकारेपेति।** शिक्षोक्तरीत्या भाष्यमते इति भावः। **अत एव** भाष्यमतोक्तरीत्या प्रत्यत्नभेदादेव। अपिनेकारपरिग्रहः। तेषां एऐशानाम्। एकदेशी आह। **न चात्रेति।** उभयत्रेत्यर्थः। तस्य प्रथमोपस्थितत्वात् यावत्स्थानैक्यस्य विवक्षितत्वादित्युक्तम्। यक्षानुरूप इति न्यायेन कृष्णाद्यनुरोधेनैव समाधत्ते। **एचामित्यादिना।** ननूक्तरीत्या नात आह। **न हीति।** यदिति शेषः। **स्वेति।** स्वस्ववर्ग्यैरित्यर्थः। दोषान्तरमाह। **यवलानामिति।** मिथ इति शेषः। तदेवाह। **न हीति।** अपिः तत्समुच्चये। स्थानमेव तत्र निर्वाहं दृढयन् तथाविवक्षायां दत्तदोषद्वयोद्धाराय शङ्कते। **नन्विति। कण्ठमणिरिति।** वादीयकथनानुकरणम्। आचक्षत इति

तत्कथं नासिकास्थानभेदेनासवर्णत्वमापाद्यत इति चेत् ? नासिका हि न बाह्या वर्णोत्पत्तौ निमित्तम्, तत्र जिह्वाग्रादिव्यापारविरहात् किन्तु अन्तरास्ये विततं चर्मास्ति पपव-चर्मवत्, तत्संबद्धो रेखाविशेषो नासिका, सैव वर्णोत्पत्तौ निमित्तमिति सिद्धान्तात्। तस्याश्च ओष्ठादिभ्योऽविशेषात् वर्ग्यो वर्ग्येण सवर्णः तुल्यास्यप्रयत्नत्वात्। रेफस्य रेफ

पाठः। नासिका तु तद्बहिर्भूता चर्मपुटरूपेति तत्कृतभेदेऽपि न दोषोऽत एव मात्रपदोक्तिस्तदाह। **तत्कथमिति।** चेन्नेति पाठः। अत एव तत्र हेतुमाह। **नासिकेति।** हि यतः। तत्र बहिर्भूतायां तस्यां तस्यानुभवसिद्धत्वेनावश्यकत्वस्य प्रागुक्तत्वात्। **अन्तरिति** पृथक् पदम्। **आस्ये** इत्यवयविनोऽधिकरणत्वविवक्षया सप्तमी वृक्षे शाखेति वत्। पणचो वाद्यविशेषः। एवेनातथाभूत-तद्व्यवच्छेदः। **तस्याश्चेति।** जिह्वाग्रादिसम्बन्धेन तदन्तर्गतस्थानत्वस्य तुल्यत्वमिति तदा विवक्षा दुष्करेति न तेन निर्वाह इति भावः। वस्तुतस्तु कण्ठादीनामिव अनुनासिकाकारादीनां नासिकाया अपि करणत्वमेव, स्थानतत्वव्यवहारस्तु आरोपकृतः। स्पृष्टतादौ तु करणत्वव्यवहार एव विवारादौ गुणत्वव्यवहारः। अत एवानुनासिक्यस्य गुणत्वव्यवहारो भाष्ये। अत एव तेषां तु नासिकास्थाने चोक्तम्। उहात्तत्वादीनां गुणत्वव्यवहारस्तु सावर्ण्यानुपयुक्तत्वान्तरतम्यपरीक्षोपयोगित्वरूप-सादृश्येनेति प्रागुक्तमेव। ङादीनां तु प्रागुक्तरीत्योभयपस्थानकत्वं शिक्षायाम्, तेन तेषामपि संग्रहः। अत एव प्रातिशाख्याविरोधः। एवञ्च प्रागुक्तरीत्या यावत्स्थानसाम्यमेव विवक्षितम्। अत एव भाष्ये एचोः सावर्ण्यमाशंक्य नैतौ तुल्यस्थानाविति समाहितम्। अत एव च वलयोर्न सावर्ण्यम्, अन्यथा तद्वानासामित्यादौ तोर्लित्वस्यापत्तिः। अत एव च प्रकृतसूत्रभाष्यमपि सङ्गच्छते। अत एव कङयोः सावर्ण्ये नानुपपत्तिः। **आस्ये तुल्यदेशप्रयत्न**मिति वार्तिकव्याख्यावसरे किमास्योपादाने प्रयोजनमित्युक्त्वा तद्व्यावर्त्यत्वेन बाह्यप्रयत्नान् प्रदर्श्य 'यथा तृतीयास्तथा पञ्चमाः, आनुनासिक्य-मेषामधिको गुण' इति भाष्येण तस्य बाह्यप्रयत्नत्वोक्त्याऽत्र सूत्रे नासिकाया आस्यशब्देन तत्रत्यप्रयत्नस्य च प्रयत्नशब्देनाग्रहणबोधनात्। एवञ्च कङादीनां नासिकारूपदेशभेदादप्राप्त-सावर्ण्यसिद्धये देशविशेषणमप्यास्यग्रहणमावश्यकमिति गूढाशयेन तेन भाष्येण ध्वनितम्। नासिकाया आस्यान्तर्गत्वेऽपि मुखेति सूत्रे नासिकातिरिक्तावयवकमुखस्यैव ग्रहणस्य वक्ष्यमाणत्वेन तत्साहचर्यादत्राप्यास्यपदेन तादृशस्यैव ग्रहणं बोध्यम्। अन्यथा स्थाने तत्कथनवैयर्थ्यापत्तिः। आस्यग्रहणव्यावर्त्यानां सावर्ण्यानुपयुक्तानां प्रदर्शनमेव हि तत्र प्रक्रान्तम्। न चेदं प्रयत्नविशेषणास्यग्रहणं व्यावर्त्यमेवास्तु, अनुनासिकयकारादीनां आदिभिः सावर्ण्यं च व्यावर्त्यम्, तत्फलं च तञ्जुडुत्वे तन्नमतीत्यादौ 'अनुस्वारस्य ययी'त्यनुवर्त्तमाने **वापदान्ते**त्यनेन

एव सवर्णः, एवमूष्मणामपि ऊष्माण एव सवर्णा न त्वन्ये, तुल्यास्यप्रयत्नात्वाभावात्। शषसहानां यथाक्रमम् इकारऋकारलृकाराकाराः सूत्रकारमते यद्यपि तुल्यास्यप्रयत्नास्तथापि न सवर्णाः ''नाज्झलौ'' (पा०सू० १-१-११०) इति निषेधात्। भाष्यकारमते तु प्रयत्नभेद एवेति वक्ष्यते।

इह स्थानभेदादप्राप्तां सवर्णसंज्ञां विधातुं वार्त्तिकमारभ्यते – ''ऋकारलृकारयोः

यकारलकारयोरनुनासिकयोरभाव इति वाच्यम्। अनुस्वारस्य नासिकास्थानत्वेन स्थानतोऽन्तरतमयोर्ञनयोरेव प्रवृत्तेः। अनुनासिक्यादीनां तु उक्तरीत्या न नासिकास्थानमित्यदोषात्। इदमेव ध्वनयितुं गुण इत्युक्तम्। अधिक**मुद्योते**[१] व्यक्तम्। किञ्च नासिकाऽऽस्यबाह्येति वदतां मते तद्ग्रहणाभावात्। युक्तं चेदमेव। अत एव मुखेति सूत्रे मुखं च नासिका चेति, मुखद्वितीया नासिकेति च विग्रहप्रदर्शनं भाष्ये[२]। न ह्यवयवावयविविषये एवंप्रयोगः सचेतसाम्। सहस्तो देवदत्त इत्यादौ तु विद्यामानवाची सहशब्दः। अत एव च नासिकाग्रहणाभावे कचटतपानामेव प्रसज्येतेति भाष्ये एवशब्दः सङ्गच्छते। अन्यथा यमादीनां ङादीनां च मुखवचनत्वात्तदसङ्गतिः स्पष्टैव। आस्यानन्तर्गतत्वे तु न दोषः, मुखमात्रवचनत्वाभावात्। प्रासादवासिन्यायप्रदर्शकभाष्येणापि ध्वनितमेतत्। कैयटोक्तास्यान्तर्गतत्वपक्षे तु सूत्रे मुखपदं मुखावयवपरम्, ब्राह्मणवसिष्ठन्यायेन च नासिकान्यावयवग्रहणम्। एवकारश्चाप्यर्थः। दृष्टान्तोऽप्येकांशेन बोध्यः। एतदभिप्रायेणैव पूर्वमज [३]..... घटित युक्तम् इति बोध्यम्। उभयवचनेषु जिह्वाग्रादिव्यापारस्यैकांशे सत्वेन न दोषः। शुद्धनासिकावचनेषु तु तं विनापि तदुत्पत्तिस्तत्रापि तत्स [३].... वेति बोध्यमिति न प्रागुक्तदोषद्वयमिति तद्विवक्षायाः सुस्थत्वेन तेन तत्र निर्वाह इति बोध्यम्। एवमक्षु उक्त्वा हल्षु आह। **वर्ग्य इति। रेफस्येति।** व्यक्तिभेदादेरिति भावः। अत एव रेफोष्मणामिति भाष्यं सङ्गच्छते। शङ्कते। **शषेति। वक्ष्यत इति।** नाज्झलावित्यत्रेति भावः।

४.३३ 'ऋकारलृकारयोः सवर्णविधि' रिति वार्तिकार्थविचारः

सङ्गतिमाह। **इहेति।** प्रकृतसूत्रे इत्यर्थः। **ऋकारलृकारेति।** 'ऋत्यक' इति प्रकृतिभावः।

---

१. तुल्यास्यसूत्रे 'प्रयत्नविशेषणमास्योपादानम्' इति भाष्यव्याख्यावसरे व्यक्तम्। म.भा.प्र.उ.पृ.सं. २४२।

२. म.भा.पृ.सं. २३५ (प्रथमो भागः) ३. अत्र ग्रन्थः त्रुटितः।

सवर्णविधिः'' (का० वा०) इति। होतृलृकारः होतृकारः। उभया-न्तरतमश्च दीर्घो न सम्भवतीति परिशेषादृकारः।

स्यादेतत्, ''अकः सवर्णे दीर्घः'' (पा०सू० ६-१-१०१) इत्यत्र ''ऋति ऋ वा'' वचनं ''लृति लृ वा'' वचनमिति वक्ष्यति। तस्यायमर्थः - अकः सवर्णे ऋति परे पूर्वपरयोः स्थाने वा ऋ अयमादेशो भवति। द्विमात्रोऽयम्। मध्ये द्वौ रेफौ, तयोरेका मात्रा, अभितोऽज्भक्तंरपरा। ईषत्स्पृष्टश्चायम्। तत्र प्रयत्नभेदादृकारेणाग्रहणादनच्त्वा-दीर्घसंज्ञाया अभावादप्राप्तोऽयं विधीयते ''लृति लृ वा'' (का० वा०) इति। अयमपि द्विमात्रः, ईषत्स्पृष्टश्च। मध्ये द्वौ लकारौ तयोरेका मात्रा, अभितोज्भक्तेरपरा। पूर्ववदप्राप्तो विधीयते। तत्र वावचनमिति वाशब्दो दीर्घसमुच्चयार्थो भविष्यति।

लक्ष्ये लृकारशब्दो देवतावाचीत्येके। **तस्येति।** वचनद्वयस्येत्यर्थः। अनुवृत्तेराह। **अक इति। द्विमात्र इति।** अत एव 'अकः सवर्णे इत्यनेनैव वक्ष्यमाणरीत्या विकल्पफलसिद्धिमाश्रित्य तद्वचनद्वयमत्र भाष्ये प्रत्याख्यातम्। तत्वमुपपादयति। **मध्ये इति। द्वौ रेफाविति।** अत्रापीदमेव भाष्यं मानम्। द्विरेफत्वे हि रेफद्वयवति स्थानिन्ययं, लकारवत्यन्य इति व्यवस्था सिद्ध्यति। **अभित इति।** सर्वत इत्यर्थः। द्वौ रेफावित्यनुषज्यते। तच्च द्वितीयान्तम्। अभितः पदयोगात्। अत एवाह। **अज्भक्तेरिति।** अन्यथा द्विवचनौचित्यम्। एओङ्सूत्रे भाष्ये मातृणामित्यादौ णत्वादिसिद्ध्यर्थमवश्याङ्गीकार्ये 'वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते' इति पक्षे - प्रलूय खड्गाभिर्वाचा तरतीत्यादौ तुगैस्द्ध्यज्लक्षणानां शङ्काया दीर्घादिति तुग्विधानसामर्थ्य - तपरकरणसामर्थ्य - नौद्ध्यच इति सूत्रस्थनौग्रहण सामर्थ्यैर्भेदेनाप्रतिभासमानेषु वर्णावयवेषु अवयवसदृशस्वतन्त्रवर्णा-श्रयकार्याभावज्ञापनरूपसमाधानस्य च करणवत् - प्रात ऋतमित्यत्र **रो री**त्यस्य तद् लृकार इत्यादौ **तोर्ली**त्यस्य च शङ्कासमाधानयोरकरणेन 'यत्तद्रेफात्परं भक्ते'रित्यग्रिमतत्रत्यभाष्येण च **ऋलृक्**सूत्रस्थयोरर्धमात्राज्भागस्याभितः क्लृप्तत्वेन तथैवौचित्यात्। 'दीर्घादि'त्यस्य यथा नियामकत्वं तथा स्पष्टं छायायाम्। 'अचो स्पृष्टा यणस्त्वीषदि'ति शिक्षायां स्पृष्टमित्यन्यत्र स्पृष्टं तस्येषत्स्पृष्टं स्वराणामिति भावः। **इर्षदिति।** उपस्थितरेफीयप्रयत्नत्यागे मानाभावात् विवृतत्वे हि विवृतऋकारलृकाराभ्यां तयोरपि ग्रहणेऽकः सवर्णे इत्यनेनैव सिद्धौ वार्तिकद्वयवैयर्थ्यापत्तेः। **तत्र** ईषत्स्पृष्टत्वे सति। उक्तभाष्यादेवाह। **द्विमात्र इति।** उक्तहेतोरेवाह। **ईषदिति।** प्राग्वदाह। **मध्ये इति। द्वौ लकाराविति।** हल्द्वयवत्पूर्वसाहचर्यादिति भावः। **विधीयते इति।** इतीति शेषः। **अत्रेदं**

वा स्याद्विकल्पोपमयोरेवार्थेऽपि समुच्चये। इत्यभिधानात्। तेनाप्राप्त एव दीर्घो भविष्यति। तत्किं सवर्णसंज्ञया ? ननु ''लृति लृवा'' इत्यत्र सवर्णे इत्यनुवर्त्तते न वा ? आद्ये 'होतृलृकार' इत्यत्र ऋलृवर्णयोः सवर्णसंज्ञाविधानं विना नेष्टसिद्धिः, अन्त्ये 'दध्लृकारो' 'मध्लृकार' इत्यादावतिप्रसङ्ग इति चेत् ? न, प्रथमवार्त्तिके ''ऋति'' इत्यपनीय 'ऋतः' इति पञ्चम्यन्तपाठेनैव सर्वसामञ्जस्यात्। सवर्ण इति च पूर्ववार्त्तिकेऽनुवर्त्तते। तेन 'धात्रंशः' इत्यादौ नातिप्रसङ्ग। द्वितीयवार्त्तिके तु सवर्ण इति निवृत्तम्। ऋत इत्यनुवर्त्तते। तस्माद् ''अकः सवर्णेः'' (पा०सू० ६-१-१०१) इत्यत्रावश्यकर्त्तव्येन वचनद्वयेनैव सकलनिर्वाहादृकारलृकारयोः सवर्णविधिरितीहत्यं वार्त्तिकं व्यर्थमिति।

मैवम्, इहत्यमेकं वार्त्तिकमाश्रित्य षाष्ठवचनद्वयप्रत्याख्यानस्यैव न्याय्यत्वात्। तथाहि, तद्वचनद्वयं कुर्वताऽपि रेफद्वयलकारद्वयगर्भयोस्तद्विधेययोरच्त्वं तावदेष्टव्यम्। तन्निर्वाहार्थं वर्णसमाम्नाये तौ पठनीयौ। अन्यथा हि विधानमात्रमनयोः स्यान्न त्वच्कार्यं प्लुतः। तद्विधाने हि ''अचश्च'' (पा०सू० १-२-२८) इति परिभाषया 'अचः' इत्युप-

---

तत्वम्। ह्रस्वऋकारद्वयस्थानिकैकादेशे एव पूर्वस्य साधुत्वं, ह्रस्वऋकारलृकारस्थानिकैकादेशे एवोत्तरस्य साधुत्वम्। अत एव लृति न ऋकारो, नाप्यृति लृकारः। अत एव वार्तिके ऋतीति तपरकरणमुत्तरवार्तिके लृतीति च चरितार्थम्। अत्र भाष्ये 'यदेतदृतीति एतदृत इति वक्ष्यामी'त्येतद्वचनाश्रयेण तयोः सावर्ण्यं न कार्यमिति शङ्कोक्तं च सङ्गच्छते इति। प्रकृतशङ्कामाह। **तत्रेति।** वक्ष्यमाणवार्तिकद्वये इत्यर्थः। वावचनमित्यादि जातावेकवचनम्। विकल्पार्थकत्वसत्वादाह। **भवीति। सवर्णेति।** वार्तिकोक्तयेत्यर्थः। आद्ये एतत्फलस्य दुर्वचत्वादाह। **लृतीति। अतिप्रसङ्ग इति।** अत एवाद्ये दध्लृकारादावनतिप्रसङ्गाय तदनुवर्त्तितम्। नन्वेवमाद्यवार्तिकातिप्रसङ्गापत्तिरिति शङ्कानिरासायाह। **सवर्णे इतीति।** चस्त्वर्थे। पूर्वपक्षमुपसंहरति। **तस्मादिति।** अत्रत्यभाष्यसिद्धान्तमाह। **इहत्यमिति। एकमि**त्यनेन लाघवं सूचितम्। अत एव तत्र गौरवसूचकमाह। **द्वयेति।** एवन्याय्यत्वाभ्यां सूचितं प्रतिपादयति। **तथा हीत्यादिना।** अपिना सावर्ण्यकृत्परिग्रहः। **ताविति।** ऋलृक्सूत्रे पठितविवृताभ्यां पूर्वमग्रे वा ईषत्स्पृष्टौ पठनीयाविति्यर्थः। अत एव तयोर्न रपरत्वम्। अयोगवाहत्वमनयोरिति **प्रागुक्तकौस्तुभोक्तं** तु चिन्त्यमेवेति प्रागेवोक्तम्। अत एव मिथो विरोधो न। अत्र हेतुमाह। **अन्यथेति।** तत्रापाठे इत्यर्थः। हि यतः। **प्लुत इति।** प्लुतसंज्ञा तयोः स्थाने प्लुतश्चेत्यर्थः। तत्राद्ये हेतोः स्पष्टत्वात्

तिष्ठते । ननु ईषत्स्पृष्टस्यानच्त्वान्मा भूत् प्लुतः, विवृतस्य तु ऋकारस्याच्त्वेन प्लुतः सिद्ध एवेति चेत् ? सत्यम् । विवृतः प्लुतः सिद्धः, ईषत्स्पृष्टौ तु प्लुतौ रेफद्वयलकारद्वयगर्भौ न सिध्यतः । अत एवाच्संज्ञामात्रेणापि न निस्तारः, ग्रहणकशास्त्रप्रवृत्तेस्तावन्मात्रेणा-निर्वाहात् किन्त्वण्सु पाठ एव कर्त्तव्य इत्युक्तम् । सति त्वण्सु पाठे ताभ्यां त्रिमात्रयोरपि ग्रहणात्प्लुतसंज्ञायां सत्यां पक्षे ईषत्स्पृष्टौ प्लुतौ भवतः । एवं स्थिते षाष्ठं वचनद्वयं माऽस्तु, तद्विधेययोरपि दीर्घतया ''अकः सवर्णे'' (पा०सू० ६-१-१०१) इत्यनेनैव सिद्धेः । ननु 'स्थानेन्तरतमपरिभाषया विवृतस्य स्थानिनो विवृतावेव दीर्घौ स्यातां न त्वीषत्स्पृष्टाविति चेत् ? न, रेफद्वययुक्त एवादेशः 'सुसदृशः' इत्यपि हि सम्भवति । तथा च किं रेफद्वययुक्तत्वमादर्त्तव्यं, किं वा विवृतत्वमित्यत्र विनिगमकाभावेन पर्यायेणोभयप्रवृत्तौ सिषाधयिषितस्य रूपद्वयस्य निर्वाहात् । लृकारेऽपि कदाचिदृकारान्तरतमो विवृतदीर्घः कदाचिद् लृकारान्तरतमो लकारद्वयगर्भ ईषत्स्पृष्ट इति सकलेष्टसिद्धेः । तदेवं षाष्ठं वचनद्वयं न कर्त्तव्यमिति स्थितम् ।

ननु तदेवास्तु संज्ञाविधानं तु मास्त्विति चेत् ? न, वचनद्वयारम्भे गौरवस्य स्पष्टत्वात् । किञ्च, संज्ञाभावे ''ऋत्यकः'' (पा०सू० ६-२-१२८) ''उपसर्गदृति''

हेतुमाह । **तदिति ।** हि यतः । पाठं द्रढयति । **अत एवेति ।** तदसिद्धत्वादेवेत्यर्थः, इत्युक्तमित्यत्रान्वयः । अको इति शेषः । **संज्ञेति ।** वाचनिकेनेत्यर्थः । मात्रपदेन पाठव्यवच्छेदः । **अण्स्विति ।** ग्रहणकशास्त्रघटकीभूताण्सु अइउण्सूत्रानन्तरमित्यर्थः । तदुपपादयति । **सति त्विति । एवं स्थिते** तत्र पाठावश्यकत्वे स्थिते । **विवृतस्येति** जातावेकवचनम् । एवमग्रेऽपि । सुसदृशत्वादेवैवोक्तिः । अपिः विवृतसमुच्चये । हि यतः । **रेफेति ।** गुणकृतान्तर्याश्रयणेनेति भावः । द्वितीये निर्वाहमाह । **लृकारेऽपीति । विवृतेति ।** रेफवानित्यपि बोध्यम् । तथा च विवृतत्व-रेफवत्वयोः साम्येन सदर्थः । **लृकारान्तेति ।** लृकारवतान्तर्येणेति भावः । उपसंहरति । **तदेवमिति ।** ननु होतृकारादौ पक्षद्वयेऽपि निर्वाहेणान्यतरपक्षखण्डनस्य भाष्यात्स्पष्टं प्रतीयमानत्वेन कथं निश्चयोक्तिरित्याशयेनाह । **नन्विति ।** तुरेवार्थे । अण्सु पाठस्य लृवर्णस्य लपरत्ववचनस्य च तुल्यत्वादाह । **वचनद्वयेति ।** मध्यभाष्यानुरोधेन होतृकारादिरूपपञ्चकसिद्धेः पक्षद्वये तुल्यत्वेऽप्यन्यत्र सावर्ण्यं विना सर्वथा निर्वाहो नेत्याह । **किञ्चेति । संज्ञेति ।** सवर्णसंज्ञाया अभावे इत्यर्थः । यत इत्यादिः । इदमेव भगवतो गूढाभिसन्धेस्तात्पर्यविषयभूतम् । यथा चैतत्तथा प्रतिपादितं

(पा०सू० ६-१-९२) ''उरण्परः'' (पा०सू० १-१-५१) इत्यादिषु ऋकारेण लृकार-ग्रहणं न स्यात्। न चैवं सिद्धान्तेऽपि 'तवल्कारः' इत्यादौ रपरत्वप्रसङ्गः रप्रत्याहार-परत्वस्य वक्ष्यमापतया लपरत्वसिद्धेः। ऋदिताम्लृदितां च धातूनामनुबन्धकार्येषु सङ्करस्तु न भवति धातूपदेशे पृथगनुबन्धकरणसामर्थ्यात्, विधिवाक्येष्वपि पृथगनुवादसामर्थ्यात्। अन्यथा हि सर्वान् ऋदित एव लृदित एव वा पठित्वा विधावपि तेनैव रूपेणानुवदत्। सम्भवत्यैकरूप्ये वैरूप्याश्रयणायोगात्।

नाज्झलौ (पा०सू० १-१-१०)। अज्झलौ मिथः सवर्णौ न स्तः। अकारहकारयोरिकारञ्चकारयो ऋकारषकारयोर्लृकारसकारयोश्चेति स्थलचतुष्टये पूर्वसूत्रेण प्राप्तं सावर्ण्यमनेन निषिध्यते। तेन 'आनडुहं चर्म' 'वैपाञ्चो मत्स्यः' इत्यत्र ''यस्येति च'' (पा०सू० ६-४-१३८) इति हकारञ्चकारयोर्लोपो न। अन्यथा हि 'यस्य' इत्यनेन

रप्रत्याहारखण्डने[1]। विस्तरस्तु तत एव बोध्यः। **न चैवं** 'उरणि'त्यतो तेन तद्ग्रहणायैत-दावश्यकत्वे। उक्ताशयेनैवाह। **सिद्धान्तेऽपीति।** अपिस्तत्पक्षसमुच्चये। अत्रत्यकैयटाद्यनुरोधेन समाधत्ते। **रप्रत्येति।** वस्तुत उभयथाऽऽवश्यकवचनेनैव तत्सिद्धिः, तस्यासत्वादित्यन्यत्र स्पष्टं, स्पष्टतरं च तत्रेति बोध्यम्। सिद्धान्ते एव दोषान्तरमुद्धरति। **ऋदितामिति।** कार्येष्विति विषयसप्तमी। हेत्वन्तरमाह। **विधीति।** अपिश्चार्थे चरमे योज्यः। उभयत्राह। **अन्यथेति।** साङ्कर्यस्येष्टत्वे इत्यर्थः। हि यतः। विनिगमनाविरहादाह। **लृदित इति।** अपिः प्रागुक्तस्यैव समुच्चये। तत्र विनिगमकमाह। **सम्भवेति।** न चानृत इति प्रतिषेधापत्तिरेवमपि क्लृप्तशिखादाविति वाच्यम्। पृथगनुबन्धत्वकरणेन तस्य नित्यत्वस्यैव कल्पनात् दृष्टानुरोधेन व्यवस्था। तस्मात् सावर्ण्याङ्गीकारे न कोऽपि दोषः। अधिकं तत एव बोध्यम्॥

४.३४ नाज्झलौ सूत्रावश्यकतानिरूपणम्

नाज्झलौ। कैयटे न्यूनतां ध्वनयन् सूत्रतात्पर्यार्थमाह। **अकारेत्यादि।** इदमुपलक्षणं चेनान्यसमुच्चय इति वा भ्रमनिरासायाह। **इति स्थलचेति। प्राप्तमिति।** तुल्यस्थानप्रयत्नादिति भावः। तस्य क्रमेण फलान्याह। **तेनेत्यादि। लोपो नेति।** इदमुपलक्षणं दण्डहस्तादौ सवर्णदीर्घाद्यभावस्यापि। उक्तमेव व्यक्तिरेकमुखेन द्रढयति। **अन्यथा हीति।** पूर्वत्रानुक्तमुच्यत इति

---

१. रप्र.ख.पृ.सं. ९।

दीर्घापामिव हकारशकारयोरपि ग्रहणं स्यात्। तथा 'दण्डहस्तः' 'दधिशीतं' 'कर्तृषट्-कम्' इत्यादौ सवर्णदीर्घः स्यात्। 'दधिसान्द्रम्' इत्यादौ यणादेशश्च स्यात्। इहाज्झलौ कस्यापि न सवर्णौ स्त इति वाक्यार्थो न ग्राह्यः संज्ञारम्भवैयर्थ्यापत्तेः। विहितप्रति-षिद्धत्वेन विकल्पे तु लाघवात् ''तुल्यास्यप्रयत्नं वा'' इत्येव सूत्रयेत्। नाप्यचामज्भिर्हलां हल्भिः सावर्ण्यं निषिध्यते। ''नाज्झलौ'' (पा०सू० २-२-२०) इत्यत्रैव सूत्रे सवर्ण-दीर्घस्य ''झयो हः'' (पा०सू० ८-४-६२) इति पूर्वसवर्णादेशस्य च निर्देशात्। ननु झलेवात्र निर्दिष्टो न तु हल्, तावतैवेष्टसिद्धेरिति चेत्तर्हि दीर्घानिर्देश एव ज्ञापकोऽस्तु। तेन ह्यचामज्भिः सावर्ण्यमनिषिद्धमिति ज्ञापिते परिशेषादज्झलोर्मिथो निषेध एव पर्यवस्यति। ''झरो झरि सवर्णे'' (पा०सू० ८-४-६५) इति ज्ञापकाच्च। यत्तु नाण्शलावित्येव कुतो न सूत्रितमिति। तन्न, 'कर्तृषट्कं' 'दधिसान्द्रम्' इत्याद्यसिद्ध्यापत्तेः, ऋलृकारयो-रनण्त्वात् ; ग्रहणकसूत्रातिरिक्ते पूर्व एवापित्युक्तत्वात्। अस्तु वा परेण, तथाप्यजपेक्षया व्यक्तिगौरवमेव स्यादित्यज्ग्रहणमपनीयाण्ग्रहणं क्रियतामिति शङ्कया गर्भस्रात्रेपैव गतार्थत्वात्। शलंशे तु व्यक्तिलाघवे सत्यपि वर्णोच्चारणे विशेषो नास्तीत्येवोत्तरम्। वस्तुतस्तु ''नाक्शलौ'' इत्येव सूत्रयितुमुचितम्।

सूचयन्नाह। **तथेति।** चेन ग्रामे षष्टः ग्रामे सरतीत्यादावयादेशस्य पयस्वित्यादौ **आदेशप्रे**ति षत्वस्य च परिग्रहः। उक्तार्थे दार्ढ्याय सम्भावितार्थान् निराचष्टे। **इहेत्यादिना। न हि नेति।** ग्रहणाग्रहणवदिति भावः। एव प्रत्यासत्तौ। उभयक्रमेण ज्ञापकद्वयमाह। **नाज्झलाविति। पूर्वेति।** झकारेत्यर्थः। द्वितीयज्ञापकं खण्डयति। **नन्विति। दीर्घेति।** सवर्णेत्यादिः। ननु एवं कथं द्वितीयार्थनिरासोऽत आह। **तेन हीति। पर्यवेति।** अन्यथा युक्तिवैयर्थ्यमेव स्यादिति भावः। तत्र ज्ञापकमप्याह। **झरो झरीति।** तथा सत्युक्तनियमाभावादाह। **अस्तु वेति।** मात्रगौरवभयादाह। **व्यक्तीति।** नन्वेवमपि नाक्शलावित्येव कुतो न कृतमत आह। **शलंशे त्विति।** प्राचोक्तसिद्धान्तमनुवदति। **वस्तुतस्त्विति।** वस्तुतस्तु नेदं युक्तम्, एकारादेः शुद्धतालव्यत्वादिमते एकारशकारादेः सावर्ण्यापत्तेः। किञ्च यत्किञ्चित्स्थानसाम्यमिति मते हैजादेर्मिथः सावर्ण्याद्यापत्त्या गोभ्यां गोदुहावित्यादौ ढत्वाद्यापत्या तथावक्तुमशक्यत्वात्। एतेन नाक्शरावित्येव सुवचमिति [1]**रत्नाकरो**क्तमपास्तम्, हकाराद्यसंग्रहाच्च। प्रकारान्तरेण वारणं तु गौरवपराहतमिति बोध्यम्। नाच्शलावित्येव सूत्रयितुमुचितमिति केचित्। तन्न। तथा सति प्रागुक्तापवाक्यार्थत्वापत्तेः।

---

१. सि.कौ.रत्न.पृ.सं. १४।

स्यादेतत्, शरां शर्भिरपि सावर्ण्यं निषिद्ध्येत। ते हीकारादिभिर्गृहीतत्वादच्संज्ञकाः हल्भूपदेशाद्धलश्च। न चास्मादेव निषेधादिकारादयो न सवर्णा इति वाच्यम्, एतद्वाक्यार्थबोधात्प्राक् पदार्थोपस्थितेरावश्यकतया तस्यामवस्थायामिकारादिभिः शरामुपस्थापनस्य दुर्वारत्वात्। ततश्च 'परश्शताः' 'रामष्षष्ठः' 'यश्शस्सारम्' इत्यादौ ''झरोझरि'' (पा०सू० ८-४-६५) इत्यस्य प्रवृत्तिर्न स्यात्। ततश्चैकैकत्र शर्त्रयं श्रूयेत। इष्यते तु द्वयम्। तथा च पूर्वपक्षवार्तिकम् - ''अज्झलोः प्रतिषेधे षकारप्रतिषेधोऽज्झल्त्वात्'' इति। अत्र शकारग्रहणं शरामुपलक्षणम्। किञ्चावर्णस्याष्टादशधा भिन्नस्य परस्परं सावर्ण्यं न स्यात्। ततश्च 'दण्डाग्रम्' इत्यादौ दीर्घो न स्यात्। तथाहि, हकारेण ग्रहणादकारो हल् अक्षु पाठाच्चाच्। न चास्मिन्नेव सूत्रे एतस्य प्रवृत्तिः, येन ग्रहणकशास्त्रमसावर्ण्यान्न प्रवर्त्तेतेति। अत्र सिद्धान्तं वार्त्तिककार एवाह - ''सिद्धमनच्त्वाद्वाक्यापरिसमाप्तेर्वा' इति। तत्र सूत्रप्रत्याख्यानेनोत्तरं प्रथमवार्तिकेऽभिप्रेतम्। तथाहि,

---

संज्ञारम्भस्य शलन्यहलंशे चारितार्थ्यात्। किञ्च **हलोऽनन्तरा** इत्यत्र तदुक्त्या प्रत्यासत्त्या तथोक्तेः। किञ्च वर्णानां कोटिद्वयस्य प्रागुक्तत्वेन तत्र यथाऽतुल्यास्यप्रयत्नानां केषाञ्चिन्न, तथा तत्वेऽपि अनेन केषाञ्चिन्न, अवशिष्टानां तु तादृशानां संज्ञाऽस्त्येवेति सूचनार्थं तथोक्तेरिति दिक् ।।

४.३५ नाज्झलौ सूत्रस्वीकारे अतिव्याप्तिशङ्क - तत्परिहारश्च

उक्तवाक्यार्थाङ्गीकारे निषेधातिप्रसङ्गमाशङ्कते। **स्यादेतदित्यादिना।** उच्चारितस्यैव प्रत्यायकत्वमिति प्रत्याहारेषु जातिग्रहणपक्षमिति च पूर्वपक्षी न जानाति। **न सवर्णा इति।** तथा च शरामपि तत्वाभावः सिद्ध इति भावः। **आवश्यकेति।** तत्र तस्य हेतुत्वात्। **तस्यां** पदार्थोपस्थितिवेलायाम्। तदानीं वाक्यार्थबोधाभावेन निषेधाप्रवृत्तेः। इष्टापत्तावाह। **ततश्चेति।** अपराद्धनुरोधेनाह। **परश्शता इति। शर्त्रयमिति।** शर्त्रयादीत्यर्थः। **द्वयमिति।** शादीत्यादिः। पूर्वपक्षस्य वार्तिकारूढत्वमाह। तथा चेति। **अज्झलोरिति।** प्रकृतत्वात्सवर्णसंज्ञाया इति बोध्यम्। **शकारेति।** द्विवचनान्तसमासः, भेदाधिष्ठानत्वात्सवर्णसंज्ञायाः। व्यक्तयैक्ये हि तुल्यास्यप्रयत्नत्वासम्भवः। तत्र न्यूनतां परिहरति। **अत्रेति।** उपलक्षणत्वावश्यकत्वं ध्वनयन् तुल्ययुक्त्या दोषान्तरमाह। **किञ्चेति।** तां युक्तिमेवाह। **तथा हीति। न चेति।** न हीत्यर्थः। उक्तयुक्तेरिति भावः। नन्वेकं सन्धित्सोरपरं प्रच्यवत इति न्यायेन वाशब्दस्वारस्येन प्रयत्नभेदेनाच्त्वाङ्गीकारे सूत्रस्यैव वैयर्थ्यापत्तिरत आह। **तत्रेति।** तयोर्मध्य इत्यर्थः। तत्रादौ प्रत्याख्यानमाह। **तथा हीति।**

शिक्षावाक्ये विवृतमूष्मणामिति योगो विभज्यते। तत्र चेषदित्यनुवर्त्तते। स्वराणाञ्चेति विवृतमित्यनुवर्त्तते। ईषदिति निवृत्तम्। तथाच प्रयत्नभेदादूष्मस्वरयोः सावर्ण्याप्राप्तौ किं सूत्रेण ? तथाच शरामनच्त्वादेव सिद्धमित्यर्थः। उपलक्षणञ्चेदमकारस्याहल्त्वादित्यपि बोध्यम्। सूत्रारम्भमभ्युपेत्येदम्। वस्तुतस्तूक्तरीत्या सूत्रमेव नारम्भणीयमित्यर्थः।

ईषदित्यस्याननुवृत्तिं समानप्रयत्नताञ्च स्वीकृत्य सूत्रारम्भपक्षेऽप्याह– वाक्यापरिसमाप्तेर्वेति। अयमाशयः - इह पूर्वं वर्णानामुपदेशः। तत इत्संज्ञा। तत ''आदिरन्त्येन सहेता'' (पा०सू० १-१-७१) इति प्रत्याहारसिद्धिः। ततो ''नाज्झलौ'' (पा०सू० १-१-१०) इत्येतद्वाक्यार्थबोधः। ततोऽपवादविषयपरिहारेण सवर्णसंज्ञानिश्चये सति ग्रहणकशास्त्रप्रवृत्तिः, नत्वेतत्सूत्रनिष्पत्तिसमये। अन्यथा तत्सूत्रेणैवेकारशकारादीनां सावर्ण्यनिषेधादिकारेण शकाराग्रहणे सत्यज्झल्त्वादिति हेतोरसिद्धचा त्वदीयः

चेतीति। इत्यत्रेत्यर्थः। क्वचित्तथैव पाठः। प्रकृतमाह। **तथा चेति।** प्रयत्नभेदं च तेषां हि तत्वादेवैतदप्रवृत्त्या लुप्तमध्यशादिकमुक्तरूपकदम्बकं सिद्धमित्यर्थः। अत्रापि प्राग्वन्न्यूनतां परिहरति। **उपेति।** तथैव वाच्यः। एवमुक्तेः फलमाह। **सूत्रारम्भमिति। इदमिति।** शरामनच्त्वादित्यादीत्यर्थः। तात्पर्यार्थमाह। **वस्तुतस्त्विति।** एऽैचोर्मिथः सावर्ण्याभावाय विवृतत्वव्याप्यानामपि सवर्णसंज्ञानियामकत्वस्य सूत्रमतेऽप्यावश्यकत्वेन तदाश्रित्य सूत्रारम्भ एव ज्यायान्। किञ्च दीर्घप्लुताकारयोर्हकारेणासावर्ण्यायेदमपि तस्यावश्यकत्वमिति भावः। चो हेतौ। यतोऽनुवृत्तिस्वीकारोऽतः समानप्रयत्नस्वीकार इत्यर्थः। नन्वेतत्सूत्रग्राहकसूत्रयोर्मिथः आकाङ्क्षाया अभावेनैकवाक्यताया अभावात्कथमत्र वाक्यापरिसमाप्तिरतो भाष्योक्तमेवाह। **अयमिति। ततः** उपदेशोत्तरकाले, ज्ञातस्य संज्ञाविधानात्। **ततः** इत्संज्ञोत्तरकाले। **सिद्धिरिति।** ततः तुल्यास्येत्यस्य सामान्यतो लक्ष्यसंस्कारकवाक्यार्थबोधः। अभावज्ञाने प्रतियोगिज्ञानस्य कारणतयाऽस्यावश्यकत्वात् ततः तुल्यास्येत्यस्य बोधानन्तरं, तदेतद् ध्वनयन्नाह। **निश्चये सतीति।** इष्टविषये सवर्णसंज्ञासंज्ञित्वग्रहे निश्चयात्मके सतीत्यर्थः। एतत्सूत्रजनितवाक्यार्थबोधे सति एते मिथः सवर्णसंज्ञा इति प्रमारूपं निश्चयज्ञानं लक्ष्यसंस्कारकं निष्पद्यत इति यावत्। **ग्रहणकेति।** ....[१] दाभ्यां तदुत्तरकालत्वमत्र प्रतिपादितम्। तत्र तदकाराभिः स्वसवर्णत्वेन ज्ञातानां ग्रहणं बोधयतीत्यर्थः। **समये इति।** एतद्वाक्यार्थबोधावस्थायाम्। **अन्यथा**

---

१. मातृकायामक्षराणि स्पष्टं न प्रतीयन्ते। 'उत्सर्गापवादाभ्यां' इति पाठः स्यादिति सम्भाव्यते।

पूर्वपक्षोऽसम्भवदुक्तिक एव स्यात्। अथ पदर्थज्ञानस्य वाक्यार्थबोधहेतुतयैतद्वाक्य-स्थपदार्थबोधकाले एतद्वाक्यार्थग्रहाभावादिह सूत्रे इकारेण ञकारग्रहः स्यादेवेतः पूर्वं सावर्ण्यनिषेधाग्रहादिति ब्रूषे तर्हीतः पूर्वं ग्रहणकशास्त्रमेव न निष्पन्नमिति कथं न पर्यालोचयेः ? नन्वेवं ''तुल्यास्यप्रयत्नं'' (पा०सू० १-१-९) ''नज्ञलौ'' (पा०सू० १-१-१०) इत्यादौ ''अकः सवर्णे दीर्घः'' (पा०सू० ६-१-१०१) इति दीर्घोऽपि न प्रवर्त्तेतेति चेत् ? न, सवर्णसंज्ञाद्युत्तरकाले प्रवर्त्तमानस्य दीर्घशास्त्रस्य दण्डाढकादा-विवेहाप्य-प्रतिबद्धप्रवृत्तिकत्वात्, उद्देश्यतावच्छेदकरूपाक्रान्तत्वाविशेषात्। न च सवर्णदीर्घ-विधानात्प्रागेतत्सूत्रार्थबोधानुपपत्तिरिति वाच्यम्, पदार्थोपस्थितिप्रभृतिसामग्रीसम्पत्तौ सत्यां साधुत्वबोधकवाक्यार्थज्ञानविलम्बेन शाब्दबोधे विलम्बादर्शनात्। अन्यथा व्याकरणशास्त्रपरिशीलनविकलानां कापि शाब्दबोधो न स्यात्। तथा वैयाकरणानामपि व्याकरणसूत्रघटकशब्देषु व्याकरणादेव साधुत्वबोधे तदुत्तरकाले च वाक्यार्थावगता-वात्माश्रयान्योन्याश्रयचक्रकापां दुर्वारत्वादिति दिक्।

उक्तन्यायानङ्गीकारेणास्य निषेधस्य स्वस्मिन्नपि प्रवृत्त्योक्तदोषवारणे। **अथेति।** यद्यपि स्वाध्यायोऽध्येतव्य इत्यात्मानमपि विषयीकरोतीति एकस्य विषयत्वविषयित्वयोर्न विरोधः, तथापि एतद्वाक्यार्थबोधोत्तरमन्यनिषेधेऽपि स्ववाक्यार्थबोधात्प्राक् स्वघटकपदार्थोपस्थितिवेलायां स्ववाक्या-र्थबोधरूपसावर्ण्याभावज्ञानाभावान्नात्रेकारञकारादेस्तदभावबोधनमिति भावः। **न निष्पन्नमिति।** न जनितलक्ष्यसंस्कारकवाक्यार्थबोधमित्यर्थः। सवर्णनिर्णयं विना तद्ग्रहणबोधनासमर्थमिति यावत्। अत्रत्याच्पदार्थोपस्थितिकाले एतद्वाक्यार्थबोधरूपसावर्ण्याभावज्ञानाभावादिकारञकारादेः सवर्ण-त्वज्ञानेऽपि तन्निश्चयाभावेनाणुदित्सूत्रस्येष्टविषये वाक्यार्थबोधरूपशक्तिग्रहस्याभावान्नात्रेकारादिना ञकारादिग्रहणमिति हेतुसिद्ध्या नोक्तदोष इति भावः। तज्जन्ये शक्तिग्रहे बाधकसम्भावना-हिताप्रामाण्यसम्भवनासत्वादिति तात्पर्यम्। यत्तु इतः प्राक् तुल्यास्येत्यस्याबोधेन सवर्णपदार्थ-ज्ञानाभावात् अणुदिदित्यस्य वाक्यार्थाबोध इत्यर्थ इति। तन्न। अभावज्ञाने प्रतियोगिज्ञानस्य कारणतया विधेः प्राक् निषेधवाक्यार्थाभावो, न तु विपरीतमित्यदोषादिति दिक्। एवं इतः पूर्वं तदनिर्णयेन चेति पदशरीरे तस्यापि निविष्टत्वेन तज्ज्ञानस्यापि कारणत्वादिति भावः। **शाब्दबोधे इति।** पदज्ञानं तु श्रावणमात्रमिष्टं नान्यथेति भावः। प्रकृताभिप्रायमिदं, अत एवाह। **अन्यथेति।** सर्वत्र शास्त्रकृतकार्यसत्वादिति भावः। न केवलं तेषामेव बोधः, किन्त्वन्येषामपीत्याह। **तथेति।** 'खरवसनयोर्विसर्जनीय' (पा०सू० ८-३-१५) इत्यादावात्माश्रयः, 'ससजुषोरु' (पा०सू० ६-

साधुत्वज्ञानं तु न शाब्दबोधहेतुः। अस्तु वाभियुक्तवाक्यत्वेन साधुत्वानुमितिः, ततः शब्दबोधे जाते लक्ष्यान्तरेष्विव लक्षणवाक्यान्तर्गतेष्वपि लक्षणप्रवृत्तिरिति दिक्।

वस्तुतस्तु शरां परस्परं सावर्ण्यनिषेधे सत्यपि न क्षतिः। परः शतादिषु हि रूपद्वयं सिद्धान्तेऽपीष्यते। शतात्पराणीति विग्रहे, ''कर्तृकरणे कृता बहुलम्'' (पा०सू० २-१-३२) इति बहुलवचनाद्वा ''सुप्सुपा'' (पा०सू० २-१-४) इति वा समासे कृते पारस्करादित्वात्सुटि सकारस्य श्चुत्वम्। ततः ''अनचि च'' (पा०सू० ८-४-४७) इति द्विर्वचनम्। ननु ''शरोऽचि'' (पा०सू० ८-४-४९) इति ''अनचि'' (पा०सू० ८-४-४७) इति वा द्वित्वनिषेधोऽस्त्विति चेत् ? न, तत्र ''नाज्झलौ'' (पा०सू० १-१-१०)

२-६६) रित्यादावन्योन्याश्रयः, प्रकृतादौ चक्रक इति बोध्यम्। ननूक्तरीत्या तस्याकारणत्वेऽपि साधुत्वज्ञानस्य कारणत्वात्तस्य तत्साध्यत्वेन पूर्वं तदभावाच्छङ्क तदवस्थैवेत्यतः आह। **साधुत्वज्ञानं त्विति।** अपभ्रंशतो बोधदर्शनात्। अत एवासाधुत्वनिश्चयप्रतिबन्धकत्वमपि नेति बोध्यम्। अपभ्रंशान्न साक्षाद्बोधः किन्तु साधुस्मरणादित इति प्राचां मतेनाह। **अस्तु वेति।** वाशब्दोऽनास्थायाम्। **जाते इति।** तन्निर्णये इति शेषः। तथा चानन्तरं तुल्यास्येत्यादौ सवर्णदीर्घप्रवृत्तिरिति न प्रकृते दोष इति बोध्यम्। ननु वाक्यापरिसमाप्तिन्यायस्यास्मदादीन् प्रति प्रवृत्तत्वेऽपि पाणिनेस्तत्तच्छात्रप्रणयनाऽन्यथानुपपत्त्या तत्तद्विषयज्ञानस्य प्रागपि सत्त्वावश्यकत्वेन तज्ज्ञानस्यैतच्छास्त्रासाध्यत्वेन च **नाज्झला**वित्यादौ सवर्णाभिप्रायेण प्रयोगः स्यात्। अस्मदादीनां बोधस्तु तत्तात्पर्यज्ञव्याख्यातृपरम्परया लक्षणया भविष्यतीति शरां मिथः प्रतिषेधः प्राप्नोति। एवमवर्णस्यापि मिथ इति चेन्न। ज्ञानसत्वेऽपि तदभिप्रायेण प्रयोगे तात्पर्यग्राहकाभावात्। करिष्यमाणसंज्ञाद्यभिप्रायेण पाणिनिव्यवहाराभावस्यैवात्रत्यतन्त्रन्यायप्रतिपादकभाष्यादिग्रन्थेन प्रतिपादनाच्चेति दिक्। तदाह। **दिगिति।**

४.३६ भाष्योक्तातिव्याप्तिशङ्कापरिहारः

एवं वार्तिकोक्तमेकीयव्याख्यानसहितमुक्त्वा तस्य अन्योक्त्यान्यथाव्याख्यानं प्रतिपादयन् भाष्योक्तमाह। **वस्तुतस्त्विति।** अक्षतौ हेतुयुतेनाह। **पर इति। सिद्धान्ते सावर्ण्ये तत्र तदुपपादयतीत्यन्तेन। परदिति।** परश्शतानि कार्याणीति भाष्यानुरोधेनाह। **पराणीति। नन्विति।** तथा च कथं शस्य द्वित्वमिति भावः। **तत्र** शरोऽचीत्यादौ। इदानीमाह।

इति निषेधादिकारेण ञकाराग्रहणात्। ततो ''झरोझरि'' (पा०सू० ८-४-६५) इति लोपविकल्पाद् द्विञकारं त्रिञकारं वा रूपमिति सावर्ण्यनिषेधेऽपि सिद्ध्यत्येवेदं रूप-द्वयम्, ''अनचि च'' (पा०सू० ८-४-४७) इति द्वित्वस्यापि वैकल्पिकत्वात्। तत्र द्वित्वस्य वैकल्पिकत्वं ''यरोनुनासिकेऽनुनासिको वा'' (पा०सू० ८-४-४५) इत्यतो वेत्यनुवर्तनात् 'सर्वत्र ञाकल्यस्य' (पा०सू० ८-४-५१) इति पाक्षिकनिषेधाद्वा। लोपस्य वैकल्पिकत्वं तु ''झयो होऽन्यतरस्याम्'' (पा०सू० ८-४-६२) इत्यतोऽन्यतरस्यांग्रह-पानुवृत्तेरित्यवधेयम्। तस्मात्सावर्ण्ये सत्यसति वा 'परञ्ञताः' इति द्विञकारकत्रिञकार-करूपयोरविञेषः। परञ्ञताद्यास्ते येषां परा संख्या ञतादिकात्। (अ०को० ३-१-६४) इत्यमरः। एवं 'रामष्ष्ठः' 'यञस्सारम्' इत्यादावपि। अत एव भाष्ये – ''अपर आह'' इत्युपक्रम्य वार्त्तिकद्वयमप्येकहेतुतया व्याख्याय ''अस्तु वा ग्रहणमिकारादिभिः ञकारा-दीनाम्'' इति वाक्यञेषाध्याहारेण प्रतिज्ञाविकल्पार्थो वाञब्द इति व्याख्यातम्। तत्र अपर आहेत्यपरितोषोद्भावनम्। तद्बीजन्तूक्तरीत्या ञर्षु सावर्ण्यनिषेधानिषेधयोः फलाविञेषेऽपि प्रागुक्तरीत्या 'दण्डाग्रम्' इत्यादि न सिद्ध्यत्। तदर्थं च सूत्रप्रत्याख्यानस्य वाक्यापरिसमाप्तिन्यायस्य वाऽऽश्रयणे आवश्यके ञरां ञर्भिः सावर्ण्याभावाभ्युपगमो निर्मूल एवेति।

सावर्ण्येति। तत्र तयोर्मध्ये। भाष्यरीत्या आह। **यर इति।** सूत्ररीत्या आह। **सर्वत्रेति। झयो ह इति।** इदं **वृत्ति**रीत्त्या। भाष्यरीत्या तु **वाऽवसान** इत्यत इति बोध्यम्। उपसंहरति। **तस्मादिति।** अस्य भाष्योक्तत्वमाह। **अत एवेति।** व्याख्यातमित्यत्रान्वयः। पूर्वपक्षवार्तिकव्याख्यानस्यापि पुनरनुवादे इत्युपक्रम्येति। अन्यथेत्युक्त्वेत्येव ब्रूयात्। सिद्धिजनकं अनच्त्वं वाक्यापरिसमाप्त्यैव साध्यते, न तु प्रयत्नभेदेन, नापि तया सिद्धिरित्यर्थः। 'तुल्यार्थस्तु विकल्पेरन्' (१२/३/१० पू.मी.) इति न्यायेनैकत्र साध्यहेतुविकल्पसम्भवेऽपि प्रकृते प्रोक्तरीत्या तदभावेन वाञब्दा-सङ्गतिपरिहाराय 'अस्तु ञकारस्य ञकारेण सवर्णसंज्ञा, मा भूत्'इत्येतद्भाष्यसूचित-प्रतिज्ञाया आश्रयं कैयटोक्तमाह। **अस्तु वेति।** अत्र पक्षान्तरे। **सावर्ण्याभावेति।** सावर्ण्यनिषेधेत्यर्थः।

स्यादेतत्, अगृहीतसवर्णानामेव ''नाज्झलौ'' (पा०सू० १-१-१०) इति निषेध इति तावत्स्थितम्। तथा चेकारादीनां ञकारादिभिः सावर्ण्यानिषेधात् 'कुमारी शेते' इत्यादौ सवर्णदीर्घः स्यादित्याशङ्क्याचीत्यनुवृत्त्या समाहितम्। एवं स्थिते 'मालासु' इत्यादौ षत्वं स्यात्। हकारेणाकारग्रहणे सति 'गौरीषु' इत्यादिवदिपः परत्वानपायात्। किञ्च 'विश्वपाभिः' इत्यत्र ''हो ढः'' (पा०सू० ८-२-३१) इति ढत्वं स्यात्, 'वागाशीः' इत्यत्र ''झयो होन्यतरस्याम्'' (पा०सू० ८-४-६२) इत्याकारस्य घकारः स्यात्, 'गासीध्वम्' इत्यत्र ''इणः षीध्वम्'' (पा०सू० ८-३-७८) इति मूर्द्धन्यादेशः स्यात्, 'दासीष्ट' इत्यादौ ''दादेर्धातोर्घः'' (पा०सू० ८-२-३२) इति घत्वं स्यात्, 'राम आयाति' इत्यादौ ''हशि च'' (पा०सू० ६-१-११४) इत्युत्वं स्यात्, 'देवा आयान्ति' इत्यादौ ''हलि सर्वेषाम्'' (पा०सू० ८-३-२२) इति नित्यो यलोपः स्यात्, 'चाखायिता' इत्यादौ ''यस्य हलः'' (पा०सू० ६-४-४९) इति यलोपः स्यात्, 'श्येनायिता' इत्यादौ ''क्यस्य विभाषा'' (पा०सू० ६-४-५०) इति लोपः स्यात्, 'निचाय्य' इत्यादौ ''हलौ यमाम्'' (पा०सू० ८-४-६४) इति यलोपश्च स्यादिति बहूपप्लवप्रसङ्गः।

अत्रोच्यते, आकारो न हकारस्य सवर्णः ''ततोऽप्याकारः'' इति अइउण्सूत्रोदाहृतशिक्षारीत्या भिन्नप्रयत्नत्वात्। ''सवर्णेग्रहणमपरिभाष्यमाकृतिग्रहणात्'' इति वार्त्तिकमते तु हकाराकारयोरेकजात्यनाक्रान्तत्वादेव नातिप्रसङ्गः। यद्वा, आकारसहितोऽच् आच् स च हल् च आज्झलाविति सूत्रे आकारप्रश्लेषो व्याख्येयः। तेनाकार-

---

४.३७ आकारप्रश्लेषविचारः

सूत्रमते न्यूनतां शङ्कते। **स्यादेतदिति।** तत्र मानान्तरमप्याह। **तथा चेति।** [१]..... ति निषेधप्राप्त्या सावर्ण्येनेत्यर्थः। दोषान्तरमाह। **किञ्चेति।** प्रसङ्गेऽन्वयोऽस्य। चरमश्चश्च मिथः सर्वेषां समुच्चायक इति बोध्यम्। [२]वागाशीति स्थलत्रये सर्वेषामेकया युक्त्या ? वारणेऽप्यापाद्यमानेऽर्थे न्यायानादरादेवमुक्तम्। तत्रादौ सूत्रमते परमतेनाह। **आकार इति।** कार इति अइउणिति पाठः। इदं शिक्षार्थेन बोधनिबन्धनमिति **नारायणः**। **वार्तिकेति।** भाष्येत्यपि बोध्यम्। अयं प्रत्याख्यानपक्ष एव सूत्रमते सिद्धस्तन्मतेनाह। **यद्वेति।** सूत्रे द्विवचनोपपत्तये

---

१. अत्र ग्रन्थः त्रुटितः। २. अत्र पङ्क्तिरस्पष्टा।

स्याचां च हल्भिः सह सावर्ण्यं निषिध्यते। आकारप्रश्लेषे लिङ्गं तु ''कालसमयवेलासु तुमुन्'' (पा०सू० ३-३-१६४) इत्यादिनिर्देशाः। अत्र पक्षे आश्च आश्चेति द्वन्द्वेन सवर्णदीर्घेण च ''नाज्झलौ'' (पा०सू० १-१-१०) इति सूत्रे दीर्घात् परः प्लुतोऽपि निर्दिष्ट इति व्याख्येयम्। तेन 'यियासो' इत्यादौ ''गुरोरनृतः'' (पा०सू० ८-२-८६) इति प्लुतादाकारात्परस्य सनः सस्य षत्वं नेत्यवधेयम्। भाष्यमते तूष्मणामीषद्विवृतताभ्युपगमेन सावर्ण्यप्रसक्तिरेव नास्तीति सूत्रप्रत्याख्यानात्सकलमनाविलम्॥

इति शब्दकौस्तुभे प्रथमस्याध्यायस्य प्रथमे पादे चतुर्थमान्हिकम्॥ ४॥

मध्यमपदलोपिसमासमाह। **आकारसहित इति।** समाहारद्वन्द्वे तु टच्प्रसङ्गः। अज्झलाविति समाहारद्वन्द्वं कृत्वा आपदेन द्वन्द्वे तु अज्भिरप्याकारस्य सावर्ण्यं न स्यादिति भावः। अत एवाह। **तेनेति।** आदिना वयस्यासुर्वाक्षास्वित्यादिपरिग्रहः। **पर इति।** वैपरीत्ये तु प्रकृतिभावापत्तिरिति भावः। **षत्वमिति।** तस्यासिद्धत्वाद् ढत्वमपि नेति बोध्यम्। व्यक्तिपक्षे प्रत्याख्यानपक्षमाह। **भाष्येति॥**

॥ इति श्रीमत्पायगुण्डोपाख्यवेपीगर्भजमहादेवसुतवैद्यनाथकृते कौस्तुभव्याख्याने प्रभाभिधे चतुर्थमाह्निकम्॥

श्रीशब्दकौस्तुभे पञ्चमाह्निकम्

ईदूदेद् द्विवचनं प्रगृह्यम् (पा०सू० १-१-११) ईदूदेदन्तं द्विवचनं प्रगृह्यसंज्ञं स्यात्। 'हरी एतौ' 'विष्णू इमौ' 'गङ्गे अमू'। ''तपरकरणमसन्देहार्थम्' इति वृत्तिकाराः। अन्यथा हि यणादेशे कृते ह्रस्वस्यायं निर्देश इत्यपि सम्भाव्येत। ततश्च 'अकुर्वह्यत्र' इत्यादावतिप्रसङ्गः स्यादिति भावः। भाष्ये तु व्यक्तिः पदार्थो, भेदकाश्च गुणा इति पक्षमाश्रित्य गुणान्तरयुक्तानां दीर्घाणां सङ्ग्रहार्थं तपरकरणमित्युक्तम्। इदञ्च 'इद्' इति प्रथमतकारस्यैव फलमित्यवधेयम्, तावतैव ऊकारेऽपि सिद्धेः ; तात्पर इति पञ्चमीसमासपक्षस्यापि स्थितत्वात्। एकारस्य त्वण्त्वादेवापुदित्सूत्रेण सवर्णग्राहकतासिद्धेः। ईदूतोः परमनपूत्वाद् गुणान्तरयुक्तसङ्ग्रहाय युक्तो यत्नः। तस्माद्भाष्यमतेऽपि ऊदेतोस्तपरकरणमसन्देहार्थमेव गुणानामभेदकत्वे त्वीदित्यपि तथेत्यभिप्रेत्यैकरूप्यं वृत्तिकृद्भिरुक्तम्। इह ''तपरः'' (पा०सू० १-१-७०) इति सूत्रे पञ्चमीसमासो माऽस्त्वित्यभिप्रेत्य ऊदिति, तथाऽतपर एवैकारो निर्दिष्ट इत्यपि सुवचम्।

---

५. पञ्चमाह्निकम्

५.१ ईदूदेदित्यत्र तपरत्वविचारः

विशेषणत्वं तदन्तविधिनाऽह। **ईदूदेदन्तमिति।** संज्ञाविधाविति निषेधादाह। **द्विवचनमिति।** समञ्जसत्वसूचनायाह। **वृत्तिकारा इति।** उकारांशे तथा लक्ष्यासम्भवादेव निर्णयो भविष्यतीति ध्वनयन्नाह। **ह्रस्वस्यायमिति।** अत एवाह। **अकुर्वेति। भाव इति।** तदित्यादिः। अत्र भाष्यं प्रोढ्येति, न समञ्जसमिति ध्वनयन्नाह। **भाष्ये त्विति। भेदकाश्चेति। भेदकत्वात्स्वरस्येति** वार्तिकोक्तेरण्विषये भेदकपक्षोऽप्यस्तीत्यभिमानः। **गुणान्तरेति।** पठितगुणभिन्नसकलगुणयुक्तानामित्यर्थः। असमञ्जसत्वमेवाह। **इदञ्चेति।** उक्तमेव दृढयन्नेकारेऽपि तत्फलाभावमाह। **एकारस्य त्विति।** परं केवलम्। **यत्नः** प्रथमतकाररूपः। **असन्देहेति।** स्फुटतया सन्देहनिवृत्त्यर्थमेवेत्यर्थः। मुखसुखोच्चारमिति तत्वम्, तथा असन्देहार्थे एकेति सति तस्मिन् वैरूप्यस्याप्यनाप्यत्वात्। नारायणाद्युक्तं भाष्याशयं वस्तुत आह। **इहेति।** सुवचमित्यत्रान्वयः। तथा गुणान्तरयुक्तसंग्रहार्थं अतपर इति न व्यञ्जनपरस्येति भाष्योक्तेरिति भावः। तत्वं तु प्रागुक्तमेव ।।

स्यादेतत्, असन्देहायापि क्रियमाणं तपरत्वं प्लुतं व्यावर्त्तयेदेव 'घटायोन्मीलितं चक्षुः पटं न हि न पश्यति' इति न्यायात्। अथायं दकारः ''ऋदोरप्'' (पा०सू० ३-३-५७) इतिवदिति चेत् ? एवमप्येकारो गृह्णातु प्लुतम्, अण्त्वात् ; न त्वीदूतौ वाक्यापरिसमाप्तिन्यायेनानण्त्वात्। जातिपरो निर्देश इति चेत् ? तर्हि ह्रस्वेऽप्यतिप्रसक्तिः। दीर्घव्यक्तिरपि विशेषणीभूता विवक्षितेति चेत् ? कथं तर्हि प्लुतसङ्ग्रहः ? न च प्लुतव्यावृत्तिरिष्टैवेति वाच्यम् 'अग्नी ३ इति' इत्यत्र 'अप्लुतवदुपस्थिते'(पा०सू० ६-१-२९) इति सूत्रेण प्लुतत्वप्रयुक्ते प्रकृतिभावे निषिद्धेऽपि प्रगृह्यत्वप्रयुक्तस्य तस्येष्यमापत्वात्। ''अप्लुतवत्'' (पा०सू० ६-१-१२९) इत्यस्य तु 'देवदत्तेति' इत्यादौ चरितार्थत्वाद्वैयर्थ्यं न शङ्क्यम्। तथा च षाष्ठे वार्त्तिकम् - ''वद्वचनं प्लुतकार्यप्रतिषेधार्थं प्लुतप्रतिषेधे हि प्रगृह्यप्लुतप्रतिषेधप्रसङ्गोऽन्येन विहितत्वात्'' इति। अत्राह भाष्यकारः - ''यथोद्देशं

अग्रिमभाष्यार्थमाह। **स्यादेतदिति।** वृत्तिमतेनाह। **असन्देहेति।** भाष्यमतसङ्ग्रहायाह। **अपीति।** व्यावृत्तिरिह निवृत्तिरग्रहणमेव वा। **अथायमिति।** तपरसूत्रे दकारप्रश्लेषस्तु न स्थितः, एतदर्थमेव दृष्टान्तोक्तिः। एकारांशेऽणुत्वात् सिद्धिः, ईदूदंशे गुणान्तरयुक्तग्रहणं तु गुणाभेदकपक्षाश्रयेणेति असन्देहस्य चैवमपि सिद्धेरिति भावः। भेदकपक्षेणाह। **न त्वीदूताविति।** तेन न्यायेन प्रागुक्तेनाणुदित्सूत्रे दीर्घादीनामणूपदेन ग्रहणादित्यर्थः। ननु प्रागुक्तं सर्वं व्यक्तिपक्षो भवेत्स एव न, तत्संग्रहाय व्यापकजातिपरनिर्देशाङ्गीकारादित्यभिप्रेत्यापि जातिपक्षमाह। **जातीति।** दीर्घत्वव्याप्येत्वादेरतिरिक्तजातित्वानङ्गीकारेण ईत्वादेरत्वाद्यनतिरिक्तत्वमतेनाह। **दीर्घेति।** विना व्यक्त्युच्चारणं जातिनिर्देशाभावादवश्यं व्यक्तावुच्चारणीयायां लाघवाय ह्रस्वे एव प्रयोक्तव्ये गुरुदीर्घोच्चारणेन तद्व्यक्तेरुपलक्षणत्वं विहाय विशेषणत्वस्यैवाश्रयणमिति भावः। **कथमिति।** तस्या तत्वेनाश्रयणे विशिष्टव्यक्तिस्थैव जातिर्गृह्यत इति न्यूनकालव्यक्तिगताया इवाधिककालव्यक्तिगताया अपि न ग्रहणमिति भावः। भिन्नभिन्नव्याप्यजातिस्वीकारे तु निर्दिष्टव्याप्यजातेः प्लुतेऽभाव एव तद्वदित्यपि बोध्यम्। एत्वजातेस्तु प्लुते सत्वात्तेन प्लुतग्रहणं भवत्येव। ततो लघुव्यक्तेरभावाच्च। **निषिद्धेऽपीति।** अप्लुतवद्भावेन बाधनेऽपीत्यर्थः। **तस्य** प्रकृतिभावस्य। नन्वीदूशेऽपि विषये प्रगृह्याश्रयप्रकृतिभावे सति प्लुताश्रयप्रकृतिभावप्रतिषेधो अप्लुतवदिति च व्यर्थः स्यादत आह। **अप्लुतेति।** प्रगृह्यसंज्ञाया अविषये इत्यर्थः। **प्रगृह्यप्लुतप्रतीति।** प्रगृह्याश्रये प्रकृतिभावे प्लुतप्रतिषेधप्रसङ्ग इत्यर्थः। प्रगृह्याश्रयस्यापि कुतो न निवृत्तिरत आह। **अन्येनेति।** प्रगृह्यः प्रकृत्येतेनेत्यर्थः।

संज्ञापरिभाषम्'' (पा०भा० २) इत्याश्रयपात् प्रगृह्यसंज्ञां प्रति प्लुतोऽसिद्धः। तथाच द्विमात्रत्वबुद्धेरप्रतिघातात् सिद्धा संज्ञा। कार्यकालपक्षे परं प्रगृह्यसंज्ञाया अपि ''अपोऽप्रगृह्यस्य'' (पा०सू० ८-४-५७) इत्येतदेशतया तां प्रति प्लुतस्य सिद्धत्वेनाऽनुनासिकः प्रवर्त्तेतैवेति स्यादेव दोषः। एतेन 'अग्नी ३ इति' इत्यादौ प्रकृतिभावोऽपि व्याख्यातः, ''प्लुतप्रगृह्या अचि'' (पा०सू० ६-१-१२५) इति ज्ञापकात्स्वरसन्धिषु प्लुतस्य सिद्धत्वेऽपि संज्ञां प्रत्यसिद्धत्वानपायात्, यथोद्देशपक्ष एवेहाश्रीयते इत्युक्तत्वात्। वस्तुतस्त्वनुनासिकप्रवृत्तिभयेनैवेह यथोद्देशपक्षाश्रयणम्। प्रकृतिभावस्तु कार्य्यकालपक्षेऽपि सूपपादः। न च प्रगृह्यः प्रकृत्येत्यनेनैकवाक्यतापन्नां संज्ञां प्रति प्लुतस्य सिद्धतया त्रिमात्रस्य संज्ञा दुरुपपादेति वाच्यम्, प्लुतस्य सिद्धतायां बीजाभावात्। यत्तूक्तं प्लुतः प्रकृत्येत्येतदेव ज्ञापकमिति। तन्न, प्लुतशब्देन तत्स्थानिनो लक्षणया सर्वसामञ्जस्यात्। न चैवं लक्षणैव दोष इति वाच्यम्, श्रुतार्थापत्तिमूलकवाक्यान्तरकल्पनापेक्षया लक्षणाया एवाभ्यर्हितत्वात्। अस्तु वा विशेषापेक्षं ज्ञापकम्। सिद्धः प्लुतः प्लुतत्वप्रयुक्तं प्रकृतिभाव इति, न तु प्रगृह्यत्वप्रयुक्तेऽपि। तस्मात्कार्य्यकालपक्षमाश्रित्य प्रकृतिभावस्य

सिद्धा संज्ञेति। तथा चानुनासिकेति भावः। पूर्वपक्षस्तु कार्यकालाशयक इत्याह। **कार्येति। सिद्धत्वेनेति।** प्रगृह्यसंज्ञाया अभावादिति शेषः। तत्पक्षाश्रयणस्य फलान्तरमाह। **एतेनेति।** एतेनेत्यस्यार्थमाह। **प्लुतेति।** कार्यकाले तस्या अपि तत्प्रकरणस्थत्वादाह। **यथोद्देशेति।** अनुनासिकनिवारणायेति भावः। अग्रिमभाष्योक्तमेव वस्तुतत्वमाह। **वस्तुतस्त्विति।** सूपपदत्वमेवाह। **न चेत्यादिना। सिद्धतयेति।** तत्पक्षेऽस्याः तत्प्रकरणस्थत्वेनोक्तज्ञापकेन तत्वाङ्गीकारे तां प्रत्यपि तत्वमिति संज्ञाया अभावे प्रकृतिभावो न स्यादिति कथं तत्र तत्सिद्धिरिति भावः। सामान्यमाह। **प्लुतस्येति। यत्तूक्तमिति।** भाष्ये एव पूर्वपक्षिणेत्यर्थः। **लक्षणयेति।** ग्रहणेनेति शेषः। **लक्षणैवेति।** सामान्यतो विशेषतो तस्य ज्ञापकत्वाङ्गीकारे प्लुतशब्दस्य मुख्यार्थवृत्तित्वं, तत्सम्भवे च तत्त्यागेनैतदाश्रयणमेवात्र दोष इत्यर्थः, न तु तत्वेन तस्या दुष्टत्वं तदुच्छेदापत्तेः। **वाक्यान्तरेति।** प्लुत इत्याद्यश्रुतवाक्येत्यर्थः। अस्यास्त्वेकदेशवृत्तित्वेन ततो लघुत्वादित्याह। **लक्षणाया एवेति।** किञ्च तन्मूलकपूर्वत्रासिद्धमिति प्रत्यक्षशास्त्रबाधकल्पनापेक्षयाऽऽनुमानिकवाक्यबाधो न्याय्य इति प्रकृते तस्या अपि वरत्वादित्यपि बोध्यम्। एतेनाश्रयात्सिद्धत्वेनापि सिद्ध्यतीत्यपि निरस्तम्। अथ मुख्यार्थापरित्यागवशेनानुमानिकवाक्यबाधो न न्याय्य इति ब्रूषे तर्हि तद्विशेषत एव कल्पयितुमर्हम्। श्रुतार्थान्यथानुपपत्त्या तस्य

समर्थयितुं शक्यत्वेऽप्यनुनासिकप्रवृत्तिवारणायैवेह यथोद्देशपक्षाश्रयणमिति स्थितम्।

अत्र हरदत्तः — यद्यपि संज्ञायामसिद्धः प्लुतस्तथाप्यनुनासिकपर्युदासे सिद्ध एव। ततश्च यस्यानेन सञ्ज्ञाकृता द्विमात्रस्य न सोऽनुनासिकविधौ स्थानी किन्तु त्रिमात्रः। न च स्थानिवद्भावात्तस्यापि प्रगृह्यत्वम्, अल्विधित्वात्। किञ्चावश्यं ''सिद्धः प्लुतः स्वरसन्धिषु'' इत्याश्रयणीयम्। 'दण्ड आढकम्' इति प्लुतस्य दीर्घेण निवृत्तिर्यथा स्यात्। अत एव 'सुश्लोका ३ इति, सुश्लोकेति' इत्यत्र गुणो भवन् प्लुतमेव निवर्त्तयति न तु स्थानिनम्। अन्यथा ह्यादेशरूपे प्लुतः श्रूयेत तदिह यथोद्देशेऽपि संज्ञापरिभाषे कथमिवेष्टसिद्धिः, कथं वा ग्रन्थेषु न पूर्वापरिविरोध इति विपश्चितः प्रष्टव्या इति ?

अत्राहुः – यद्यपि द्विमात्रस्त्रिमात्रेणापहृतस्तथापि ''पूर्वत्रासिद्धम्'' (पा०सू० ८-२-१) इति शास्त्रासिद्धत्वबोधनात्त्रिमात्रेऽपि द्विमात्र एवायमिति बुद्ध्या प्रगृह्यसंज्ञा

प्लुतप्रकृतिभावमात्रविषयत्वस्यौचित्यात्। विशेषोपस्थापकवाक्यरूपप्रमाणापेक्षया सामान्योपस्थापकप्रकरणरूपप्रमाणस्य दुर्बलत्वाच्च। तदाह। **अस्तु वेति।** उपसंहरति। **तस्मादिति।**

५.२ अत्र हरदत्तविमर्शः

अत्र भाष्ये। **यद्यपीति।** शास्त्रासिद्धत्वाच्छास्त्राप्रवृत्तौ प्लुताप्रवृत्त्या स्थानिनः प्रगृह्यसंज्ञासिद्धिरिति भावः। **तथापीति।** पुनः प्लुते कृते तस्य तेन स्थानिनो विनाशाद्धीर्घाभावात् तत्कालत्वाभावात् संज्ञा दीर्घाश्रया नेत्यनुनासिकः स्यादेवेति भावः। तदाह। **अनुनेति।** तस्य ततः पूर्वत्वात्। **अल्विधित्वादिति।** प्लुतस्याल्वृत्तिधर्मत्वेनानल्विधाविति निषेधादित्यर्थः। एवश्चागच्छतमग्नी३ इत्यादावणोऽप्रगृह्येत्यनुनासिकः स्यादिति भावः। इति इत्यादौ। प्लुतस्य परस्य दीर्घेण। अन्यथा आदेशे तच्छ्रवणमेव स्यात्। तदाश्रयस्य फलान्तरमाह। **अत एवेति।** तदाश्रयणादेवेत्यर्थः। **इत्यत्रेति।** अप्लुतवदित्यप्लुतवद्भावेन प्लुताश्रयणे प्रकृतिभावे बाधिते सतीति शेषः। भाष्ये दोषमुपसंहरति। **तदिहेति। अत्राहुरिति। कृष्णादय** इत्यर्थः। **इति** इत्यनेन। **त्रिमात्रेऽपीति।** भाष्यादिप्रवृत्ते शास्त्रेऽसिद्धवत्वेन तत्प्रवृत्तिबुद्धिभावेन तद्बुद्ध्यभावात्। द्विमात्रविषयाया बुद्धेस्त्रिमात्रे सत्वात् द्विमात्रबुद्ध्या त्रिमात्रस्य संज्ञेत्यर्थः। अत्र यद्यप्यन्तरङ्गत्वाच्छास्त्रं प्रवृत्तं, प्लुतश्च जातः द्विमात्रस्य चाभावस्तथापि शास्त्रासिद्धत्वाश्रयणात्

क्रियते । अत एव 'अमुना' इत्यत्र मुत्वे कृते तदुपजीवनेन नाभावे च कृते ''सुपि च'' (पा०सू० ७-३-१०२) इति दीर्घो मुञ्शब्द एव दश्शब्दोऽयमिति बुद्ध्या प्राप्नोति तत्परिहाराय तन्त्रावृत्त्याद्याश्रयपेन नाभावे कर्त्तव्ये कृते च सति मुभावो नासिद्ध इत्यष्टमे व्याख्यातम् । कृन्मेजन्तसूत्रे च सन्निपातपरिभाषया समाहितम् । न त्विह द्विमात्रे कृतां संज्ञां स्थानिवद्भावेन त्रिमात्रे आनयामः, येन ''अनल्विधौ'' (पा०सू०ए० १-१-५६) इति निषेधः शङ्क्येत । न हि रजतभ्रमप्रयुक्ता प्रवृत्तिः शुक्तिं न गोचरयतीति युक्तम् । एतावानेव पर विशेषः रजतभ्रमोऽनाहार्य्यः प्रवर्त्तकः, इह तु शास्त्रप्रामाण्यादाहार्यारोपोऽपि तत्तच्छास्त्रप्रवृत्तावप्रवृत्तौ च नियामक इति । तदेतत्कैय्यटेनैव स्फुटीकृतम् । यदाह शास्त्रासिद्धत्वाश्रयणाच्च प्लुतबुद्धावसत्यां प्रगृह्यत्वे विधीयमाने द्विमात्रत्वबुद्धिः प्रवर्त्तते । तथा च वक्ष्यति – ''असिद्धवचनमुत्सर्गलक्षपभावार्थमादेशलक्षणप्रतिषेधार्थं च'' इति । ''षत्वतुकोरसिद्धः'' (पा०सू० ६-१-८६) इत्येतत्सूत्रस्थं वार्त्तिकमिदम् । उत्सृज्यते निवर्त्यते आदेशेनेत्युत्सर्गः स्थानी, स लक्षपं निमित्तं यस्य कार्यस्य तुगादेस्तस्य प्रवृत्त्यर्थमित्यर्थः । तथा चैकरूप्यार्थं सर्वत्र शास्त्रासिद्धत्वमेवेति भावः । एतेन यस्यानेन संज्ञा कृता न सोऽनुनासिकविधौ स्थानीति प्रथमदूषपमुद्धृतम् । यदपि 'दण्डाढकं'

मानमाह । **अत एवेति ।** उक्तप्रकाराश्रयणादेवेत्यर्थः । अग्रे उभयत्रान्वयः । अन्यथा प्राप्ते एवोक्तरीत्या अभावेन तदसङ्गतिः स्पष्टैवेति भावः । **तदुपेति ।** तदाश्रयणेनेत्यर्थः । **कृते चेति ।** न इति विषयसप्तमीति भावः । भाष्ये तु ने यत्कार्यं तत्र सिद्धत्वेनेत्यर्थेनैव नाभावोऽप्याक्षिप्त इति व्याख्यातम् । **कृदिति ।** विसर्गप्राग्भागानुकरणेन भेदविवक्षया सुपि सामासिको लुकि, चो व्युत्क्रमे समाहितं चेत्यर्थः । 'नाभावो यञि दीर्घत्वस्यामुना' इति शङ्कायां तद्धीर्घाभावः साधितश्चेत्यर्थः । **एवं** किन्तु त्रिमात्रः, अन्त्यां तां तदुक्तिं सन्दूष्याग्रिमां तदुक्तिं खण्डयति । **न त्विहेति ।** उक्तार्थस्य लोकसिद्धत्वमप्याह । **न हीति ।** परं केवलम् । **अनाहार्यः** बाधकालिकेष्वजन्यः । **इह तु** शास्त्रे तु । अन्यथा तद्वैयर्थ्यं स्पष्टमेव । उक्तार्थे स्वोत्प्रेक्षितत्वं निराकरोति । **तदेतदिति ।** तमेवाह । **यदाहेति ।** असिद्धः प्लुत इति प्रतीकं धृत्वेति भावः । नन्वितिशब्दादिसमभिव्याहारे कार्यार्थं प्रगृह्यसंज्ञाप्रवृत्तेरन्तरङ्गत्वात्पूर्वं प्लुते तेन स्थानिनो निवृत्तत्वेन प्लुतासिद्धत्वेऽपि कथं स्थान्याश्रया प्रगृह्यसंज्ञेत्यत आह । **शास्त्रेति ।** प्रवृत्तेऽपीत्यादिः । प्रागुक्त एवार्थः । चेतीत्यन्तः कैयटग्रन्थः । ननु प्राधान्यात्कार्यासिद्धत्वमेव स्यादत आह । **तथा चेति ।** कर्मणि घञित्याह । **उत्सृज्येति ।** ननु तत्र तथोक्तावपि प्रकृते किमत आह । **तथा चेति । भाव इति ।** तदित्यादिः । **एतेन** सर्वेण ।

''सुश्लोकेति'' इत्यादावादेशः प्लुतः श्रूयेतेति। तदपि न, उक्तरीत्या तत्राप्यादेशेन प्लुतस्यैव निवृत्तेः। प्लुतो मयाऽपह्नियते इति बुद्धिः परं तस्य नास्तीत्यन्यदेतत्।

यत्तु षष्ठे भाष्यकारो वक्ष्यति – ''सिद्धः प्लुतः स्वरसन्धिषु'' इति, तत्त्विहानुनासिकपर्य्युदासानुरोधाद्यथोद्देशपक्ष एवाश्रयणीय इति स्थिते स्वरसन्धिसामान्यापेक्षज्ञापकाश्रयणेऽपि न दोष इत्याशयेन, न तु सामान्यापेक्षतायामेव किञ्चिदाग्रहे बीजमस्तीति दिक्।

ननूदाहरणेष्वीदादिकमेव द्विवचनं न तु तदन्तमिति चेत् ?, व्यपदेशिवद्भावेन तदन्तत्वात्। नन्वीदूदन्तं द्विवचनान्तमित्येव कथं न व्याख्यातम् ? एवं हि सति व्यपदेशिवद्भावो नाश्रयणीय इति चेत् ? न, 'कुमार्योरगारं कुमार्यगारं' 'वध्वोरगारं वध्वगारम्' इत्यत्र प्रत्ययलक्षणेन द्विवचनान्तेऽतिव्याप्तेः ''संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति'' (प०भा० २७) इति ''सुप्तिङन्तं पदम्'' (पा०सू० १-४-१४) इत्यत्रान्तग्रहणेन ज्ञापितत्वाच्च। एतेनेदाद्यन्तं यद् द्विवचनं तदन्तं प्रगृह्यं, कुमार्य्यगारादौ

षष्ठभाष्यविरोधं परिहरति। **यत्तु षष्ठे इति। इति स्थिते इति।** कतरपक्षे एव सकललक्ष्यसिद्धये इति शेषः। नन्वत्र पक्षेऽग्नी३ इत्यादौ प्लुतस्यासिद्धत्वेन ततः प्रागेव प्लुताभावपक्षेऽनुनासिकप्रतिबन्धेन फलवत्त्यां संज्ञायां ततः प्लुते तं द्विमात्रत्वेन पश्यन्त्या अपि संज्ञायाः पुनः प्रवृत्तौ बीजाभावात् - अल्विधित्वेन स्थानिवत्वाभावाच्चाप्रगृह्यत्वेनानुनासिकः स्यादिति चेन्न संज्ञायाः कार्यार्थतया पुनः प्रवृत्तौ कार्यसिद्धिरूपबीजसत्वेन पुनस्तस्याः सुलभत्वात्। एतदेव ध्वनयता 'प्लुतस्यासिद्धत्वात्तत्काला एव भवन्ती'त्येवकारो भाष्ये प्रयुक्तः। प्लुतात्प्राक् संज्ञायां च तत्काला एवेति तदर्थ इति दिक्। तदाह। **इति दिगिति ॥**

५.३ ईदूदेत्सूत्रे द्विवचनविशेषणताविचारः

भाष्योक्तान्यवाक्यार्थत्रयनिरासेनोक्तवाक्यार्थसिद्धान्तवित् तत्र शङ्कते। **नन्विति।** एकारांशे तथा व्याख्याने दोषाभावं सूचयितुमाह। **ननु ईदूदन्तमिति। प्रत्ययग्रहणे इति** वचनाच्छब्दरूपं विशेष्यमादाय तदन्तविधौ द्विवचनान्तमिदादिभिर्विशेष्यमिति भावः। अत्र बीजमाह। **एवं हि सतीति।** तत्रादावभ्युपेत्यार्थं दोषमाह। **कुमार्योरिति।** वस्तुतस्तथार्थस्यैवासम्भव इत्याह। **संज्ञेति।** इति इत्यस्य। ईदादिकं श्रूयमाणत्वेन द्विवचनविशेषणमेव न्याय्यमित्येतदसम्भवमित्यपि बोध्यम्। अत एवाह। **ईदाद्यन्तं यत् द्विवचनमिति।** श्रुतस्य सम्बन्धो न्याय्य इति भावः।

तु सकारान्तं द्विवचनं न त्वीदाद्यन्तमिति परास्तम्, संज्ञाविधौ प्रत्ययग्रहणे तदन्ताग्रहणात्। यत्त्वस्मिन्पक्षे दूषणान्तरमुक्तम् - 'अशुक्ले शुक्ले समपद्येतां शुक्लचास्तां वस्त्रे' इत्यत्र शब्दान्तरप्राप्त्याऽनित्यं लुकं बाधित्वा परत्वाच्छीभावे कृते तस्य लुकि प्रत्ययलक्षणेन शुक्लीत्यस्य प्रगृह्यता स्यादिति। तन्न, ''अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते'' (प०भा० ५२) इति परिभाषयौकारस्यैव लोपात्, तस्य चेदाद्यन्तत्वविरहात्। अस्तु तर्हि ईदादि विशेष्यं, तथा च द्विवचनसंज्ञं ईदादि प्रगृह्यमित्यर्थ इति चेत् ? न, 'गङ्गे' इत्यादेः सिद्धावपि 'दृश्येते' इत्याद्यसिद्धेः। द्विवचनावयवो ह्ययमेकारो न तु द्विवचनम्। किञ्च प्रगृह्यमित्यस्य सन्निहितत्वाद् द्विवचनमेव संज्ञि न त्वीदादिः, विप्रकृष्टत्वात्। तस्माद्यथाव्याख्यानमेव मनोरमम्।

अत्र वृत्तिकाराः – ''मपीवादीनां प्रतिषेधो वक्तव्यः'' इति पठित्वा 'मपीव' 'रोदसीव' 'दम्पतीव' 'जम्पतीव' इत्युदाजह्रुः। मुनित्रयानुक्तत्वादप्रमापमिदमिति कैयटादयः। एवं वदद्भिः समानन्यायतयाऽन्येषां मुनित्रयानुक्तानां वृत्तिकृन्मात्रोक्तानां तुरीयस्येष्टिः, शंसिदुहिगुहिभ्यो वा, क्रमेके छन्दसि, भाषायां च

तदन्तमिति। प्रागुक्तरीत्येति भावः। पूर्वदोषमुद्धरति। **कुमार्यगेति। सकेति।** तेनौसिति सकारान्तमित्यर्थः। इति इत्यपि। तथा चैतेनेति द्वितीयदोषपरमित्याशयेन तदर्थमाह। **संज्ञेति।** न चोभयोर्विशेषणत्वेन परार्थ्यागुणानामिति न्यायेन कथमुक्तरीत्यापि सम्बन्ध इति वाच्यम्। 'गुणः कृतात्मसंस्कार' इति न्यायेन क्वचिद्गुणानामपि प्रधानस्यातिशयितोपकारार्थं मिथः सम्बन्धस्वीकारात्। तस्य तथोपकारश्चोक्तरीत्या कुमार्यगारमित्यादौ संज्ञाप्रसङ्गाभाव एवेति बोध्यम्। भाष्योक्तमेव तदुक्तिविशेषेण दूषयति। **यत्त्विति। शीभावे इति।** कृते लुकि प्रसङ्गरूपषष्ठ्यर्थाभावादप्राप्त्याऽनित्येत्यादिः। **इत्यस्येति।** तेन व्यपदेशिवद्भावेनेदाद्यन्तं यत् द्विवचनं तदन्तत्वस्य तत्र सत्वादिति भावः। अत एवाह। **तस्य चेदाद्यन्तत्वेति।** प्रत्ययलक्षणेपीति भावः। पारिशेष्यादाह। **अस्तु तर्हीति। विशेष्यमिति।** प्राथम्याददसो मादित्यनेनैकरूप्याच्चेति भावः। येनेति सूत्रेऽन्तशब्दस्यावयववचनत्वेन तदन्तस्येति बहुव्रीहिणा च तेषां द्विवचनान्तत्वासम्भवादाह। **द्विवचनसंज्ञमिति।** प्रथमपक्षे साधकं सूचयन्नत्र तद्विपरीतरूपं दोषान्तरमाह। **किञ्चेति। सनीति।** येन विधिरित्यस्यानुग्रहाच्चेत्यपि बोध्यम्॥

प्रसङ्गादाह। **एवं च वदद्भिरिति।** एवं तु वदद्भिः कैयटादिभिरित्यर्थः। **अन्येषां** प्रकृ

अङ्गगात्रकण्ठेभ्यस्त्विष्यत इत्यादीनामनादर्त्तव्यतोक्ता। मणीवोष्ट्रस्य लम्बेते इति तु इवार्थकेन वाशब्देन निर्वाह्यमित्याहुः। न्यासकारस्तु ''सम्बुद्धौ शाकल्यस्येतौ'' (पा०सू० १-१-१६) इति शाकल्यग्रहणस्य सिंहावलोकितन्यायेनेह सम्बन्धाद्व्यवस्थित-विभाषाश्रयणाच्चेदं लभ्यते इत्याह। केचित्त्विवार्थेयं वशब्दः प्रयुक्तो भीमो भीमसेन इतिवत्। 'कादम्बखण्डितदलानिव पङ्कजानि' इत्यादिवच्चेत्याहुः। वस्तुतस्तु ''वद्वा यथा तथैवैवं साम्ये'' (अ०को ०३-४-९) इत्यमरग्रन्थे ववेति पाठमाश्रित्य ''शात्रवं व पपुर्यशः'' (र०वं० ४-४२) इति कालिदासप्रयोगस्य तद्व्याख्यातृभिरुदाहरणात्सर्वं सुस्थम्। युक्तश्चायमेव पाठः प्रातिपदिकप्रक्रमे तद्धितस्य वतेरननुगुणत्वात्। एतेन —

स्फुटोत्पलाभ्यामलिदम्पतीव
विलोचनाभ्यां कुचकुड्मलाश्रया।
निपत्य बिन्दू हृदि कज्जलाविलौ
मणीव नीलौ तरलौ विरेजतुः॥ (नै०)

इति श्रीहर्षप्रयोगोऽपि गतार्थः।

अदसो मात् (पा०सू० १-१-१२)। अस्मात्परावीदूतौ प्रगृह्यौ स्तः। अमी ईशाः। रामकृष्णावमू आसाते। न चामू इत्युदाहरणं पूर्वसूत्रेण गतार्थमिति वाच्यम्,

---

तिभिन्ना, मपि ना **उक्ता** उक्तप्राया। तदुक्तं प्रयोगोपपत्तिमाह। **मणी वोष्ट्रेति।** रोदसीवेत्यादि तु छान्दसमिति भावः। **लोकितेति।** अनेन तदाकाङ्क्षया सम्बन्धः सूचितः, अपकर्षे तु एतदाकाङ्क्षयेति ततोऽस्य भेदः। तावताऽप्यनिर्वाहादाह। **व्यवेति।** अत्रारुचिबीजं तु तासां परिगणनं प्रकृतेऽसम्भवादिरूपम्। केचिदित्यनेनाप्यरुचिः सूचिता विनापि प्रत्ययमिति वचनेन तादृशस्थले तथाकल्पनेऽप्यखण्डपदे तथात्वे मानाभावेनोक्तार्थासम्भवरूपा। एवञ्च कादम्बेति दृष्टान्तासङ्गतिरपि। तदेतद् ध्वनयन् सिद्धान्तमाह। **वस्तुतस्त्विति। शात्रवं वेति।** शात्रवं यश इवेत्यर्थः। तथा च वशब्द एव इवपर्यायः स्वतन्त्र एव, न तु सत्या भीमादिवदेकदेश इति तात्पर्यम्। **प्रक्रमे** प्रकरणे। **गतार्थः** सङ्गतार्थः॥

५.४ 'अदसो मात्' 'सूत्रे हरदत्तविमर्शः - अभ्युपेत्य तत्समर्थनम्

अदसो मात् अदः शब्दसम्बन्धिमकारात्। अत एवेहैकाराननुवृत्तिरसम्भवादित्याशयेनाह।

तस्मिन् कर्त्तव्ये मुत्वस्यासिद्धत्वात्। ''अदसो मात्'' (पा०सू० १-१-१२) इति सूत्रं प्रति तु नासिद्धत्वम्, आरम्भसामर्थ्यात्। तथा च वार्त्तिकम् - ''आश्रयात्सिद्धत्वं च यथा रोरुत्वे'' इति। पुंवद्वचनमेवोदाहरपं स्त्रीनपुंसकयोर्द्विवचने तु मुत्वस्यासिद्धत्वेऽप्ये-कारन्तत्वात्पूर्वेणैव सिद्धा संज्ञा। ततश्च प्रकृतिभावोऽनुनासिकपर्य्युदासश्च सिद्ध एवेत्यवधेयम्।

यत्तु हरदत्तेनोक्तम् ''अणोऽप्रगृह्यस्य'' (पा०सू० ८-४-५७) इत्यत्रोपस्थितेन पूर्वसूत्रेण संज्ञायां क्रियमाणायां मुत्वस्य सिद्धत्वाल्लिङ्गत्रयेपि द्विवचनेऽनुनासिकपर्युदासः पूर्वेणैव सिद्धः। एतत्सूत्रारम्भस्त्वद्विवचनार्थः, पुंसि द्विवचने प्रकृतिभावार्थश्चेति। तच्चिन्त्यम्, प्लुतसंग्रहानुरोधन पूर्वसूत्रे यथोद्देशपक्षस्यैव स्थापितत्वात्। तस्मात् पुंसि द्विवचनेऽनुनासिकपर्युदासोऽप्येतत्सूत्रस्य फलं न तु प्रकृतिभावमात्रमित्यवधेयम्।

अथापि कथञ्चिद्धरदत्तोक्तिस्समर्थयितव्येत्याग्रहस्तर्हि इत्थं समर्थनीया-पूर्वसूत्रे कार्यकालपक्ष एवास्तु। न चैवं प्लुतस्यानुनासिकपर्य्युदासो न स्यादिति वाच्यम् 'ई ई ३ त्' 'ऊ ऊ ३ त्' इति दीर्घात्परभागे प्लुतस्यापि प्रश्लिष्टनिर्देशात्। एकारस्त्वपृत्वादेव प्लुतं ग्रहीष्यति। न च तादपि परस्तपर इति तत्कालग्रहणापत्तिः ''ऋदोरप्'' (पा०सू० ३-३-५७) इति वद्दकार एवायमित्याशयात्। युक्तश्चैतत्, यथोद्देशपक्षे प्लुतात् प्रागेव संज्ञाप्रवृत्तौ सत्यां ततः प्लुते कृते तमेव द्विमात्रत्वेन पश्यन्त्या अपि संज्ञायाः पुनः प्रवृत्तौ बीजाभावात्। नाभावस्तु मुभावात्प्रागप्राप्तस्ततो मुत्वनिमित्तकं नाभावमाश्रित्य मुभावे दशब्दोऽयमिति बुद्धया प्राप्नुवन् दीर्घः प्रतिविधीयते इत्युचितम्। न ह्यसौ प्लुतात् प्राक्

ईदूताविति। तस्मिन् पूर्वसूत्रे। तथा चोदनं त्वसम्भव इति भावः। **आरम्भेति।** यथा चैतत्तथाऽग्रे स्फुटीभविष्यत्यनुपदमेव। रामकृष्णाविति विशेषणफलमाह। **पुंवद्वचनमिति।** तत्र तदसिद्धत्वेऽप्यौकारान्तत्वादिति भावः। संज्ञाफलमाह। **ततश्चेति।** तस्य सिद्धत्वाच्चेत्यर्थः। कार्यकालपक्षेणाह। **अणोऽप्रगृह्येति। सूत्रेणेति।** पूर्वमिति सिद्धत्वात्, ततः तस्य पूर्वत्वात्। एकारस्यातपरकत्वमिति पक्षाशयेनाह। **न च तादपीति।** इत्याशयात् **हरदत्तस्य।** इदं समर्थयते। **युक्तमिति।** प्रश्लेषेणानुनासिकवारणमित्यर्थः। **प्लुतादिति।** प्लुतस्य सिद्धत्वादिति भावः। **भावादिति।** अनुनासिकापत्तेस्तादवस्थ्यात् इति शेषः। प्रागुक्तं दृष्टान्तं विघटयति। **नाभावस्त्विति। ततः** तस्मात्। दृष्टान्तवैषम्यं स्फुटयति। **न ह्यसाविति।** नाभाव इत्यर्थः।

प्रगृह्यसंज्ञावन्मुभावात् प्रागेव प्रवृत्तो येन पुनर्न प्रवर्त्तेत। एतेन पूर्वसूत्रस्थहरदत्त-ग्रन्थोऽप्युज्जीवित इति यावद्धाधं साधु। भाष्यकैयटयोस्त्वयं भावः - प्लुतात् प्राक् प्राप्ताऽपि प्रगृह्यसंज्ञा फलाभावान्न क्रियते। न च प्लुतेऽनुनासिकप्रवृत्तिरेव फलमस्त्विति वाच्यम्, संज्ञाया अप्रवृत्तावपि तल्लाभात्, प्रगृह्यत्वप्रयुक्तपर्य्युदासस्यैव विधिस्पृष्टस्य तत्फलत्वौचित्याच्चेति। 'सुश्लोकेति' इत्यादावप्यन्तरङ्गत्वात् प्लुतः 'अन्तरङ्गम्बलीयः' (प०भा० ३८) इति न्यायात्।

प्रकृतमनुसरामः - नन्वारभ्यमाणेऽप्यस्मिन् सूत्रे पूर्वसूत्रेणैकरूप्यार्थं यथोद्देशपक्ष एवाश्रयणीयः। तथाच रुत्वस्योत्वं प्रतीव प्रगृह्यसंज्ञां प्रत्येव मुत्त्वमीत्वयोः सिद्धत्वं स्यात्, न त्वयादीन् प्रत्यपि। ततश्च 'अमी आसते' इत्यत्रायादेशप्रसङ्गः, 'अमू आसाते' इत्यत्र पुंस्यावादेशः, 'अमी अत्र' इत्यत्र ''एङः पदान्तादति'' (पा०सू० ६-१-१०९) इत्येकादेशप्रसङ्गश्च। न च संज्ञां प्रत्येव सिद्धत्वे वचनानर्थक्यं स्यादिति वाच्यम्, अनुनासिकपर्युदासेन चरितार्थत्वात्।

प्रवर्तेत इत्यस्येतीति शेषः। वस्तुतस्तु चिन्त्यमिदम्। संज्ञायाः कार्यार्थतया पुनः प्रवृत्तौ कार्यसिद्धिरूपबीजसत्वेन पुनस्तस्याः सुलभत्वात्। ध्वनितं चेदं तत्काला एवेति भाष्येणेति बोध्यम्। तदेतद् ध्वनयन्नाह। **यावद्धाधमिति।** इदमेव कथञ्चिदित्यनेनापि सूचितम्। **न च प्लुतेति।** प्राग्भूतप्रगृह्यसंज्ञाया अल्विधित्वेन विधिना प्लुते आनयनासम्भवेनाप्रगृह्यत्वादिति भावः। **संज्ञाया इति।** तथा च नैतत्संज्ञायास्तस्या असाधारणं फलमिति भावः। इदं च न फलमभ्युपेत्य, वस्तुतस्तदेव नेत्याह। **प्रगृह्यत्वेति। विधीति।** प्रगृह्यत्वविधीत्यर्थः। तत्प्रगृह्यसंज्ञा। नन्वेवमपि सुश्लोकेतीत्यादौ गुणदृष्ट्या प्लुतस्य सिद्धत्वेन गुणेन स्थानिनिवृत्तावप्यप्लुतश्रवणापत्तिरिति हरदत्तोक्तेः[1] सिद्धः प्लुतः स्वरसन्धिष्वित्यवश्यमाश्रयणीयमत आह। **सुश्लोकेतीत्यादाविति।** एवञ्च प्रकृतिभावेन गुणबाधेऽप्यप्लुतवद्भावेन तस्यैव निवृत्तिरिति भावः। पदसंस्कारेण एकपदाश्रयत्वेन वा तस्यान्तरङ्गत्वं बोध्यम्। चिन्त्यमिदम्, त्रैपादिके तत्प्रवृत्तेः। अत्र गतिस्तु सैवेत्यन्यत्र स्फुटम्॥

५.५ 'अदसो मात्' सूत्रारम्भप्रयोजनविचारः - दळकृत्यविचारश्च

अस्मिन्निति। मात्पदघटिते इत्यर्थः। यदि तु अदसो दादित्युच्यते, दात्पूर्वश्च पूर्वोत्तरसाहचर्यादवर्णभिन्नोऽच् - औकारैकाररूप एव, तदा न दोष इति भावः। **यथोद्देशेति।**

---

१. का.प.पृ.सं. १०८।

अत्रोच्यते - यद्यनुनासिकपर्य्युदासमात्रं प्रयोजनं स्यात्तर्हि संज्ञासूत्रं न प्रणयेत्। ''अणोऽप्रगृह्यस्यानुनासिकः'' ''अदसो न'' इत्येव ब्रूयात्। 'असौ' 'अमुके' 'अमुकाभ्याम्' इत्यादौ तु सिद्धान्तेऽपि न भवत्यनुनासिकः, अनपूत्वादनवसानत्वाच्च। अतस्तत्र माद्रूहपमीदूद्रूहपं वा न कर्त्तव्यम्। न चैवं 'हे अमुक' इत्यत्रापि निषेधापत्तिः, त्यदादीनां सम्बोधनविभक्तिविरहस्यौत्सर्गिकत्वात्। अतः संज्ञारम्भसामर्थ्यात्प्रकृतिभावार्थत्वमप्यस्य विज्ञायते। तद्वलाच्चायादिविरहोऽपि सिद्ध्यति, प्रकृतिभावस्यापवादरूपतया ''उपसञ्जातनिमित्तोऽप्युत्सर्ग उपजनिष्यमाणनिमित्तेनाप्यपवादेन बाध्यते' (प०भा० ३५) इति परिभाषावताराच्च। यत्तु संज्ञारम्भसामर्थ्यादयादीन्संज्ञां च प्रति मुत्वमीत्वयोः सिद्धत्वज्ञापनादयादीन् बाधित्वा परत्वान्मुत्वमीत्वे इति तन्न, अयाद्यभावस्य ज्ञापने लाघवात्। अर्थापत्तेर्हि साक्षादुपपादकविषयतौत्सर्गिकी। किञ्च

कार्यकाले तु प्रकृतिभावः, अदसो मादित्यस्योपस्थितिसामर्थ्यात् सन्ध्यभावः। भाष्योक्तमेवाह। **अदसो नेत्येवेति।** अणोऽप्रगृह्यादसोरनुनासिक इति तु युक्तम्। उभयत्रापि निषेधातिप्रसङ्गं लक्ष्यत्वेन निराचष्टे। **असाविति।** लाघवादाह। **मादिति।** तदना [१].... इत्याह। **ईदूद्रूहपं वेति।** विपरीतपाठस्तु युक्तः। अपि व्युत्क्रमे, न चैवमपीत्यर्थः। उक्तदोषाभावेऽपीति यावत्। **औत्सर्गिकेति।** असुकेत्यादौ स्त्रीलिङ्गे दोषवारणं तु संज्ञापूर्वकविधेरनित्यत्वात्। अत एवानुनासिकसंज्ञासूत्रप्रणयनमिति कश्चित्। तन्न। अस्याऽसत्वात्, तत्सूत्रस्य प्रत्याख्यानाच्च। तस्माददस इत्यावर्त्त्य न विद्यते दस्य स्थाने सो यस्य तादृशादस इति व्याख्यानेन तत् बोध्यमिति केचित्। तादृशानामनभिधानमेवेत्यन्ये। प्रकृतिभावार्थत्वे एवाह। **प्रकृतीति। परिभाषेति।** प्रकृत्य चेति मूलकेत्यर्थः। **विप्रतिषेधाद्वेति** वार्तिकस्य[२] एवमपीत्यादिना कैश्चिद्वर्णितं भाष्यतात्पर्यं दूषयितुमनुवदति। **यत्त्विति।** भाष्योक्तेनापवादवचनसामर्थ्यादिति पक्षान्तरेणैव दूषयति। **अयादीति।** लाघवमेवाह। **अर्थेति।** हि यतः। तत्प्रमाणस्य साक्षादुपाधिककल्पकत्वं न पारम्परितस्येति प्रकृते तस्यैव तत्वेन तयोः सिद्धत्वस्येति भावः। नन्वेवं कथमसिद्धस्योद्देश्यत्वमिति तां प्रति सिद्धत्वमपि सामर्थ्यादाश्रयाद्वा वाच्यमिति क लाघवम्। अन्यथा **सिद्धं धर्मिणमिति** (पू.मी. ८/२/१७) न्यायविरोधः। हविरार्तिवदसिद्धस्याप्युद्देश्यत्वमिति तु न। लोके शास्त्रे च सत एव संज्ञाविधानात्। तदुक्तं वृद्धिसूत्रे भाष्ये[३] सतो हि कार्यिण इतीत्यत आह। **किञ्चेति।**

---

१. अत्र ग्रन्थः त्रुटितः। २. म.भा.पृ.सं. २६५ (प्र.भागः) ३. म.भा.पृ.सं. १६६ (प्र.भागः)

मुत्वमीत्वयोरेकपदाश्रयत्वेन बलीयस्त्वम्, 'अन्तरङ्गम्बलीयः' (प०भा० ३८) इति न्यायात्। तत्कथं विप्रतिषेधोपन्यासः ? ''नाजानन्तर्य्ये'' (प०भा० ४१) इति निषेधस्तु, ''असिद्धं बहिरङ्गम्'' (प०भा० ५०) इत्यस्यैव न तूदाहृतपरिभाषायाः। यद्यपि ''असिद्धं बहिरङ्गमन्तरङ्गे'' (प०भा० ५०) इत्यनयैव गतार्थत्वादन्तरङ्गम्बलवदिति पृथक् परिभाषा न कर्त्तव्येति ''विप्रतिषेधे परम्'' (पा०सू० १-४-२) इति सूत्रे भाष्यकृद्वक्ष्यति। तथाऽप्यभ्युच्चयमात्रं तत्, सापवादनिरपवादत्वाभ्यां फले विशेषात्। 'वृक्ष इह' इत्यत्र हि सप्तम्येकवचनेन सह गुणोऽन्तरङ्गः। सवर्णदीर्घत्वं तु बहिरङ्गम्। न चेहासिद्धपरिभाषया गुणो लभ्यते ''नाजानन्तर्य्ये'' (प०भा० ५१) इति निषेधात्। अत एव ''अचः परस्मिन्'' (पा०सू० १-१-५७) इति सूत्रे भाष्यकृद्वक्ष्यति

आरभ्यमाणे नित्योसौ परश्चासौ व्यवस्थया।
युगपत् सम्भवो नास्ति बहिरङ्गेण सिद्ध्यति ।। इति ।।

एतच्च तत्रैव स्फुटीकरिष्यते। अत एवोक्तं वार्त्तिककृता, – ''शचडन्तस्यान्तरङ्गलक्षणत्वात्'' इति। 'धियति' 'अदुद्रुवत्' इत्यादि च तत्रोदाहृतम्। ज्ञापकं चात्र ''ओमाङोश्च'' (पा०सू० ६-१-९५) इत्याङ्ग्रहणम्। तद्धि 'खट्वा-आ-ऊढा' इत्यत्र परमपि सवर्णदीर्घं बाधित्वा धातूपसर्गयोः कार्यमन्तरङ्गमित्यन्तरङ्गत्वाद् गुणे कृते वृद्धिप्राप्तौ सत्यां पररूपं यथा स्यादिति क्रियते। एतच्च ''सम्प्रसारणाच्च''

हरदत्तरीत्या [१]बहिरङ्गे अयादावचोरानन्तर्यसत्वान्निषेधप्राप्तेराह। **नाजेति। एवेति।** तथैव धर्मिग्राहकमानसिद्धत्वात्। अत एव स्पष्टार्थमेव व्यवच्छेद्यमेवाह। **न त्विति।** परिभाषयोर्भेदे इदं सुवचम्, स एव नेत्याह। **यद्यपीति। सापेति।** सामान्ये नपुंसकयोरितरेतरद्वन्द्वे तयोर्भावौ ते ताभ्यामित्यर्थः। तमेवाह। **वृक्ष इति।** हि यतः। त्वं बहिरिति पाठः। **न च** न हि। भाष्योक्त्यापि तस्य तत्वमाह। **अत एवेति।** आरभ्येत्यादि नास्तीत्यन्तः पूर्वपक्षः, बहिरिति समाधिः। युगपत्सम्भवश्च स्वस्वनिमित्तानन्तर्यविघातात्। **तत्रैव** अचः परेत्यत्रैव। वार्तिकोक्त्याऽपि तत्वमाह। **अत एव चेति।** निर्मूलत्वं निराचष्टे। **ज्ञापकं चेति।** तत्वप्रतिपत्तये एव तत्फलमाह। **तद्धीति।** अस्य प्रामाणिकत्वमाह। **एतच्चेति।** तस्माद्विप्रतिषेधासङ्गतो वार्तिकस्य का

---

१. बहिरङ्गे इत्यधिकं ख।

(पा०सू० ६-१-१०८) इति सूत्रे भाष्ये स्पष्टम्। कथं तर्हि वार्तिककृतोक्तं विप्रतिषेधाद्वेति ? सत्यम्, अत एवापरितोषाद्भाष्यकारेणाथवेति पक्षान्तरमाश्रितमिति दिक्।

मात् किम् ? अमुकेऽत्र। नन्विह सूत्रे ईदूतावेवानुवर्त्तितौ न त्वेकारः। सत्यम्, सति माद्ग्रहपे एकारो नानुवर्त्तते अदसो मात् परस्य तस्यासम्भवात्। अन्यथा त्वनुवर्त्तेत। एकदेशानुवृत्तिस्तु दुर्ज्ञाना। तस्मादेकाराननुवृत्तितात्पर्यग्राहकफलकं माद्ग्रहणमिति स्थितम्। अत्रेदं चिन्त्यम्। ''ईदूतौ सप्तम्यर्थे प्रगृह्यौ, अदसः, एच्च द्विवचनम्'' इत्येव कुतो न सूत्रितम् ? एवं हि पूर्वसूत्रस्थमीद्ग्रहणं प्रकृतसूत्रे माद्ग्रहणं च न कर्त्तव्यमिति महल्लाघवम्। एकदेशानुवृत्तिश्चि नाश्रयणीया भवतीति ॥

शे (पा०सू० १-१-१३)। अयं प्रगृह्यः स्यात्। अस्मे इन्द्राबृहस्पती। चतुर्थीबहुवचनस्य स्थाने ''सुपां सुलुक्'' (पा०सू० ७-१-३९) इति सूत्रेण शे आदेशः। शित्त्वात् सर्वादेशः। ''शेषे लोपः'' (पा०सू० ७-२-९०) न युष्मे वाजबन्धवः। युष्मास्वित्यर्थः। अत्र पदपाठकाले 'युष्मे' इत्युदाहरणं बोध्यम्। संहितायान्त्वच्-

---

गतिरित्याह। **कथमिति। अथवेतीति।** अथवा प्रगृह्यसंज्ञावचनसामर्थ्यात् प्रगृह्यसंज्ञा भविष्यतीत्यर्थः। वस्तुतस्तु त्रैपादिकेऽन्तरङ्गे तदप्रवृत्तेरिदं चिन्त्यम्। एकयैवासिद्धमित्यनयार्थद्वय-क्रोडीकारेण परिभाषाद्वयाभावात्। सिद्धान्तरीत्या नाजानन्तर्ये इत्यस्या अप्राप्तेर्लाघवाभाव-स्योक्तत्वात्। अत एव विप्रतिषेधोपपत्तेः प्रकारान्तरेणापि तदुपपत्तेः स्फुटत्वेन वार्तिकस्य निर्दुष्टत्वाच्चेति दिगिति बोध्यम्। तदाह। **दिगिति।** अन्यथा तु तदसत्वे तु। ननु स्वरितत्वा-त्तयोरेवानुवृत्तिरत आह। **तस्मादिति।** महत्वमेवाह। **एकेति।** न च सिद्धान्ते यथाश्रुतन्यासे सप्तम्यर्थे इत्यत्रार्थग्रहणाभावे ईदूदेदिति वदीदूदन्तानां सप्तमीत्यर्थापत्तिः। तथा च पपीत्यादावेव स्यात् एकादेशस्य परादिवत्वेन सप्तमीत्वात्, न तु गौरीत्यादाविति तत्सिद्ध्यर्थं तदावश्यकमिति वृत्तावित्याद्यर्थलाभो न स्यादिति वाच्यम्। तादृशलघुभूतन्यासेन सिद्धे गुरुभूतन्यासकरणेन तत्प्रकरणापेक्षया वैजात्यबोधनात्। ऊकारांशे असम्भवाच्च। संज्ञाविधाविति निषेधाप्रवृत्त्या ईदूदन्तं सप्तम्यन्तमित्यर्थे तदिष्टसिद्धेरिति चिन्तेति केचित्। वस्तुतस्तु सिद्धान्त एवायमिति बोध्यम् ॥

५.६ शेसूत्रार्थनिरूपणम्

शे। युष्मास्विति। प्रक्रिया पूर्ववत्। षष्ठीबहुवचनमिदमिति तु **नारायणः। अत्र**

परत्वाभावेन सत्यसति वा प्रगृत्यत्वे विशेषालाभात्। एवं 'त्वे रायः सुदुघास्ते ह्यश्वाः' इत्यादीनामपि पदपाठकाले उदाहरणत्वं बोध्यम्। ''लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् (प०भा० ११४)। तेनेह न – 'काशे' 'कुशे' 'वंशे' 'हरिशे' 'बभ्रुशे'। हरिं बभ्रु आभ्यां लोमादित्त्वाच्छप्रत्ययः। ततः सप्तम्येकवचनम्॥

निपात एकाजनाङ् (पा०सू० १-१-१४)। एकोऽज् निपात आङ्भिन्नः प्रगृह्यः स्यात्। अ निषेधाधिक्षेपयोः, 'अ अवद्यम्'। इ विस्मये, 'इ इन्द्रः' उ जुगुप्सासंतापान्वर्थाप्यर्थेषु 'उ उमेशः'। एकाजिति कर्मधारयः वर्तिपदार्थप्राधान्येनान्तरङ्गत्वात्, ''व्याहरति मृगः'' (पा०सू० १-३-८३) इत्यादिनिर्देषाच्च। तेनेह – 'प्रेदं ब्रह्मवृत्रतूर्येष्वावित्थ' 'प्रेद्धः' इत्यादि।

स्यादेतत्, यद्ययं कर्मधारयस्तर्हि एकग्रहणं व्यर्थम्। निपातो योऽच् इत्येतावतैवाभिमतसिद्धेः। न च विपरीतविशेषणविशेष्यभावेनाजन्तो यो निपात इत्यर्थः स्याद्विशेषणेन तदन्तविधेरिति वाच्यम्, तथासति व्यावर्त्यालाभेन विशेषणवैयर्थ्यापत्तेः। न च हलन्तं व्यावर्त्यम्, तस्य सञ्ज्ञायां सत्यामपि बाधकाभावात्। न च 'पुरोऽस्ति' इत्यादौ हलन्तस्य संज्ञायां सत्यां प्रकृतिभावाद्रो रुत्वं न स्यादिति वाच्यम्, प्रगृह्यसञ्ज्ञां प्रति रुत्वस्यासिद्धतया दोषाभावात्। न च सान्तस्य कृता प्रगृह्यसञ्ज्ञा एकदेशविकृतस्यानन्यतया रेफान्तस्यापि स्यादेवेति प्रकृतिभावप्रसङ्गस्तदवस्थ

अनयोर्मध्ये, न युष्मे इति श्रुतो वा। अत एवाह। **युष्मे इतीत्युदेति। दीनामपीति।** त्वे इत्यादेरिति शेषः। **लक्षणेति।** अर्थवत्परिभाषातः प्रबलयाऽपि वारणं सर्वत्रेति भाष्यादौ स्पष्टं, तत एव बोध्यम्॥

५.७ 'निपात एकाजनाङ्' सूत्रे एकग्रहणवैयर्थ्यपूर्वपक्षः

निपात एकाजनाङ्। अन्वर्थः = पश्चात्। अप्यर्थः = समुच्चयः। ननु विशेष्यसन्निधानादेकग्रहणसामर्थ्याच्च बहुव्रीहिरेव स्यादत आह। **व्याहरतीति।** अत एव शङ्कते। **स्यादेतदिति। निपात इति।** तस्य विशेषणत्वात्। **स्यादिति।** तथा च प्रेदमित्यादौ दोष एव। **हलन्तस्य** रान्तस्य। **एकदेशेति।** स्थानिवदित्यस्य त्रिपाद्यमपि प्रवृत्तेः, तथा चोत्वं न स्यादेवेति

एवेति वाच्यम्, प्रगृह्यसञ्ज्ञां प्रतीव प्रकृतिभावं प्रत्यपि रुत्वस्यासिद्धत्वात्। सकारान्तस्य तु न किञ्चिदपि सिद्धकाण्डस्थं प्राप्नोति यत्प्रकृतिभावेन व्यावर्त्येत। तस्मादचा निपातस्य विशेषणे एक ग्रहणं व्यर्थमेव स्यादिति सुष्ठूक्तम्। नन्वजन्तस्यैव यथा स्यादज्मात्रस्य मा भूदित्येवमर्थं विशेषणं किन्न स्यादिति चेत् ? न, व्यपदेशिवद्भावेन तस्याप्यजन्तत्वा-नपायात्। विशेषणसामर्थ्याद्व्यपदेशिवद्भावो न प्रवर्त्तते इति चेत् ? न, तदन्तविधि-परित्यागेनापि तत्सार्थक्यस्य सुवचत्वात्। तथाप्यन्यतरपरित्यागे आवश्यकं विनिगमकं किमिति चेदाङ्ग्रहणमेवेत्यवेहि। तद्धि व्यपदेशिवद्भावमात्रबाधे व्यर्थं स्यात्, तस्मादचो विशेषणत्वेनाङ्ग्रहणाज्ज्ञापकात्तदन्तविधिर्न। अचो विशेष्यत्वे तु सुतरां तदन्तविधिरिति। उभयथाऽप्येकग्रहणं व्यर्थमेवेति स्थितम्। नन्वच्समुदायनिवृत्त्यर्थमेकग्रहणमस्तु। 'अइउ अपेहि' इति समुदायस्यैव संज्ञा स्यान्नावयवानामेकाज्द्विर्वचनन्यायादिति चरमस्यैव प्रकृतिभावः स्यान्न तु पूर्वयोरिति। मैवम्, अजित्येकत्वस्य विवक्षयैव समुदाय-निराससम्भवात्।

अत्राह भाष्यकारः - अच्समुदायग्रहणशङ्कानिरासार्थमेकग्रहणं कुर्वन् ज्ञापयति

भावः। ननु सान्तस्य प्रगृह्यत्वे प्रकृतिभावादुत्वमेव न स्यादत आह। **सकेति।** असिद्ध-काण्डस्थरुत्वं तु प्रकृतिभावेऽसिद्धमेवेति भावः। तस्य तदज्निमित्तकार्यत्वाभावादपि तत्र तदप्रवृत्तिरित्यपि बोध्यम्। उपसंहरति। **तस्मादिति। विशेषणं** विशेष्यीकरणम्। **तथापि** अन्यतरनिवृत्या तत्सार्थक्येऽपि। **सुतरामिति।** प्रसङ्गस्यैकभावेन तत उत्कर्षः। **अस्त्विति।** अन्यथेति शेषः। **अजित्येकत्वेति।** पशुना यजेतेत्यादौ पशोरपि यागोपकारकत्वाद्गुणत्वम्। न हि यागः पश्वर्थः, अपि तु यागार्थः पशुरिति तद्गतमेकत्वं यथा विवक्ष्यते, तथाऽवयवस्यापि संज्ञोपकारकत्वाद्गुणत्वमित्येकत्वं विवक्षितमित्यर्थः। ग्रहं सम्मार्ष्टीत्यादौ तु ग्रहार्थत्वात्संमार्गस्य ग्रहस्य प्राधान्यमिति न तद्गतसंख्या विवक्षितेति भावः। वस्तुतस्तु चिन्त्यमिदम्। संज्ञायाः स्वकार्यद्वारा संज्ञ्युपकारकत्वेऽपि संज्ञिनः संज्ञोपकारकत्वाभावात्। अन्यथा ग्रहस्यापि कर्मार्थत्वेन संमार्गार्थतापत्तेः। ग्रहोद्देशेन तद्विधानेऽपि तस्य प्राधान्याभावात्। अत एव वृद्धिसूत्रभाष्यसंङ्गतिः। तस्मान्मीमांसकमर्यादैव युक्ता। तैर्गुणगता सा विवक्षितेति क्वाप्यनुक्तेः। प्रकृतदोषवारणं तु स्वाङ्गसमुदाये स्वाङ्गत्वाभाववदच्समुदायेऽच्त्वाभावान्न तद्ग्रहणप्रसक्तिरित्येव बोध्यम्।

५.८ अत्र भाष्यकारोक्तसमाधिः

एकग्रहणवैयर्थ्यरूपं स्यादेतदित्यारभ्योक्तं दोषं परिहरति। **अत्राहेति।** तद्वैयर्थ्यविषये

वर्णग्रहणेषु व्यक्तिसङ्ख्या न विवक्ष्यते किन्तु जातिरेव निर्दिश्यते इति। तेन ''दम्भेर्हल्ग्रहणस्य जातिवाचकत्वात्सिद्धम्'' इति वार्तिककृता वक्ष्यमाणं सूत्रेणैव ज्ञापितं भवति। दम्भेः सिद्धमित्यन्वयः। अत्र हेतुर्हल्ग्रहणस्य जातिवाचकत्वादिति। तेन दम्भेः सनि कृते ''सनीवन्त'' (पा०सू० ७-२-४९) इति विकल्पादिडभावे ''दम्भ इच्च'' (पा०सू० ७-४-५६) इतीदीतोः कृतयोः ''अत्र लोपोऽभ्यासस्य'' (पा०सू० ७-४-५८) इत्यभ्यासलोपे ''हलन्ताच्च'' (पा०सू० १-२-१०) इति सनः कित्त्वान्नलोपे भष्भावे च कृते 'धिप्सति' (पा०सू० १-२-१०) इति सनः कित्त्वान्नलोपे भष्भावे च कृते 'धिप्सति' 'धीप्सति' इति रूपद्वयं सिद्ध्यति। हल्ग्रहणस्य व्यक्तिपरत्वे तु योऽत्रेकः समीपो हल् नकारो न ततः परः सन्, यस्माच्च परः सन् भकारान्नासाविकः समीप इति कित्वं न स्यात्। तथा ''तृंहू हिंसायां' (तु०प० १२१५) तुदादिः, ऊदित्वादिड् वा तितृंहिषति तितृक्षतीति स्यादिति दिक्।

स्यादेतत्, 'अइउ अपेहि' इत्यत्र एकाज्द्विर्वचनन्यायोपन्यासो न युक्तः समुदायसङ्ज्ञंयाऽवयवानामननुग्रहात्। अत एव हि 'निर्ग्लायात्' 'निर्ग्लेयात्' इत्यादौ बहूनां सन्निपाते द्वयोः संज्ञा स्वीकृता। नापि निपातग्रहणेन ग्रहणमेकैकस्मिन्निपाते संज्ञाविधानसम्भवात्। सत्यम्, एकाज्समुदायग्रहणशङ्कामात्रं तु स्यादेव। तन्निरासायैव

इत्यर्थः। कुर्वन् पाणिनिः। **जातिरेवेति।** उपात्तजात्याश्रयैकानेकव्यक्तिरेवेत्यर्थः। यथासम्भवमिति भावः। यथाश्रुतं तु न युक्तम्, जातेरेकैकव्यक्तिव्यङ्ग्यतयाऽसङ्गतेः। **वक्ष्येति।** 'हलन्ताच्चे'त्यत्रेति भावः। अप्रत्यासत्तेरन्वयादाह। **दम्भेरिति।** सामीप्यमव्यवहिते एवेति अनेन भाष्येण सूचितम्, तस्य तत्रैव शक्तेरतोऽद्यन्तेति सूत्रभाष्यमप्यत्र मानम्। एतेन व्यवहितस्यापि समीपत्वानपायाच्चिन्त्यमिदमित्यपास्तम्। वस्तुतस्तु अजिति ग्रन्थस्यायुक्तत्वमुक्तमेव। किञ्च अइउइत्यत्रातिप्रसङ्गोऽप्ययुक्तः, वैषम्येण तदविषयत्वात्। किञ्च निपातस्य समुदायस्य निपातग्रहणेनाग्रहणात्, स्वाङ्गसमुदायस्य स्वाङ्गग्रहणेनेव। सूत्रस्य त्वेकैकत्र चारितार्थ्यात्। तस्मात्तितउशब्दैकदेशस्य अउइत्यस्यानुकरणे उक्तसमुदायानुकरणे वाऽनितिपरे निपातसंज्ञके 'अउअकरोत्' इत्यादावतिप्रसङ्गवारणाय तत् क्रियमाणमुक्तरीत्या व्यर्थं सत् ज्ञापकमिति तत्वम्। तदाह। **इति दिगिति।** इदमेव दृढयति। **स्यादेतदित्यादिना। स्वीकृतेति।** अन्यथा तदानर्थक्यं स्पष्टमेव। **शङ्कामात्रं त्विति।** अच्समुदायेऽच्त्वाभावादापत्तेरभावादिति भावः। एवेनापत्तेरेव

क्रियमाणमेकग्रहणं प्रागुक्तमर्थं ज्ञापयति। वस्तुतस्त्वपृक्तसंज्ञायामेकग्रहणमुक्तार्थे ज्ञापकमित्याश्रित्य प्रकृतसूत्रे एकग्रहणस्य परित्याग एव ज्यायान्। निपात इति किम् ? चकारात्र। तथा अततेर्डः अः, 'हे अ आगच्छ' इत्यपि प्रत्युदाहरणम्। आङनाङोर्व्यवस्थामाह भाष्यकारः —

ईषदर्थे क्रियायोगे मर्यादाऽभिविधौ च यः।
एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित्॥ इति॥

इह एतच्छब्देन पूर्वमनिर्दिष्टत्वादेतमित्यस्यैनादेशो न कृत इति कश्चित्। तन्न, – अन्वादेशश्च कथितानुकथनमात्रं न त्विदमेव कथितस्येदमाऽनुकथनमिति भाष्यकृता वक्ष्यमाणत्वात्। तस्माद्यत् किञ्चिद्विधाय वाक्यान्तरेणान्यदुपदिश्यते सोऽन्वादेशः। इह तु ईषदर्थादौ यो वर्त्तते इति वृत्तिर्न विधेया, किन्तु परिचायकतामात्रेणोपात्ताः। अतो नैनादेशः। एतेन –

नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय।

इत्यपि व्याख्यातम्। भीरुत्वस्य विधेयत्वाविवक्षणात् सिद्धस्यैव हेतुत्वेनानुवादादिति दिक्।

व्यवच्छेदभाष्याद्यनुक्तमाह। **वस्तुतस्त्विति।** प्रत्युदाहरणान्तरमाह। **तथेति।** नन्वस्य सम्बोधनत्वेन प्लुतसंज्ञायां तदाश्रये प्रकृतिभावे सिद्धान्तेऽपि दीर्घस्यात्राप्रवृत्तिरेवेति कथं प्रत्युदाहरणमिदमिति चेन्न प्लुतस्य वैकल्पिकत्वेन तदभावपक्षे दोषसम्भवादिति कश्चित्। दूराद्धूतत्वाविवक्षायामिदं, तत्र हि प्लुतो दुर्वारः स्यात्। तत्वाभावाद्वा न प्लुत इत्यन्यः। वस्तुतस्तु सर्वमिदं चिन्त्यम् - प्लुताभावेऽपि सिद्धान्ते प्रगृह्यत्वाभावे तेन तत्र प्रत्युदाहरणत्वे सवर्णदीर्घे तथा बोधनापत्तेरिति प्रपञ्चितं **छायायाम्**[1]**।** चस्त्वर्थे। **कश्चिदिति।** दण्ड्यादिरित्यर्थः। **इदमेवेति।** इदमुपलक्षणमेतदपि। अत एव पूर्वसङ्गतिः। तस्योभयत्राविशेषत्वेन विशेषे नियामकाभावश्च। **विधायेति।** अत्रोभयत्र विधानं प्रवर्तनाविषयत्वरूपं। प्रकृते द्वितीये तस्य सत्वेऽप्याद्ये नेत्याह। **इह त्विति। परीति।** उपलक्षकतेत्यर्थः। प्रयोगेन तत्स्वरूपस्य साक्षादनुपलभ्यत्वेन तद्बोधनाय काकवदिदमुपात्तमिति भावः। **भीरुत्वस्येति।** तस्य तत्वेनाविवक्षणादित्यर्थः। अत्र हेतुमाह। **सिद्धस्येति।** हेतुगर्भं विशेषणमिदम्। सिद्धत्वेन तस्य हेतुत्वेनानुवादस्यैव विवक्षणादित्यर्थः। अयं

---

१. छाया पृ.सं. २७२ (प्रथमो भागः)

ईषदर्थे-आ उष्णम्। आङीषदर्थे इति ''कुगति'' (पा०सू० २-२-१८) इति सूत्रे वार्त्तिककृता। ङिव्यवहृतः। क्रियायोगे–आ इतः एतः। प्रादिषु ङित्पठितः। मर्यादाऽभिविधौ चेति समाहारद्वन्द्वे आगमशासनस्यानित्यत्वान्नुमभावः। मर्यादया सहिते अभिविधाविति मध्यमपदलोपी वा समासः। मर्यादायाम् - आ उदकान्तात् ओदाकान्तात्। अभिविधौ–आ अहिच्छत्रात् आहिच्छत्रात्। विना तेनेति मर्यादा, सह तेनेत्यभिविधिः ''आङ् मर्यादाभिविध्योः'' (पा०सू० २-१-१३) इति च ङिन्निर्दिष्टः। पूर्वप्रक्रान्तस्य वाक्यार्थस्यान्यथात्वद्योतनाय आकारः प्रयुज्यते - 'आ एवं नु मन्यसे'।

भावः। राधाभीरुत्वस्येति सखीवाक्यमिदम्। तत्र सखीवाक्ये कृष्णे वास्तवभीरुत्वस्याभावात् बहुशोऽभीरुकार्यकरणात् तात्पर्यार्थासम्पादनाच्चारोपितभीरुत्वं भाविकार्यव्यवहारसंगोपनायानुवाद्यत्वेनैव विवक्षितम्। गृहप्रापणं प्रति प्रार्थ्यमानया राधया तादृशभीरुत्वस्य बुद्धत्वेन तां प्रति तदनुवाद्यमेव। एवेन तत्र भीरुत्वेऽतात्पर्यविषयत्वं सूचितम्। अन्यथोक्त दोष एव। अत एव त्वमेवेत्येवकारसङ्गतिः। अन्यथा त्वमपीति वदेत्। अत एव तदिममीत्यादि सारस्वमेद्यैरित्यादिनोद्धीपनविभावादिबोधनसाङ्गत्यं चेति। यत्तु तट्टीकाकृत् तद्वाक्यमिदमिति। तन्न। तथा सति चिरकालिकरहःकेलीनां तव तात्पर्यविषयत्वेनासङ्गत्यापत्तेः। गृहप्रापणनस्यैव तात्पर्यविषयत्वेन भीरुत्वस्य विधेयत्वापत्त्योक्तदोषापत्तेश्च। न चैवं नन्दनिदेश इति कथम्, नन्दनीयनिदेशादिति तदर्थात्। कर्मणि घञनीयरौ, कर्मधारयः, पञ्चम्यन्तात्सार्वविभक्तिकस्तसिः, भाविसुरतजनकत्वेन निदेशस्यानन्दनीयत्वमिति भावः। वस्तुतस्तु तन्न प्रवर्त्तनाविषयत्वरूपम्, अन्वादेशश्च **कथितानुकथनमात्र**मिति भाष्यविरोधात्। अत एव 'इमकाभ्यां रात्रिरधीता अथो आभ्यामहरप्यधीतम्' इत्युदाहरणसङ्गतिः। तस्मादज्ञातज्ञापनरूपापूर्वबोधनमेवोभयत्रापि विधानम्। तदपि प्रकृते आद्ये न, ईषदर्थादिवृत्तित्वस्य सिद्धत्वेनापूर्वाबोध्यत्वेनानुवाद्यत्वात्। अतो न स इति बोध्यम्। परमार्थस्तु मिथो निराकाङ्क्षयोरेव तयोर्यत्र सत्ता तत्रैवान्वादेशत्वमिति प्रकृते पूर्वार्द्धोक्तस्य नित्यमुत्तरस्य सापेक्षत्वेनार्धोक्तिरूपत्वेन तद्वाक्यपूर्त्यभावेनोक्तस्य तादृशस्य पुनरुक्तिरूपत्वाभावेन तस्य सम्भव एव नेति न तत्प्रसक्तिः। अत एव कैयटादिभिस्तत्किमपि नोक्तमिति बोध्यम्। तदाह **दिगिति।**

५.९ 'ईषदर्थे क्रियायोग' इति कारिकार्थः

उदाहरणान्याह। **ईषदित्यादि।** हरदत्तप्रकाशोक्तमाह। **समेति।** तस्यासत्वात् सिद्धान्तमाह। **मर्यादेति।** परिनिष्ठितविभक्त्या समासः। **अन्यथात्वेति।** अनभिमतत्वेत्यर्थः।

नैवं पूर्वममंस्थाः, संप्रत्येवं मन्यसे इत्यर्थः । वाक्यारम्भसूचनाय आकार इत्यपरे । तथा स्मृतेः । सूचक आकारः प्रयुज्यते । ततः स्मृतोऽर्थो निर्दिश्यते – आ एवङ्किल तदिति ।

अत्र च वाक्यस्मरणयोरङिदित्यत्रैव तात्पर्यम् । अतो वाक्यस्मरणाभ्यामन्यत्रेषदर्थाद्यभावेऽपि ङित्त्वं बोध्यम् । तेन ''आमेन्यस्य रजसो यदभ्र आँ अपो वृणाना'' इत्यत्र सप्तम्यर्थवृत्तेरप्याकारस्य ङित्त्वेन ''आङोऽनुनासिकश्छन्दसि'' (पा०सू० ६-१-१२६) इति प्रवर्त्तते इति षष्ठे हरदत्तादयः ।

युक्तश्चैतत् । ङिदङिदोरन्यतरलक्षणमात्रेणार्थादुभयविवेकलाभे तत्रापि लाघवादङिल्लक्षणे तात्पर्य्यमाश्रित्य भागान्तरस्यावयुत्यानुवादरूपत्वात् ।

ओत् (पा०सू० १-१-१५) । ओदन्तो निपातः प्रगृह्यसंज्ञः स्यात् । आहो इति, उताहो इति । निपात इति किम् ? देवोऽसि । वषट् ते विष्णवास आ । वायवायाहि ।

तदाह । **नैवमिति ।** एतेन वाक्यार्थस्य तस्यैव सत्वान्नान्यथात्वमित्यपास्तम् । **स्मृतेरिति ।** विस्मृतस्य स्मृतिविषयताया इत्यर्थः । एवं किल तदिति स्मृतार्थनिर्देशादिदमलब्धं, तदाह । **तत इति ।** दोषन्यूनतयोर्निरासाय भाष्याद्यनुक्तं विशेषमाह । **अत्र चेति ।** उक्तभाष्यपद्ये इत्यर्थः । **इत्यत्रैव** अङिल्लक्षणे एव । **तात्पर्यमिति ।** लाघवात्, अन्यस्य ङित्वं त्वर्थसिद्धम् । ईषदर्थे इत्यादिस्तु अवयुत्त्यानुवाद इति भावः । तदेवाह । **अत इति ।** तत्फलमाह । **तेनेति । सप्तम्यर्थेति ।** 'अभ्र आँ अपः', 'अपोऽभ्रेऽधि' इति यास्कोक्त्या तस्य तद्वृत्तित्वं बोध्यम् । अत एव तत्संग्रहाय चोऽपि भाष्ये पठितः । वाक्यस्मरणातिरिक्तेऽर्थे ङेर्ङित्वं न, तथा प्रयोगाभावात् । अत्र चेदमेव भाष्यं मानम् । अत एव **स्वरादी**ति सूत्रे आ इति वाक्यस्मरणयोरित्येवोक्तम् । एतेनाङ्गीकाराद्यर्थवृत्तेरा आगत इत्यादावातोऽङित्वस्यापीष्टत्वादिदं चिन्त्यम्, तस्मादस्योभयलक्षणेऽपि न तात्पर्यं, किन्तु सूत्रे पाणिन्यादिना यत्र ङिर्निर्दिष्टस्तत्र सोऽन्यत्राङिदिति ज्ञेयमित्यत्रेति [१]रत्नकृदुक्तमपास्तमिति दिक् ।।

५.१० 'ओत्सूत्रे' काशिकोक्तप्रत्युदाहरणविमर्शः

ओत् । वृत्त्युक्तं खण्डयति । **यत्त्विति । एतदेव** उत्तरसूत्रोक्तमेव, सम्भवात् लाघवाच्च ।

---

१. र.प्र.पृ.सं. ४४ द्वितीयभागः ।

विष्णोव। यत्तु 'गवित्ययमाह' इत्येतदेव निपातग्रहणस्य व्यावर्त्यमिति। तन्न, प्रगृह्यसेज्ञायां सत्यामपि क्षत्यभावात्। न चैवं प्रकृतिभावापत्तिः, प्रकृतिभावविधौ पदान्ताधिकारात्। न चायं पदान्तो भवत्येवेति भ्रमितव्यम्, अनुकार्यानुकरणयोर-भेदविवक्षयाऽर्थवत्वाभावेनाप्रातिपदिकत्वाद्विभक्तेरनुत्पत्तावेवै-तदूपाभ्युपगमात्। अन्यथा विभक्तिश्रवणापत्तेः। न चैवमपदस्य प्रयोगासङ्गतिरिति वाच्यम्, ''अपदं न प्रयुञ्जीत'' इत्युद्घोषस्य अपरिनिष्ठितं न प्रयुञ्जीतेत्येवं परत्वात्, तस्य च सुप्तिङादिविषयक-तत्तद्विधिशास्त्रमूलकत्वात्, इह तूक्तरीत्या सुब्विभक्तेरप्यप्राप्त्या गो इति स्वरूपस्यैव परिनिष्ठितत्वात्। अत एवेह ''लोपः शाकल्यस्य'' (पा०सू० ८-३-१९) इत्यपि न प्रवर्त्तते। कथं तर्हि पूर्वसूत्रे ''शेऽर्थवत् ग्रहणात्'' इति वार्त्तिके ''एङः पदान्तात्'' (पा०सू० ६-१-१०९) इति पूर्वरूपं कृतमिति चेत् ? तत्रानुकार्यानुकरणयोर्भेदं विवक्षित्वा विभक्तिं च कृत्वा शेष्वर्थवान् शेऽर्थवानिति समासेन सुपो लुकं कृत्वा व्याख्यानात्। एतेनोत्तरसूत्रे 'सम्बुद्धाविति किम् ? 'गवित्ययमाह' इत्युदाहरन्तो

एवेनान्यनिरासः। **पदान्तेति।** एङः पदान्तादित्यतः विभक्तिविपरिणामेनान्वयः। अन्यथा भेदपक्षादौ। न च लिङ्गसर्वनामनपुंसकत्वाभ्युपगमेनोत्पन्नाया लुक्, ह्रस्वापत्तेः। न च नैकधेत्यादाविव सुप्सुपेति समासेन निर्वाहः। इतिशब्दस्य स्वरूपपरतातात्पर्यग्राहकत्वेन तेनैकार्थीभावरूपसामर्थ्यस्य दुरुपपादत्वात्। न च गोभ्यां गोक्षीरमित्येकदेशानुकरणे प्रकृतिवदिति पदत्वं सुलभमिति वाच्यम्। तदनित्यत्वेनाप्रवृत्तिमाश्रित्य सुसाधत्वेनासाधारणफलत्वाभावात्। अत्र दोषान्तरमपि ध्वनयन् उद्घोषेत्यनेनानार्षत्वं सूचितम्। **एवं परेति।** एवं तात्पर्यकत्वादित्यर्थः। निर्मूलत्वं तु नेत्याह। **तस्य चेति। विभक्तेरपीति।** विभक्तेरेवेत्यर्थः। अभेदविवक्षां दृढयति। **अत एवेति।** एतेन तद्घटकस्यानुकरणे न क्षतिरित्यपास्तम्, लोपस्य दुर्वारत्वात्। यद्यपि लोपस्य वैकल्पिकत्वं, तथापि भावानुष्ठानस्यैवौचित्यम्। एतेन तस्य वैकल्पिकत्वात् श्रूयमाणप्रयोगे न क्षतिरित्यपास्तम्। केचिदभावपक्षेणैवात्र क्षत्यभावमाहुः। अन्ये तु गोभ्यामित्यादिघटकस्य तस्यानर्थक्याल्लोपस्य वैकल्पिकत्वादप्राप्त्या तेन पदत्वेन वृत्तेः सुयोजत्वं न प्रकृतेः, स्वादिप्रत्ययस्य तल्लोपस्य च विरहप्रयुक्तप्राप्तपदत्वस्यातिदेशेन यत्तदेतेभ्य इत्यादाविव प्रकृतिसत्ताबोधनेऽपि स्वादिप्रत्ययादेर्बोधनस्य कर्तुमशक्यत्वेनातिदेष्टुमशक्यत्वादित्याहुः। **पूर्वेति।** शे इति सूत्रे इत्यर्थः। शेश्चासाविति कर्मधारये दण्डिकृष्णाद्युक्ते पूर्वनिपातवैपरीत्यापत्तेराह। **शेष्विति।** सुप्सुपेति समासः। **व्याख्यानादिति।** अन्येषामित्यादिः। **उदाहरन्तः** प्रत्युदाहरन्तः। अपिः सूत्रे इत्यग्रे

वृत्तिकारा अपि प्रत्युक्ताः। तस्मादिह 'देवोऽसि' इत्यादिकमेव प्रत्युदाहरणं बोध्यम्। न च ''एङः पदान्तात्'' (पा०सू० ६-१-१०९) इत्यारम्भसामर्थ्यादेव तत्सिद्धिः, 'हरेऽव गच्छ' इत्यादौ चरितार्थत्वात्। न चैङ्ग्रहणसामर्थ्यम्। ''ङसिङसोश्च'' (पा०सू० ६-१-११०) इत्युत्तरार्थत्वात्। उत्तरसूत्रे तु सम्बुद्धिग्रहणाभावे 'आहो इति' इत्यादावपि परत्वाद्विकल्पापत्तिः, पूर्वसूत्रस्य 'अहो ईशाः' इत्यादावुत्तरस्य तु 'विष्णो इति' इत्यादौ लब्धावकाशतया विप्रतिषेधसम्भवात्। न चेह ओदन्तस्य कार्यितयोत्तरत्र तु विशेष्यासन्निधानेन तदन्तविधिविरहादोकारमात्रस्य कार्यितया भिन्नविषयकत्वे कथं विप्रतिषेध इति वाच्यम्। 'त्रपूणाम्' इत्यादौ प्रकृतिप्रत्ययावयवयोर्नुम्नुटोरिवेहापि फलविरोधेन विषयभेदेऽपि विप्रतिषेधसम्भवात्, अर्थाधिकारपक्षे उत्तरसूत्रेऽप्योकारान्तस्य संज्ञित्वाच्च, शब्दाधिकारपक्षेऽपि ''इको झल्'' (पा०सू० १-२-९) इत्यत्र सनाक्षिप्तस्य धातोरिका विशेषणवदिहापि सम्बुध्याक्षिप्तायाः प्रकृतेरोकारेण विशेषणे तदन्तविधि-सम्भवाच्च। तस्मात्सूत्रद्वयेऽपि 'गवित्ययमाह' इति प्रत्युदाहरणं नेति स्थितम्। प्रकृतिभावे पदान्तग्रहणं न सम्बध्यते इत्याशयेन तु वृत्तिग्रन्थो योज्यः। अस्मिंश्च पक्षे मण्डूकप्लुतिन्यायेन ''इकोऽसवर्णे'' (पा०सू० ६-१-१२७) इत्यत्र पदान्तग्रहणं सम्बन्धनीयमेव। अन्यथा 'गौर्यौ' 'गौर्य्यः' इत्यादावतिप्रसक्तेरिति दिक्।

योज्यः। प्रक्रियाकृदादिसमुच्चायको वा। **एङिति।** प्रत्याहारेत्यर्थः। एवं प्रकृते निश्चित्य प्रसङ्गादाह। **उत्तरेति।** अपिना तल्लक्षसमुच्चयः। एकस्य द्विकार्ययोग एव विप्रतिषेध इति शङ्कते। **न चेहेति।** तदभावेऽप्यसम्भवमात्रेण तदङ्गीकार इत्याह। **त्रपूणामिति।** संज्ञयोः स्थानतोऽविरोधादाह। **फलेति।** दृष्टान्तेऽप्येवम्। इदञ्च शब्दाधिकारं पूर्वपक्ष्युक्तमसिद्धान्तभूत-मभ्युपेत्य। सिद्धान्तमतेनाह। **अर्थेति।** मतान्तरमाह। **प्रकृतीति।** प्लुतप्रगृह्य इत्यत्रेत्यर्थः। क्वचित्तथैव पाठः। युक्तश्च सः। चस्त्वर्थे। वस्तुतस्तु मण्डूकानुवृत्तिर्न युक्ता, सम्बन्धतदभावो-भयकल्पनापत्त्या गौरवापत्तेः। अत एव पदान्तप्रकरणे प्रकृतिभाव इत्यदसो मादिति सूत्रभाष्यं सङ्गच्छते। एतत्सूचक एव तुः प्रयुक्तः। किञ्च परत्वाद्विकल्पः सम्बुद्धिग्रहणाभावे इत्याद्यप्यसङ्गतम्। तथा हि। तत्र केचित्तदाश्रयं वर्णयन्ति। न चाकडारसूत्रतस्तदधिकारान्यत्र संज्ञानां बाध्यबाधकभावाभावस्य लाभेन परत्वादित्ययुक्तमिति वाच्यम्। संज्ञाया एकत्वात्, समावेशेऽपि विकल्पदुर्वारत्वात्। न ह्येतेनाभावसहिता प्रगृह्यसंज्ञा क्रियते। नित्यादिपदाभावात् ज्ञापकस्य विशेषविषयत्वेन संज्ञाभेदविषयत्वाच्च न वेति शब्दनिरपेक्षेनान्तरङ्गत्वादौदित्येव युक्तमिति

वाच्यम्। निपातसंज्ञासापेक्षत्वेन समत्वात् अन्तरङ्गे कृते बहिरङ्गस्य दुर्वारत्वाच्च। न चैवमप्येतदभावे नित्यविधिर्दुवार इति भिन्ने ओदित्यस्य निपातभिन्ने सम्बुद्धावित्यस्य साफल्येन सामर्थ्याभावात्। एवञ्च फलेऽविशेष इति वाच्यम्। परत्वेन विकल्पप्रवृत्तावभावपर्यन्तमप्यस्य व्यापारेण सकृदिति न्यायेन ओदित्यस्य तदभावेऽप्रवृत्तेः। अत एव 'न यदि' (पा०सू० ३-२-११३) 'विभाषा साकाङ्क्षे' (पा०सू० ३-२-११४) इत्यत्र निषेधीयोभयत्रविभाषेति सङ्गच्छते। अत्र हि परत्वादेतत्प्रवृत्तावप्यनेन निषेधाभावे साक्षात्प्रभृती(पा०सू० १-४-७४) ति अनेन विभाषा प्राप्नोति, नित्या च गतिसंज्ञेष्यते। पूर्वेणेति पुनः प्रसङ्गविज्ञानात् इति **कैयटः**[१]। पुनरिति परत्वाद्विकल्पेऽपि तदभावे नित्यविधिप्राप्त्या न दोषः। न च प्राप्तविभाषाविषये वैकल्पिकाभावे नित्याङ्गीकारे विकल्पशास्त्रवैयर्थ्यापत्तिः, अच्व्यन्ते चारितार्थ्यादित्युद्योतश्च[१]। न च तस्याचश्चेति सूत्रभाष्यविरोधः, तत्र हि यत्र पूर्वविधेः परप्रवृत्तिविफलकत्वं न तत्र पुनः प्रसङ्गेत्यस्य प्रवृत्तिरित्युक्तमिति। तद्भाष्यस्यान्यथाऽपि सुयोजत्वात्। एतद्भाष्यकैयटविरोधात् 'ई च द्विवचने' इत्यत्रत्यभाष्यादिविरोधाच्च तत्रत्यकैयटस्य चिन्त्यत्वाच्च। स्पष्टीकृतमेतद् **गदायाम्**[२]। अत्राधिकं [३]**भावप्रकाशतो** ज्ञेयम्। किञ्च संज्ञाकृतबहिरङ्गत्वानाश्रयणेन तथा ओदित्यस्यान्तरङ्गत्वे परत्वमयुक्तमेव। किञ्च नित्यविकल्पविध्योर्युगपत्प्राप्तावपि विरोधाभावेनोक्तभाष्यरीत्या पक्षे तेन संज्ञाविधानमात्रेण भावपर्यन्तव्यापारे मानाभावेन फलविरोधस्याप्यभावेनासम्भवरूपबीजाभावेन परत्वादित्यस्य सर्वथाऽसङ्गतिरेव। सम्बुद्धाविति तु निपातपदाननुवृत्तितात्पर्यग्राहकमेव। अन्यथा सम्बुद्धिग्रहणाभावे ओदन्तनिपातस्यैवेतौ विकल्पापत्तिः। एवमप्यपवादत्वे विप्रतिषेधासङ्गतिरेव। यद्यप्येवंरीत्या परत्वादित्यस्य निरवकाशत्वेनोत्कृष्टत्वादपवादत्वादिति व्याख्यानं सुवचम्, तथापि विप्रतिषेधोपपादकस्याग्रिमस्य सर्वग्रन्थस्यासङ्गतिरेव। अत्राधिकं किञ्चिदुत्तरसूत्रे वक्ष्यामः। विशेषान्तरं तु [४]**भावप्रकाशतो** ज्ञेयम्। किञ्च 'शेऽर्थवानिति' वार्तिकस्य तथार्थकरणमप्ययुक्तम्।

---

१. 'साक्षात्प्रभृतीनि च' (१-४-७४) इति सूत्रभाष्यस्थ अयमुद्योतः कैयटश्च।

२. पुनः प्रसङ्गविज्ञानादिति परिभाषाव्याख्यावसरे गदायाम्। तत्र हीत्थमुक्तम् - 'वस्तुतस्त्वयुक्तः स कैयटः। ई च द्विवचन इति सूत्रस्थभाष्यकैयटवृत्तिहरदत्तादिग्रन्थविरोधात्। तत्र ह्यक्षी ते इन्द्र पिङ्गले इत्यादावक्षि औ इति स्थिते नुमः परत्वादीकारे सकृद्गतिन्यायात्पुनस्तदभावे शीभावे पूर्वसवर्णे रूपसिद्धिरित्युक्तम्। भवद्रीत्या तु तत्र पुनः प्रसङ्गविज्ञानस्य विषयो नापरस्य'। इति। परि.शे.ग.पृ.सं. ७२।

३. प्रौ.म.श.भा.प्रा.पृ.सं. २४३।

४. 'ओद्गृहणानुवृत्त्यैव सिद्धे पुनरोद्ग्रहणेनापि तन्निवृत्तिसिद्धौ वैचित्र्यार्थमेव सम्बुद्धिग्रहणम्' इति शब्दरत्नव्याख्यावसरे विशेषान्तरं प्रतिपादितमिति भावः।

स्यादेतत्, निपातसमुदाया एते। आह उ आहो, उत आहो उताहो इत्यादि। ततश्चादिवद्भावात् ''निपात एकाज्'' (पा०सू० १-१-१४) इत्यनेनैव सिद्धा संज्ञा। न चैवम् 'आहो इति' इत्यादिषु ''ऊँ'' (पा०सू० १-१-१८) इत्यस्य प्रसङ्गः, निरनुबन्धकोऽयमुकारः न तूञ् इति समाधानात्। अत एव ''उञः'' (पा०सू० १-१-१७) इति सूत्रे अकारोच्चारणमपि सार्थकम्। अत एव च ''उञः'' (पा०सू० १-१-१७) ''ऊँ'' (पा०सू० १-१-१८) इत्यत्र भाष्यकृतोक्तम् – ''द्वावुकाराविमौ। एकोऽननुबन्धकः, अपरः सानुबन्धकः'' इति। न चैवमपि आ उ ओ इत्यत्राऽऽङनाङोरेकादेशस्यानाङिति प्रतिषेधे प्राप्ते प्रतिप्रसवायेदमिति वाच्यम्, अनाङित्यस्य पर्य्युदासाश्रयणेनाऽऽङनाङोरेकादेशस्यादिवद्भावादनाङ्ग्रहणेन ग्रहणात्। प्रसज्यप्रतिषेधे ह्यसमर्थसमासो वाक्यभेदश्च स्यात्। भाष्येऽपि प्रतिषिद्धार्थमेतदित्युक्तिरभ्युच्चयमात्रम्। कथमन्यथाऽनुपदमेव 'अदोभवत्' इत्यत्रातिप्रसङ्गमाशङ्क्य प्रतिपदोक्तस्यैवौकारस्य ग्रहणमिति समादधीत। तस्मादिदं सूत्रं विनाऽपि सर्वं लक्ष्यं निर्व्यूढमेवेति चेत् ?

अत्रोच्यते – आहो उताहो इत्यादयो न निपातसमुदायाः, किन्त्वखण्डा एव। एतच्च एतत्सूत्रबलात्प्रतिपदोक्तस्यौकारस्य ग्रहणमिति भाष्यबलाच्चाध्यवसीयते। तेन

तथा भाष्यादिशैल्यभावात्, सूत्रे इव तत्प्राप्तलुप्तविभक्त्यन्तत्वेन तदनुकरणतया पदत्वसम्भवेन पूर्वद्वये बाधकाभावादिति बोध्यम्। तदाह। **दिगिति ।।**

५.११ ओत्सूत्रावश्यकताविचारः

उदाहरणे शङ्कते भाष्यादिक्रमेण। **स्यादेतदिति।** भाष्येऽत्र च निपात एकाजित्युक्तिं सफलयन् दोषमाह। **न चैवमिति।** निपातसमाहारत्वे इत्यर्थः। तथा च विकल्पोऽतः पक्षेऽनिष्टं रूपं स्यादिति भावः। **अत एव** निरनुबन्धकस्य सत्वादेव। तद्व्यवृत्तये इति भावः। सूत्रसम्मते भाष्यसम्मतिमप्याह। **अत एव चेति।** ञकारानुबन्धकेनोञैकादेशस्त्वनभिधान्नेति भाष्याद्याकूतमिति भावः। एवमपि अहो इत्यादौ तेन सिद्धावपि। कैयटाद्यनुरोधेनाह। **कथमिति।** आङनाङोरेकादेशेऽपि लाक्षणिकत्वादेव प्रवृत्त्यापत्तौ तस्यापि तत्वेनासंग्रहापत्तेः। तथा च सूत्रवैयर्थ्यमेव स्यात्। किञ्च ओदन्तो निपात इति सामान्यरूपप्रणयनान्यथानुपपत्तिरोषु यातमित्यादेरेवोदाहरत्वात्। तत्सामर्थ्यात् तत्परिभाषाया अप्रवृत्तौ तु अदो अभवदित्यादौ दोष इत्यादिभाष्यस्याभ्युच्चयैव स्यादिति भावः। [1]**एतच्चेति।** आशयस्तूक्त एव। तस्य फलमाह। **तेनेति।** अन्यथा

---

१. 'एतच्चेति' प्रतीकमारभ्य 'न स्यादिति भावः। अत एव' इत्यन्तं कपाठे नास्ति।

'आम् आहो देवदत्त' इत्यत्र ''आम एकान्तरमामन्त्रितम्'' (पा०सू० ८-१-५५) इति निघातप्रतिषेधः सिद्धः। अत एव पदकारैरपि ''ओषुवर्त्तमरुत'' इत्यादौ 'ओ' इत्याद्यैकपद्येनैव पठ्यते। तदेवं सूत्रकारभाष्यकारपदकाराणां सम्वाद एवेति स्थिते निपातसमुदाय एवायमित्याश्रित्यैतत्सूत्रं प्रत्याचक्षापाः परास्ताः।

स्यादेतत्, अनदोऽदः समभवदित्यत्रातिप्रसङ्गः, च्व्यन्तस्य निपातत्वात् ''ऊर्यादिच्विडाचश्च'' (पा०सू० १-४-६१) इति गतिसंज्ञाविधानेऽपि ''प्राग्रीश्वरान्निपाताः'' (पा०सू० १-४-५६) इत्यस्याधिकारात्। न च लक्षपप्रतिपदोक्तपरिभाषया लाक्षणिक ओकारो व्यावर्त्यत इति वाच्यम्, वर्णग्रहणेषूक्तपरिभाषाया अप्रवृत्तेः। अन्यथा ''एचोऽयवायावः'' (पा०सू० ६-१-७८) इत्यपि 'हरये' इत्यादौ न प्रवर्त्तेत, 'चक्रे' 'चक्रिरे' इत्यादौ प्रतिपदोक्ते चारितार्थ्यात्। वर्णस्य प्राधान्ये माऽस्तु परिभाषा, विशेषपत्वे तु स्यादेवेति चेत्। न, अविशेषेपाप्यप्रवृत्तेः सूपपादत्वात्। तथा च षष्ठे

द्व्यन्तरितत्वान्न स्यादिति भावः। अत एव = एकनिपातत्वादेव। पठ्यते पदपाठे इति भावः। वस्तुतस्तु भाष्ये पक्षद्वयेऽपि सूत्रसाफल्यमुक्तम्। तत्रैकनिपातत्वपक्षे उक्तमेव। समाहारपक्षेऽपि प्रतिषिद्धार्थत्वमस्य। **ओषु यात**मित्यादौ उदाहरणानां त्रयाणामुक्त्या नैकमित्यस्याविषयत्वं सूचितम्। ततो विशेषस्य दुष्करत्वाच्च। मिथो इत्यादेस्तु स्वरादित्वेन न निपातत्वमिति तद्भावः। प्रतिषिद्धार्थत्वं च यथा प्रसज्यप्रतिषेधे तथा पर्युदासेऽपि। तत्रापि प्रतिषेधस्य गम्यत्वात्। अत एवाङ्भिन्नत्वस्य शास्त्रीयत्वेन न लाभः। न च स्वाश्रयमाङ्भिन्नत्वम्, आङ्त्वस्य पूर्वान्तवत्वेनातिदेशेऽतिदिश्यमानधर्मविरुद्धस्वाश्रयधर्मप्रयुक्तकार्यस्य निवृत्तेरतिदेशस्वभावत्वात्। न चान्तवत्वमेव दुर्लभम्, शास्त्रीयकार्याभावादिति वाच्यम्। तत्रापि प्रतिषेधस्य गम्यतया शास्त्रतात्पर्यविषयत्वेन प्रगृह्यत्वाभावस्य शास्त्रीयतयाऽन्तवत्वप्रवृत्तेः। प्रतिषिद्धार्थत्वे 'ओतश्चिवप्रतिषेधः' अदोऽभवदित्यादिभाष्यविरोधस्तु कैयटेनैव परिहृतः। चादिपाठादुभयसिद्धिः, उभयपक्षाङ्गीकारादेव आम् अहो इत्यादौ ओषु यातं मरुत इत्यादौ पदकारैस्तथा पठ्यमाने न दोषः। किञ्च समासेनापि तदुपपत्तिः सुकरा आद्यं स्थानिवत्वं तु व्यवधानस्याशास्त्रीयत्वात्। अत एव भाष्येऽन्यतरनिश्चयो न कृत इतीदं चिन्त्यमिति बोध्यम्। तदेतद् ध्वनयन् स्वस्य परमतात्पर्यमाह। **निपातेति। प्रत्याचक्षापाः** नारायणादयः। तथा चावधारणखण्डने एव मम तात्पर्यं, न तत्रेति भावः॥

विधानेऽपि तद्विधायकतत्सूत्रेऽपि। नारायणाद्यनुरोधेनाह। **वर्णग्रहणेष्विति। चारीति।**

वक्ष्यामः – ''अभ्युपेत्यापि ब्रूमः-अगोर्गौः समभवद्गोऽभवदित्यादौ ''गमेर्डो'' (उ०सू० १-२-२३५) इत्योकारस्य प्रतिपदोक्ततयाऽतिप्रसङ्गः स्यादेव''।

नन्विह गौपमुख्यन्यायेन समाधानमस्तु। तथाहि, 'संघीभवन्ति ब्राह्मणाः' 'त्वङ्द्रवति देवदत्तः' 'मङ्द्रवसि त्वं' 'त्वङ्द्रवाम्यहम्' इत्यादौ वचनपुरुषव्यवस्थानुरोधेन च्विप्रत्ययस्थले सर्वत्र प्रकृतेरेव कर्तृत्वमिति सिद्धान्तस्थितिः। तथाच प्रकृतावारोपेण वर्त्तमानाद्विकृतिवाचकाच्छब्दाच्चेरुत्पत्तौ च्विप्रत्ययं प्रति प्रकृतिभूतस्य वाहीकादिवृत्ते-र्गोशब्दस्य गौणार्थता स्पष्टैव। अत एव 'अमहान् महान् भूतो महद्भूतश्चन्द्रमाः' इत्यादौ ''आन्महतः'' (पा०सू० ६-३-४६) इत्यात्वं न प्रवर्त्तते इति चेत् ? न, दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यात्। तथाहि, विशिष्टरूपोपादाने गौपमुख्यन्यायः। तस्य ''अर्थवद्ग्रहणे नानर्थकस्य'' (पा०आ० १४) इत्येतत्परिभाषामूलकत्वात्, अर्थोपस्थितेश्च रूपविशेषग्रहसापेक्षत्वात्। तथा च ''आन्महतः'' (पा०सू० ६-३-४६) इति विशिष्टरूपग्रहणेन विधीयमानमात्वं गौणे न भवतीति युक्तम्। इह तु ''ओत्'' (पा०सू० १-१-१५) इति वर्णपुरस्कारेण विधीयमाना प्रगृह्यसंज्ञा कथं गौणार्थवृत्तेर्न भवेत्। निपातसंज्ञा तु तस्यापि मुख्यैव। अत एव संज्ञा श्वश्रुरस्यापत्यं – 'श्वाशुरिः'

अयादेरिति भावः। दृष्टान्तवैषम्यमाह। **वर्णस्येति। वक्ष्याम इति।** 'आदेच उपदेशे' इति सूत्रे उपदेशग्रहणं ज्ञापकं वर्णग्रहणे उक्तपरिभाषाया अप्रवृत्तौ। यदि च वर्णप्रधानान्ये एवाप्रवृत्तिस्तर्हि ज्ञापितेऽप्युपदेशग्रहणवैयर्थ्यमेव स्यादिति तस्य तत्राप्रवृत्तिज्ञापकतापराकरग्रन्थविरोध इति भावः। न स्यादिदं पूर्वं पररीत्या। वस्तुतस्तु प्रकृतसूत्रभाष्यप्रामाण्यात् वर्णग्रहणेऽपि तत्प्रवृत्तिः, तत्रोपदेशग्रहणेन तु परिभाषाया अनित्यत्वमेव ज्ञाप्यते, न तु विशिष्य वर्णग्रहणेऽपि तत्प्रवृत्तिः। **ह्रावामश्चे(पा०सू० ३-२-२)**त्यादिज्ञापकस्यापीयमेव गतिरिति तयाऽत्र निर्वाहः सुकर एवेति बोध्यम्। **तदाभ्युपेत्यापीति।** सिद्धान्तमित्यादिः।

५.१२ गौपमुख्यन्यायस्य विशिष्टरूपोपादानविषयत्वनिरूपणं - कैयट विमर्शश्च

नारायणाद्यनुरोधेनाह। **दृष्टान्तेत्यादि। रूपविशेषग्रहेति।** रूपग्रहविशेषेति पाठान्तरम्। **सापेक्षत्वात्** आनु पूर्वविशेषज्ञानस्य तत्र कारणत्वात्। **तस्यापि** महदित्यस्यापि। अपिनै-तत्समुच्चयः। **मुख्यैव** औपदेशिक्यैव। तत्वाविशेषात् तत्र विशिष्टरूपाग्रहणेन गौणेति न्याया-प्रवृत्तेः। वैषम्ये दृष्टान्तमाह। **अत एवेति।** परिभाषायास्तत्र प्रवृत्तेरन्यत्राप्रवृत्तेरङ्गीकारादेवेत्यर्थः।

इत्यत्र ''राजश्वशुराद्यत्'' (पा०सू० ४-१-१३६) न प्रवर्त्तते। ''अत इञ्'' (पा०सू० ४-१-९५) तु प्रवर्त्तते एव। अन्यथा इञो यतश्च तुल्ययोगक्षेमतैव स्यात्। अत एव 'गौर्वाहीको ब्रूते' 'गां वाहीकं पाठय' इत्यादौ वृद्ध्यात्वे स्त एव तयोरपि वर्णाश्रयत्वात्, ''गोतः'' (पा०सू० ७-१-९०) इति तपरत्वमोकारान्तोपलक्षणार्थमिति वक्ष्यमाणत्वात्। तथा च ''औतोऽम्'' (पा०सू० ६-१-९३) इति सूत्रे भाष्यकृद्वक्ष्यति – ''गामित्यत्र पराऽपि वृद्धिर्निरवकाशेनाऽऽत्वेन बाध्यते'' इति। तत्रैव कैयटोऽपि वक्ष्यति – ओत इति सूत्रं पाठ्यम्। ओकारान्तोपलक्षणतया वा ''गोत'' (पा०सू० ७-१-९०) इत्येतद्व्याख्येयम्' इति। वृत्त्यादिग्रन्थेष्वप्येवमेव स्थितम्।

यत्तु वदन्ति – मुख्यएव स्वार्थे सास्नादिमति गोशब्दो वृद्ध्यात्वे लभते। ततो वाहीकादिशब्दान्तरसन्निधानाद्गौणताप्रतीतिः। 'गोभवत्' इत्यत्र तु गौणार्थतां विना च्विरेव दुर्लभ इति वैषम्यम्। तस्मात् पदकार्येष्वयं न्यायो न प्रातिपदिककार्येष्विति स्थितमिति। तच्चिन्त्यम्, वाक्यसंस्कारपक्षे वृद्ध्यात्वप्रवृत्तितः प्रागेव गौणार्थावगतेः। यत्तु कारकाणां क्रिययैव श्रौतःसम्बन्धस्तत एकक्रियावशीकृतानामरुणैकहायनीन्यायेन पार्ष्णिकः परस्परावच्छेदः। तथाच 'गामानय' इत्यन्वयवेलायां न गौणार्थता, किन्तु वाहीकेन सह पार्ष्टिकावच्छेदवेलायाम्। न चान्तरङ्गत्वेन प्रवृत्तः पदसंस्कारो बहिरङ्गगौणत्वप्रतीतावपि निवर्त्तते इति। तदपि न, तावताऽपि 'बूते' 'पाठय' इति क्रियान्वयायैव गौणताया आश्रयणीयत्वात्, कटोऽपि कर्म, भीष्मादयोऽपीति पक्षे कथञ्चिदुक्तिसम्भवेऽपि सामानाधिकरण्याद्भीष्मादेर्द्वितीयेत्येवं रूपे भाष्योक्तपक्षान्तरे

हिश्चार्थे। **यदिति।** इति यदित्यर्थः। एवमग्रेऽपि। द्वितीये फलान्तरमाह। **अत एवेति।** अन्यत्राप्रवृत्तेरित्यर्थः। ननु वृद्धेर्न वर्णाश्रयत्वमत आह। **गोत इति।** प्रसङ्गात्तत्रैव तत्समूलयति। **तथा चेति।** ननु यथाश्रुते वैपरीत्यमिति भाष्यासङ्गतिरत आह। **तत्रैवेति।** तस्मात् गौणमुख्यन्यायेन तत्रानिर्वाहो विशिष्टरूपोपादानाभावादिति सिद्धम्। एवं स्थिते कैयटाद्युक्तिं खण्डयति। **यत्तु वदन्तीति।** पदसंस्कारपक्षे निर्वाहादाह। **वाक्येति।** तदुक्तप्रकारमपि खण्डयति। **यत्विति। वशीति।** तदन्वितानामित्यर्थः। **पार्ष्टिक इति।** पश्चाज्जायमानोऽपि यो विशेषणविशेष्यभाव इत्यर्थः। **न च** न हि। **तावतापि** आनयेति समभिव्याहारे निर्वाहेऽपि। **ब्रूते इति।** मदुक्तस्थले इति भावः। आनयेति समभिव्याहारेऽपि दोषमाह। **कटोऽपीति।**

त्वदुक्तन्यायानवताराच्च, 'श्वाशुरिः' इत्यत्रेञोप्यभावापत्तेश्च, शब्दप्रयोक्त्रा वाहीकनिष्ठस्यैव कर्मत्वादेर्विवक्षितत्वाच्च। तस्माद्वर्णाश्रयत्वाद् वृद्ध्यात्वे इत्येव तत्त्वं, न तु प्रातिपदिककार्य्यत्वादिति। अत एव च ''एकाच्च प्राचाम्'' (पा०सू० ५-३-९४) इत्यादौ प्रातिपदिककार्यत्वेऽपि न स्मायादयः, विशिष्टरूपपुरस्कारेणैव सर्वनामसंज्ञाविधानात्। ''अभिव्यक्तपदार्था ये'' इत्यपि गौणमुख्यन्यायसिद्धार्थकथनपरं प्रसिद्धाप्रसिद्धत्वे एव हि मुख्यत्वगौणत्वे इत्यन्यत्र विस्तरः। अत एव सर्वादिसूत्रे ''संज्ञोपसर्जनप्रतिषेधः'' इति वार्त्तिकं प्रत्याचक्षाणो हरदत्त आह – ''संज्ञाप्रतिषेधस्तावन्न वक्तव्यः अभिव्यक्तपदार्था ये इत्येव सिद्धत्वात्'' इति। यत्तु तत्र कैयटो वक्ष्यति – ''प्रसिद्ध्यप्रसिद्धिवशात्सम्भवन्नपि गौणमुख्यन्यायो नेहोक्तः। पदकार्येष्वयं न तु प्रतिपदिककार्येष्वित्योत्सूत्रे उक्तत्वात्'' इति। तदभ्युच्चयमात्रम्, युष्मदस्मदोः स्वरूपमात्राश्रयाणां कार्याणामुपसर्जनतायामिव संज्ञायां प्रवृत्त्यापत्तेः, ''युष्मद्युपपदे'' (पा०सू० १-४-१०५) ''अस्मद्युत्तमः'' (पा०सू० १-४-१०७) इत्यादावपि तदापत्तेश्चेति दिक्। तदेवम् 'अदोभवत्' 'गोभवत्' इत्यादौ 'ओत्'' (पा०सू० १-१-१५) इति प्रगृह्यसंज्ञाऽव्ययत्वादिवद् दुर्वारिति पूर्वपक्षः पर्य्यवसन्नः।

अत्रोच्यते, पूर्वसूत्रेऽनाङिति पर्युदासादाङ्सदृशाः प्रतिपदघटिता एव निपाता

उक्तस्थलेऽनिर्वाहादाह। **कथञ्चिदिति। श्वाशुरिरिति।** सुबन्तात्तद्धितोत्पत्त्याऽस्यापि यद्वत् पदकार्यत्वात्। **शब्देति।** तथा च तदर्थकानामसम्भव एवेति भावः। तदुक्तमुपसंहरति। **तस्मादिति**। विपक्षे दोषान्तरं सूचयन् स्वमतं दृढयति। **अत एव चेति।** वर्णाश्रयमात्रेऽप्रवृत्त्यङ्गीकारेणान्यत्र सर्वत्र तादृशे प्रवृत्तेरेवेत्यर्थः। स्वोक्तं बीजमस्तीत्याह। **विशिष्टेति।** ननु तत्र नानेन निर्वाहः, किन्त्वभिव्यक्तेति न्यायेनेति कैयटोक्तेर्नेदं बाधकमत आह। **अभिव्यक्तीति।** अपिनाऽभियुक्तोक्तत्वेनास्य प्रसिद्धत्वं सूचितम्। परं परमेव। अन्यथा मुनित्रयानुक्तत्वेन निर्मूलत्वेनाप्रामाण्यापत्तिः स्फुटैव। एवोऽप्यर्थे। अपिना गौणलाक्षणिकत्वादेः संग्रहः। **अत एव** तयोस्तत्परत्वेन तस्य तन्मूलकत्वादेव। **तत्र** सर्वादीनीति सूत्रे। कार्याणां त्वादीनां उपैति अतित्वमित्यादावित्यर्थः। **संज्ञायां** युष्मदस्संज्ञायाम्। अनुकरणे शब्दस्वरूपपरे दोषमाह। **युष्मद्युपेति।** स्यादेतदित्यादि पूर्वपक्षमुपसंहरति। **तदेवमिति।** आदिना निपातत्वपरिग्रहः।

तदनुरोधेनैवाह। **अत्रोच्यते इति।** स्वयं तथैव सिद्धान्तितत्वादाह। **पर्युदेति।** ननु पूर्वसूत्रे

गृह्यन्ते। इहाप्यर्थाधिकारेपानाङ्ग्रहणानुवृत्त्या वा तथैवेति सर्वं सुस्थम्। तथाच सर्वादिसूत्रे ''अकारात्कारौ अनुपसर्जनत्वे सत्येव भवतः'' इति प्रघट्टके ''तदोः सः सौ'' (पा०सू० ७-२-१०६) इति सत्वं तर्ह्यविशेषितत्वाद्गौपतायामपि स्यादित्याशङ्क्य ''त्यदादीनामः'' (पा०सू० ७-२-१०२) इत्यत्र ''अनुपसर्जनात्'' (पा०सू० ४-१-१४) इति परिभाषयाऽनुपसर्जनानामेव ग्रहणे सिद्धे तथाभूतानामेव सत्वविधावनुवर्त्तनान्न कश्चिद्दोष इति समाधत्त कैयटः।

पर्युदासेन प्रतिपदपठितानां ग्रहणेनेहार्थाधिकाराश्रयणेऽनिरिरभवदी अभवदित्यादौ पूर्वसूत्रेण प्रगृह्यानापत्तिः। न चेष्टापत्तिः। पूर्वसूत्रे च्विप्रत्ययप्रतिषेधे वार्तिकानारम्भेण प्रगृह्यसंज्ञाया इष्टत्वानुमानादत आह। **अनाङिति।** तथा च शब्दाधिकारेणात्रैवोक्तरीत्या तथाकल्पनेति प्रकृतार्थसिद्धिरुक्तदोषाभावश्च। एतेनेदं चिन्त्यं प्रगृह्यत्वं भवतीति सूचनादिति **रत्नकृदु**क्तमपास्तम्। शब्दाधिकारे आह। **आङिति।** अत्र दृष्टान्तमाह। **तथा चेति।** समाधत्ते इत्यत्रान्वयः। अनुपसर्जनादिति सूत्रार्थमाह। **अकारात्कारावितिं।** तर्हि अस्मिन् पक्षे, यथाश्रुतेऽनुपयोगादेवं व्याख्यातनमित्याह। **परीति।** यत्राकारात्कारावितिं तर्हि अस्मिन् तत्रानुपसर्जनेत्युपतिष्ठत इति वाक्यार्थः। प्रागुक्तस्तु फलितः।

५.१३ कौस्तुभमतविमर्शः - गौणमुख्यन्यायविवरणञ्च

वस्तुतस्तु इदं सर्वं चिन्त्यम्, भाष्याद्याशयानवबोधात्। तथाहि। गौणमुख्यन्याये गौणत्वं गौणलाक्षणिकत्वमप्रसिद्धत्वं च। तत्रान्त्यं संज्ञाबोध्ये अनुकरणबोध्ये च। अत एव युष्मदादेः स्वरूपमात्राश्रितकार्याणामुपसर्जनतायामिव संज्ञायां युष्मद्युपपदे इत्यादौ चाप्रवृत्तिः। **एकाच्च प्राचा**मित्यादौ स्मादीनामपि[1]। इयं च वक्ष्यमाणवृद्ध्यादिसाधकरीत्या बोध्या। प्रियत्रया-णामित्यादौ त्रयादेशो भवत्येव। तत्र त्रिशब्दार्थस्येतरविशेषणत्वेऽप्युक्तरूपगौणत्वाभावात्। सोऽयं न्यायो न प्रातिपदिककार्ये। किन्तु उपात्तविशिष्टरूपकपदकार्ये एव। उपात्तेति विशेषणेन श्वाशुरिरित्यादाविञो यदभावस्य च सिद्धिः। परिनिष्ठितस्य पदान्तरसम्बन्धे हि गौर्वाहीक इत्यादौ गौणत्वप्रतीतिर्न तु प्रातिपदिकसंस्कारवेलायामित्यन्तरङ्गत्वाज्जातसंस्कारबाधायोगः प्रतिपदिककार्ये प्रवृत्त्यभावे बीजम्। ननु कर्मत्वादेर्द्वितीयाद्यर्थकस्य कारकत्वज्ञानसापेक्षतया गां वाहीकमानयेत्यादौ विशिष्टस्य क्रियासम्बन्धेन कर्मत्वेऽपि तदभिधानाय जायमाना द्वितीया

---

१. स्मायादेरपि इति ख।

समुदायस्याप्रातिपदिकत्वात्प्रत्येकं प्रवर्तते । तत्र पूर्वमेव गौणत्वादात्वं न स्यादिति चेन्न क्रिया-सम्बन्धस्य द्वितीयाश्रुत्यन्यथानुपपत्त्या कल्पितत्वरूपश्रौतत्वेन द्वितीयादेः सामान्यतः क्रियासम्बन्धज्ञानापेक्षत्वात् तज्ज्ञानमूलकद्वितीयाद्युत्पत्तौ आकाङ्क्षादिमूलकशक्तिरूपवाक्यीयन्या-यात् गोपदार्थस्य वाहीकान्वय इति कर्मणोरेव विशेषणविशेष्यभावो न विशिष्टस्यात्र कर्मत्वमिति । सामानाधिकरण्यात् पाठनादिक्रियान्वयाच्च गौणार्थप्रादुर्भावात् विभक्त्यन्तस्यैव प्रयोगेण तत उपस्थितानामर्थानामितरान्वयेन प्रातिपदिकमात्रार्थेन पूर्वमन्वय इत्यस्य वक्तुमप्यशक्यत्वात् । गां पाठयेत्यादौ मुख्यगोपदार्थस्य पाठनकर्मत्वासम्भवेन विभक्त्युत्पत्तिवेलायां प्रयोक्तृभिर्गौणार्थत्वस्य प्रतीतावप्यपदस्याप्रयोगेण बोद्धृभिः सर्वत्र पदस्यैव गौणार्थकत्वस्य ग्रहेण, 'अत्वं त्वं सम्पद्यत' 'अमहान्महान् भूतस्त्वद्भवती'त्यादौ भाष्यप्रयोगे त्वाद्यादेशदीर्घादीनां करणेन चास्य न्यायस्य पदकार्यमात्रविषयत्वौचित्यात् । अन्यथा वाक्यसंस्कारपक्षे तेषु तदनापत्तिः । **गामित्युक्ते सर्वा क्रिया प्रसक्ते**त्याद्यर्थवत्सूत्रस्थभाष्येण **संस्कृत्य संस्कृत्येति** वृद्धिसूत्रस्थभाष्येण च सामान्यतः क्रियाजन्यफलाश्रयत्वमात्रविवक्षायां द्वितीयादेः साधुत्वान्वाख्यानमित्यर्थस्य लाभेन पाठनक्रियान्वयकालपदस्यैव गौणार्थत्वप्रतीतेः प्रयोक्तुरपि सत्वात् । अर्थाश्रये चेत्यादेः लौकिकार्थवत्वयोग्यपदाश्रये एव न्यायस्तद्रहितशब्दाश्रये च ते इत्यर्थात् । तस्मादनेनोभयोरपि वारणं, तया आद्यमात्रवारणमुक्तमेव । पूर्वसूत्रे तेषां ग्रहणमिति तु दूषितमेव । तद्ग्रहणानुवृत्तिरप्ययुक्ता, प्रतिषिद्धार्थोऽयमिति भाष्यविरोधापत्तेः । तस्मादत्रत्यभाष्यकैयटादिकं सर्वादिसूत्रस्थकैयटोक्तं च युक्तमेव । सर्वमधिक**मुद्योते**[१] **परिभाषेन्दुशेखरे गदायां**[२] च व्यक्तं तत एव बोध्यम् ।

एतेन केचित्तु अयमत्र कैयटाशयः । विशिष्टोपादाने एवेयं परिभाषा, परन्तु पदकार्ये एवेति । अन्यथा **सान्तमहत(पा०सू० ६-४-१०)** इत्यस्यापि गौणत्वेनाप्रवृत्त्यापत्तिः, तथा चामहान् महान् भूत इत्यादिभाष्यप्रयोगानुपपत्तिः । अमहान् महानिति वाक्ये ह्यवश्यं महत्पदस्य तत्सदृशे लक्षणा । अन्यथाऽनन्वयापत्तेः । अत एव महच्छब्दो महत्वे वर्तते इति एको महान् महत्वे वर्तत इति भाष्यप्रयोगः सङ्गच्छते । अन्यथाऽसङ्गतिः स्पष्टैव । अत एव त्वद्भवतीत्यादावादेश इत्याहुः । तन्न । युष्मदीत्यादावप्यापत्तेः । महानित्यत्र दीर्घस्तु भाष्यप्रामाण्येन गौणेति न्यायानित्यत्वमाश्रित्य

---

१. ओत् सूत्रे 'अथाश्रये एतदेवं भवति' इति भाष्यकैयटव्याख्यायां निरूपितम् । म.भा.प्र.उ.पृ.सं. १७८ प्रथमभागः ।

२. गौणमुख्यपरिभाषाव्याख्याने निरूपितम् । परि.शे.ग.पृ.सं. ३३।

सम्बुद्धौ शाकल्यस्येतावनार्षे (पा०सू० १-१-१६)। ऋषिर्वेदः ''तदुक्तमृषिणा'' इत्यादौ तथा दर्शनात्। संम्बुद्धिनिमित्त ओकारोऽवैदिके इतौ परे प्रगृह्यो वा स्यात्। 'विष्णो इति' 'विष्णाविति'। संम्बुद्धाविति किम् ? गवित्ययमाहेति वृत्तिकारः। एतन्निष्कर्षश्च पूर्वसूत्रे उक्त एव। अनार्षे किम् ? ब्रह्मबन्धवित्यब्रवीत्। इताविति किम् ? पटोऽत्र।

गोमतीभूतेत्यादौ पुंवद्भावाभावं च साधनीय इत्याहुः। **अत्रेदं तत्वम्।** गौणत्वमप्रसिद्धत्वं गौणलक्षणयाऽर्थबोधकत्वं च। तत्राप्रसिद्धत्वरूपं गौणत्वमाश्रित्यैतन्न्यायप्रवृत्तिस्तु विशिष्टरूपोपादाने एव। अत एव संज्ञाश्वशुरादौ यदाद्यभावसिद्धिः। द्वितीयगौणत्वमाश्रित्य प्रवृत्तिस्तु उपात्तविशिष्टरूपकार्यमात्रे एव। पदान्तरसम्बन्धे एव गौणार्थाभिव्यक्तेः। अत एवा'महान् महान् भूतः', 'स महान् महत्वे च वर्तते', त्वद्भवती देवदत्त इत्यादौ भाष्याद्युदाहृते सान्तेति दीर्घो युष्मदाद्यादेशाश्च भवन्त्येव। केवलविशिष्टरूपोपादानमात्रे प्रवृत्तौ तु न स्युरिति स्पष्टमेव। भाष्यं त्वेवं व्याख्येयंगौणमुख्ययोरिति अनाङिति पर्युदासादित्यादिर्वक्ष्यमाणोऽभिप्रायः, इतरः परिभाषेयमनेनात्रोपन्यास्तेति मन्वानो अन्यत्राऽप्येवं परिभाषाप्रवृत्तिः स्यादित्याशयेनाशङ्कते। कथं तर्हि वाहीके इति। समाधत्ते। अर्थाश्रये इति। अर्थबोधकविशिष्टरूपाश्रये इत्यर्थः। शब्दाश्रये चेति। अर्थरहितशब्दमात्राश्रये इत्यर्थ इति सुधियो विभावयन्त्वितीत्यपास्तम्। उक्तयुक्तिगणादिति बोध्यमिति दिक् ।।

५.१४ सम्बुद्धौ शाकल्यस्येति सम्बद्धिग्रहणविचारः

सम्बुद्धौ शाकल्यस्येतावनार्षे। त्रपो इतीत्यादौ सोर्लुका लुप्तत्वेन सम्बुद्धेरश्रवणेन तत्परत्वासम्भवान्निमित्तसप्तमीयम्। न लुमतेति निषेधानित्यत्वं त्वगतिकगतिरित्याह। **सम्बुद्धि-निमित्त इति।** निमित्तक इत्यर्थः। चस्त्वर्थे। अत्रेदं बोध्यम्। अत्र सम्बुद्धिग्रहणाभावे निपातस्याप्योदिति पदानुवृत्त्यापत्तौ अहो इतीत्यादावपवादत्वेनोदन्तनिपातस्यैव तौ विकल्पः स्यात्। तथा च निपातपदाननुवृत्त्यर्थं सम्बुद्धिपदम्। न च व्याख्यानत एव तदननुवृत्तिरिति वाच्यम्। तथा सत्यपि निषेधार्थकाकारेण वेधस्शब्दस्य समासे रुत्वे उत्वे गुणे पूर्वरूपेऽवेधो इतीत्यादावनतिप्रसङ्गाय तदावश्यकत्वात्। न च तत्र लाक्षणिकत्वान्नातिप्रसङ्ग इति वाच्यम्। एवमपि मिथो इतीत्यादौ तद्वारणाय तदावश्यकत्वात्। व्याख्यानस्य भाष्यानुक्तस्याश्रयणे मानाभावाच्च। वस्तुतस्तु ओद्भहणानुवृत्त्यैव तत्सम्बद्धया भवदभिमतार्थे सिद्धे, पुनरोत्

उञः (पा०सू० १-१-१७)। उञ इतौ प्रगृह्यसंज्ञा वा स्यात्। 'उ इति' 'विति'।

ऊँ (पा०सू० १-१-१८)। उञ इत्यनुवर्त्तते, शाकल्यस्येति, प्रगृह्यमिति च। प्रगृह्यस्य उञ इतौ परे ऊँ आदेशो वा स्यात्। दीर्घोऽनुनासिकश्च ऊँ इति। इह यद्येको योगः स्यात् उञ ऊँ इति, तदादेशे विकल्पिते रूपद्वयमेव स्यात् – 'ऊँ इति' 'उ इति'। अतो योगं विभज्य प्रगृह्यसंज्ञाऽपि विकल्पिता। एवमपि ''ऊँ'' (पा०सू० १-१-१८) इति द्वितीयसूत्रे यदि प्रगृह्यग्रहणं शाकल्यग्रहणं चेत्युभयमपि नानुवर्त्तेत, तदा उञ्मात्रस्य नित्यमूँभावविधानात्प्रगृह्यस्येवाप्रगृह्यस्याप्यादेशः स्यात्। तत्र प्रगृह्यस्यादेशे कृते स्थानिवद्भावेन प्रगृह्यत्वात् 'ऊँ इति' इति रूपं सिद्धम्। न च ''अनल्विधौ'' (पा०सू० ९-१-१-५६) इति प्रतिषेधः, उञ इति समुदायरूपेणाश्रयणात्। तथा च ''इट ईटि'' (पा०सू० ७-२-२८) इति सूत्रे इट इति समुदायरूपाश्रयणाद् 'अग्रहीत्' इत्यत्र च ''ग्रहोऽलिटि'' (पा०सू० ७-२-३७) इति दीर्घस्य स्थानिवद्भावमाश्रित्य सिज्लोपः सिद्ध्यतीति स्थानिवत्सूत्रे वक्ष्यते। अप्रगृह्यस्य त्वादेशेऽनुनासिको यण् स्यात्। तथा चेष्टरूपत्रितयमध्ये 'ऊँ इति' इत्येकमेव सिद्धं न त्वपरं द्वयमित्यव्याप्तिः। अतिव्याप्तिश्च सानुनासिकवकारयुक्तस्यानिष्टस्यापि प्रसङ्गात्। अथ प्रगृह्यग्रहणमात्रमनुवर्त्तेत तदा प्रगृह्यस्योञो नित्यमादेशः स्यात्ततश्च 'विति' 'ऊँ इति' इति द्वे एव रूपे स्यातां, न तु 'उ इति' इति तृतीयम्। अथ शाकल्यग्रहणमात्रमनुवर्त्तेत तत उञ्मात्रस्यादेशविकल्पनाद् 'ऊँ

शाकल्यस्येत्येवं न्यासेनोत्ग्रहणेनापि अनार्षे इति निषेधानुरोधेन विभक्तिनिमित्तकौकारस्यैव ग्रहणेन तन्निवृत्तेरर्थात्सिद्धौ वैचित्र्यार्थमेव सम्बुद्धिग्रहणम्। वैचित्र्यं च पदलाघवाभावरूपम्। अवान्तरपदत्वमादाय तल्लाघवे तु वैयर्थ्यरूपमदृष्टार्थरूपं वा तदिति बोध्यमिति दिगिति। स्पष्टीकृतमिदं **भावप्रकाशे**[1] ॥

५.१५ 'उञः' 'ऊँ' सूत्रार्थविचारः

उञः ऊँ। एकं सूत्रम्। ततः वक्ष्यमाणफलार्थं विभज्य तत्राद्यं व्याचष्टे। **उञ इति।** इतेः शाकल्यस्य चानुवृत्तिरित्याह। **इताविति। वेति।** ऊँ इति च अनुवर्तते। विपरिणामेनाह। **प्रगृह्यस्येति।** तत्स्वरूपमाह। **दीर्घ इति।** इह अत्र प्रकरणे। एवमपि = योगविभागेन तद्विकल्पेऽपि। मात्रं कार्स्त्न्ये। **तत्र** तयोर्मध्ये। **रूपेपेति।** प्रगृह्यः प्रगृह्येत्यत्रेति कश्चित्। **ऊँ** इत्यत्रेति तु तत्वम्। **इत्यत्र चेति।** चो सूत्रे इत्यग्रे योज्यः। तेन 'ग्रहोऽलिटी'ति सूत्रसमुच्चयः। **अन्विति।**

---

१. प्रौ.म.श.भा.पृ.सं. २५४।

इति' 'उ इति' इति द्वयं प्रगृह्यस्य, 'विति' 'विति' इति द्वयमप्रगृह्यस्येति संकलनया रूपचतुष्टयं स्यात्। तत्र त्रितयस्येष्टत्वेऽपि सानुनासिकवकारयुक्तमनिष्टमापतति। तस्माच्छाकल्यग्रहणं प्रगृह्यग्रहणं चेत्युभयमनुवर्त्तत इत्युक्तम्। इह विभक्तिविपरिणामेन प्रगृह्यस्योञ इति व्याख्यातम्। आदेशसामानाधिकरण्येन प्रगृह्यं ऊँ इत्येतदादेशो भवतीति व्याख्यानेऽपि न कश्चिद्विशेष इत्यवधेयम्।

ननु परिनिष्ठितमेव प्रयोगार्हं, परिनिष्ठितत्वं च अप्रवृत्तनित्यविध्युद्देश्यतावच्छेदकानाक्रान्तत्वम्। निहते तिङन्तादावव्याप्तिवारणायाप्रवृत्तेति। वैकल्पिकेडागमोद्देश्यतावच्छेदकाक्रान्ते 'सेद्धा' इत्यादावव्याप्तिवारणायोक्तं नित्येति। अत एव 'पच्' 'लट्' इत्यादीनामलौकिकतेति सिद्धान्तः। तथाच 'उ इति' इत्येतद्रूपं न स्यादेव। अत्र हि शाकल्यमते ऊँआदेशेन भाव्यमेव। इतरेषां मते तु प्रगृह्यत्वमेव नास्तीति चेत् ? भवेदेवं यदि शाकल्यग्रहणं यथाश्रुतं स्यात्, तत्तु विकल्पमात्रतात्पर्यकम्। तथा च भाष्यम् — ''शाकल्यस्य विभाषा यथा स्यात्'' इति ''ऊँ वा शाकल्यस्य'' इति च। तथाच तत्र कैयटः – ''शाकल्यश्रुतेरेव फलं वाग्रहणेन प्रतिपादयति'' इति, ''स्मृत्यन्तरानुसन्धानद्वारेण विभाषा सम्पद्यते'' इति च। यद्वा, अस्तु शाकल्यग्रहणं यथाश्रुतम्। तथापि ''निपात एकाज्'' (पा०सू० १-१-१४) इत्यनेनैव सिद्धे ''उञः'' (पा०सू०

स्थानेऽन्तरेरित्यनेन। ऊँ इतीत्येकमिति पाठः। मात्रपदेन शाकल्यव्यवच्छेदः। **प्रगृह्यमिति।** न च तस्य प्रथमान्तत्वादादेशेनैव सम्बन्धः स्यादिति वाच्यम्। एवं सति उञ्मात्रस्य नित्यं प्रगृह्यसंज्ञकस्य ऊँभावस्य विधाने योगविभागेन प्रगृह्यसंज्ञाविध्यानर्थक्यापत्तेः। मात्रपदेन तद्व्यवच्छेदः। **ततः** तदा। **तत्र** चतुर्णां मध्ये। **इह** ऊँ इत्यत्र। शाकल्यपदस्य यथाश्रुतार्थकत्वचोभयं शाकल्यमते इति तयोरेकप्रयोगे एव प्रवृत्तिरित्याशयेन शङ्कते। **नन्वित्यादि।** चस्त्वर्थे। निहते अनुदात्ते। **अत एव** तदानाक्रान्तत्वाभावादेव। उक्ततात्पर्यमाह। **तथा चेति।** तत्रादौ व्याख्यातभाष्यमाह। **शाकल्यस्येति।** वार्तिकमाह। **ऊँ वेति।** स्येति चेति पाठः। कैयटस्य तत्प्रतीकस्थत्वात् वैपरीत्येनोक्तं, तमेव कैयटमाह। **तथा चेति।** एतत्प्रतीकस्थकैयटमुक्त्वा 'उञ इति योगविभाग' इति प्रतीकस्थकैयटमाह। **स्मृत्यन्तरेति।** एवञ्च योगविभागसामर्थ्यादनुवृत्तिसामर्थ्याच्च तन्न यथाश्रुतं, किन्तु विकल्पमात्रतात्पर्यकमिति विकल्पद्वयेन सकलेष्टसिद्धिरिति शाकल्यमते एव विकल्पः फलित इति भावः। नारायणाद्यनुरोधेनाह। **यद्वेति।** तेषां निषेधमुखेन

१-१-१७) इति तावन्नियमार्थम्। तथा च शाकल्यभिन्नमते न प्रगृह्यतेति प्रथमसूत्रार्थः। उत्तरसूत्रे च प्रगृह्यस्योञ इत्येतावतैव शाकल्ये लब्धे पुनः शाकल्यानुवृत्त्येतरेषामपि मते पाक्षिकः प्रगृह्योऽस्तीत्यनुमीयते। तेन 'उ इति' रूपं सिद्धम्। अथ वोत्तरसूत्रे पुनः शाकल्यानुवृत्तिसामर्थ्याच्छब्दाधिकाराश्रयपेन शकलस्यैव ऋषेरपत्यान्तरं गृह्यते। अस्मिंश्च पक्षे प्रगृह्यस्योञ इत्यनुवादसामर्थ्यादेव प्रगृह्यताऽपि लभ्यते। यथा ''ढकि लोपः'' (पा०सू० ४-१-१३३) इत्यनुवादसामर्थ्याङ्गिति दिक्।

आदेशश्चायमनुनासिक इति निर्देशादेव व्यक्तम्। तथा च बव्हृचप्रातिशाख्यम् – ''उकारश्चेतिकरपेन युक्तो रक्तो पृक्तो द्राघितः शाकलेन'' (ऋ०प्रा० १-१८) इति। रक्तसंज्ञोऽनुनासिक इति च। अत एव 'यदेतनूँ इति पदकाराः पठन्ति' इत्यनुकरपे ''यरोऽनुनासिकेऽनुनासिको वा'' (पा०सू० ८-४-४५) इत्येव विधिः प्रवर्त्तते।

प्रवृत्तावाह। **तथा चेति। पाक्षिक इति।** तथा च तद्धारणाय तदनुवृत्तिः सार्थिकेति भावः। नन्वयुक्तमेतत्, विकल्पार्थं उञ इत्यस्य विधेयत्वे सम्भवति नियामकत्वासम्भवात्। नियमशास्त्राणां विधिरूपेणाप्रवृत्तेरेव सिद्धान्तितत्वात्, तदन्यमते पाक्षिकप्रगृह्यत्वाङ्गीकारे नियमवैयर्थ्यापत्तेश्चात आह। **अथ वेति। पुनरिति।** उक्तरीत्यैव लाभे सतीति भावः। **शब्देति।** शाकल्यस्य चेति भावः। **शकलस्यैवेति।** तथा च न सर्वात्मना वाच्यार्थत्याग इति लाघवम्, पूर्वमतद्वये तु सर्वथा तत्त्याग इति गौरवमिति भावः। नन्वेतच्छकलापत्यमतेन प्रगृह्यत्वं, तत्र हि शकलापत्यान्तरस्यैव ग्रहणादत आह। **अस्मिंश्चेति।** अपिरुक्तसमुच्चायकः। ननु प्रथमान्ततया विधेयत्वमेवास्त्विति किमर्थं सामर्थ्यकल्पनेनेति चेन्न प्रथमान्तत्वेन प्रगृह्यत्वविशिष्टस्य ऊँ आदेशस्य विधानेऽपि विशेष्योद्देश्यकस्य विशेषणविधेरार्थिकस्य कल्प्यमानत्वमेव। अन्यथाऽनुदात्तत्वादिविशिष्टस्यावादेशविधानस्य सम्भवेन विधेयस्यानुवाद्यत्वलाभार्थं कृतं सर्वग्रहणमनर्थकं स्यात्, उभयविधाने वाक्यभेदापत्तिरिति भावः। वस्तुतस्तु एकसूत्रत्वे शाकल्याननुवृत्तौ ऊँ इत्येकमेव रूपं स्यात्, प्रगृह्यसंज्ञाप्रकरणेन प्रगृह्यत्वस्यादेशस्य च सहविधानात्। 'उ इति' 'विती'ति च न स्यात्। तदनुवृत्तावपि द्वयोर्विकल्पे 'ऊँ इति' 'विती' ति सिद्ध्यति, न तु उ इतीति। प्रगृह्यत्वस्य विकल्पेन पक्षे तदभावेऽप्यस्य तात्पर्यात्। एतदभावे 'निपात' इत्यस्याप्राप्तेः। तदुक्तं भाष्ये 'ऊँ'विभाषा यथा स्यात्, 'ऊँ इति' 'उ इति'। अन्येषामाचार्याणां मते वितीति। अनेन हि योगविभागस्य 'उ इती'ति रूपसिद्धिः फलमिति स्पष्टमेव लभ्यते। आद्ये विकल्पाननुवृत्तौ

ईदूतौ च सप्तम्यर्थे (पा०सू० १-१-१९)। शाकल्यस्य इताविति निवृत्तम्। ईदन्तमूदनन्तं च शब्दरूपं सप्तम्यर्थे वर्त्तमानं प्रगृह्यं स्यात्। 'अध्यस्यां मामकी तनू'। मामक्यां तन्वामिति प्राप्ते ''सुपां सुलुक्'' (पा०सू० ७-१-३९) इति लुप्तसप्तमीकावेतौ। मामकी इति, तनू इतीति पदकाले कार्योदाहरणे बोध्ये। 'सोमो गौरी अधिश्रितः' इति संहितायामप्युदाहरणम्। ईदूताविति किम् ? प्रियः सूर्य्ये प्रियो अग्ना भवेति। अग्निशब्दात्परस्याः सप्तम्या डाआदेशः। पदकारैः प्रगृह्येष्वितिशब्दप्रयोगस्य नियमितत्वेनेहापि पदकाले इतिशब्दप्रयोगप्रसङ्ग इति प्रत्युदाहरणमिदम्। सप्तमीग्रहणं किम्। धीती, मती, सुष्टुती। धीत्या, मत्या, सुष्टुत्येति प्राप्ते तृतीयैकवचनस्य पूर्वसवर्ण ईकारः। ततः ''अकः सवर्णे दीर्घः'' (पा०सू० ६-१-१०९) इत्येकादेशः। न त्विह सुपो लुक्, ह्रस्वश्रवणापत्तेः। अर्थग्रहणं किम् ? वाप्यामश्वो वाप्यश्वः। नद्यामातिर्नद्यातिः

'निपात' इत्येव सिद्धे इदं व्यर्थमेव स्यात्। 'ऊँ इति' 'उ इति'। एवञ्च प्राप्तविभाषेयम्। द्वितीये द्वयोरसम्बन्धे 'उञ' इत्यार्थाधिकारादप्रगृह्यस्यैवादेशे तस्य 'इको यणि'ति यणि ऊँ इतीत्यस्यासिद्धिः। दीर्घोच्चारणवैयर्थ्यापत्तिश्च। विकल्पमात्रसम्बन्धेऽपि तदसिद्धिरेवेति विधानसामर्थ्यात्प्रगृह्यपदसम्बन्धः। तन्मात्रसम्बन्धेऽर्थाधिकारादप्रगृह्यस्य नित्ये ऊँ आदेशे 'ऊँ इती'ति, प्रगृह्यस्य 'उ इतीति' सिद्धेऽपि 'वितीति' न सिद्धचेत् अतः तस्यापि सम्बन्धः। किञ्च इको यणित्यत्र सिद्धान्ते कथमपि यणंशेऽनुनासिकाग्रहणेन सानुनासिकवकारघटितरूपापत्तिरनन्विता। किञ्च सामानाधिकरण्येन विपरिणामेन च व्याख्यानमयुक्तम्। प्रगृह्यत्वस्य साक्षादुद्देश्यसम्बन्धस्य कृत्यतयाऽत्र विधेयविशेषणत्वे मानाभावात्। उञनुवादेन संज्ञाऽऽदेशयोः सहविधानस्यैव न्याय्यत्वाच्च। वाचः क्रमवृत्तित्वात्सम्भवानुरोधेन पूर्वं संज्ञा पश्चादादेश इति स्थानिवत्वेनादेशे तत्कार्यम्। भाष्ये 'प्रगृह्यसंज्ञके'त्यपि तल्लब्धार्थस्वरूपकथनमेव। यद्वेति मते दोषस्तु उक्त एव। अथ वेत्यपि मतं न युक्तम्, 'अन्येषामाचार्याणां मते' इति भाष्यविरोधापत्तेरुक्तरीत्या तदलाभात्। प्रसिद्धविरोधापत्तेः, रूढियोगमिति न्यायविरोधापत्तेः। विशिष्टविध्यनङ्गीकारात्, सर्वग्रहणस्य स्पष्टार्थत्वस्याकरे उक्तत्वाच्चेति दिगिति बोध्यम्। तदाह। **दिगिति ।।**

५.१६ 'ईदूतौ च सप्तम्यर्थे' अत्रार्थग्रहणविचारः

ईदूतौ च सप्तम्यर्थे। कार्योदेति। सन्धिकार्याभावफलकप्रकृतिभावोदेत्यर्थः।

''संज्ञायाम्'' (पा०सू० २-१-४४) इति सप्तमीसमासः। ननु सप्तम्यर्थोपीहास्त्येव तत्कथमर्थग्रहणे कृतेऽपीष्टसिद्धिरिति चेत् ? इत्थम्, जहत्स्वार्थावृत्तिरिति पक्षे पदे वर्णवद्वृत्तौ वर्त्तिपदानामानर्थक्यादीदन्तमिहानर्थकं, न तु सप्तम्यर्थवृत्तीति स्पष्टमेव। अजहत्स्वार्थावृत्तिरिति पक्षेऽपि उपसर्जनपदं न स्वार्थमात्रे पर्यवस्यति किन्तु तत्संसृष्टे प्रधानार्थे। अर्थग्रहणसामर्थ्याच्च यावानर्थः सप्तम्याऽभिधीयते आधेयासंगृष्टो निष्कृष्टाधिकरणरूपस्तावन्मात्रस्येह ग्रहणमिति वृत्तिप्रविष्टेन भविष्यति। यद्यपि वाक्यवत्समासेऽपि लुप्तसप्तमीबलेनाधिकरणमात्रबोधः पश्चाद्वाक्यार्थतया संसृष्टबोध इति वक्तुं शक्यते, तथापि सिद्धान्ते तावत् ''समर्थः पदविधिः'' (पा०सू० २-१-१) इति परिभाषानुरोधात् समासस्थले एकार्थीभाव एव सामर्थ्यं, न तु व्यपेक्षा। अत एव ''उपसर्जने विशेषणान्वयो न भवति शक्यैकदेशत्वात्'' इति द्वितीये वक्ष्यते।

संहितायामिष्टापत्तेराह। **पदकारैः प्रगृह्येष्वितीति। वर्णवदिति। संज्ञाया**मिति समासेऽस्य रूढिशब्दत्वेनावयवार्थाप्रतीतेः। विग्रहप्रदर्शनं तु रथन्तरादिवद्बोध्यम्। अत एव 'जहत्स्वार्था तु तत्रैव रूढिर्यत्र विरोधिनी'त्युक्तं वृद्धैः। अत एव **संज्ञाया**मिति समास उक्तः। वाक्येन संज्ञनवगमेन नित्यसमाससदृशत्वेऽपि तत्र वाग्रहणसम्बन्धे मानाभावेन विग्रहे बाधकाभाव इति भावः। **न त्विति।** नैवेत्यर्थः। सुतरामिति भावः। चस्त्वर्थे। यावानित्यस्य व्याख्या। **आधेयेति।** तस्य व्याख्या। **निष्कृष्टेति।** नन्वर्थग्रहणाभावे ईदूदेदितिवत् इदूदन्ता या सप्तमीत्यर्थापत्तौ सोमो गौरीत्यादौ न स्यात्, किन्तु पपीत्यादावेव स्यात्, एकादेशस्य परादिवद्भावेन सप्तमीत्वादिति तत्सिद्ध्यर्थं तदावश्यकत्वे कथं सामर्थ्योपवर्णनमिति चेत् - अत्र केचित्। तथा सति ईदूतौ सप्तम्यन्ते इत्येव वदेत्। ईदन्तमूदन्तं च सप्तम्ये इदमेव वैलक्षण्यं बोधयितुं लघुभूतोऽपि ईदूदित्यत्रैव तत्सूत्रगर्भो न्यासो न कृत इत्याहुः। अन्ये तमित्यर्थेन सर्वस्याप्यत्र स्यात्। किञ्च त्वदुक्तार्थे ईदूतोरित्येव वदेत्, अजहत्स्वार्थाजहत्स्वार्थयोः फलैक्यानुरोधेन च बहुलक्षणसंस्कारानुरोधेन सप्तम्यर्थेत्याद्यर्थः 'इदूतौ सप्तमी प्रगृह्यम्' 'अदसः' 'एच्च द्विवचनम्' इत्येव सिद्धे गुरुभूतन्यासकरणेन तदपेक्षया बोधनेन ऊकारांशेऽसम्भवेन च संज्ञाविधाविति निषेधाप्रवृत्तौ इदूदन्तं सप्तम्यन्तमित्यर्थेनेष्टसिद्धेरित्याहुः। वस्तुतस्तु पपीत्यादीनामेतद्भाष्यप्रामाण्यादनभिधानमेवेति न कोऽपि दोष इति बोध्यम्। पक्षद्वयेऽपि परमतेनाशङ्कते। **यद्यपीति।** यद्यप्यत्रापि द्वितीयपक्षे वारणं भाष्यादौ स्फुटम्, तथापि वस्तुतत्वमेवाह। **तथापीति।** तथा च पक्षद्वयेऽपि न भवदुक्तशङ्कावसरः, तयोस्तयोरेव पर्यवसानेनोभयत्राप्यदोषस्योक्तत्वादिति भावः। एवं स्वमते उक्त्वा परमतेऽप्याह।

मीमांसकादीनामपि निषादस्थपतिन्यायेन पूर्वपदार्थसम्बन्धिनि लक्षणाऽभ्युपगमाद्युक्तैवार्थग्रहणेन वाप्यश्वनद्यातिप्रभृतेर्व्यावृत्तिः। आतिः बलाका। शरारिरातिराटिश्च बलाका विसकण्टिका। (अ० को० २-५-२७) इत्यमरः। आद्यास्त्रयोऽपि स्त्रीलिङ्गाः बलाकासाहचर्यादिति केचित्। वस्तुतस्तु शरार्यादयस्त्रयः पक्षिविशेषवाचका न तु बलाकापर्यायाः। अतो बलाकासाहचर्यमकिञ्चित्करं स्त्रीत्वं परमस्त्येव। रत्नकोशे स्त्रीलिङ्गकाण्डे – ''आटिः शरारिर्वरटी'' इत्युक्तेः। आतेरपि तत्साहचर्यात्।

तपरकरणमसन्देहार्थमिति वृत्तिः। अत्र वार्त्तिकम् –

ईदूतौ सप्तमीत्येव लुप्तेऽर्थग्रहणाद्भवेत्।
पूर्वस्य चेत्सवर्णोऽसावाडाम्भावः प्रसज्यते॥
वचनाद्यत्र दीर्घत्वं तत्रापि सरसी यदि।
ज्ञापकं स्यात्तदन्तत्वे मा वा पूर्वपदस्य भूत्॥

अस्यार्थः – ईदूतौ सप्तमीत्येवास्तु नार्थोऽर्थग्रहणेन। अत्रोत्तरमाह — लुप्त इति। संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधेरभावात्। सप्तम्या एव संज्ञा स्यात्। लुप्तेऽपि सुपि प्रकृतिभागस्य संज्ञासिद्धये तु कर्त्तव्यमेवार्थग्रहणमित्यर्थः। ननु 'सोमो गौरी' इत्यादौ विभक्तिर्न लुप्यते किन्तु 'धीती' 'मती' इत्यादाविव पूर्वसवर्णे कृते ''अकः सवर्णे'' इति दीर्घैकादेशे तस्यादिवद्भावात्सप्तमीग्रहणादस्त्येव सप्तमीत्याशङ्क्याह - पूर्वस्येति। आडाम्भाव इति। एकादेशं बाधित्वा परत्वादाङ्गत्वाच्चाऽऽडामौ स्यातामित्यर्थः। तस्माल्लुगेवेति स्थितेऽर्थग्रहणं कर्त्तव्यमेवेति भावः। नन्वर्थग्रहणं माऽस्तु वचनसामर्थ्याच्च संज्ञाविधावपि तदन्तविधिर्भविष्यतीत्याशङ्क्याह - वचनादिति। यत्र दीर्घत्वं तत्रैव वचनात्स्यात् ''दृतिं न शुष्कं सरसी शयानम्'' इति यथा। अत्र हि सरश्शब्दात्परस्य सप्तम्येकवचनस्य ''इयाडियाजीकारापामुपसंख्यानम्'' (का०वा०) इतीकारादेशे सप्तमी

मीमांसकेति। न्यायस्वरूपं प्रागुक्तम्। **लक्षणेति।** पूर्वपदस्येति भावः। **वार्तिकमिति।** श्लोकेत्यादिः। **स्यादिति।** तथा च सरसीत्यत्रैव स्याद्गौरीत्यादौ न स्यादिति भावः। तदाह। **लुप्तेऽपीति। पूर्वसवर्णे इति।** यद्यपीकारान्ते पूर्वसवर्णे सत्यसति वा न विशेषस्तथाप्यूकारान्ते विशेषो बोध्यः। **आडामिति।** यत्तु ईदूतौ चर्षणयोरिति वाच्ये तथोक्त्वा ओस्सुपोरादेशे सूत्रवृत्त्या बोधितत्वेन तत्राडामोरप्राप्त्येदं चिन्त्यमिति नारायणः। तन्न। एतद्भाष्यप्रामाण्येन

श्रूयते। तथाच 'सोमो गौरी' इत्यादौ न स्यादेवेत्यर्थः। एतद् दूषयतितत्रापीति। तत्रापि सप्तम्या लुगेव न त्वीकारः। यदि सरसीशब्दोऽपि वर्त्तते। असन्दिग्धे सन्दिग्धवचनमेतच्छास्त्रापि चेत्प्रमापं स्युरिति यथा। अस्ति हि सरसीशब्दो ''दक्षिणापथेहि महान्ति सरांसि सरस्य इत्युच्यन्ते'' इति भगवदुक्तेः ''कासारः सरसी सरः'' (अ०को० १-१०-२८) इत्यमरकोशाच्च। तथा च '''सरसीः परिशीलितुं मया'' इत्यादि प्रयोगोऽपि दृश्यते। एवञ्च सरसीशब्दोऽपि लुप्तविभक्तिक एवेति वचनात्तदन्तविधिरिति स्थितम्। ननूक्तरीत्याऽस्तु सरसीशब्दः, सरस्शब्दोऽपि सान्तो निर्विवाद एव। तथाच सान्तादेवेकारादेशोऽयमस्तु। एवं हि सति संज्ञाविधौ ज्ञापकात्त्यक्तस्य तदन्तग्रहणस्य पुनराश्रयणं न कर्त्तव्यं भवतीति चेत् ? न, तथा सतीकारस्य सुत्वेनानुदात्ततया सरः शब्दस्य च सृधातोरसुनि व्युत्पादितस्य नित्स्वरेण सरसीति पदमाद्युदात्तं प्रसज्येत। गौरादिषु ''पिप्पल्यादयश्च'' (का०वा०) इति पाठात्पिप्पल्याद्यन्तःपातिनः सरःशब्दान्ङीषा त्वन्तोदात्तमिष्यते। तथैव वेदे पाठात्। एवन्तर्हि प्रगृह्यसंज्ञाप्रकरणे प्रत्ययलक्षणं नास्तीति ज्ञापनायेदमर्थग्रहणमस्तु। एवञ्च ''इदूदेद् द्विवचनम्'' (पा०सू० १-१-११) इति सूत्रे ईदूदेदन्तं द्विवचनान्तमिति पक्षे ईदूदेदन्तं यद्विवचनं तदन्तमिति पक्षश्च समर्थितो भवति। तत्र हि कुमार्य्योरगारं कुमार्य्यगारम्, अशुक्ले शुक्ले सम्पद्येतां शुक्लचास्तां वस्त्रं इत्यात्रातिव्याप्तिरिति दोषः। स च प्रत्ययलक्षणविरहादेवोद्धृत इत्याह – ज्ञापकमिति। प्रगृह्यसंज्ञाप्रकरणे प्रत्ययलक्षणाभावस्येति शेषः। केदं ज्ञापनमुपयुज्यते, तदाह-तदन्तत्व इति। तदन्तगर्भे

तेषामनभिधानात्। चो ह्यर्थे। निराकर्तुः संशयार्थकयदिशब्दासङ्गतेराह। **असमिति।** हि यतः। अतः सन्देहो न। तथा च किञ्च नन्वित्याद्यवतरणं सान्तादेव परस्य ङे इत्याद्येवमाह। **एवं सतीति। नित्स्वरेणेति।** आद्युदात्ततयेति शेषः। **पाठादिति।** यत्तु सुपामिति सूत्रभाष्यप्रामाण्याच्छाखान्तरे आद्युदात्तपाठोऽप्यस्ति, तत्रेयाडित्यस्य दन्ति नेत्येवोदाहरणं दत्तमिति चिन्त्यमेतदिति। तन्न। प्रकृतसूत्रभाष्यविरोधात्। तत्र हि सरसीशब्द एवोदाहृतः, ततो लुकैवोक्तप्रयोगे सिद्धे इयाडिति वार्तिके इकारादेशो न विधेय इति भाष्याशयः। सरसीशब्दो यदि ङीषन्तस्तदान्तोदात्तत्वमित्यत्र न्यायसिद्धं। असुन उगन्तत्वात् ङीबन्तत्वे तु स्वरव्यत्ययादेव तत्वम्, शाखान्तरे आद्युदात्तपाठे तु तत्र व्यत्ययेन ङीबिति बोध्यम्। **तत्र हि** तयोः पक्षयोर्हि। यथाक्रममिति शेषः। **इत्यत्र** इत्यनयोः। यथाश्रुतेऽनन्वितत्वादाह। **प्रगृह्येति।**

पक्षद्वयेऽपीत्यर्थः। ननु संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधेरभावादेव तदन्तपक्षस्तत्र न स्थित इत्यपरितोषादाह - मा वेति 'वाप्यश्वः' इत्यादौ मा भूदित्यर्थः।

अत्रेदमवधेयम्, ''अवितृस्तृतन्त्रिभ्य ईः'' (उ०सू० ३-४४६) इति सूत्रादीरित्यनुवर्त्तमाने ''यापोः किद्वे च'' (उ०सू० ३-४४७) ''वातप्रमीः'' (उ०सू० ४-३४९) इति सूत्राभ्यां शब्दत्रयं व्युत्पादितम्। यान्त्यनेनेति ययीर्मुक्तिमार्गः। पिबति रसान्पाति वा लोकमिति पपीः सूर्य्यः। वातं प्रमिमीते सम्मुखधावनादिति वातप्रमीः निःशृङ्गो मृगाकृतिर्वातमृगनामा पशुविशेषः। एभ्यस्त्रिभ्योऽपि ङौ सवर्णदीर्घात् 'पपी' 'ययी' 'वातप्रमी' इति रूपं निर्विवादम्। तथाचेह श्रूयमाणस्येकारस्य सप्तमीत्वात् 'तत्रापि सरसी यदि'इत्यसङ्गतम्, ईकारस्य श्रूयमाणस्यासम्भवात्। सामर्थ्यात्तदन्ताविधिर्भविष्यतीत्यस्यार्थः। तस्मादूकारांशे सामर्थ्यात्तदन्तविधौ लब्धे 'सोमो गौरी' इत्यादावपि भविष्यतीत्याशयः। 'ययी आसक्तः' इत्यादौ तु भाव्यमेव प्रकृतिभावेन। न चायं योगश्छान्दसस्तथाविधानामेवोदाहरणानां दत्तत्वादिति वाच्यम्, मुनित्रयोक्तिं विनाऽस्मदिच्छया छान्दसत्वकल्पनेऽतिप्रसङ्गात्, लोके प्रगृह्यत्वं न भवतीत्यस्मिन्नर्थे प्रमाणानुपलम्भाच्च, 'अप्रतिषिद्धमनुमतं भवति' इति न्यायेन लोके 'ययी' 'पपी'

अपरितोषादिति। उक्तार्थे ज्ञापितेऽपि प्रकृतसूत्रस्य लुप्ते वचनसामर्थ्यादेव प्रवृत्तौ अर्थग्रहणस्याचारितार्थ्येन ज्ञापकस्य शैथिल्यमित्यप्यपरितोषो बोध्य इत्याहुः। **मावेतीति।** अत्र पूर्वपदग्रहणमुपसर्जनोपलक्षणम्। तेन वाप्यामिवाचरति वापीयति कूपे इत्यत्राप्यर्थान्तरसङ्क्रमात्प्रगृह्यत्वं नेति बोध्यमिति केचित्। तन्न। तत्राफलत्वादेवाप्रवृत्तेः। किञ्चोपसर्जनं शास्त्रीयं लौकिकं वा। आद्ये तत्रापि तदभावः। अन्त्ये गौरीत्यादावपि दोष इति दिक्। नारायणादिसिद्धान्तमाह। **अत्रेदमिति।** असाङ्गत्ये हेतुमाह। **ईकारेति।** हि यतः। एवं सन्दूष्य भाष्यं योजयति। **तस्मादिति। इत्याशय इति।** भाष्यस्येति शेषः। तथा च तत्साहचर्यादीकारान्तेऽपि भविष्यतीति तात्पर्यम्। एतेनैतद्भाष्यप्रामाण्याद्ययीत्यादीनां सप्तम्येकवचने प्रयोगाभाव इति परास्तम्। न चानाङित्यनुवर्त्य पर्युदासात्तस्यापि तादृशस्य प्रातिपदिकस्यैव ग्रहणाद्ययीति सप्तम्यन्ते नेति वाच्यम्। मण्डूकानुवृत्तौ मानाभावात्। गौरीत्यादीनामनुदाहरणत्वापत्तेश्च। सुबन्तत्वेन सादृश्यस्य वक्तुं शक्यत्वाच्च। न च सप्तम्या प्रकृतिराक्षिप्यते, अतो नास्येति वाच्यम्। सप्तम्यन्तस्याप्याक्षेपापत्तेः। **तथाविधेति।** अर्थग्रहणानुवृत्त्या तत्वमिति तु न युक्तम्। मण्डूकानुवृत्तेरेकदेशानुवृत्तेश्च

'वातप्रमी' इत्येतेषां प्रगृह्यत्वस्यैव न्याय्यत्वाच्च । अत एव ''दृग्दृश्वतुषु'' (पा०सू० ६-३-८९) इति सूत्रे ''दृक्षे च'' (का०वा०) इति वार्तिकमुपादाय क्सप्रत्ययः सादेश्चश्च छन्दस्येव, भाष्ये 'सदृक्षासः' इत्युदाहृतत्वादिति केचिदिति व्याचक्षापा हरदत्तादय-श्छान्दसत्वं वदतां मते स्वस्यापरितोषमाविश्चक्रुरिति दिक् ।

दाधाघ्वदाप् (पा०सू० १-१-२०) । दारूपा धारूपाश्च धातवो घुसंज्ञाः स्युर्दाप्दैपौ वर्जयित्वा । तत्र दारूपाश्चत्वारः – ''डुदाञ्'' (जु०उ० १०९१) प्रपिददाति, ''दाप्' (भ्वा०प० ९३०) प्रपियच्छति, ''दो'' (दि०प० ११४८) प्रपिद्यति, ''देङ्'' (भ्वा०आ० १६२) प्रपिदयते । धारूपौ द्वौ - ''डुधाञ्'' (जु०उ० १०९२) प्रपिदधाति, ''धेट्'' (भ्वा०प० ९०२) प्रपिधयति वत्सो मातरम् । अदाबिति किम् ? ''दाप् लवने'' (अ०प० १०५९) दातं बर्हिः । लूनमित्यर्थः । घुत्वाभावाद् ''दोदद्घोः'' (पा०सू० ७-४-४६) इति न प्रवर्त्तते । ''दैप् शोधने'' (भ्वा०प० ९२४) अवदातं मुखम् । इह घुत्वाभावाद् ''अच उपसर्गात्तः'' (पा०सू० ७-४-४७) इत्येतन्न । घुप्रदेशा ''नेर्गदनद'' (पा०सू० ८-४-१७) इत्यादयः । इह दोदेङ्धेटामनुकरणानि व्यवस्थाप्य तत्र ''प्रकृतिवदनुकरणम्'' (प०भा०) इत्यतिदेशाद् ''आदेच उपदेशेऽशिति'' (पा०सू० ६-१-४५) इत्यात्वं क्रियते, अनैमित्तिकमात्वं शिति तु प्रतिषेध इति सिद्धान्तात् । न चैवं विभक्तेरुत्पत्तिर्न स्यादधातुरिति प्रातिपदिकसंज्ञानिषेधादिति वाच्यम्, अधातुरिति पर्य्युदासोऽयं न तु प्रसज्यप्रतिषेधः । अस्ति चेह स्वाश्रयमधा-

---

दुर्वचत्वात् । मते तदंशे, स्वस्य स्वग्रन्थस्य । वस्तुतस्तु 'न चास्ति सप्तमी ईदूता'विति भाष्यप्रामाण्यादेषामनभिधानमेवेति यथाश्रुतमेव भाष्यं युक्तमिति अत्रेदमित्यादि चिन्त्यमिति बोध्यम् । तदाह । **दिगिति ।।**

५.१७ घुसंज्ञासूत्रार्थविचारः

दाधा घ्वदाप् ।। दाधा इत्यनयोः प्रत्यययोर्न ग्रहणम्, दाप्साहचर्यात् । तत्र घुसंज्ञायाः फलाभावाच्चात आह । **धातव इति ।** तत्र तावत्सूत्रमतमाह । **इहेत्यादिना ।** नन्वनुकरणानामुपदेशाभावान्नोपसंदेशे एजन्तत्वमिति कथमास्वप्राप्तिरत आह । **प्रकृतीति ।** नन्वेवमप्यशित्परत्वाभावात्तदप्राप्तिरेवात आह । **अनैमित्तेति । एवं** प्रकृतीत्यस्य सञ्चारे । हि यतः ।

तुत्वम्। यद्वा, ''यत्तदेतेभ्यः'' (पा०सू० ५-१-३९) इत्यादाविवेहापि कार्यविज्ञेष-पुरस्कारेणैवातिदेशप्रवृत्त्यप्रवृत्ती भविष्यतः। ततश्चतुर्णां दारूपापां द्वयोश्च धारूपयोरेक-शेषं कृत्वा द्वन्द्वः कर्त्तव्यः। 'प्रपिदाता' इत्यादौ कृतात्वानां दोदेद्धेटां तु स्थानिवद्भावात्सिद्धं घुत्वं, लक्षणप्रतिपदोक्तपरिभाषाया ''निरनुबन्धकग्रहणे न सानुबन्धकस्य'' (प०भा० ८२) इत्यस्याश्च नेह प्रवृत्तिः, सर्वेषां स्वरूपेणैवानुकृतत्वात्। अत एव दारयतिधारयत्योर्नातिप्रसङ्गः, तयोरनुकरणे आत्वासम्भवेनेह दृ धृ इत्यनयोरनुपात्तत्वात्। ननु कृतात्वस्य सूत्रे निर्देशात् 'प्रणिद्यति' 'प्रणिधयति' इत्यादौ चात्वविरहात्कथं घुत्वमिति चेत् ? भ्रान्तोऽसि। न हि वयं कृतात्वमनुकुर्मो येनोक्तदोषः स्यात्, अपि तु देदोधे इत्येङन्तेष्वेवानुक्रियमाणेषु लक्षणवशनिष्पन्नमात्वमित्युक्तम्। न च लक्षणेन स्वरूपान्यत्वेऽप्यनुकरणता हीयते, ''सख्युरसम्बुद्धौ'' (पा०सू० ७-१-९२) इत्यत्रापि सखिरूपप्रतीतेः, 'गवित्ययमाह' इत्यत्र गोशब्दप्रतीतेश्च। दीङस्तु नेह ग्रहणं तदनुकरणे आत्वासम्भवात्। वार्तिकमते एजन्तानां दीङादीनामात्वविधानात्। भाष्यमते त्वेङ्निमित्ते परतस्तद्विधानात्। तेन दीङस्तृजादावात्वे कृतेऽपि घुसंज्ञाविरहात् 'प्रनिदाता' इत्यत्र ''नेर्गद'' (पा०सू० ८-४-१७) इति, नित्यं षत्वं न भवति ''शेषे विभाषा'' (पा०सू० १-२-२७) इति वैकल्पिकं तु स्यादेव। तथा 'उपादास्तास्य स्वरः शिक्षिकस्य' इत्यत्र ''स्थाघ्वोरिच्च'' (पा०सू० १-२-१७) इतीत्वं न भवतीति सूत्रकारस्य मतम्। नन्वस्मिन्पक्षे दाप्दैपावनुकृतौ न वा ? आद्येऽनुकरणपर्युदासोभयसामर्थ्यात्तयोर्घुसंज्ञा-विकल्पः स्यात्, अन्त्ये अदाबिति व्यर्थं स्यात् अननुकृतत्वादेव दाप्दैपोर्घुसंज्ञाप्राप्ति-

---

प्रसज्यप्रतिषेधेऽप्याह। **यद्वेति। द्वन्द्व इति।** तदुत्तरं विभक्त्यश्रुतिः सौत्रीति केचित्। असौ रुत्वयत्वलोपेषु रूपमिति तु तत्वम्। आदिना प्रणिदयते प्रणिद्यतीत्यादिसङ्ग्रहः। कृतात्वानामित्युपलक्षणं विकृतमात्राणाम्। अन्यथा प्रणिद्यतीत्यादावपि संज्ञा न स्यात्, दोदेरूपाभावादिति बोध्यम्। **नेति।** अत्र पक्षे इति भावः। उक्तमेव शङ्कापूर्वं दृढयति। **नन्वित्यादिना। नोक्त इति।** दोदेरूपाभावात्तत्र तत्र स्यादित्युक्त इत्यर्थः। **न च** न हि। ह्यर्थमेवाह। **सख्युरित्यादि।** तदसम्भवं द्वेधा आह। **वार्तिकेति।** प्रकृतत्वादाह। **दीङादीनामिति।** व्युत्क्रमे बोध्यः। आदिशब्दः सादृश्ये। निमित्ते प्रत्यये **इति सूत्रेति।** इत्यारभ्यैतत्पर्यन्तमुक्तमित्यर्थः। **उदात्ताविति।** यत इत्यादिः। परं केवलम्। न च न हि। दोषान्तरमाह। **तथेति।** विकृतानां 'दोदद्धो'रिति सूत्रे धेण्निवृत्त्यर्थदाग्रहणपर्यालोचनया गामादेति

विरहादिति चेत् ? न, अदाबित्यस्मिन्नसति तयोरप्यनुकरणं सम्भाव्येत। न हि लक्षणैकचक्षुषा दोदेङादीनां दाप्दैपोश्च वैलक्षण्यं किञ्चिदनुभूयते यद्बलाद् ग्रहणाग्रहणे व्यवस्थाप्येयाताम्। ''व्याख्यानतो विशेषप्रतिपत्तिः'' (प०भा०१) इति परमवशिष्यते। किन्त्वगतिकगतिरेषाऽनभिधानवत्। न च तद्बलेन सिद्धस्य प्रत्याख्यानं शोभते।

वार्तिककारमते तु प्रयोगस्थानामेव दाधारूपाणामिदमनुकरणम्। न चैवं 'प्रणिद्यति' 'प्रणिदयते' इत्यादौ शिति न स्यात्, आत्वाभावात्। तथा ''देङ् रक्षणे'' (भ्वा०आ० ९६२) अदित ''धेट्'' (भ्वा०प० ९०२) व्यत्यधित, 'प्रणिदाता' 'प्रणिधाता' इत्यादावपि न स्यादात्वस्य लाक्षणिकत्वात्, ''लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्य ग्रहणम्'' (प०भा० ११४) इति न्यायादिति वाच्यम्, वचनबलेनैव तत्समाधानात्। तथाच कात्यायनवार्तिकम् - ''घुसंज्ञायां प्रकृतिग्रहणं शिदर्थम्'' इति। भारद्वाजीयास्तु पठन्ति – ''शिद्विकृतार्थम्'' इति। तथाच दाधाप्रकृतयो घु इति पठित्वा दाश्च धाश्च प्रकृतयश्चेति द्वन्द्वं कृत्वा सन्निधानाद्दाधामेव प्रकृतय इति व्याख्येयम्।

भाष्यकारास्तु वार्त्तिकं प्रत्याचख्युः। तथाहि, ''नेर्गद'' (पा०सू० ८-४-१७) इति सूत्रे तावदवश्यं प्रकृतिग्रहणं कर्त्तव्यं 'प्रणिमयते' 'प्रण्यमयत' इत्यत्रापि णत्वं यथा स्यात्। तदेव पुरस्तादपकृष्य घुप्रकृतिम इति पठिष्यामः। घुश्च प्रकृतिश्च माश्चेति द्वन्द्वः। सन्निधानाच्च पूर्वोत्तरयोः प्रकृतिर्ग्रहिष्यते। न चैवं मीनातिमिनोत्योरपि माप्रकृतित्वाद्ग्रहणापत्तिः, माङो ङकारानुबन्धस्यैव तत्रावश्यं पठनीयत्वात्। अन्यथा 'मामानः'

परिभाषामाश्रित्य घुत्वं सुलभमिति शिदर्थमित्येवोक्तम्। अनेन तु विकृतार्थमपीति। भारद्वाजीयैस्तु ज्ञापकाश्रयणे प्रतिपत्तिगौरवात् तावद्विवेकासमर्थानां विकृतसङ्ग्रहोऽप्यस्य प्रयोजनमित्याशयेन विकृतार्थत्वमप्युक्तम्। **व्याख्येयमिति।** प्रत्येकं वाक्यार्थे पर्यवसन्ने प्रकृतिशब्दस्य सम्बन्धिशब्दत्वात्प्रकृतानामप्रकृतानां च सम्बन्धिनामुपस्थितो प्रत्यासत्त्याऽप्रकृतानां निरासे दाधामेव पर्यवस्यति, न तु वाच्योऽयम्। एतेन प्रकृतिशब्दान्वयाय दाधाशब्दे विभक्तिविपरिणाम इत्यपास्तम्। गौरवात्। वार्तिके सूत्रपदानि नानुवर्तत इति तु वालवं धनमात्रम्, वाहतेत्यादौ पुत्रपदानुवृत्तेः सर्वसम्मतत्वादिति बोध्यः। **कर्तव्यमिति।** माङ्ग्रहणेन मेङोऽपि ग्रहणं यथा स्यादित्येवमर्थमिति भावः। तदाह। **प्रणीति। न चैवमिति।** वार्तिकमतेनेयं शङ्का यद्यपि, तथापि वस्तुतत्वमेवाह। **माङ इति।** ङानुबन्धकस्य माङ एवेत्यर्थः। एवमपि दास्थले निर्वाहेऽपि

इत्यत्रातिप्रसङ्गात्। तस्माद् घुप्रकृतिमाङिति पाठेन 'प्रणिद्यति' 'प्रणिदयते' इत्यादेः सिद्धत्वाच्छिदर्थं तावद् धुसंज्ञायां प्रकृतिग्रहणं न कर्त्तव्यमिति स्थितम्। भारद्वाजीयोक्तरीत्या 'विकृतार्थं कर्त्तव्यम्' इति पुनरवशिष्यते। तदपि न, ''गामादाग्रहणेष्वविशेषः'' (प०भा० ११५) इति परिभाषयैव लाक्षणिकस्यापि दारूपस्य घुसंज्ञासिद्धेः। अस्यां च परिभाषायां दैपः पित्त्वं लिङ्गम्। तद्धचदाबिति सामान्यग्रहणार्थं क्रियते, लाक्षणिकत्वादेव घुसंज्ञायां देपूग्रहणाभावे तु किं निषेधे सामान्यग्रहणार्थेन पित्त्वेन ? न चैवमपि धेटो घुसंज्ञा न स्यादेवेति वाच्यम्, ''दो दद्धीः'' (पा०सू० ७-४-४६) इत्यत्र धेटो निवृत्त्यर्थं द इत्युक्तमिति वाच्यम्, तत्र दधातेर्हिः'' (पा०सू० ७-४-४२) इति ह्यादेशविधानादेव दद्भावाप्रसङ्गात्। नन्वेवमपि ''गामादाग्रहणेष्वविशेषः'' (प०भा० ११५) इत्येतेन लक्षणप्रतिपदोक्तपरिभाषाया ''निरनुबन्धकग्रहणे'' (प०भा० ८२) इति परिभाषायाश्च यथा बाधस्तथार्थवद्ग्रहणपरिभाषाया अपि बाधः स्यात्। तथाच 'प्रनिदारयति' 'प्रनिधारयति' इत्यत्राप्यतिप्रसङ्ग इति चेत् ? न, गदादीनां य उपसर्गस्तत्स्थान्निमित्तादुत्तरस्य तानेव गदादीन् प्रत्युपसर्गस्य नेरिति व्याख्यानात्। दारयतिधारयत्यवयवयोस्तु दाधारूपयोरनर्थकत्वान्न तं प्रत्युपसर्गत्वम्, यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञा इति वक्ष्यमापत्वात्। न चैवं 'प्रणिदापयति' 'प्रणिधापयति' इत्यत्रापि पत्वं न स्यादिति वाच्यम्, तत्र पुगागमात्पूर्वं

विशेषापेक्षं ज्ञापकमिति भावः। तन्मतेनैवाह। **दो ददिति।** धेण्निवृत्त्यर्थमिति पाठः। धेण्निमित्तमिति पाठे तु मक्षिकार्थो धूम इति वत् बोध्यम्। **तत्र** दधातौ। **एवमपि** उक्तरीत्याऽव्याप्त्यभावेऽपि। **निरनुबन्धकेति।** सत्यां च तस्यां दोऽवेत्यस्यैव ग्रहणं स्यादिति भावः। तथा च वार्तिकमते कृतेऽपि प्रकृतिग्रहणे निरनुबन्धकेति परिभाषाव्यावृत्त्यर्थं गामादेत्याद्यावश्यकमिति बोध्यम्। दा इति सामान्यानुकरणसामर्थ्यात्तन्मते अस्या अप्रवृत्तिः। अन्यथा दोधा इत्येव वदेदित्यन्ये। **स्यादिति।** एतदंशे विशेषाभावात् ज्ञापकस्य सामान्यापेक्षत्वम्। एवञ्च भाष्योक्तप्रथमसमाधिरयुक्त इति भावः। अत एव तदुक्तद्वितीयसमाधिमेवाह। **गदादीनामिति। यत्क्रियेति** व्याख्यातमिदम्। **एवं** उक्तरीत्यङ्गीकारे। पत्वस्यासिद्धत्वात्पुकः पूर्वमप्रवृत्तेः तन्निमित्तभूतघुसंज्ञाया अपि फलाभावात्तदाऽप्राप्तेः पुकि घुत्वेऽप्यनर्थकत्वेन तं प्रत्युपसर्गत्वाभावात्तदप्राप्तिरिति भावः। **त्यत्रापीति।** घुसंज्ञातः प्राक् परत्वान्नित्यत्वाच्च पुगिति भावः। **पूर्वमिति।** अन्तरङ्गत्वादिति भावः। धातूपसर्गयोः कार्यस्यान्तरङ्गत्वात्पुकः पूर्वं दाधा

दा धा इत्यवस्थायां घुसंज्ञाप्रवृत्तौ पुग्विशिष्टस्यापि घुग्रहणेन ग्रहणात्। 'अनागमकानां सागमका आदेशाः' इति पक्षे तु स्थानिवद्भावेन घुसंज्ञाप्रवृत्तेः। नन्वनान्तर्यमेवैतयोरान्तर्य्यं सम्प्रयोगो वा नष्टाश्वदग्धरथवदिति स्थानेन्तरतमसूत्रस्थभाष्यरीत्या दारयत्यादेरपि दापयत्यादिसाम्यमेव, निष्पन्नस्यापो रपरत्वाभ्युपगमेन रेफपुकोरविशेषादिति चेत्? सत्यम्, ''सिद्धन्तु प्रसङ्गे रपरत्वात्'' इत्युरप्रपरसूत्रस्थवार्त्तिकरीत्या समाधानं कृतम्। उक्तभाष्यरीत्या तु प्रसक्तो दोषः प्रागुक्तसूत्रकारमतमाश्रित्योद्धर्त्तव्यः। न हि दृधृ इत्यनयोरनुकरणे आत्वं लभ्यते इति दिक्।

इदं त्ववधेयम्, 'प्रणिदापयति' इत्यत्राप्युपसर्गयोः प्रकृत्यर्थविशेषपत्वे सत्येव ''नेर्गद'' (पा०सू० ८-४-१७) इति नित्यं पत्वं, ण्यर्थविशेषकत्वे तु घुसंज्ञकं प्रत्यनुसर्गत्वात् ''शेषे विभाषा'' इति विकल्प एव न तु नित्यं पत्वमिति।

स्यादेतत्, 'उपदिदीषते' इत्यत्र ''सनि मीमा'' (पा०सू० ७-४-५४) इतीस्भावः स्यात्, वार्त्तिककृता घुसंज्ञायां प्रकृतिग्रहणात्। सूत्रकारभाष्यकारयोस्तु नासौ दोषः,

---

इत्यनयोरर्थनत्वेन तं प्रत्युपसर्गत्वस्य सत्वात्ततः पूर्वमेव णत्वेन तद्रूपफलस्य सत्वान्न तदा घुसंज्ञेति तात्पर्यम्। नन्वकृतपरिभाषया न पूर्वं णत्वप्रवृत्तिरत आह। **पुग्विशिष्टेति।** यदागमा इति न्यायादिति भावः। दारयतीत्यादौ तु गुणात्पूर्वं न दारूपत्वम्, गुणे कृतेऽपि रेफस्य न दारूपवचनत्वम्। अवयवावयवस्य समुदायावयवत्वेऽपि अकारस्य दकारावयवत्वे मानाभावाच्च क्षतिरिति दिक्। अत्र पुकि कर्तव्ये णत्वस्यासिद्धत्वात्तदा कार्याभावात् घुसंज्ञा न प्रवर्तते। कृते तु दारुपस्यानर्थक्यादप्राप्तिरिति चिन्त्यमेवेदमिति केचित्। वस्तुतस्तु पुकि कृते पुका दारूपतावयवत्वेन दाग्रहणेन ग्रहणात्पुग्विशिष्टस्यैव घुसंज्ञेति न क्वचिद्दोषः। प्रनिदार पृहीत्यत्र तु न रेफः समुदायावयव इति न तद्ग्रहणेन ग्रहणम्। 'यदाऽगमा' इत्यस्य च यमुद्दिश्यागमो विहितस्तद्ग्रहणेन गृह्यन्त इत्यर्थः इति बोध्यम्। अयमेव च दिगर्थः। **कृतमिति।** इदं च भगवता भाष्यकारेणेति भावः। **उरण्रपर** इति सूत्रे प्रसङ्गवाचिनः स्थानशब्दस्यानुवृत्त्या विधीयमान एवाण् रपरो भवतीत्यर्थेन क्रियमाणा वृद्धि रा भवतीति दाधारोरेवार्थवत्वं नावयवानामिति नास्ति तत्र घुसंज्ञाप्रवृत्तिरिति तात्पर्यम्। **सूत्रेति।** भाष्यमते तूक्तरीत्याऽयं दोष एव। तथा चानेनापि तस्यैव सिद्धान्तत्वं सूचितम्, न तस्येति बोध्यम्। सूत्रमतमेवाह। **न हीति।** भाष्यसूचितं कैयटाद्युक्तं सिद्धान्तमाह। **इदं त्विति।** दीङः प्रतिषेध इत्यादिभाष्यार्थमाह। **स्यादेतदित्यादिना।** अयं दोषो

सूत्रकृता दीङोऽननुकृतत्वात्, भाष्यमते पत्वे प्रकृतिग्रहणेपि घुसंज्ञायान्तद्विरहादिति चेत् ? सत्यम्, वार्त्तिकमतेऽपि नेयं दाप्रकृतिः, एजन्तानामात्वविधानाभ्युपगमात् । न चैव मादन्तत्वनिबन्धनयुच्प्रत्ययासिद्धिः, तत्राकारान्तलक्षणप्रत्ययविधिरिति वचनेनैव तत्सिद्धेः । भाष्ये त्वेतद्वचनप्रत्याख्यानायैजूविषये आत्वं सिद्धान्तितमित्यन्यदेतत् ।

इदं त्ववशिष्यते, भाष्यवार्त्तिकोभयमतेऽपि ''उपादास्तास्य स्वरः शिक्षकस्य'' इत्यत्र ''स्थाघ्वोः'' (पा०सू० १-२-१७) इतीत्वं प्राप्तं, तच्च भाष्ये सन्निपातपरिभाषया परिहृतम् । उप दी म् त इति स्थिते एज्विषये प्रवर्त्तमानमात्वं सिचोऽकित्त्वमुपजीवति । यदि चात्र घुसंज्ञा स्यात्तर्हि ''स्थाघ्वोरिच्च'' (पा०सू० १-२-२७) इति सिचः कित्त्वं स्यादतोऽकित्त्वमुपजीव्य प्रवृत्त आकारः कित्वप्रवर्त्तिकां घुसंज्ञां न प्रवर्त्तयत्येवेति ।

वार्त्तिककृता तु ''दीङः प्रतिषेधः स्थाघ्वोरित्वे'' (का०वा०) इति वचनमेव कृतम् । उभयमतेऽपि दीङस्तृजादावात्वे कृते 'प्रपिदाता' इत्यादौ ''नेर्गद'' (पा०सू० ८-४-१७) इति पत्वं भवति । अत एव वार्त्तिककृता ''दीङः प्रतिषेधः'' इत्येव नोक्तं किन्तु ''स्थाघ्वोरित्वे'' इति विषयविशेषो निर्दिष्टः ।

सूत्रमते तु न भाव्यं पत्वेनेति स्पष्टमेव । किञ्च भाष्यवार्त्तिकयोर्नं केवलं सूत्रकृता

वार्तिकमते एवेत्याह । **वार्तिकेति । न चैवमिति ।** अवदात इत्यादाविति भावः । **अन्यदेतदिति ।** अयं वार्तिकमते समाधिर्नारायणाद्यनुरोधेनोक्तः । वस्तुतस्तु चिन्त्यमिदम्, तादृशवार्तिकस्यानुपलम्भात् । विपरीतं **मीनातीति** सूत्रे 'उपदेशवचनं कर्तव्यं कघञ्युच्सिद्ध्यर्थ'मिति वार्तिकं दृश्यते । तत्र चोपदेशे एच इति विरुद्धमित्याशङ्क्य एज्विषय इति भाष्यकृता व्याख्यातम् । न तु भवदुक्तवार्तिकं तत्प्रत्याख्यानं वा भाष्ये दृश्यते । एवञ्च घुसंज्ञायां प्रकृतिग्रहणं वार्तिककृदुक्तं दुष्टमेव । न तु तदनुरोधेन गुरुभूतवचनान्तरकल्पनाभिनिवेशः कार्यः । न ह्येकदेश्युक्तमतपरिष्कारे गुरुप्रकारेण क्रियमाणे किञ्चित्फलमिति बोध्यम् ।।

अकित्वमिति । एचो विषयस्यान्यथाऽसम्भवादिति भावः । **कित्वमिति ।** तदभावे संनियोगशिष्टत्वादित्वमपि नेति कार्याभावाद् घुत्वस्याप्रवृत्तिरिति भावः । **उभयमतेऽपीति ।** प्रयोगस्थानामेवानुकरणात्, अन्यथा णत्वविधायके प्रकृतिग्रहणापकर्षणेन प्रकृतवार्तिकखण्डनं न सङ्गच्छेतेति भावः । **स्पष्टमेवेति ।** तथा च तस्य ताभ्यां विरोधमिति भावः । एवार्थकः केवलशब्दो

सह विरोधः किन्तु परस्परेणापि । तथाहि, भाष्यमते 'प्रपिदीयते' 'प्रपिदीनः' इत्यदावपि नित्यं पत्वं पत्वविधौ प्रकृतिग्रहणात् । वार्त्तिकमते तु वैकल्पिकम्, एजन्तानामेव प्रकृतित्वाभ्युपगमेनेदन्तस्याप्रकृतित्वात् । अन्यथा 'उपदिदीषते' इत्यत्रेस्भावापत्तेः । तदेवं 'प्रपिदाता' इत्यादौ सूत्रकृता सह द्वयोर्विरोधः । 'प्रपिदीनः' इत्यादौ तु भाष्यकृता सहेतरयोर्विरोधो दुष्परिहर इति ।

अत्रेदं वक्तव्यम्, 'यथोत्तरं मुनीनां प्रामाण्यम्' इति सिद्धान्ताद्भाष्योक्तरीत्या सर्वत्र दीङि परे नेर्नित्यं पत्वमिति स्थिते सूत्रवार्त्तिकमतेऽपि ''शेषे विभाषा'' (पा०सू० ८-४-१८) इति व्यवस्थितविभाषामाश्रित्य भाष्याविरोधः सम्पादनीयः, एकवाक्यतयैव सर्वनिर्वाहसम्भवे मतभेदकल्पनस्यानाश्रयणयित्वादिति ।

नन्वदाबिति प्रतिषेधे ''दाप्लवने'' (अ०प० १०५९) इत्यस्यैव ग्रहणं युक्तम्, न तु दैपः । पकारे श्रूयमापे आत्वायोगादिति चेत् ? न, ''अनुबन्धा अनेकान्ताः'' (प०भा० ४) इति पक्षे श्रूयमापस्यापि पकारस्य काकादिवदनवयवत्वेन धातोरेजन्तत्वानपाये आत्वप्रवृत्तेः । ''एकान्ता अनुबन्धाः'' (प०भा० ५) इति पक्षेऽपि भवत्येवात्वम् ''नानुबन्धकृतमनेजन्तत्वम्'' (प०भा० ७) इति सिद्धान्तात् । अत्र च ''उदीचां माङो व्यतीहारे'' (पा०सू० ३-४-१९) इति कृतात्वस्य मेङो निर्देशो ज्ञापकः । न च ''माङ्माने'' (जु०आ० १०८८) इत्यस्यैवायं निर्देशो 'व्यतिमिमीते' इत्यादौ तस्यापि कदाचिद्व्यतीहारे वृत्तिसम्भवादिति वाच्यम्, अपूर्वकालार्थस्य त्त्वाप्रत्ययस्य ''माङ्माने'' इत्यस्मादनभिधानात् । अत्र च भाष्योक्तेरेव

विरोधादग्रे योज्यः । दोषमुपसंहरति । **तदेवमिति । सहेति ।** वार्तिककृत इति शेषः । इतरेतरयोरिति पाठः, परस्पर इति तदर्थः । इतरयोरित्यपपाठः । **मतेऽपि** जातावेकवचनम् ।

दाप्प्रतिषेध इत्यादिभाष्यार्थमाह । **नन्वित्यादिना । आत्वायोगादिति ।** तथा चावदातं मुखमित्यत्र तत्वापत्तिरिति भाष्यम् । न च तर्हि दारूपत्वाभावात्कथं घुत्वं, कथं वा तन्निबन्धनं तत्वमिति वाच्यम् । **दोदद्घो**रित्यत्र धेण्निवृत्त्यर्थाद्धाग्रहणादनुबन्धप्रयुक्तोपदेशिकेजन्तत्वाभावेऽपि आत्वप्रवृत्तेः स्वीकारात् । [१]..... विशेषः । **नानुबन्धेति ।** अत एव घटादीनामात्वम्, अन्यथोपदेशे एजन्तत्वाभावात्तन्न स्यात् । व्यतिमिमते इति पाठः । एकवचनपाठस्तु न युक्त

---

१. अत्र ग्रन्थः त्रुटितः ।

प्रमापत्वादित्याहुः। एवञ्च मेङ इत्येव पठनीये ''माङो व्यतीहारे'' इति गुरुकरणं ''नानुबन्धकृतमनेजन्तत्त्वम्'' (प०भा० ७) इति ज्ञापनार्थमेव।

भाष्यकारास्तु नायं दैप् किन्तु दिवादिषु ''दाप् शोधने'' इत्येव पठिष्यत इत्याहुः। न च स्वरे भेदः 'दायति' इत्यादेरुभयथाप्याद्युदात्तत्वात्। ननु ताच्छीलिके चानशि 'दायमानः' इत्यत्र स्वरेभेदः। श्यनि धातोराद्युदात्तत्वं शपि तु चानशोऽन्तोदात्तत्वमिति चेत् ? न, उभयथाऽप्यन्तोदात्तत्वानपायात्। न च श्यन्स्वरस्य सतिशिष्टत्वेन प्राबल्य-मिति वाच्यम् ''अन्यत्र विकरपेभ्यः'' (प०भा०ए०) इति पर्युदासात्, ''आत्ममाने खश्च'' (पा०सू० ३-२-४३) इत्यत्रत्यभाष्यकैयटबलेन खशीव चानश्यप्यन्तोदात्ततया निर्पयात्। स्थानिवत्सूत्रीयः कैयटग्रन्थस्तु खश्सूत्रस्थभाष्यस्वोक्तिभ्यां विरोधात्प्रामादिक इति वक्ष्यते। ध्यायत्यादयस्तु दिवादिष्वेवादन्तत्वेनन पठिताः ''गपकार्यमनित्यम्'' (प०भा० ९६) इति ज्ञापयितुम्। तेन ''न विश्वसेदविश्वस्तं'' ''पथिकवनिताः प्रत्ययादाश्वसन्त्यः'' (मे०दू०) इत्यादि सिद्धम्। यत्तु भाष्ये एकान्तत्वपक्षेऽपि न दोष इत्युपक्रम्य पकारलोपे कृते भविष्यति, दाप्त्वं तु भूतपूर्वमनुबन्धमाश्रित्य व्युत्पादनीयमिति सिद्धान्तितम्। तत्रेत्थं प्रत्यवतिष्ठन्ते - सत्यप्येजन्तत्वे उपदेशे एजन्तत्वं कथमिति ? अत्रोच्यते — पित्करणसामर्थ्यादुपदेशे एजन्तत्वाभावेऽप्यात्वप्रवृत्तिः।

इत्यन्यत्र स्फुटम्। **आहुरिति।** नारायणादय इत्यर्थः। अत्रारुचिबीजं तु एवं सति व्यतीहारे इति व्यर्थम्। मेङो व्यतिहारादन्यत्राप्रवृत्तेरिति। तस्मात् व्यतीहारग्रहणेन तेन नित्ययोगकस्य मेङ एव ग्रहणमिति कैयटोक्तमेव रमणीयमित्याहुः। अत एव ज्ञापकाद्व्यतीहारादन्यत्राप्यस्य वृत्तिरिति तु तत्वमित्यपरे। एवञ्च तदनिर्देशे निश्चये च, एवेन व्यतीहारपदव्यवच्छेदः। अत एवाह। **गुर्विति।** गुरुन्यासकरणमित्यर्थः। **पर्युदासादिति।** तथा च सति शिष्टादपि विकरणस्वरात्सार्वधातुकस्वरस्य बलीयस्त्वमिति भाष्ये उक्तम्। तदेवाह। **आत्मेति।** विरोधं परिहरति। **स्थानीति।** तुल्ययुक्त्या प्राप्तं निराकरोति नारायणाद्यनुरोधेन। **ध्यायत्त्यादयस्त्विति।** वस्तुतस्तु तस्याः परिभाषाया भाष्यासम्मतत्वात्तेषामसाधुत्वमेव। तेषां तत्रापाठस्तु अशोकवनिकान्यायेन वैचित्र्यार्थमेव वा। यद्वा तथाभाष्योक्त्या तेषामपि तत्रैव पाठोऽभिमत इति बोध्यम्। **भवीति।** निषेध इति भावः। नारायणोक्तिमाह। **इत्थमिति। सत्यपीति।** पलोपोत्तरमिति भावः। **पित्करपेति।** निषेधार्थं हि तत्, स च प्राप्तिपूर्वकः, प्राप्तिस्त्वात्वप्राप्त्येति भावः। ननु दैपः पित्वमात्वाभावार्थमेवास्तु, मास्तु च

वस्तुतस्तूपदेशग्रहणं भाष्यकारो न मन्यते। तथाच तत्र वक्ष्यति-उपदेशग्रहणं न करिष्यते। यद्युपदेशग्रहणं न क्रियते 'चेता' 'स्तोता' इत्यत्रापि प्राप्नोति। अत्राप्याचार्यप्रवृत्तिर्ज्ञापयति न परनिमित्तस्यैच आत्वं भवतीति। यदयं क्रीङ्जीनां पावेच आत्वं शास्ति। नैतदस्ति ज्ञापकं नियमार्थमेतत्स्यात् क्रीङ्जीनां पावेवेति। यत्तर्हि ''मीनातिमिनोतिदीङां ल्यपि च'' (पा०सू० ६-१-५०) इत्यत्रैज्ग्रहणमनुवर्त्तयतीति। ननु 'प्रपिदापयति' इत्यत्राप्यदाबिति प्रतिषेधः स्यादिति चेत् ? न, यथोद्देशपक्षेऽन्त-रङ्गत्वाद्दावस्थायामेव घुसंज्ञाया निवृतत्वात्। कार्यकालपक्षे तु घुसंज्ञाया पत्वसमान-देशतया पुकं प्रति पत्वघुसंज्ञयोरसिद्धत्वेन प्रागेव पुक् ततो घुसंज्ञा न स्यादिति दोषः प्रसज्जत्येव। अत एव भाष्ये द्वेधा समाहितम् - दाधाघ्वपिदिति वक्ष्यामि। यद्वा, बान्तावेतौ धातू सूत्रमपि बान्तम्। चर्त्वेन सर्वत्र पकारो निर्दिष्टः। अतो 'दापयति' इत्यत्र नासौ निषेधः तस्यापि स्वादबान्तत्वाच्चेति।

तस्य निषेधोऽत आह। **वस्तुतस्त्विति।** ग्रहं ग्रहणम्। **वक्ष्यतीति।** वर्त्तयतीतीत्यन्तमिति बोध्यम्। **नियमार्थमिति।** वर्णग्रहणे लक्षणप्रतिपदोक्तपरिभाषायाः क्वचिदनित्यत्वेनाप्रवृत्ताविदमपि नियमसूत्रं ज्ञापकमिति बोध्यम्। **एजग्रहणमिति।** इदं च ज्ञापकं वार्तिककारमते, तेनैजन्तस्याप्यभ्युपगमात्। भाष्यमते तु अवदातेत्यादिसिद्ध्यर्थमेजनिमित्ते प्रत्यये विवक्षिते आत्वमिति मिथ्यतुरिति व्यावृत्त्या तस्य चारितार्थ्याद् ज्ञापकत्वं न सम्भवतीति वक्तव्यम्। कृप्तप्रकृत्यन्वयत्यागेन तदन्वयस्तु सत्युपदेशग्रहणे उपदेशे एजन्तत्वासम्भवात्सामर्थ्यात्। असति तु तस्मिन् तद्विशेषणत्वे पूर्वेणैव सिद्धत्वात्सामर्थ्यादित्यन्यदेतत्। केचित्तु उपदेशे य एच् तदन्तमिति व्याख्याने पकारलोपे कृते भविष्यतीत्यादिग्रन्थः, उपदेशे यदेजन्तमिति व्याख्याने अथवेत्यादिग्रन्थ इत्येवं भाष्यं व्याचख्युः। अत एवात्र भाष्यकारो न मन्यत इत्युक्तम्। अत एव तत्सूत्रान्ते प्रातिपदिकानामेत्वं स्यादित्याशङ्क्य धातोरित्यधिकारान्नेति समाधाय तदननुवृत्तिध्वननायाव्युत्पत्ति-पक्षमभिप्रेत्य प्रातिपदिकानां नोपदेशः किन्तूदेश इति पक्षान्तरत्वेनोपदेशग्रहणसत्तामादाय सिद्धान्तितसूत्रारम्भमादायैव तदन्तभाष्यस्य तत्र बहुधा प्रोढ्या प्रवृत्तत्वेनार्थाव्यवस्थापकत्वाच्चेति दिक्। **स्यादिति।** लक्षणेति परिभाषया तु न वारयितुं शक्यः। गामादेत्युक्तेः। दाबित्यपि पकारोपलक्षितदाग्रहणमेवेति भावः। **निर्दिष्ट इति।** तथा च न सूत्रभेद इति भावः। वस्तुतः कार्यकालपक्षे पूर्वं पुक्प्रवृत्तावपि दापो दाशब्देन ग्रहणात् घुत्वं सुलभमेवेत्यन्तरङ्गत्वादिति चिन्त्यमिति बोध्यम्॥

आद्यन्तवदेकस्मिन् (अष्टा०सू० १-१-२१)। असहाये आदाविवान्त इव कार्यापि स्युः। औपगवः। यथा तव्यादीनां प्रत्ययाद्युदात्तत्वं प्रवर्त्तते, एवमिहापोपि। आभ्याम्। यथा 'वृक्षाभ्याम्' इत्यादौ ''सुपि च'' (पा०सू० ७-३-१०२) इति दीर्घत्वं भवति एवमिहापि। ''ईङ्गतौ'' दिवादिः-एवम्। ''अचो यत्'' (पा०सू० ३-३-५७) इति अजन्ताद्धातोर्विधीयमानो यत्प्रत्ययो यथा 'चेयं' 'जेयम्' इत्यादौ भवति तथेहापि। इणस्तु ''एतिस्तु'' (पा०सू० ३-१-१०९) इति क्यपि 'इत्यम्' इत्येव रूपं न तु 'एयम्' इति। एकस्मिन्निति किम् ? सभासन्नयने भवः साभासन्नयनः। अत्र ह्याकारस्यादित्त्वे सति तमेवाश्रित्य सभासन्नयनशब्दस्य वृद्धत्त्वं स्यात्। ततश्चापं बाधित्वा ''वृद्धाच्छः'' (पा०सू० ४-२-११४) इति छः प्रसज्येत। ननु ''वृद्धिर्यस्याचामादिः'' (पा०सू० १-१-७३) इति सूत्रे आदिग्रहणस्यापीदमेव व्यावर्त्त्यम्। तत्सामर्थ्यादेव सभासन्नयनशब्दे वृद्धसंज्ञा न भविष्यतीति चेत् ? न , यदि हि वृद्धसंज्ञासूत्रे आदिग्रहणसामर्थ्यादनाति-देशिकस्य मुख्यस्यैवादेर्ग्रहणं तर्हि जानातीति ज्ञा ब्राह्मणीत्यादिरसहायोऽपि वृद्धो न स्यात्। ततश्च ज्ञाया अयं 'ज्ञीयः' इत्यादि न सिद्ध्येत्। असति हि प्रकृतसूत्रस्थैकग्रहणे यत्रादिव्यपदेशो मुख्यो नास्ति असहाये मध्ये अन्ते च स सर्वोऽप्यविशेषादतिदेशस्य विषयः स्यात्। यदि त्वतिदेशसामर्थ्याज्ज्ञाशब्दे वृद्धत्वं तर्ह्यविशेषात्सभासन्नयनेऽपि स्यात्। वृद्धसंज्ञायामादिग्रहणं तर्हि व्यर्थमेवेति चेत् ? हन्तैवमतिदेशस्यादिग्रहणस्य च सामर्थ्यात्सर्वत्र विकल्पापत्तिः। इहैकग्रहणे कृते त्वन्त्यमध्ययोर्व्यावृत्त्या वृद्धसंज्ञायामादिग्रहणं सार्थकमिति दिक्।

यत्तु न्यासकृतोक्तम् – अतिदेशसूत्रे एकग्रहणाभावे वृद्धसंज्ञासूत्रस्थमादिग्रहण-मनाति-देशिकप्रतिपत्त्यर्थं सदसहायानां ज्ञादीनामेव वृद्धसज्ञां वारयेन्न तु सभासन्नयनस्य,

---

५.१८ आद्यन्तवत्सूत्रे एकग्रहणविचारः

आद्यन्तवदेकस्मिन्। एकशब्दश्चात्रासहायवाची, न तु संख्यावाची आनर्थक्यापत्तेरिति स्पष्टं कैयटादौ। तदाह। **असहेति। सभेति।** दरिद्रातेरिवर्णान्तलक्षणस्याचोऽभावोप्येक तत्फलमिति कैयटादौ स्पष्टम्। तदाह। तत्र च स्वरेऽपि विशेषो बोध्यः। **न सिद्ध्येदिति।** तथा च तथा दुर्वच एव। **असति हीति।** हिस्त्वर्थे। स्थलत्रयमाह। **असहेति।** तथा च प्रागुक्त दोष एव। **यदि त्विति।** तत्सामर्थ्यात् तत्र मुख्यादिग्रहणेऽपीति भावः। **सर्वत्र** स्थलत्रये।

सन्नयनेत्येतदन्तर्गतांश्चतुरोऽचोऽपेक्ष्यानातिदेशिकस्यादित्वस्य तत्र सत्त्वादिति। तच्चिन्त्यम्, परस्मिन्सति यस्मात्पूर्वो नास्ति स आदिरिति सिद्धान्तरीत्या मध्यस्थेऽप्यादित्वविरहात्। इयानेव हि विशेषः असहाये सत्यन्तविशेषणविरहाद्विशिष्टाभावः, मध्यस्थे तु विशेष्याभावाद्विशिष्टाभाव इति।

वार्तिककारस्तु लाघवादपूर्वत्वमात्रमादिशब्दस्य प्रवृत्तिनिमित्तमनुत्तरत्वमात्रं चान्तशब्दस्य न तु सत्यन्यस्मिन्नित्यपि विशेषणं, गौरवात्। तथा चासहायेऽपि मुख्ययोरेवाद्यन्तयोः सम्भव इति मन्वानः सूत्रमेतत्प्रत्याचख्यौ। आह च - ''अपूर्वानुत्तरलक्षणत्वादाद्यन्तयोः सिद्धमेकस्मिन्'' इति।

भाष्यकारस्तु नैतन्मेने, सत्यन्यस्मिन्निति विशेषणप्रक्षेपप्रयुक्तस्य गौरवस्य प्रामाणिकत्वात्। लोके ह्ययमादिरन्तो वेत्युक्तेऽवशिष्टमपि किञ्चिदस्तीति नियमेन प्रतीयन्ति। पदान्नियतोपस्थितिश्च शक्तिसाध्या। अनुभवमपलप्यैकदेशमात्रे शक्तिकल्पने तु श्वशुरादिपदानामपि लाघवाद्भार्यात्वमात्रं पितृत्वमात्रं तद्घटकपुंस्त्वमात्रं वा शक्यतावच्छेदकं स्यादिति विशिष्टविषयकशक्त्युच्छेदेन सकलशिष्टव्यवहारव्याकोपः स्यादिति। नन्वेवमपि व्यपदेशिवद्वचनं कर्त्तव्यमेव, 'इयाय' 'आर' इत्यादौ धात्ववयवत्वं प्राथम्यमेकाच्त्वं चाश्रित्य द्वित्वं यथा स्यात्। एकाच इति हि बहुव्रीहिरिति वक्ष्यते। न चेपो वृद्ध्यायादेशयोरर्त्तेश्च वृद्धौ रपरत्वे च कृते आय् आर् इत्यनयोरेकाच्त्वं पचादेरिव मुख्यमेवास्तीति वाच्यम्, ''द्विर्वचनेऽचि'' (पा०सू० १-१-५९) इति रूपातिदेशेन इ ऋ अनयोरेव द्विरुक्तेः। किञ्च यजेः पञ्चमलकारे 'स देवान् यक्षदिषितो यजीयानि' इत्यादौ ''सिब्बहुलं लेटि'' (पा०सू० ३-१-३४) इति सिप्। तस्य षत्त्वं व्यपदेशिवद्भावेनैव साध्यं, प्रत्ययस्य यः सकारस्तस्य षत्वमिति सिद्धान्तात्। तस्माद् ''व्यपदेशिव-

---

आदित्वविरहादिति। किञ्च त्वदुक्तरीत्या तत्रादित्वग्रहणेऽतिदेशसूत्रे एकग्रहणे कृतेऽपि कथं सभासन्नयनस्य वारणं, कथं वादिग्रहणं चरितार्थमित्यपि दूषणं बोध्यम्। **आह चेति।** सहैवेति भावः। तत्वमेवाह। **लोके हीति। प्रतियन्ति** जानन्ति। जना इति शेषः। एवं तत्वमुक्त्वा विपक्षे बाधकमाह। **अनुभवेति। एवमपि** गौरवाभ्युपगमेन सूत्रारम्भेऽपि। कर्मधारये तत्सत्वादाह। **एकाच इति।** तादौ दोषापत्तेश्चेत्यपि बोध्यम्। **द्विरुक्तेरिति।** द्वित्वमित्यर्थः। पूर्वपक्षमुपसंहरति।

देकस्मिन्'' (प०भा० ३२) इत्येव सूत्र्यतां किं प्रकृतसूत्रेण ? व्यपदेशो नाम विशिष्टो मुख्योऽपदेशो व्यवहार एकाच इत्यादिः सोऽस्यास्तीति व्यपदेशी, पचिप्रभृतिस्तस्मिन्निवासहायेऽपि कार्य्यं स्यादित्यर्थः। अत्राह भाष्यकारः ''अवचनाल्लोकविज्ञानात्सिद्धम्'' इति। वचननिरपेक्षाल्लोकव्यवहारादेव व्यपदेशिवद्भावसिद्धेराद्यन्तवदिति व्यपदेशिवदिति चोभयमपि न सूत्रयितव्यमित्यर्थः। अस्ति हि लोके निरूढोऽयं व्यवहारोऽयमेव मे ज्येष्ठः पुत्रोऽयमेव मध्यमोऽयमेव कनिष्ठ इति। तथा असूतायामसोष्यमाणायां च प्रथमगर्भेण हतेति व्यवहरन्ति। तथा पूर्वमनागतोऽग्रेऽनग्रजिगमिषुश्चाहं इदं मे प्रथममागमनमिति। ननु सर्वे इमे गौणा व्यवहारास्तत्कथं मुख्ये चरितार्थं शास्त्रं गौणे प्रवर्त्तेतेति चेत् ? न, निरूढतरतया गौणस्याप्यस्य मुख्यसमकक्षत्वात्, ज्ञापकाच्च। यदयम् ''इट ईटि'' (पा०सू० ८-२-२८ इति) सिचो लोपं शास्ति तज्ज्ञापयति व्यवपदेशिवदेकस्मिन्निति। न ह्यन्यथेट् लभ्यते। वलूरूपत्वेऽपि वलादित्वविरहात्। तथा ''दीर्घ इणः किति'' (पा०सू० ७-४-६७) इत्यादीन्यपि ज्ञापकानि। न हि व्यपदेशिवद्भावं विना इणोऽभ्यासो लभ्यते इति दिक्।

तस्मादिति। तदर्थमाह। **व्यपदेश इति।** विशिष्ट इत्यस्यैव व्याख्या **मुख्य इति।** उपमेये सप्तमीदर्शनात्सप्तम्यन्ताद्वतिरित्याह। **तस्मिन्निवेति।** एवं सूत्रे बोध्यम्। बहुव्रीहेराह। **वचनेति। गमनमितीति।** एवञ्च प्रकृतेऽपि बुद्धिकल्पिततत्सदृशद्वितीयाश्रयः प्रथमव्यपदेशः, धात्ववयवत्वं तु अनन्तप्रयोगविषयस्य पचेरिदं अप्रयुज्यमानं रूपमवयव इत्यभिप्रायेण। एवमनेकप्रयोगविषयस्येण एकोऽयमिकार इत्येवमन्यपदार्थकल्पना बोध्या। यद्वा परिकल्पितार्थविशिष्टस्येणो निरर्थकोऽयमिका एचोऽवयव इत्यादि बोध्यं मुख्यव्यपदेशिनि। **गौणे** तत्सदृशे। **निरूढतरेति।** सास्रंसतेत्यादिव्यवहारवदिति भावः। **यदयमिति।** यमरमनमातामित्यत्र वलादेरित्यस्य सम्बन्धे फलाभावेनावलादेरपीटो विधानात्कथमेतज्ज्ञापकमिति चिन्त्यमिदमिति कश्चित्। तन्न। आर्धधातुकस्येति सूत्रे वलादेरिति योगं विभज्य यावा [१]..... म स वलादेरित्यस्य व्याख्याने तस्य सिच्सूत्रे भाष्ये ध्वनितत्वेन च तस्यापि वलादित्वनिमित्तत्वात्। रुदादिभ्य इति सूत्रे वलादेरित्यस्य सम्बन्धसत्वेन मध्येऽपि सम्बन्धस्यैव न्याय्यत्वात्। अत एव सप्तमे भाष्ये 'एकाचस्तौ वलीति चे'त्युक्तम्। अस्य विशेषापेक्षत्वेऽप्याह। **तथेति।**

---

१. अत्र ग्रन्थः त्रुटितः।

यत्तूक्तं कैयटेन-अर्थवता व्यपदेशिवद्भावात्कुरुत इत्यादौ तशब्दाकारस्यानर्थकत्वेन तत्र टिसंज्ञासिद्धये आदिवद्भावो वचनेनैव साधनीय इति। अत्रेदं वक्तव्यम्, अर्थवता व्यपदेशिवद्भाव इति तावन्नेयं परिभाषा तस्या विध्यङ्गत्वात्। व्यपदेशिवद्भावस्तु लौकिक इत्युक्ततया तं प्रत्यङ्गत्वायोगात्। किन्तु शास्त्रे व्यपदेशिवद्भावयोजनाय शब्दार्थसमुदाय-माश्रित्य तस्यैकदेशः शब्द इति व्युत्पादयितुमर्थवत्ताऽपेक्षितेति परं तस्याशयः। अत एव षष्ठे ''निजौ चत्वार एकाचः'' इत्येतेषु व्युत्पादनावसरे भाष्यकैयटयोरनर्थकेनापि व्यपदेशिवद्भावः स्वीकृतो लोक इव शास्त्रेऽप्यनर्थकस्य व्यपदेशिवद्भावसम्भवात्। तस्मादर्थवतेति प्रायोवादमात्रं, सूत्रप्रत्याख्यानं तु सम्यगेवेति दिक्॥

तरप्तमपौ घः (पा०सू० १-१-२२) एतौ घसंज्ञौ स्तः। कुमारितरा। कुमारितमा। ''घरूप'' (पा०सू० ६-३-४७) इति ह्रस्वः। नद्यास्तरो नदीतर इत्यत्र तु न भवति, तमपा साहचर्येण प्रत्ययस्यैव तरपो ग्रहणात्। यद्वा, तरबिति रूपं संज्ञाप्रवृत्तावाश्रितं तच्च

अर्थवतेति। उरण् रपर इति सूत्रे भाष्येऽप्येवमेव। **तस्याः** परिभाषायाः। परं केवलम्। **तस्य** तथावदतो भाष्यकैयटादेः। **अत एव** तथानियमाभावादेव। **नर्थकस्येति।** नानासमुदायान्तर्गतनिरर्थकेकारसमुदायस्यायमेव इकारस्तादृशोऽवयवश्चेत्येवमिति भावः। किञ्च 'यद्यपि व्यपदेशिवद्भावेन सिद्ध्यति तथापि गौणत्वान्नेति यस्य भ्रान्तिस्तं प्रति सूत्रारम्भ' इति पूर्वग्रन्थविरोधः, कुरुत इत्याद्यर्थं सूत्रस्याभ्रान्तं प्रत्यावश्यकत्वादित्यपि दूषणं बोध्यम्। सूत्रकारेण तदज्ञानात्तदुदाहरणासम्भवात्। वस्तुतोऽर्थवतेति चासहायत्वस्यैवोपलक्षणम्, ससहायस्य प्रायेणानर्थकत्वात्। तशब्दाकारश्चासहाय एव, येन सहायेनाचामन्तत्वस्य बहुव्रीह्यर्थस्य चोपपत्तिस्तादृशसहायाभावात्। अन्यथाऽऽद्यन्तवद्भावोऽपि न स्यात्। विजातीयकन्या-दिसहायसत्वेऽप्येकपुत्रस्यायमेव ज्येष्ठ इत्यादिव्यवहाराद् ईदृशस्थलेऽपि लोकसिद्धत्वम्। उक्तरीतिस्तु अनर्थके न युक्तोक्ता, एकाचोऽवयविनो द्वित्वमिति यस्याद्यमवयवस्तस्य बहुरूपस्य द्वित्वापत्तेरिति बोध्यम्। तदाह। **दिगिति॥**

५.१९ घसंज्ञासूत्रविचारः

तरप्तमपौ घः॥ नद्यास्तर इति। तॄधातो ऋदोरबित्यपि गुणे रपरत्वे च तर इति रूपम्। साहचर्येणोपाधिमाह। **यद्वेति।** प्रत्ययाप्रत्ययोरित्यपि नोक्ता, तस्या लक्ष्यासंस्कारकत्वात्। एतेन

परिनिष्ठिते प्रयोगे क्वापि नास्तीत्यौपदेशिकं गृह्यते। तच्च तरप्प्रत्ययस्यैवास्ति। अपिच प्रतिपदोक्तत्वमपीह सुलभम्। तेनावयवशो व्युत्पादिते नदीतरे नातिप्रसङ्गः। किञ्च समानाधिकरपे स्त्रीलिङ्गे परे ह्रस्वत्वं विधीयते। अन्यथा 'महिषीव रूपं महिषीरूपम्' इत्यत्रापि स्यात्। ''सुप् सुपा'' इति समासः। रूपमाकृतिः, महिषीवेयमाकृतिरित्यर्थः। सामानाधिकरण्यस्त्रीत्वे च स्वार्थिकत्वादातिशायनिकस्य स्तो न तु नदीतरे, अतो नोक्तदोषः। नन्वातिशायनिकप्रकरण एव तादी घ इति, पितौ घ इति वा क्रियतां लाघवादिति चेत् ? न, प्रकरणोत्कर्षेपेह संज्ञाप्रकरणस्यान्योऽपि तरबस्तीति

---

[1]प्रत्ययाप्रत्ययोरिति परिभाषया चेत्यपि बोध्यमित्यपास्तम्। भाष्याद्यनुक्तं समाधिमुक्त्वा तस्यासार्वत्रिकत्वात् तदुक्तं समाधिमाह। **यद्वेति।** नारायणोक्तं तमाह। **अपि चेति।** पुनर्भाष्योक्तमेवाह। **किञ्चेति। अन्यथेति।** अप्रत्यययोरपि घसंज्ञायां तत्साहचर्याद् रूपादेरप्रत्ययस्यापि ग्रहणं स्यादिति भावः। **सुप्सुपेति समास इति।** जरतीयाकृतिः जरदाकृतिरिति वत् पूर्वपदस्य तत्सदृशे लाक्षणिकत्वेन सामानाधिकरण्यात् प्राप्तः **स्त्रियाः पुंवदि**ति पुंवद्भावस्तु न, **जातेश्चे(पा०सू० ६-३-४१)**ति निषेधात्। **उपमानानीति** समासस्तु न, रूपशब्दस्योपमेयवाचकत्वेऽपि साधारणधर्मावाचकत्वात्। साधारणधर्मो ह्यत्र विसंष्टुलत्वादिः आकृतिश्चावयवसंस्थानम्, उपमानसमासे पुंवत्कर्मधारयेत्यस्य दुर्वारत्वाच्च। उपमानसमासेऽपि कर्मधारयत्वाङ्गीकारात्। अत एव मृगचपलेत्यादौ पुंवद्भावः। दर्शनीया पतिरित्यादौ लक्षणासत्वेऽपि न पुंवद्भावः। वृत्तौ वृत्तेः प्राक् च सामानाधिकरण्ये एव तत्प्रवृत्तेः, अत्र च व्याख्यानमेव शरणमिति दिक्। ना**प्युपमित**मित्यनेन, रूपशब्दस्योपमेयवाचित्वेन पूर्वनिपातापत्तेः। तस्योपमानवाचित्वे तु कस्य रूपमिति विशेषणस्य तत्रापेक्षत्वाद्वृत्त्यभावापत्तेः। महिषीशब्दश्च महिष्याकृतिसदृशे लाक्षणिकः। विशेषणसमासोऽपि न, तक्रकौण्डिन्यन्यायेनोपमानव्यतिरिक्तस्यैव विशेषणस्य तत्र ग्रहणादिति कश्चित्। तन्न। तस्य विधेयविषयत्वात्। पूर्वनिपातवैपरीत्यापत्तेरिति तु तत्वम्। प्रागुक्तक्रमविवक्षया आह। **सामेति। स्वार्थिकत्वादिति।** तत्त्वं च प्रकृत्यभिहितार्थ-द्योतकत्वम्। तथा च प्रकृत्त्या सामानाधिकरण्यं स्पष्टमेव। तत्वं चैकविशेष्यकबोधजनकत्वमिति प्रकृत्या समानविषयत्वं फलतिम्। 'स्वार्थिकत्वात्प्रकृतित' इति वचनात्स्त्रीत्वं च। **नन्विति।** षष्ठीसमासात्तस्य पुंस्त्वाच्चेति भावः। **प्रकरेति।** तत्प्रकरणादुत्कर्षेणोद्धरणेनेत्यर्थः। **अन्यः**

---

१. 'प्रत्ययाप्रत्ययोरिति' इत्यारभ्य 'तस्यासार्वत्रिकत्वात्' इत्यन्तं कपाठे नास्ति।

ज्ञापनार्थत्वात्। स चानिर्दिष्टार्थत्वात्स्वार्थे भवति। तेन ''अल्पाच्तरम्'' ''लोपश्च बलवत्तरः'' इत्यादि सिद्धम्। केचित्तु सामान्यापेक्षं ज्ञापकमाश्रित्य ईयसुनोऽपि स्वार्थिकतामाहुः। तेनाहो महीयस्तव साहसिक्यमित्यादि प्रयोगाः समर्थिता भवन्ति।

बहुगणवतुडति सङ्ख्या (पा०सू० १-१-२३)। एते सङ्ख्यासंज्ञाः स्युः। बहुकृत्वः ''संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्'' (पा०सू० ५-४-१७)। बहुधा ''संख्याया विधार्थे धा'' (पा०सू० ५-३-४२)। बडुभिः क्रीतो बहुकः ''संख्याया अतिशदन्तायाः कन्'' (पा०सू० ५-१-२२) बहुशः ''बह्वल्पार्थाच्छस्कारकात्'' (पा०सू० ५-४-४२) इत्यनुवर्त्तमाने ''संख्यैकवचनाच्च वीप्सायाम्'' (पा०सू० ५-४-४३) इति शस्। गणकृत्वः, गणधा, गणकः, गणशः, तावत्कृत्वः, तावद्धा, तावत्कः, तावच्छः। ''यत्तदेतेभ्यः परिमाणे वतुप्'' (पा०सू० ५-१-३९)। ''आ सर्वनाम्नः'' (पा०सू० ६-३-९१) शेषं प्राग्वत्। कतिकृत्वः कतिकः, कतिधा कतिशः ''किमः संख्यापरिमाणे डति च'' (पा०सू० ५-२-४१) शेषं प्राग्वत्।

स्यादेतत्, वैपुल्येऽपि बहुशब्दो वर्त्तते, बहुर्हिमवानिति। सङ्घे च गणशब्दः, भिक्षुकाणां गण इति। ''समवायश्चयो गणः'' (अ०को० २-५-४०) इत्यमरः। तथाच सङ्घवैपुल्यवाचिनोरप्यनयोः संख्या संज्ञा स्यादिति चेत् ? न, संख्यायतेऽनयेत्यन्वर्थसंज्ञा-विज्ञानात्। तस्मात्संख्यावाचिनोरेव बहुगणशब्दयोरिह ग्रहणम्। तच्च नियमार्थम् – अनियतबहुत्ववाचिनां मध्येऽनयोरेव संख्या संज्ञा न तु भूर्यादीनामिति। तेन बहुविषययोर्द्वयेकयोर्नियतबहुत्ववाचिनां त्र्यादीनां च न व्यावृत्तिः। ननु नियमार्थत्वे सिद्धे सजातीयापेक्षत्वान्नियमस्य त्वदुक्तव्यवस्था सिद्ध्येत्। नियमार्थत्वमेव तु दुरुपपादम्, विध्यर्थताया एवौचित्यात्। तथाहि, अस्ति तावत् ''कृत्रिमाकृत्रिमयोः कृत्रिमे

अनातिशायनिकः। इत्यादीत्यादिना 'अरुच्या वान्यतर' इति **याज्ञवल्क्य**सङ्ग्रहः। आहुरित्यरुचिबीजं तु भाष्यानुक्तत्वरूपम्। आद्यमप्येवमेव बोध्यम्॥

५.२० संख्यासंज्ञासूत्रविचारः

बहुगणवतुडति संख्या। अत्र च तुसाहचर्यात् तद्धितो डतिर्न त्वौणादिकः पातेर्डतिः। इदं व्युत्पत्तिपक्षे, सिद्धान्तपक्षे तु शङ्कैव न। **औचित्यादिति।** विधिनियमेति न्यायादिति भावः।

कार्य्यसम्प्रत्ययः'' (प०भा०अव०९) इति परिभाषा। सा च न्यायमूला। संज्ञासूत्रेण संज्ञिविशेषे नियम्यमानो हि संज्ञाशब्दः कथं तदितरं बोधयेत्। एवं स्थिते बहुगणयोरिह ग्रहणाभावे संख्यप्रदेशेषु ग्रहणमेव न स्यात्, अकृत्रिमत्वात्। तस्मात्स्वसङ्ग्रहार्थमेव बहुगणग्रहणं न तु भूर्यादिनिवृत्त्यर्थमिति। अत्राहुः - संज्ञिविशेषे क्रियमाणः संज्ञानियमो यदि सामान्यापेक्षस्तदा युक्ताऽकृत्रिमस्य व्यावृत्तिः। विशेषपरत्वे तु सजातीयं कृत्रिमान्तरमेव नियमेन व्यावर्त्त्येत न त्वकृत्रिममपि। तदेतदुच्यते – ''उभयगतिरिह शास्त्रे भवति'' (प०भा०९) इति कृत्रिमाकृत्रिमयोरुभयोरपि ग्रहणमित्यर्थः। अस्ति च संख्याप्रदेशेषूभयग्रहणे लिङ्गं ''संख्याया अतिशदन्तायाः कन्'' (पा०सू० ५-१-२२) इति सूत्रे शदन्तपर्युदासः। स हि कृत्रिमा संख्या शदन्ताऽस्तीति दिक्। तेन 'पञ्चधा' 'पञ्चकृत्वः' इत्यादि सिद्धं भवति। यद्यपि संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति, तथापि वतुडत्योः केवलयोः संज्ञायाः प्रयोजनाभावात्सामर्थ्यात्तदन्तग्रहणम्। तद्धितविधौ हि ''ङ्याप्प्रातिपदिकात्'' (पा०सू० ४-१-१) इत्यधिकृतं, न च केवलस्य प्रत्ययस्य प्रातिपदिकत्वमस्तीति बोध्यम्। एतच्च सूत्रं भाष्ये प्रत्याख्यातम्। ''बहुपूगगणसङ्घस्य तिथुक्'' (पा०सू० ५-२-५२) ''वतोरिथुक्'' (पा०सू० ५-२-५३) ''षट्कति-कतिपयचतुरां थुक्'' (पा०सू० ५-२-२१) इति सूत्रैर्डटि परे आगमा विधीयमाना बहुप्रभृतीनां डटो निर्वाहकं संख्यात्वं ज्ञापयन्तीति किमनेन सूत्रेण ? ननु ''बहुपूगगणसङ्घः'' (पा०सू० ५-२-५२) इत्यादौ विशेषाश्रयणात्संघवैपुल्यवाचिनोरपि बहुगणशब्दयोः संख्याकार्ये स्यादिति चेत् ? न, अनियतसंख्यावाचिनोरप्येतयोः संख्याकार्यं भवतीत्येतावन्मात्रज्ञापनेन चरितार्थत्वे सति सर्वथा संख्यामप्रतिपादयतोरपि संख्याकार्यकल्पनस्य गौरवपरास्तत्वात्। भूर्यादीनां त्वनियतसंख्यावाचिनां ग्रहणं न भवति, नियतसंख्यावाचिनां पञ्चादीनामेव लोके संख्याशब्दत्वेन प्रसिद्धतरत्वात् ;

न्यायमेवाह। **संज्ञासूत्रेणेति। ग्रहणार्थमेवेति।** सङ्ग्रहपरमेवेति पाठान्तरम्। त्यन्तपर्युदासस्या-चारितार्थ्यादाह। **शदन्तेति।** वस्तुतस्तु मिथः साहचर्यात्संख्याव्याप-कार्थवाचिनोरेव बहुगुणयोर्ग्रहणम्, न तु सङ्घादिवचनयोरिति व्यर्थाऽन्वर्थसंज्ञा। किञ्च सर्वार्थबोधकत्वेऽपि लोके तत्रैव गृहीतशक्तिकतयाऽन्यत्र शक्त्यग्रहणे चादिकसङ्ग्रहार्थत्वादगृहीतशक्तिकत्वाच्च तेषां विधायकत्वेन न नियामकत्वम्। न्यायबीजं तु प्रकरणमिति भाष्ये एव स्फुटमिति बोध्यम्। **तद्धितेति। न च** न हि। **सङ्घेति।** उभयत्र पूर्वनिपातः शास्त्रीयः, अन्वयस्तु व्युत्क्रमेण बोध्यः।

प्रसिद्धाप्रसिद्धयोः प्रसिद्धग्रहणस्य न्याय्यत्वात्। नन्वेवमपि बहुगणयोरिव पूगसंघादीनामपि धाञसुकृत्वसुजादिसंख्याकार्यप्रसङ्गः। न च बहुगणयोः सामान्यापेक्षं ज्ञापकं पूगादीनां तु डद्विषयकमेवेति वाच्यम्, अनुपपत्तेः। समानत्वेन एकसूत्रोपात्तत्वेन च वैषम्ये बीजाभावादिति चेत् ? मैवम्, लक्ष्यानुरोधेन क्वचित्सामान्यापेक्षं क्वचिद्विशेषापेक्षं ज्ञापकमित्याश्रयणात्तदनुरोधेन वैरूप्यस्य सोढव्यत्वादिति दिक्। इमां कुसृष्टिमसहमानेनैव सूत्रकृता सूत्रमिदं प्रणीतमिति तु परमार्थः।

अत्र वार्तिकानि – अध्यर्द्धग्रहणं समासकन्विध्यर्थम्। अर्द्धेनाधिकमध्यर्धम्। एकदेशवाचकोऽयमर्द्धशब्दः। तस्याधिशब्देन समासे कृते यौगिकार्थः प्रतीयते न संख्येति वार्त्तिकारम्भः। अध्यर्द्धेन शूर्पेण क्रीतमद्ध्यर्द्धशूर्प्पं "दिक्संख्ये" (पा०सू० २-१-५०) इत्यनुवर्त्तमाने "तद्धितार्थ" (पा०सू० २-१-५१) इति समासः, ततः "शूर्पादञन्यतरस्याम्" (पा०सू० ५-१-२६) इत्यञष्ठञो वा "अध्यर्द्धपूर्व" (पा०सू० ५-१-२८) इति लुक्। अध्यर्द्धेन क्रीतमध्यर्द्धकम् "संख्याया अतिशदन्तायाः कन्" (पा०सू० ५-१-२२) इति कन्। इह समासविध्यर्थमिति सम्बन्धसामान्ये षष्ठी। समासे विधीयमाने समासनिमित्ते वाऽन्यस्मिन्कार्ये विधीयमाने इत्यर्थः। तेन द्विगुनिमित्तो लुगपि लभ्यते। तथाच "अध्यर्द्धपूर्व" (पा०सू० ५-१-२८) इति सूत्रेऽध्यर्द्धग्रहणं न कर्तव्यं भवति। तदुक्तं, लुकि चाग्रहणमिति। अध्यर्द्धपूर्वपदश्च पूरणप्रत्ययान्तः। संख्येत्यनुवर्त्तते। पूरणप्रत्ययान्त इत्यस्य पूरणप्रत्ययान्तोत्तरपद इत्यर्थः। समासकन्-विध्यर्थमित्येव। अर्द्धं पञ्चमं येषामिति बहुव्रीहिः। अर्द्धपञ्चमैरर्द्धाधिकैश्चतुर्भिः शूर्पैः क्रीतमर्द्धपञ्चमशूर्प्पं, पूर्ववदञष्ठञो वा लुक्। अर्द्धपञ्चमेन क्रीतमर्द्धपञ्चमकम्।

पूगादिभ्यो उडर्थं बहुगुणेति सूत्रे कृतेऽपि ज्ञापकावश्यकत्वमिति ततः प्रत्याख्यानमेव वरम्, वस्तुतस्तु वतोरिड्वेत्यनेन संख्यानकरणत्वाभाववतामप्यन्येषां प्रयोगेषु दृश्यमानसंख्याकार्याणां संख्याकार्यं ज्ञाप्यते। तेनाधिकादीनामपि सिद्धम्, पूगादिभ्यः शमादिप्रसङ्गोऽपि नेति बोध्यम्। तदाह। **दिगिति।** अग्रे तुना इयमेवारुचिः सूचिता। **इह** वार्तिके। **निमित्ते** तन्निमित्तके। समासपदेन द्विगुसमास एव। तस्यैव संख्यानिमित्तकत्वात्। तन्निमित्तकमपि द्विगुनिमित्तकमेवेत्याह। **तेन द्विग्विति। तदुक्तमिति।** वार्तिककृतेति भावः। पूर्वोत्तरवदर्थासम्भवादाह। **संख्येत्येति।** पूरणप्रत्ययान्तस्यार्द्धपूर्वपदकत्वासम्भवादाह। **उत्तरपदमिति। इत्येवेति।** पूर्ववार्तिकादनुवर्त्तत एवेत्यर्थः। तदर्थं स्पष्टार्थमाह। **अर्द्धाधिकैरिति।**

अधिकग्रहणं चालुकि समासोत्तरपदवृद्ध्यर्थम्। अधिकया षष्ट्या क्रीतोऽधिकषाष्टिकः, अधिकसाप्ततिकः, ''तद्धितार्थ'' (पा०सू० २-१-५१) इति समासः। ''प्राग्वतेष्टञ्'' (पा०सू० ५-१-१८)। अलुकीति वचनात् ढकि कर्त्तव्ये संख्यासंज्ञा नास्तीति द्विगुत्वमपि न, तेन ''अध्यर्द्धपूर्वद्विगोः'' (पा०सू० ५-१-२८) इति लुङ् न। ततः ''संख्यायाः संवत्सरसंख्यस्य च'' (पा०सू० ७-३-१५) इत्युत्तरपदवृद्धिः। नन्वलुकीति व्यर्थम्, उत्तरपदवृद्ध्यर्थमिति वचनादेव लुगभावस्याक्षेप्तुं शक्यत्वादिति चेत् ? अर्हत्यर्थात्परेष्वर्थेषु ये प्रत्ययास्तेषां लुगप्राप्त्या तत्रैवोत्तरपदवृद्धेः सावकाशत्वात्।

ष्णान्ता षट् (पा०सू० १-१-२४)। षान्ता नान्ता च संख्या षट्संज्ञा स्यात्। 'षट् तिष्ठन्ति' 'षट् पश्य' 'पञ्च' 'सप्त' इत्यादि। संख्येति किम् ? विप्रुषः, पामानः। ननु 'शतानि' 'सहस्राणि' इत्यत्र नुमि कृते तस्य पूर्वभक्ततया नान्ता संख्येति षट्संज्ञा स्यादिति चेत् ? अस्तु। न चैवं ''षड्भ्यो लुक्'' (पा०सू० ७-१-२२) इति लुक् स्यादिति वाच्यम्, सर्वनामस्थानसन्निपातेन कृतस्य नुमस्तदविघातकत्वात्। नन्वेवमपि 'अष्टानाम्' इति न सिद्ध्यति। तथाहि, 'अष्टन् आम्' इति स्थिते परत्वान्नित्यत्वाच्च ''अष्टन आ विभक्तौ'' (पा०सू० ७-२-८४) इत्यात्वे कृतेऽनान्तत्वात्। संज्ञायामसत्यां ''षट्चतुर्भ्यश्च'' (पा०सू० ७-१-५५) इति नुण्न प्राप्नोतीति चेत् ? न, यथोद्देशपक्षे आत्वात्प्रागेव षट्संज्ञा, अन्तरङ्गत्वात्। ततः कृतेप्यात्वे एकदेशविकृतस्यानन्यतया षट्संज्ञकत्वेन नुटः सिद्धत्वात्। कार्यकालपक्षे तर्ह्युक्तदोषस्तदवस्थ एव। किञ्च यथोद्देशेऽप्यल्विधित्वादतिदेशो दुर्लभः। अत एव 'वव्रश्च' इति ''अचः परस्मिन्'' (पा०सू० १-१-५७) इत्यस्य फलमिति कैयट इति चेत् ? न, ''अष्टनो दीर्घात्''

चालुकीति। लुगन्योक्तसंख्याकार्यसिद्ध्यर्थमधिकग्रहणं संख्यासंज्ञायां कर्तव्यमित्यर्थः। समासविध्यर्थमुत्तरवृद्ध्यर्थं वेति तदर्थः। **नन्विति।** ञ्णिदादिषु तद्विधानादिति भावः। **परेष्वर्थेषु** तमधीष्ट इत्यादिषु ।।

५.२१ षट्संज्ञासूत्रविचारः

ष्णान्ता षट्। विप्रुष इति। संख्येत्यनुवृत्त्यभावेऽनयोरपि षट्संज्ञायां लुक् स्यात्। तौ हि नित्यस्त्रीलिङ्गौ। अन्यथा दाप्रन्तेति स्त्रीलिङ्गनिर्देशादेव न स्यादिति भावः। कार्यकालपक्षेणाह। **परत्वादिति।** तर्हि तत्पक्षे सिद्धावपि। **अन्तोदात्तमिति।** अन्तोदात्तत्वमिति पाठान्तरम्। तत्र =

(पा०सू० ७-२-८४) इति दीर्घग्रहणेन कृतात्वस्यापि षट्संज्ञाज्ञापनात्। तथाहि, ''त्रेः संख्यायाः'' (पा०सू० ७-३-१५) इत्याद्युदात्तत्वं बाधित्वा घृतादिपाठादन्तोदात्तोऽष्टन्शब्दः साधितः। तस्माद्भिसि'अष्टभिः' 'अष्टाभिः' इति रूपद्वयम्। तत्रात्वाभावे मध्योदात्तमात्वपक्षे त्वन्तोदात्तमिति सिद्धान्तः। तत्र ''षट्त्रिचतुर्भ्यो हलादिः'' (पा०सू० ६-१-१७९) इति सूत्रेण 'षण्णां'' 'षड्भिः' इत्यादाविव विभक्तेरुदात्तत्वं प्राप्तं तद्बाधित्वा ''झल्युपोत्तमम्'' (पा०सू० ६-१-१८०) इति प्राप्तम्। षट्त्रिचतुर्भ्यो या झलादिर्विभक्तिस्तदन्ते पदे उपोत्तममुदात्तं भवतीति हि तस्यार्थः। तद्बाधनाय ''अष्टनो दीर्घात्'' (पा०सू० ६-१-१८२) इत्यारभ्यते। दीर्घान्तादष्टनः पराऽसर्वनामस्थानविभक्तिरुदात्ता भवतीति सूत्रार्थः। तत्र यद्यात्वपक्षे षट्संज्ञा न स्यात्तर्हि सावकाशोऽष्टनः स्वरः परत्वादात्वाभावपक्षे ''झल्युपोत्तमम्'' (पा०सू० ६-१-१८०) इति षट्स्वरेण बाधिष्यते इति किं दीर्घग्रहणेन ? कृतात्वस्यापि षट्संज्ञायां सत्यां तु षट्स्वरस्याष्टनः स्वरोऽपवादः सम्पद्यते। न चाष्टनः स्वरः भ्रसि सावकाश इति वाच्यम्, तत्र ''एकादेश उदात्तेनोदात्तः'' (पा०सू० ८-२-५) इति सूत्रेणैव गतार्थत्वात्। 'अष्टन्शब्दोऽन्तोदात्तः' इति समनन्तरमेवोक्तत्वात्। तेन दीर्घपक्ष इव तदभावपक्षेऽपि विभक्तेरुदात्तता स्यादिति

आत्वपक्षे। तत्र = तस्मिन् सति। **सावेति।** अष्टन इति सूत्रेणात्वपक्ष इति भावः। **कृतेति।** कृतेन तेनेत्यादिसंज्ञायां ज्ञापितायामिति शेषः। **अष्टन इति।** तन्निमित्तक इत्यर्थः। **भ्रसीति।** स्वरप्रवृत्तेः पूर्वमन्तरङ्गस्याप्येकादेशस्याप्रवृत्तेः, 'यद्धितु पर'(पा०सू० ८-१-५६)मित्यादिसूत्रस्थभाष्य[1]सम्मतत्वादिति भावः। **एवं तस्य** तज्ज्ञापकत्वे। एवञ्चाष्टभिरिति प्रयोग एव सङ्गत इति भावः।

---

१. 'यद्धितुपरं छन्दसि' इति सूत्रं नियमसूत्रम्। 'निपातेर्यद्यदि' 'हि च' 'तुपश्य' इति सूत्रैः सिद्धे अनिघाते आरम्भात्। एवञ्च 'जाये स्वो रोहावेहि' इत्यत्र गत्यर्थलोटा युक्तस्य 'रोहावे'त्यस्य 'लोट् च' इत्यनिघातः प्राप्तोऽनेन नियमेन व्यवर्त्त्यत इति स्वःशब्दाश्रयो निघातो भवति। तत्र भाष्ये ''अथेदानी'' रोहवेत्यनेन युक्ते 'एही'त्यस्य कस्मान्न भवति ?'' इति एहीत्यस्य लोट्च इति निषेधः आशङ्कितः। अनेन च भाष्येण 'स्वरप्रवृत्तेः पूर्वमन्तरङ्गस्याप्येकादेशस्याप्रवृत्ति'रिति सिद्धान्तः ज्ञायते। प्रतिपादितमिदं तत्रैव कैयटेआङः परस्येहीत्यस्य निघात इष्यते, न च प्राप्नोति, लोट् चेति निषेधात्। केवलोऽपि रुहिश्छन्दसि गत्यर्थो दृश्यत इत्याङ इणा योगो, न रुहिणा। 'छन्दसि परेऽपि' इति वचनाद्यदि रुहिणाऽऽङो योगः स्यात्तदा नानावाक्यत्वादाङो निघातो न स्यात्। ननु नित्यत्वादेकादेशे कृते व्यपवर्गाभावादुभयत आश्रयेऽन्तादिवद्भावनिषेधाच्च निघातो न प्राप्नोति। एवं तर्ह्यस्मादेव भाष्यकारवचनादनुमीयते - 'प्रङ्निर्घातः ततः एकादेश' इतीत्युक्तम्। तत्र उद्योते 'प्राङ्निघात इति। 'नेन्द्रस्य परस्ये'ति सामान्यापेक्षं ज्ञापकमिति भाव' इत्युक्तम्। म.भा.पृ.सं. ५९ षष्ठो भागः।

तद्व्यावृत्त्यर्थं क्रियमाणं दीर्घग्रहणं सार्थकमेव। तस्माद्दीर्घग्रहणेनात्वपक्षेऽपि षट्संज्ञा ज्ञाप्यते इति स्थितम्। न चैवं दीर्घग्रहणस्यात्वविकल्पज्ञापकत्वं न स्यादिति वाच्यम्, उभयज्ञापकत्वसम्भवात्। न ह्येकेनैकमेव ज्ञाप्यते इति नियमः, यावता विनाऽनुपपत्तिस्तावतो ज्ञाप्यत्वात्। तच्चैकमनेकं वेत्यन्यदेतत्। प्रकृते चोभयं विना दीर्घग्रहणवैयर्थ्यानुद्धारादिति दिक्।

यदि तु ष्णाः षकारनकाराकारा अन्ते यस्याः सा ष्णान्तेति प्रकृतसूत्रे एवाकारोऽपि प्रश्लिष्येत तदा ''द्वाभ्याम्'' इत्यत्र ''षट्त्रिचतुर्भ्यो हलादिः'' (पा०सू० ६-१-१७९) इति विभक्तेरुदात्तत्वं स्यात्। ''आ द्वाभ्यां हरिभ्यामिन्द्र याहि'' इत्यादावाद्युदात्तमेव द्वाभ्यामिति पदं पठ्यते तस्मादिहाकारप्रश्लेषो न वर्पनीयः, किन्तूक्तप्रकार एवादर्त्तव्य इति स्थितम्। तथा सप्तमे योगविभागं कृत्वा तद्बलेनापि द्वेधा भाष्ये समाहितम्। तथाहि, ''षड्भ्यो लुक्'' (पा०सू० ७-१-२२) इत्यत्र षड्भ्य इति विभज्यते। ''अष्टाभ्य औश्'' (पा०सू० ७-१-२१) इति सूत्रादष्टाभ्य इत्यनुवर्त्तते। तेन षड्भ्यो यदुक्तं कृताकारादष्टनोऽपि तत्स्यादिति सूत्रार्थः। न चैवं जश्शसोर्लुगप्यतिदिश्येतेति वाच्यम्, औश्त्वविधिवैयर्थ्यापत्तेः। अथवा ''अष्टन आ विभक्तौ'' (पा०सू० ७-२-८४) इत्यस्मादनन्तरं ''रायः'' (पा०सू० ७-२-८५) इति योगं विभज्य हलीत्युभयोर्योगयोः

वस्तुतस्तु दीर्घग्रहणेन षट्संज्ञायां यथोद्देशपक्षाश्रयणमेव ज्ञाप्यते। तद्द्वारैव च षट्संज्ञाज्ञापकत्वम्। तत्पक्षे आत्वस्य बहिरङ्गतयाऽसिद्धत्वेन नान्तत्वबुद्ध्या षट्त्वमस्ति। स्पष्टं **चेदमष्टनो दीर्घादित्यत्र** कैयटे। किञ्च यथोद्देशपक्षे षट्त्वं स्थानिवद्भावेनापि सुलभम्, नकारान्तसंख्यावाचकत्वसमानाधिकरणधर्मविशेषरूपस्य षट्त्वस्य समुदायधर्मत्वेन तन्निमित्तकनुडादेरल्विधित्वाभावादिति बोध्यम्। तदाह। **दिगिति ॥**

प्रश्लिष्यते इति। प्रश्लेष्यतेति पाठान्तरम्। **स्यादिति।** आदीनामभावेन झल्युपोत्तममित्यस्याप्राप्तेरिति भावः। आपत्तिस्तु नेत्याह। **द्वाभ्यामिति।** न च षान्तनान्तसाहचर्यादाकारान्तोऽपि बहुवचनान्त एव प्रगृह्यत इति नायं दोष इति वाच्यम्। साहचर्यस्य सर्वत्राव्यवस्थापकत्वमित्याशयात्। **औश्त्वेति।** अत एव विभक्तसूत्रे जश्शसोरनुवृत्तिर्न, तथा सति लुगेव निर्दिश्येतेति तद्वैयर्थ्यं स्पष्टमेव। विपरीतं तु न, व्याख्यानात्। एवञ्च कृतात्वस्य कार्यकालपक्षेऽसत्यपि षट्त्वेऽतिदेशान्नुट्सिद्धिरित्यर्थः। एवं तस्योभयशेषत्वे।

शेषो व्याख्येयः। तेन 'अष्टानाम्' इत्यत्र नुटः पश्चादेवात्वं न तु ततः प्राक्। न चैवं जश्शसोरात्वं न स्यादिति वाच्यम्, लाघवार्थमष्टभ्य इति निर्देष्टव्ये ''अष्टाभ्य औश्'' (पा०सू० ७-१-२१) इति कृतात्वनिर्देशेन जश्शसोर्विषये आत्वानुमानात्। यत्रात्वं तत्रैवौश्त्वं यथा स्यादित्येतदर्थं हि तत्र दीर्घोच्चारणं कृतमिति।

स्यादेतत्, हलीति यद्युभयोः शेषस्तर्हि प्रियाष्टन्शब्दे औजसमौट्शस्टाङेङसिङसो-साम्ङ्योस्सु वैकल्पिकतयेष्यमापमात्वं न सिद्ध्येत्। न च तत्रात्वं नेष्यत एवेति वाच्यम्, इतःप्राचीनपक्षापामतिव्याप्तिप्रसङ्गात्। तेषु ह्यात्वं प्राप्यते एव विभक्तिमात्रे तद्विधानात्। न च ''षड्भ्यो लुक् (पा०सू० ७-१-२२) ''षट्चतुर्भ्यश्च'' (पा०सू० ७-१-५५) इति सूत्राभ्यां विधीयमानौ लुग्नुटौ यथा गौपतायां न स्तस्तथात्वमपि न स्यादेवेति वाच्यम्, वैषम्यात्। लुग्नुटोर्विधौ हि 'षड्भ्यः' इति 'षट्चतुर्भ्यः' इति बहुवचननिर्देशात् षडर्थप्राधान्य एव तौ प्रवर्त्तेते। आत्वविधौ तु 'अष्टनः' इत्येकवचननिर्देशाद् गौपेऽपि 'प्रियाष्टाभ्याम्' इत्यात्वं प्रवर्त्तते एव ''पदाङ्गाधिकारे तस्य तदुत्तरपदस्य च'' (प०भा० २९) इति वक्ष्यमापत्वात्। न च जश्शसोरष्टाभ्य औशिति कृतात्वनिर्देशेनानुमीयमानमात्वं केवले प्राधान्ये च 'अष्टौ' 'परमाष्टौ' इत्यत्र यथा भवत्येवं गौपत्वेऽपि भविष्यतीति तदंशे नानुपपत्तिरिति वाच्यम्, औश्त्वं हि लुग्टाविव गौपत्वे न भवति 'अष्टाभ्यः' इति बहुवचननिर्देशात्। अन्यथा हि कृतात्वानु-करपेऽप्येकवचनेनैव निर्दिशेत्-अष्टा औशिति अष्ट इति वा। स्पष्टं चैतदिहैव सूत्रे भाष्यकैयटयोः। तथा चौश्त्वविधौ कृतात्वनिर्देशबलेनानुमीयमानमात्वमपि प्राधान्ये एव स्यान्न तु गौपतायामिति तदंशेऽप्यनुपपत्तिसाम्यात्। तस्माद् –

हलीत्युभयशेषश्चेन्न स्यादात्वं प्रियाष्टनः।
टाङेङसिङसोसाम्सु तथैवौजसमौट्छसि॥
प्रागुक्तेषु तु पक्षेषु भवेदात्वममीष्वपि।
फलभेदे महत्येवं कथं पक्षविकल्पनम्॥

लाघेति। एकमात्राकृतेत्यर्थः। **तद्विधानादिति।** तथा च फलभेदापत्तिरिति भावः। विधाविति जातावेकवचनम्। नन्वपकर्षपक्षेऽष्टनो विहितमात्वं कथं तदन्ते स्यादत आह। **पदाङ्गेति। औश्त्वेति।** औशित्यर्थः। त्वस्तु अनुकरणादनुकार्यरूपे भावे इति बोध्यम्। एवमात्वेत्यादावपि।

अत्रोच्यते, प्रियाष्टन्शब्दस्याजादावात्वमनिष्टमेव, हलीत्युभयोःशेषस्य भाष्ये एव सिद्धान्तितत्वात्। तथा सत्यौजसोः क्रमेप 'प्रियाष्टानौ' 'प्रियाष्टानः' इत्येव रूपं स्यान्न तु 'प्रियाष्टौ' 'प्रियाष्टा' इत्यपीत्याशङ्क्य ''यथालक्षणमप्रयुक्ते'' इत्यभिहितत्वाच्च। अत एव यथालक्षणमिति प्रतीकमुपादाय न भवत्येवात्रात्वमित्यर्थ इति कैयटोऽव्याख्यत्। एवं स्थिते प्राचीनाः पक्षा अपरितोषग्रस्ता एव व्यवस्थितविभाषया गौपतायामजादिष्वात्वं न भवतीत्याशयेन वा योज्याः, उदाहृतभाष्यकैयटप्रामाण्यात्। तस्मात्प्रियाष्टनः सर्वेषु वचनेषु राजन्शब्दसाधारपं रूपं, हलादौ तु हाहाशब्दसाधारपमपरं रूपम्। औश्नुटोस्तु प्राप्तिरेव नास्तीति प्रामाणिकः पन्थाः। अत एव ''सर्वादीनि सर्वनामानि'' (पा०सू० १-१-२७) इति सूत्रे हरदत्तेन गौपत्वे औश्च भवतीति स्पष्टमेवाभिहितम्। अत एव ''अष्टाभ्य औश्'' (पा०सू० ७-१-२१) इति सूत्रे ''तदन्तग्रहणमत्रेष्यते परमाष्टौ'' इत्युक्त्वा ''प्रियाष्टान इत्यत्रात्वस्याभावादौश्न भवति'' इति काशिका संगच्छते। अत एव च ''अष्टन आ विभक्तौ'' (पा०सू० ७-२-८४) इति सूत्रे तदन्तविधिश्चात्रेष्यते। प्रिया अष्टौ यस्य प्रियाष्टावित्यपि यथा स्यादिति काशिकाग्रन्थोऽपि सङ्गच्छते, हलादावात्वस्य निर्बाधत्वात्। हरदत्तस्तु ''अष्टाभ्य औश्'' (पा०सू० ७-१-२१) इति सूत्रे प्रियाष्टान इत्यत्रेति वृत्तिग्रन्थमुपादाय यथा पुनरगौपतायामात्वं न भवति तथा तद्विधावेव वक्ष्यत इति प्रतिज्ञाय ''अष्टन आ विभक्तौ (पा०सू० ७-४-८४) इति सूत्रे एकवचननिर्देशात्स्वरूपस्य ग्रहपं नार्थस्य, तेनोपसर्जनेऽप्यष्टनि भवति तत्रापि विकल्पितत्वात्। 'प्रियाष्टा, 'प्रियाष्टानौ, प्रियाष्टानः' इत्यपि भवति। तत्राप्यात्वपक्षे भसंज्ञाविषये आतो लोपमिच्छन्ति 'प्रियाष्टः पश्य' इत्याद्यात्वाभावपक्षेऽप्यल्लोपे ष्टुत्वं 'प्रियाष्ट' इति भवतीत्यन्तेन ग्रन्थेन पूर्वप्रतिज्ञातार्थविपरीतं भाष्यवृत्यादिविरुद्धं च कथमभिहितवानिति तस्याशयं स एव प्रष्टव्यः। अल्लोपे ष्टुत्वमित्यपि तदुक्तिश्चिन्त्यैव। पूर्वस्मादपि विधावल्लोपस्य स्थानिवद्भावेन ष्टुत्वायोगात्। न च ''पूर्वत्रासिद्धीये न

अत्र चात्वेत्यादिभाष्यप्रयोग एव मानम्। पूर्वपक्षमुपसंहरति। **न स्यादिति। तथा सति** तथोभयशेषत्वे सति। **अभीति।** भगवतेति भावः। फलभेदं निराचष्टे। **एवं स्थिते इति।** ननु तासां परिगणनादिदमयुक्तमत आह। **उदाहृतेति।** तस्मादित्यस्य प्रामेत्यत्रान्वयः। **आत्वस्येति।** अत्र विरीतमुचितम्। **यस्य प्रियाष्टाविति।** साविदं रूपम्। सूत्रे इत्यस्यापीत्यत्रान्वयः। विशेषमाह। **तत्रापीति।** एवमग्रेऽपि। **विपेति।** दीर्घादिति ज्ञापकादिति भावः। प्रसङ्गादाह। **अल्लोपे इत्यादि।**

स्थानिवत्'' (भा०इ०) इति निषेधः ''तस्य दोषः संयोगादिलोपलत्वपत्वेषु'' (भा०इ०) इति सापवादत्वात्। ननु ''रषाभ्यां नो णः'' (पा०सू० ८-४-१) इति प्रतिपदोक्तं पत्वं तत्र गृह्यते न तु ष्टुत्वंविधिलभ्यमपि विलम्बितप्रतीतिकत्वादिति चेत् ? न, ''अपदान्तस्य मूर्द्धन्यः'' (पा०सू० ८-३-५५) इति सूत्रं संपूर्णं ''रषाभ्याम्'' (पा०सू० ८-४-१) इति सूत्रेऽनुवर्त्य तत्रत्यस्य पग्रहणस्य ''पदान्तस्य'' (पा०सू० ८-४-३७) इति निषेधसूत्रस्य च भाष्ये प्रत्याख्यातत्वात् ; यथोत्तरं मुनीनां प्रामाण्यात्। न च मूर्द्धन्यशब्देन ष्टुशब्देन वा निर्वर्त्यमाने णकारे वैषम्यमस्ति। सूत्रकाररीत्या कथंचित्संभवन्नपि न्यायोऽत्र भाष्यानुरोधात्त्याज्य एव। तथाच ''श्पूर्वाः खयः'' (पा०सू० ७-४-६१) इति सूत्रे खर्पूर्वग्रहणं कर्त्तव्यमिति वार्त्तिकं प्रत्याचक्षाणो भगवानाह-अभ्यासजश्त्वचर्त्वं सिद्धमित्येव एत्वतुग्ग्रहणं न कर्त्तव्यमिति। तथा च हलादिः शेषे कर्त्तव्ये तुकश्श्रुत्वेन निष्पन्नस्य चकारस्यापि चर्त्वेन सिद्धतया 'उचिच्छिषति' इति रूपं सिद्धमिति तदाशयः कैयटेन वर्णितः। तदेवं 'प्रियाष्ट्नः' इत्याद्येव रूपमुचितम्। न 'चैवं पूष्णः' इत्यादावपि नकार एव पठ्येतेति वाच्यम्, तत्र ''अट् कुप्वाङ्'' (पा०सू० ८-४-२) इति सूत्रेण पत्वप्रवृत्तेरिति दिक्।

लभ्यमिति। लक्ष्यमिति पाठान्तरम्। ननु सूत्रमते तत्सम्भव एवात आह। **यथोत्तरमिति। न च** न हि। सूत्रमतेऽपि मूर्द्धन्यपदानुवृत्तेर्वस्तुतस्तत्र सत्वादाह। **कथञ्चिदिति।** अत एव षठावित्येव सिद्धे मूर्द्धन्यपदं सार्थकम्। तत्फलं तु लाक्षणिकत्वसम्पादनमेव। णग्रहणं तु विध्यन्तरबोधनद्वारा परस्यानित्यबोधनार्थम्। तेन दुर्भवानीत्यादि सिद्धमित्याहुः। न्यायलक्षणेतीति सूत्रेति प्राग्वत्। **अभ्यासेति। अभ्यासजश्चर्चमेत्वे तुको**रिति तत्र वार्तिकम्। तत्रैव तुकोरिति विषयनिर्देशो न कर्तव्य इति भाष्याशयः। **पूर्वत्रासिद्धीयमद्वित्वे** इत्यनभ्युपगम्येदं भाष्यं बोध्यम्। प्रासङ्गिकमुपसंहरति। **तदेवमिति।** वस्तुतस्तु यथालक्षणमित्यस्य प्रागुक्तः कैयटेन प्रथमपक्षत्वेनोक्तो न युक्तः। तथा हि सति इष्यत एवैतदित्येव ब्रूयात्। किञ्चाप्रयुक्त इति वाक्यशेषोऽसङ्गतः, प्रयुक्तेऽपि लक्षणानतिक्रमसत्वात्। प्रयुक्तानां हीदमन्वाख्यानमिति भाष्योक्तेश्च। तस्या तदुक्तो द्वितीय एवार्थो युक्तः। स चेत्थम्। लक्षणस्याभावोऽलक्षणम्, तस्य योग्यता - यथालक्षणमित्यव्ययीभावः। अप्रयुक्ते लक्षणाभावस्य योग्यता न तु लक्षणस्येति एवं तादृशप्रयोगोऽसाधुरिति तद्भावः। किञ्च भाष्यकारस्य लक्ष्यैकचक्षुष्कतया इयमेव व्याख्या ज्यायसी। एवञ्च प्रियाष्टादेरनभिधानमेव। एवञ्च **हरदत्ता**देः प्रियाष्टन्शब्दादिषु

डति च (पा०सू० १-१-२५)। डत्यन्ता संख्या षट्संज्ञा स्यात्। कति सन्ति, कत्यद्राक्षीः। षट्त्वाज्जश्शसोर्लुक्। संख्येति किम् ? पातेर्डतिः, पतयः। न चास्य संख्यासंज्ञाऽपि स्यादिति वाच्यम्, वतुसाहचर्येण तत्र तद्धितस्यैव ग्रहणात्। इदं सूत्रं प्रत्याख्यातं भाष्ये। बहुगणवतुसंख्या'' ''डति'' संख्येत्यनुवर्त्तते। ततः ''ष्णान्ता षट्'' संख्या डतीत्युभयमप्यनुवर्तते। पूर्वसूत्रेप्यन्वर्थसंज्ञाविज्ञानात् संख्याप्रश्नविषयस्यैव डतेर्ग्रहणं न त्वौपादिकस्येति।

क्तक्तवत् निष्ठा (पा०सू० १-१-२६)। एतौ निष्ठासंज्ञौ स्तः। कृतः। कृतवान्। ननु विहितयोः प्रत्ययोरनेन संज्ञा। संज्ञया च विधानम्। वक्ष्यति हि तृतीये-निष्ठेति। तथाचान्योन्याश्रय इति चेत् ? न, सूत्रशाटकवद्भाविसंज्ञाविज्ञानात्। तौ भूते काले भवतो

आत्वादिप्रवृत्तिविचारोऽन्यश्च तत्प्रयोगविचारः प्रागुक्तः सर्वोऽपि प्रामादिक एव। एतेन गौणे प्रियाष्टाभिरित्यादौ षट्स्वराष्टन्स्वरयोः प्रवृत्तिरस्त्येवेति न तदवकाश इति, कदष्टन्शब्दोऽव्ययपूर्वपदप्रकृतिस्वरेणाद्युदात्त इति 'कदष्टौ' इत्यस्यैकदेशस्वरेणासिद्धेस्तत्राष्टस्वरः सावकाश इति च परास्तम्। तस्याप्यनभिधानात्। बहुवचननिर्देशादित्यप्यसङ्गतमित्यन्यत्र स्पष्टम्। षट्भ्य इत्येतत्साहचर्यात्तस्य प्राधान्ये एव प्रवृत्तिरिति तु तत्वम्। तस्य च यथा प्रकारान्तरेण गौणे न प्रवृत्तिस्तथाऽन्यत्र स्पष्टम्। एवं स्यादेतत् हलीति यद्युभयोः शेष इत्यादि प्रागुक्तं सर्वं हरदत्तानुरोधेनैवेति बोध्यम्। तदाह **दिगिति ॥**

५.२२ डति चसूत्रार्थविचारः

डति च। ग्रहणादिति। एवञ्चात्र न दोषः। एकदेशानुवृत्तेरसम्भवादाह। **बह्वीति।** नन्वेवमसाहचर्यात्पूर्वत्र प्रागुक्तदोष एवात आह। **पूर्वसूत्रेऽपीति।** सङ्कुचायतेऽनयेति हि अन्वर्थः। न च तस्यार्थस्य डत्यन्ते सम्भवः। संख्याप्रश्नविषयत्वं तु तदर्थ इति इदं कैयटानुरोधेनोक्तं चिन्त्यमेव। तस्मात् संख्येति महासंज्ञासामर्थ्यात्तत्र संख्याप्रश्नविषयडतेरेव ग्रहणम्। किञ्च पातेः कतिनापि सिद्ध्या न तत्र डतिनियमः। किञ्चोणादीनामव्युत्पन्नत्वमिति सिद्धान्तादोष इति तत्वम् ॥

५.२३ क्तक्तवतूनिष्ठासूत्रविचारः

क्तक्तवतू निष्ठा। न्यायं योजयति। **ताविति। सारूप्यमिति।** प्रयोगे इति शेषः। **न च**

ययोर्विहितयोर्निष्ठेत्येषा संज्ञा भविष्यतीति। स्यादेतत्, अनुबन्धाः कार्यार्थमुपादीयन्ते न तु श्रवणार्थं, तेषां लोपविधानात्। तथा च लुप्तनुबन्धस्य परिनिष्ठितस्य यत्र सारूप्यं तत्र कानुबन्धकार्यं भवतु क वा नेति निश्चेतुमशक्यम्। न च काकादिवदुपलक्षणस्यापि व्यावर्त्तकता भविष्यतीति वाच्यम्, काकादिनाऽपि हि वेदिकापुण्डरीकादिकं स्थिरं किञ्चित्परिचाय्यते तद्बलाच्चोड्डीनेऽपि काके व्यवहारो न सङ्कीर्य्यते। न चेह परिचेयान्तरमुपलभ्यते क्तप्रत्ययतन्प्रत्ययोः काकादिकल्पौ हि ककारनकारौ तदपगमे संवृत्ते- 'त' इत्यत्र परिचेयस्य परस्परव्यावृत्तस्य दुर्वचत्वादिति।

अत्राहुः - कालकारकविशेषादयो अर्था एवात्र वेदिकापुण्डरीकादिस्थानापन्नास्तदर्शनाच्चानुबन्धस्मृतौ सत्यां तत्तत्प्रयुक्तं कार्य्यं साधुतया ज्ञायते। तथा 'लूनः शालिः' इति केनचित्प्रयुक्ते लक्षपज्ञेन कर्मभूतकालबलात्क्तप्रत्ययोऽयमिति निर्पीयते। ''लोतमालभेत'' इति प्रयुक्ते तु मेषवाची लोतशब्दस्तनूप्रत्ययान्तः प्रयुक्त इति निर्पीयते ''हसिमृग्रिण्वामिदमिलूपूधूर्विभ्यस्तन्'' (उ०सू० ३-३७३) इत्युणादिसूत्रात्। ''लोतः स्यादश्वमेषयोः'' इति तु पञ्चपादीवृत्तौ स्थितम्। तथा 'प्राभित्त घटं देवदत्तः' इति प्रयोगे कर्त्रेकत्वाद्यवगमाल्लुङन्तस्यायं प्रयोगो न तु निष्ठान्तस्येति निर्पीयते।

स्यादेतत्, ''अञ्जिघृसिभ्यः क्तः'' (उ०सू० ३-३७६) इति क्तप्रत्यये 'अक्तं' 'घृतं' 'सितम्' इति व्युत्पादितम्। तत्रापि निष्ठा संज्ञा स्यात्। ततश्च ''निष्ठा च द्यजनात्''

काकादीति। यदा किञ्चिद्वैशिष्ट्ये वर्तमानतया प्रतिपाद्यन्ते तदा तद्विशेषणत्वेन व्यवह्रियन्ते, यदा त्ववर्तमानतया तदा तदुपलक्षणत्वेनेति भावः। **वेदिकेति।** एवञ्च साक्षादितरव्यावर्तकं विशेषणम्। स्वोपस्थाप्याद्वारा इतरव्यावर्तकमुपलक्षणमिति भावः। **कल्पो** सदृशः। **कालेति।** तथा च न तशब्दमात्रं लक्ष्यम्, किन्त्वर्थविशेषाद्यवच्छिन्नमिति भावः। **तदर्शनात्** कालादिज्ञानात्। अन्यदाह। **तथेति। तनिति।** वकारानुपलक्षिते इत्यर्थः। अर्थांशे विशेषमाह। **लोत इति।** अन्यदाह। **तथेति। प्राभित्तेति।** यद्यप्यत्र निघातप्रवृत्तेर्न निष्टात्वकृतो विशेषस्तथापि 'यन्मा प्रकीर्ष्ट' इत्यस्योपलक्षणमिदम्। तत्र हि **निपातै(पा०सू० ८-१-३०)**रिति निघाते निषिद्धे **निष्ठा चे(पा०सू० ६-१-२०५)ति** नित्यमाद्युदात्तत्वं स्यात्। असंज्ञायामपि तत्प्रवृत्तिरिति पूर्वपक्षाशयः। **आदिः सिच** (पा०सू० ६-१-१८७) इति विकल्पस्त्विष्यत इति तात्पर्यम्। **घृषीति।** यद्यप्यत्रोपलक्ष्यकालकारकाद्यभावस्तथापि गुणाभावदर्शनात् क्तोऽयमित्यवगतिरिति

(पा०सू० ६-१-२०५) इति स्वरः स्यात्। निष्ठान्तं द्व्यच्कं संज्ञायामाद्युदात्तं स्यात्स चेदादिराकारो नेति सूत्रार्थः। न चेष्टापत्तिः ''घृतं मिमिक्षे'' इत्यादावन्तोदात्तस्यैव पठ्यमानत्वादिति।

अत्राहुः– ''अतः कृकमि'' (पा०सू० ८-६-४६) इति सूत्रे कमिग्रहणेनैव सिद्धे कंसग्रहणेन ज्ञापितमुणादयः क्वचिद् व्युत्पत्तिकार्यं न लभन्ते इति। अतो नात्र निष्ठा संज्ञेति। यद्वा ''घृतादीनां च'' (फि०सू० १-२१) इति फिट्सूत्रेण सिद्धम्।

।। इति श्रीशब्दकौस्तुभे प्रथमाध्यायस्य प्रथमे पादे पञ्चमान्हिकम् ।।

भावः। **क्वचिदिति।** इदं प्राचामनुरोधेन। वस्तुतस्तु सर्वत्र तदभाव एवेति बोध्यम्। एवञ्च घृतादित्वकल्पनं व्यर्थमिति शिवम् ।।

।। इति श्रीमत्पायगुण्डोपाख्यवेपीगर्भजमहादेवसुतवैद्यनाथकृते कौस्तुभव्याख्याने प्रभाभिधे पञ्चमाह्निकम् ।।